00013449

THE
ASIATIC SOCIETY OF BOMBAY
Town Hall, Bombay.

Digitized with financial assistance from the
Government of Maharashtra
on 25 June, 2016

# ॥ किरातार्ज्जुनीयम् ॥

॥ श्रीभारविकृतम् ॥

साधारणविद्यान्वर्थकसमाजाधिपतीप्सितम्

श्रीमत्तारानाथतर्कवाचस्पतिभट्टाचार्य्यादिविबुधवरैर्विशोधितम्

श्रीमद्दत्तवंशावतंसश्रीबाबूरसमयदत्तमहाशयानामाज्ञया
कलिकाताराजधान्यां सारसुधानिधिमुद्रायन्त्रे
मुद्रितमभूत्

अङ्काङ्काद्रिशशाङ्कसम्मितशके काव्यं कृतिर्भारवे
र्यन्त्रे सारसुधानिधौ सुललितं घण्टापथालङ्कृतम् ।
तारानाथधरामरादिविबुधैः श्रीलैः श्रमाच्छोधितं
श्रीमद्दत्तकुलाग्रणीरसमयादेशादभून्मुद्रितम् ॥

१७६९

CIVIL AND ...
BOMBAY

00013449

॥ श्रीगणेशाय नमः ॥

अर्द्धाङ्गीकृतदाम्पत्यमपि गाढानुरागि यत् ।
पितृभ्याञ्जगतस्तस्मै कस्मैचिन्महसे नमः ॥ १ ॥
आलम्बे जगदालम्बं हेरम्बचरणाम्बुजम् ।
शुष्यन्ति यद्रजःस्पर्शात्सद्यः प्रत्यूहवार्द्धयः ॥ २ ॥
तद्दिव्यमव्ययन्धाम सारस्वतमुपास्महे ।
यत्प्रसादात्प्रलीयन्ते मोहान्धतमसच्छटाः ॥ ३ ॥
वाणीङ्काणभुजीमजीगणदवाशासीच्च वैयासकी
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥ ४ ॥
मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया ।
तत्किरातार्ज्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ॥ ५ ॥
नारिकेलफलसम्मितं वचोभारवेः सपदि तद्विभज्यते ।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिकायथेप्सितम् ॥ ६ ॥
नानानिबन्धविषमैकपदैर्नितान्तं
साशङ्कचङ्क्रमणखिन्नधियामशङ्कम् ।
कर्त्तुम्प्रवेशमिह भारविकाव्यबन्धे
घण्टापथं कमपि नूतनमातनिष्ये ॥ ७ ॥
इहान्वयमुखेनैव सर्व्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥ ८ ॥

॥ श्रीगणेशाय नमः ॥

॥ किरातार्ज्जुनीयम् ॥

॥ प्रथमः सर्गः ॥

CIVIL EXAMINATION COMMITTEE BOMBAY

श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

अथ तत्रभवान् भारविनामा कविः काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे । इत्याद्यालङ्कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनतां काव्यालापांश्च वर्ज्जयेदिति निषेधशास्त्रस्यासत्काव्यविषयताञ्च पश्यन् किरातार्ज्जुनीयाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वादाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याद्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन् कथामुपक्षिपति । श्रिय इति । आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिरत्रोपयुज्यते । तदुक्तं । देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्व्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वेति । कुरूणां निवासाः कुरवो जनपदाः । तस्य निवास इत्यण् प्रत्ययः । जनपदे लुक् । तेषामधिपस्य दुर्य्योधनस्य सम्बन्धिनीं । शेषे षष्ठी ।

श्रियोराज्यलक्ष्म्याः। कर्तृकर्म्मणोः कृतीति कर्म्मणि षष्ठी। पाल्यते अनयेति पालनी तां प्रतिष्ठापिकामित्यर्थः प्रजारागमूलत्वात्सम्पद इति भावः। करणाधिकरणयोश्चेति सूत्रेणात्र करणे ल्युट्। टिड्ढाणञित्यादिना ङीप्। प्रजासु जनेषु विषये। प्रजा स्यात् सन्ततौ जनइत्यमरः। वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं वनेचरं अयुङ्क्त नियुक्तवान्। वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी। तदुक्तम्। स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्। सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम्। एतदष्टविधमैथुनाभावः प्रशस्तिः। वर्णाद्ब्रह्मचारिणीति णिनि प्रत्ययः। तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी ब्रह्मचारिवेषवान् इत्यर्थः स नियुक्तः वने चरतीति वनेचरः किरातः। भेदाः किरातशबरपुलिन्दाः म्लेच्छजातयइत्यमरः चरेष्टइति टप्रत्ययः तत्पुरुषे कृतिबहुलमित्यलुक्। विदितं वेदनमस्यास्तीति विदितः परवृत्तान्तज्ञानवान् इत्यर्थः। अर्शआदिभ्योऽजित्यच् प्रत्ययः। अथवा कर्त्तरि कर्मधर्मोपचारात् विदितवृत्तान्तोविदितइत्युच्यते उभयत्रापि पीतागावोभुक्ताब्राह्मणाविभक्ताभ्रातरइत्यादिवत्साधुत्वं न तु कर्त्तरि क्तः सकर्म्मकेभ्यस्तस्य विधानाभावात्। अतएव भाष्यकारः। अकारोमत्वर्थीयः विभक्तमेषामस्तीति विभक्ताः पीतमेषामस्तीति पीताभुक्तमेषामस्तीति भुक्ता इति सर्व्वत्र। अथवा उत्तरपदलोपोऽत्र द्रष्टव्यः। विभक्तधनाविभक्ताः पीतोदकाः पीताः भुक्तान्ना भुक्ताइति अत्र लोपशब्दार्थमाह कैयटः। गम्यार्थस्य प्रयोगएव लोपोऽभिमतः। विभक्ताभ्रातरइत्यत्र च धनस्य यद्विभक्तत्वं तत्

कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनोनहि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ २ ॥

भावेषूपचर्य्यते पीतागावः इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यते भुक्ताब्राह्मणा इत्यत्र अन्नस्य भुक्तत्वं ब्राह्मणेषूपचर्य्यतइति । तद्द इत्रापि वृत्तिगतं विदितत्वं वेदितरि वनेचरे उपचर्य्यते । एतेन वनाय पीतप्रतिबद्धवत्सामिति पातुञ्च प्रयत्नं व्यवस्यति भलं युष्मास्वपीतेष्वेरमादयोव्याख्याताः । अथ वा विदितः विदितवान् सकर्म्मकादप्यविवक्षिते कर्म्मणि कर्त्तरि क्तः । आश्रितः कर्त्रत्यादौ यथा क्तः । धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात् । प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रियेति । प्रतीहारादिना ज्ञापि तइति वा । द्वैतवने द्वैताख्ये तपोवने यद्वा द्वे इते गते यस्मात्तत् द्वीतं द्वीतमेव द्वैतं तच्च तद्वनञ्च तस्मिन् शोकमोहादिरहिते इत्यर्थः युधि रणे स्थिरं युधिष्ठिरं धर्म्मराजम् । हलन्तात्सप्तम्याः संज्ञायामित्यलुक् । गविशुधिभ्यां स्थिरइति षत्वं । समाययौ सम्प्राप्तः । अत्र वने वने चरइति द्वयोः स्वरव्यञ्जनसमुदाययोरेक धैवावृत्त्या वृत्त्यनुप्रासोनामालङ्कारः । अस्मिन् सर्गे वंशस्थवृत्तम् तस्य लक्षणम् जतौ तु वंशस्थमुदीरितं जराविति ॥ १ ॥

सम्प्रति तत्कालोचितत्वं आदेशयन् तस्य तद्गुणसम्पन्नत्वमादर्श यन्नाह । कृतप्रणामस्येति । कृतप्रणामस्य तत्कालोचितत्वात् कृतनम स्कारस्य सपत्नेन रिपुणा दुर्य्योधनेन । रिपुवैरिसपत्नारिद्विष

द्विषां विघाताय विधातुमिच्छतो
रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्य्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे ॥ ३ ॥

द्वेषणदुःखेदइत्यमरः । जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय क्रियाग्रहणात् सम्प्रदानत्वं निवेदयिष्यतोज्ञापयिष्यतः । लृटः सद्वेति शतृप्रत्ययः । तस्य वनेचरस्य मनोन विव्यथे । कथमोदृक् अप्रियं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थः । व्यथभयचलनयोरिति धातोर्लिट् । उक्तमर्थमर्थान्तरोपन्यासेन समर्थयते । नहीति । हि यस्मात् हितमिच्छन्तीति हितैषिणः स्वामिहितार्थिनः पुरुषाः मृषा मिथ्याभूतं प्रियं वक्तुं नेच्छन्ति । अन्यथा कार्य्यविघातकतया स्वामिद्रोहिणः स्युरिति भावः । असौख्यमसान्द्यम् मृषाभाषित्वमभ्रूहकत्वञ्चेति चारगुणाइति नीतिवाक्यास्मृते ॥ २ ॥

तथापि प्रियार्हे राज्ञि कटुनिष्ठुरोक्तिर्न युक्तेत्याशङ्क्य स्वाम्यनुज्ञायां न दुष्यतीत्याशयेनाह द्विषामिति । रहस्येकान्ते स वनेचरो द्विषां शत्रूणां । कर्म्मणि षष्ठी । विघाताय द्विषो विहन्तुमित्यर्थः । तुमन्ताच्च भाववचनादिति चतुर्थी भाववचनाच्चेति तुमर्थे घञ् प्रत्ययः । अत्र तादर्थ्ये चतुर्थ्यामपि न दोषः तथापि प्रयोगवैचित्र्यविशेषस्याप्यलङ्कारत्वादेवं व्याचक्षते । विधातुं व्यापारङ्कर्तुमिच्छतः समानकर्त्तृकेषु तुमुन् । द्विषो विहन्तुमुद्युक्तस्यानस्येत्यर्थः अतएव भूभृतो युधिष्ठिरस्यानुज्ञामधिगम्य प्राप्य । सुष्ठुभावः सौष्ठवं शब्दसामर्थ्यं सुष्ठुशब्दादव्ययादुद्गात्रादित्वादञ् प्रत्ययः । उदारस्य भावः औदार्य्यं

क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥

अर्थसम्पत्तिः तयोर्द्वन्द्वः सौष्ठवौदार्य्ये । अत्रौदार्य्यशब्दस्याजाद्यदन्तत्वेऽपि लक्षणहेत्वोः क्रियाया इत्यत्राल्पस्वरस्यापि हेतुशब्दस्य पूर्व्वनिपातमकुर्व्वता सूत्रकृतैव पूर्व्वनिपातशास्त्रस्यानित्यत्वज्ञापनान्न पूर्व्वनिपातः । उक्तञ्च काशिकायाम् । अयमेव लक्षणहेत्वोरिति निर्द्देशः पूर्व्वनिपातव्यभिचारचिह्नमिति । ते एव विशेषः तयोर्वा विशेषः तेन शालते शोभते इति सौष्ठवौदार्य्यविशेषशालिनी तां ताच्छील्ये णिनिः । विनिश्चितार्थां विशेषतः प्रमाणतो निर्णीतार्थां इति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवान् उवाचेत्यर्थः ॥ ३ ॥

प्रथमं तावदप्रियनिवेदकमात्मानम्प्रति अक्षोभं याचते क्रियास्विति । हे नृप क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिर्भृत्यैश्चारादिभिरित्यर्थः चरन्तीति चराः पचाद्यच् तएव चाराः चरेः पचाद्यजन्तात्प्रज्ञादित्वादण् प्रत्ययः । तएव चक्षुर्येषां ते चारचक्षुषः । स्वपरमण्डलकार्य्याकार्य्यविलोकने चाराश्चक्षूंषि क्षितिपतीनामिति नीतिवाक्यामृते । तदुक्तं । गावोघ्राणेन पश्यन्ति वेदैः पश्यन्ति पण्डिताः । चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जना इति । प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीयाः न प्रतारणीयाः सत्यमेव वक्तव्यमित्यर्थः चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इति भावः । अतोऽप्रतार्य्यत्वाद्धेतोः असाधु

स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किम्प्रभुः ।
सदानुकूलेषु हि कुर्व्वते रतिं
नृपेष्वमात्येषु च सर्व्वसम्पदः ॥ ५ ॥

अप्रियं साधु प्रियं वा मदुक्तमिति शेषः वाशब्दोऽप्यर्थे वक्तुं सोढु मर्हसि कुतः हितं पथ्यं मनोहारि प्रियञ्च वचो दुर्लभं अतोमद्वचो ऽपि हितत्वादप्रियमपि वक्तव्यमित्यर्थः ॥ ४ ॥

तर्हि तूष्णीम्भाव एव वरमित्याशङ्क्याह । स इति । यः सखा अमात्यादिः अधिपं स्वामिनं साधु हितं न शास्ति नोपदिशति। ब्रुविशासीत्यादिना शासेर्दुहादिपाठाद्द्विकर्म्मकत्वम् । स हिता नुपदेष्टा कुत्सितः सखा किंसखा दुर्मन्त्रीत्यर्थः । किमः क्षेप इति समासान्तप्रतिषेधः । तथा यः प्रभुर्निग्रहानुग्रहसमर्थः स्वामी हितादाप्तजनाद्धितोपदेष्टुः सकाशात् । आख्यातोपयोगे अपा दानत्वात् पञ्चमी । न संशृणुते न शृणोति हितमिति शेषः । समोगम्यृच्छीत्यादिना सम्पूर्व्वाच्छृणोतेरकर्म्मकत्वादात्मनेपदम् अकर्म्मकत्वं वैवक्षिकम् । स हितमश्रोता प्रभुः किम्प्रभुः कुत्सित स्वामी पूर्व्ववत्समासः । सर्व्वथा सचिवेन वक्तव्यं श्रोतव्यञ्च स्वामिना एवञ्च राजमन्त्रिणोरैकमत्यं स्यादित्यर्थः । ऐकमत्य स्य फलमाह सदेति हि यस्मान्नृपेषु स्वामिषु अमा सह भवा अमात्यास्तेषु च । अव्ययात् त्यप् अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्व्वसम्पदः सदा रतिमनुरागं कुर्व्वते कुर्व्वन्ति न जातु जहती त्यर्थः । अतोमया वक्तव्यं त्वया च श्रोतव्यमिति भावः । अत्रैवं

निसर्गदुर्ब्बोधमबोधविक्लवाः
क्व भूपतीनाञ्चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ ६ ॥

राजमन्त्रिणोर्हितानुपदेशतदश्रवणनिन्दासामर्थ्यसिद्धेरैकमत्य लक्षणकारणस्य निर्द्दिष्टस्य सर्व्वसम्पत्सिद्धिरूपकार्य्येण समर्थनात् कार्य्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः । तदुक्तं सामान्य विशेषकार्य्यकारणभावाभ्यां निर्द्दिष्टकृतसमर्थनमर्थान्तरन्यास इति ॥ ५ ॥

सम्प्रति स्वाहङ्कारम्परिहरति । निसर्गेति । निसर्गदुर्ब्बोधं स्वभावदुर्ग्रहम् । ईषद्दुरित्यादिना खल् प्रत्ययः । भूपतीनाञ्चरितं अबोधविक्लवाः अज्ञानोपहता जन्तवो मादृशाः पामरजनाइत्यर्थः क्वापि नोभयं सङ्घटते इत्यर्थः । तथापि निगूढतत्त्वं संवृतयाथार्थ्यं विद्विषां नयवर्त्म षाड्गुण्यप्रयोगः सन्धिविग्रहयानानि संस्थाप्यासनमेवच । द्वैधीभावस्य विज्ञेयाः षड्गुणानीति वेदिनामित्यादिरूपः यत् मया अवेदि ज्ञातमिति यावत् । विदेः कर्म्मणि लुङ् । अयमिदं वेदनमित्यर्थः । विधेयप्राधान्यात्पुंलिङ्ग निर्देशः । तवानुभावः सामर्थ्यं अनुगतोभावोऽनुभावः राज्ञाः अकृष्टोभावइति घञन्तेन प्रादिसमासेनतृपसृष्टात् घञ्प्रत्ययः । श्रोणीभुवोऽनुपसर्गइत्यनुपसर्गाद्भवतेर्धातोर्घञ्विधानात् । अत एव काशिकायां कथं प्रभावोराज्ञाम्प्रकृष्टोभावइति प्रादिसमास इति । दोषपरिहारो सम्यक् ज्ञात्वैव विज्ञापयामि न तु वृथा कर्णकठोरम्प्रलपामीत्याशयः ॥ ६ ॥

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥

सम्प्रति यदवक्तव्यं तदाह । विशङ्कमान इति । सुखेन युध्यते स सुयोधनः । भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः । नृपासनस्थः सिंहासनस्थोऽपि वनमधिवसतीति वनाधिवासिनो वनस्थात् राज्यभ्रष्टादपीत्यर्थः । भवतस्त्वत्तः पराभवम्पराजयं विशङ्कमान उत्प्रेक्षमाणः सन् । दुष्टमुदरमस्येति दुरोदरं द्यूतम् । पृषोदरादित्वात्साधु । दुरोदरो द्यूतकारे पणे द्यूते दुरोदरमित्यमरः । तस्य छद्मना मिषेण जितां लब्धां दुर्नयार्जितां जगतीं महीं । जगती विष्टपे मह्यां वास्तुच्छन्दोविशेषयोरिति वैजयन्ती । नयेन नीत्या जेतुं वशीकर्त्तुं समीहते व्याप्रियते न तु दास्यतीत्यर्थः । बलवत्स्वामिकमविश्रुङ्खागमञ्च धनम्भुञ्जानस्य कुतो मनःसमाधिरिति भावः । अत्र दुरोदरच्छद्मजितामिति विशेषणद्वारेण पदार्थम्प्रति हेतुत्वेनोपन्यासात् द्वितीयकाव्यलिङ्गमलङ्कारः । तदुक्तम् । हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतमिति ॥ ७ ॥

नयेन जेतुं जगतीं समीहत इत्युक्तं तत्प्रकारमाह । तथापीति । तथापि साशङ्कोऽपि जिह्मो वक्रो वञ्चक इति यावत् । स दुर्योधनो भवज्जिगीषया गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः । हेताविति तृतीया । गुणसम्पदा दानदाक्षिण्यादिगुणगरिम्णा

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्य्यसङ्गमा
द्वरं विरोधोऽपि समं महात्मभिः ॥ ८ ॥

करणेन शुभ्रं यशः तनोति स खलो गुणलोभनीयान्वत्सम्पदमात्म सात्कर्त्तुं लुब्धोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः । नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महान् दोष इत्याशङ्क्य सोऽपि सत्संसर्गलाभे नीचसङ्गमाद्वरमुत्कर्षावहत्वादित्याह । समिति । तथा हि भूतिं समुन्नयन्नुत्कर्षमापादयन् । लटः शतृशानचा वित्यादिना शतृप्रत्ययः । पुनर्लट् ग्रहणसामर्थ्यात्प्रथमासामाना धिकरण्यम् । महात्मभिः समं सहेत्यर्थः । साकं सार्द्धं समं सहेत्यमरः । अनार्य्यसङ्गमात् दुर्ज्जनसंसर्गात् पञ्चमी विभक्त इति पञ्चमी । विरोधोऽपि वरं मनाक् प्रियः । देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक् प्रिय इत्यमरः । अत्र मैत्र्यपेक्षया मनाक् प्रियत्वं विरोधस्य । भूतिं समुन्नयन्नित्यस्य पूर्व्ववाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात्समाप्तपुनरात्ताख्यानदोषापत्तिः । तदुक्तम् काव्यप्रकाशे । समाप्तपुनरादानात्समाप्तपुनरात्तकमिति । न च वाक्यान्तरमेतत् येनोक्तदोषपरिहारः स्यात् । अर्थान्तरन्यासो ऽलङ्कारः । स च भूतिसमुन्नयनस्य पदार्थविशेषणद्वारा विरोधव त्सम्प्रति हेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणित इति ॥ ८ ॥

कृतारिषड्वर्गजयेन मानवी
मगम्यरूपाम्पदवीम्प्रपित्सुना ।
विभज्य नक्तन्दिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ॥ ९

ननु कातर्य्यं केवला नीतिरित्याशङ्क्य नीतियुक्तम्पौरुषमस्येत्याह । कृतेति । षणां वर्गः षड्वर्गः अरीणां अन्तःशत्रूणां कामक्रोधादीनां षड्वर्गोऽरिषड्वर्गः शिवभागवत्समासः तस्य जयः कृतोयेन तथोक्तेन विनीतेनेत्यर्थः । विनीताधिकारं प्रजापालनमिति भावः । अगम्यरूपाम्पुरुषमात्रदुःप्राप्यां मनोरिमां मानवीं मनूपदिष्टसदाचारतुल्यामित्यर्थः । पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रतिपत्तुमिच्छुना । प्रपद्यतेः सनन्तादुप्रत्ययः । सनि मीमेत्यादिना इसादेशः अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः । अस्ता तन्द्रिरालस्यं यस्य तेनास्ततन्द्रिणा अनलसेनेत्यर्थः । तदिः सौत्रोधातुः तस्माद् अङ्गादयश्चेत्यौणादिकः क्रिन्प्रत्ययः । कृदिकारादक्तिनइति वा ङीष् । तन्द्री घटी तरी तन्त्रीति ङीषन्तोपीति चीरस्वामी । तथा रामायणप्रयोगः निस्तन्द्रिरप्रमत्तश्च स्वदोषे परदोषवदिति । तेन दुर्य्योधनेन पुरुषस्य कर्म्म पौरुषं पुरुषकारउद्योगइति यावत् । युवादित्वादण् प्रत्ययः । पौरुषं पुरुषस्योक्तं भावे कर्म्मणि तेजसीति त्रियः । नक्तञ्च दिवा च नक्तन्दिवं अहोरात्रमित्यर्थः । अचतुरेत्यादिना सप्तम्यर्थवृत्त्योरव्यययो द्वन्द्व निपातेऽच् समासान्तः । विभज्य अस्यां वेलायामिदं कार्य्यमकार्य्यमिति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्य्यते ॥ ९ ॥

सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान्सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम् ॥ १० ॥

सम्प्रति भृत्याद्यनुरागमाह। सखीनिति। गतस्मयो निरहङ्कारः अतएव स दुर्य्योधनः सन्ततमनारतं साधु सम्यगकपटमित्यर्थः। अनुजीविनो भृत्यान् प्रीतियुजः स्निग्धान् सखीनिव मित्राणीव दर्शयते लोकस्येति शेषः। हेतुमति चेति णिच् णिचश्चेत्यात्मनेपदम्। शोभनं हृदयं येषां तान् सुहृदो मित्राणि च। सुहृदुर्हृदौ मित्रामित्रयोरिति निपातः। बन्धुभिर्भ्रात्रादिभिः समानमानांस्तुल्यसत्कारान् दर्शयते। बन्धूनां समूहो बन्धुता तां। ग्रामजनबन्धुसहायेभ्यस्तल्। कृतमाधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते बन्धूनधिपतीनिव दर्शयते इत्यर्थः। यथा भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य तथा तान् सम्भावयतीत्यर्थः। अनुजीव्यादीनां कर्त्तुरीप्सिततमं कर्म्मेति कर्म्मत्वम्। पूर्व्वत्वस्मिन्नेव पदान्वये वाक्यार्थमित्थं वर्णयन्ति। स राजा अनुजीव्यादीन् सख्यादीनिव दर्शयते। सख्यादयइव ते तु तम्पश्यन्ति सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते स्वयमेव छन्दानुवर्त्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः। अत्रापि स्वेप्सितकर्म्मत्वं अणिचि कर्त्तुरनुजीव्यादेरभिवादिदृशोरात्मनेपदमुपसङ्ख्यानमिति पाक्षिकं कर्म्मत्वम्। एवञ्चात्र णत्वकर्म्मणोराज्ञोणन्ते कर्त्तृत्वेऽपि आरोहयते हस्ती स्वयमेवेत्यादिवत् अशुप्रमाणकर्म्मान्तराभावान्नायं णेरणादिसूत्रस्य विषयइति

असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवा
न्न बाधतेऽस्य त्रिगणः परस्परम् ॥ ११ ॥

मत्वा णिचश्चेत्यात्मनेपदमितिपेदिरे । भाष्ये तु णेरणाविसूत्र विषयत्वमप्यस्योक्तम् । यथाह । पश्यन्ति भृत्याराजानं दर्शयते भृत्यान्राजा दर्शयते भृत्यैराजा अत्रात्मनेपदं सिद्धं भवतीति। अत्राह कैयटः । ननु कर्म्मान्तरसद्भावादनात्मनेपदेन सम्भाव्यम् । उच्यते । अस्मादेवोदाहरणाद्भाष्यकारस्यायमेवाभिप्राय ऊह्यते अण्यन्तावस्थायां ये कर्तृकर्म्मणी तद्व्यतिरिक्तकर्म्मान्तर सद्भावादात्मनेपदं न भवति । यथा स्थलमारोहयति मनुष्यानिति इह त्वण्यन्तावस्थायां कर्तृणां भृत्यानां णौ कर्म्मत्वमिति भवत्येवात्मनेपदमिति ॥ १० ॥

नचायं त्रिवर्गात्प्रमाद्यतीत्याह । असक्तमिति । यथायथं यथास्वं विभज्य असङ्कीर्णरूपं विविच्येत्यर्थः । यथास्वे तु यथायथमिति निपातनात् द्विर्भावो नपुंसकत्वञ्च ह्रस्वोनपुंसके प्रातिपदिकस्येति ह्रस्वत्वं पक्षे पातःपक्षपातः आसक्तिविशेषः समस्तुल्योयस्यां सा तथा तया समपक्षपातया भक्त्या अनुरागविशेषेण । पूज्येष्वनुरागोभक्तिरित्युपदेशः पूज्यश्चायं त्रिवर्गइति भावः । असक्तमनासक्तमव्यसनितयेति यावत् । आराधयतः सेवमानस्यास्य दुर्य्योधनस्य त्रयाणां धर्म्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः । त्रिवर्गोधर्म्मकामार्थैश्चतुर्वर्गः स मोक्षकैरित्यमरः । गुणानुरागात्तदीयगुणेष्वनुरागाद्गुणवदाश्रय

निरत्ययं साम न दानवर्ज्जितं
न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्त्तते तस्य विशेषशालिनी
गुणानुरोधेन विना न सत्क्रिया ॥ १२ ॥

लोभदित्यर्थः । सख्यं मैत्रीम् । सख्युर्य्यइति यप्रत्ययः । ईयिवान् उपगत वानित्युत्प्रेक्षा । उपेयिवाननाश्वानननूचानश्चेति क्वसुप्रत्ययान्तो निपातः । नात्रोपसर्गस्तन्त्रमिति काशिकाकारश्चाह स्म । परस्परं न बाधते समवर्त्तित्वादस्य धर्मार्थकामाः परस्परानुपमर्द्देन वर्द्धन्त इत्यर्थः । उक्तञ्च धर्म्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यइति ॥ ११ ॥

अथ श्लोकत्रयेणोपायकौशल्यं दर्शयन्नादौ सामदाने दर्शयति । निरत्ययमिति । तस्य दुर्य्योधनस्य निरत्ययं निर्बाधममायिकमित्यर्थः । अन्यथा जनानान्दुर्ग्रहत्वादिति भावः । साम सान्त्वम् । साम सान्त्वमुभे समे इत्यमरः । दानवर्ज्जितं न प्रवर्त्तते । अन्यथा लुब्धप्रवर्त्तनस्य शुष्कप्रियैर्वाक्यैर्दुष्करत्वादिति भावः । उक्तञ्च । लुब्धमर्थेन गृह्णीयात्साधुमञ्जलिकर्म्मणा । मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितमिति । तथा भूरि प्रभूतं न तु कदाचित्स्वल्पमित्यर्थः । दानं धनत्यागः । सदित्यादरार्थेऽव्ययम् । आदरानादरयोः सदसतीइति निपातसंज्ञास्मरणात् । तस्य क्रियां सत्क्रियां विरहय्य विहाय । ल्यपि लघुपूर्व्वादित्ययादेशः । न प्रवर्त्तते अनादरे दानवैफल्यादिति भावः । न चैवं सर्व्वत्र येनाविवेकित्वं कोशहानिश्च स्यादित्याह । प्रेति । विशेषशालिनी

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्म्मविप्लवम् ॥ १३ ॥

अतिशययोगिनी सत्क्रिया आदरक्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्त्तते । पृथग्विनेत्यादिना तृतीया । गुणेष्वेवा दरोऽभूदिदानञ्चेति नोक्तदोषावकाशइत्यर्थः । अत्रोत्तरोत्तरस्य पूर्व्वपूर्व्वविशेषणतया स्थापनादेकावल्यलङ्कारः । तदुक्तङ्काव्य प्रकाशे । स्थाप्यतेऽपोह्यते वापि यथा पूर्व्वं परम्परम् । विशेषणतया वस्तु यत्र सैकावली द्विधेति ॥ १२ ॥

अथ दण्डप्रकारमाह । वसूनीति । वशी स दुर्य्योधनोवसूनि धनानि वाञ्छन् लोभादित्यर्थः । वसु तोये धने मणाविति वैजयन्ती । निहन्तीति शेषः । तथा मन्युना कोपेन नच । मन्युर्दैन्ये क्रतौ क्रुधी त्यमरः । धर्म्मशास्त्रानुसारेण क्रोधलोभविवर्ज्जितइति स्मरणा दित्यर्थः । किन्तु निवृत्तकारणोनिवृत्तलोभादिनिमित्तः सन् स्वधर्म्मइत्येव स्वस्य राज्ञः सतोमम्मायं धर्म्मोममेदङ्कर्त्तव्यमित्यस्मा देव हेतोरित्यर्थः । अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्ड यन् । अयशोमहदाप्नोति नरकञ्चैव गच्छतीति स्मरणादिति भावः । गुरूपदिष्टेन प्राड्विवेकोपदिष्टेन । धर्म्मशास्त्रम्पुर स्कृत्य प्राड्विवेकमते स्थितः । समाहितमतिः पश्येद्व्यवहारा ननुक्रमादिति नारदस्मरणात् । दण्डेन दमेन शिक्षयेत्यर्थः रिपौ सुतेऽपि वा स्थितमिति शेषः । एतेनास्य समदर्शित

विधाय रक्षान् परितः परेतरा
नशङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः॥ १४ ॥

मुक्तम्। धर्म्मविप्लवन्धर्म्मव्यतिक्रममधर्म्ममिति यावत्। निहन्ति निवारयति। दुष्ट एवास्य शत्रुः शिष्ट एव बन्धुर्नतु सम्बन्धनिबन्धनः पक्षपातोऽस्तीत्यर्थः ॥ १३ ॥

सम्प्रति भेदकौशलन्दर्शयति। विधायेति। शङ्का सञ्जातास्य शङ्कितोऽविश्वस्तः सन् परितः सर्व्वत्र स्वपरमण्डले परेतरान् आत्मीयान् अवञ्चकानित्यावत् यद्वा परान् इतरयन्ति भेदेनात्मसात्कुर्व्वन्तीति परेतरान्। तत्करोतीति ण्यन्तात्कर्म्मण्यण् प्रत्ययः। रक्षन्तीति रक्षान् रक्षकान् मन्त्रगुप्तिसमर्थानित्यर्थः। नन्दिग्रहीत्यादिना पचाद्यच्। विधाय कृत्वा नियुज्येत्यर्थः अशङ्किताकारमुपैति स्वयमविश्वस्तोऽपि विश्वस्तवदेव व्यवहरन् परमुखेनैव परान् भिनत्तीत्यर्थः। न च तान् रक्षानुपेक्षते येन तेऽपि विकुर्व्वीरन्नित्याह। क्रियेति। क्रियापवर्गेषु कर्म्मसमाप्तिषु अनुजीविसात्कृता भृत्याधीनाः कृता अपरावर्त्तितया दत्ता इत्यर्थः। देये त्राचेति साति प्रत्ययः। सम्पदोऽस्य राज्ञः कृतज्ञतामुपकारित्वं वदन्ति प्रीतिदानैरेवास्य कृतज्ञत्वम्प्रकाश्यते न तु वाङ्मात्रेणेत्यर्थः। कृतज्ञे राजन्यनुजीविनोऽनुरज्यन्तेऽनुरक्तास्तं रक्षन्तीति भावः ॥ १४ ॥

अथोपायप्रयोगस्य फलवत्तां दर्शयति। अनारतमिति। तेन राज्ञा दुर्य्योधनेन षड्‌गुणेषूपायवस्तुषु। पदं व्यवसितत्राणस्थानलक्ष्मा

अनारतन्तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिवृंहितायती
रुपेत्य सङ्घर्षमिवार्थसम्पदः ॥ १५ ॥
अनेकराजन्यरथाश्वसङ्कुल
न्तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रता
म्भृशं नृपोपायनदन्तिनां मदः ॥ १६ ॥

द्विवस्तुष्वित्यमरः । सम्यगसङ्कीर्णमव्यस्तञ्च विभज्य विविच्य विनियोगएव सत्क्रिया अनुग्रहः सत्कार इति यावत् याभान्ताः लम्भिताः स्थानेषु सम्यक् प्रयुक्ताइत्यर्थः । उपायविशेषणं वा उपायाः सामादयःसङ्घर्षम्परस्परस्पर्द्धामुपेत्येवेत्युत्प्रेक्षा परिवृंहितायतीः प्रचितोत्तरकालाः स्थिराइत्यर्थः अर्थसम्पदोऽनारतमजस्रम्फलन्ति प्रसुवत इत्यर्थः ॥ १५ ॥

अर्थसम्पदमेवाह । अनेकेति । अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्धइव गन्धोयस्याऽसौ अयुग्मच्छदगन्धिः । सप्तम्युपमानेत्यादिना बहुब्रीहिरुत्तरपदलोपश्च । उपमानाच्चेति समासान्तइकारः । नृपाणामुपायनान्युपहारभूताये दन्तिनस्तेषां मदः । उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः ।राज्ञामपत्यानि पुमांसोराजन्याः क्षत्रियाः राजश्वशुराद्यत् इति यत्प्रत्ययः राज्ञोऽपत्ये जातिग्रहणादण् । रथाश्चाश्वाश्च रथाश्वम् । सेनाङ्गत्वादेकवद्भावः । अनेकेषां राजन्यानां रथाश्वेन सङ्कुलं व्याप्तं तदीयमास्थान

सुखेन लभ्या दधतः कृषीवलै
रकृष्टपच्या इव शस्यसम्पदः ।
वितन्वति क्षेममदेवमातृका
श्चिराय तस्मिन् कुरवश्चकासते ॥ १७ ॥

निकेतनाजिरं सभासण्डं पाङ्गणम् । अङ्गणञ्चत्वराजिरे इत्यमरः । स्वप्नमत्यर्थमार्द्रताम्पङ्किलत्वन्नयति । एतेन महासम्बद्धिरुक्ता अतएवोदात्तालङ्कारः । तथाचालङ्कारसूत्रम् । समृद्धिमद्वस्तु वर्णनमुदात्तइति ॥ १६ ॥

सम्प्रति जनपदक्षेमकरत्वमाह । सुखेनेति । चिराय तस्मिन् दुर्य्योधने क्षेमं वितन्वति क्षेमङ्करे सति देवः पर्ज्जन्यएव माता येषान्ते देवमातृकाः वृष्ट्यम्बुजीविनोदेशाः ते न भवन्तीत्यदेव मातृका नदीमातृकाइत्यर्थः । देशोनद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहि पालितः । स्यान्नदीमातृकोदेवमातृकश्च यथाक्रममित्यमरः । एते नास्य कुल्यादिपूर्त्तपवर्त्तकत्वमुक्तम् । कुरूणां निवासाः कुरवोजन पदविशेषाः । कृष्टेन पच्यन्तइति कृष्टपच्याः । राजसूयेत्यादिना कर्म्मकर्त्तरि क्यप्प्रत्ययान्तोनिपातः । तद्विपरीता अकृष्टपच्या इव । कृषिरेषामस्तीति कृषीवलैः कर्षकैरित्यर्थः । रजः कृष्या दिना वलच् प्रत्ययः वलइति दीर्घः । सुखेन अक्लेशेन लभ्या लब्धुं शक्याः शस्यसम्पदः दधतोधारयन्तः । नाभ्यस्ताच्छतुरिति नुमा गमप्रतिषेधः । चकासते सर्व्वोत्कर्षेण वर्त्तन्ते इत्यर्थः । अदभ्यस्ता दिति झेरदादेशः जक्षित्यादयः षडित्यभ्यस्तसंज्ञा । सम्पन्नजनपद त्वादसन्तापकरत्वाच्च दुःसाध्योऽयमिति भावः ॥ १७ ॥

उदारकीर्त्तेरुदयन्दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयम्प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी ॥ १८ ॥

नन्वेवञ्जनपदानुवर्त्तिनः कथमर्थलाभ इत्यत आह । उदा इति । उदारकीर्त्तेर्महायशसः । उदारो दातृमहतोरित्यमरः । दयावतः परदुःखप्रहरणेच्छोः अतएव प्रशान्तबाधम्प्रशमितोपद्रवं यथास्यात्तथा इति क्रियाविशेषणम् उदयविशेषणं वा । वा दान्तशान्तेत्यादिना शमधातोर्ण्यन्तान्निष्ठान्तो निपातः । अभिरक्षया सर्व्वतस्त्राणेनोदयं वृद्धिन्दिशतः सम्पादयतः वसूपमानस्य कुवेरोपमस्य । वसुर्मयूखाग्निधनाधिपेष्विति विश्वः । अस्य दुर्य्योधनस्य गुणैर्दयादाक्षिण्यादिभिरुपस्नुता द्राविता मेदिनी वसूनि धनानि । वसु तोये धने मणाविति वैजयन्ती । स्वयमदुग्धे अक्लेशेन दुह्यत इत्यर्थः । दुहेः कर्म्मकर्त्तरि लट् । न दुहस्नुनमां यक् चिणाविति यक् प्रतिषेधः । यथा केनचिद्दिदुग्धेन नवप्रसूता रक्षिता च गौः स्वयमदुग्धे इति भावः । अलङ्कारस्तु विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिरिति सर्व्वस्वकारः । अत्र प्रतीयमानया गवा सह प्रकृताङ्गया मेदिन्याः भेदेऽभेदलक्षणातिशयोक्तिवशादपोह्यत्वेनोक्तिरिति सङ्क्षेपः ॥ १८ ॥

वीरानुकूल्यमाह । महौजस इति । महौजसो महाबलाः । अन्यथा दुर्व्वलानामनुपकारित्वादिति भावः । मानः कुलशीलाद्यभिमानएव धनं येषान्ते मानधनाः । अन्यथा कदाचिद्बलदर्पादि

महौजसो मानधना धनार्च्चिता
धनुर्भृतः संयति लब्धकीर्त्तयः ।
नसंहतास्तस्य नभिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ १९ ॥

कुर्व्वीरन्निति भावः । धनार्च्चिताः धनैरर्च्चिताः सत्कृताः अन्यथा दारिद्र्यादेनञ्जह्युरिति भावः । संयति सङ्ग्रामे लब्धकीर्त्तयो बद्ध प्रसरा इत्यर्थः । अन्यथा कदाचिन्मुह्येयुरिति भावः । संहताः मिथः सङ्गताः स्वार्थनिष्ठाश्च भवन्तीति नसंहताः नञर्थस्य नशब्दस्य सुप्सुपेति समासः । भिन्नवृत्तयो मिथोविरोधात् स्वामिकार्य्यविघात कराश्च भवन्तीति नभिन्नवृत्तयः पूर्व्ववत्समासः । अन्यथा स्वामि कार्य्यविघातकतया स्वामिद्रोहिणः स्युरित्युभयत्रापि तात्पर्य्यार्थः । धनुर्भृतो धानुष्काः । आयुधीयमात्रोपलक्षणमेतत् । प्राधान्याद्धनु र्ग्रहणं तस्य दुर्य्योधनस्यासुभिः प्राणैः प्रियाणि समीहितुङ्कर्त्तुं वाञ्छन्ति । आनृण्यार्थं प्राणान्दातुमिच्छन्ति अन्यथा दोषस्मरणा दिति भावः । अत्र महौजसादिपदार्थानाम्प्राणदानकर्त्तव्यताम्प्रति विशेषणगत्या हेतुत्वाभिधानात् काव्यलिङ्गमलङ्कारः । लक्षण न्तूक्तम् । तथा साभिप्रायविशेषणत्वात्परिकरालङ्कार इति । द्वयोस्तिलतण्डुलवद्विभक्ततया स्फुरणात्संसृष्टिः ॥ १९ ॥

सम्प्रति स्वराष्ट्रवत्परराष्ट्रवृत्तान्तमपि वेत्तीत्याह । महीभृता मिति । अशेषितक्रियः समापितकृत्यः आफलोदयकर्म्मेत्यर्थः । स दुर्य्योधनः सचरितैः शुद्धचरितैरवञ्चकैरित्यर्थः । चरन्तीति चरास्तैश्चरैः प्रणिधिभिः । पचाद्यच् । महीभृतां क्रियाः प्रारम्भान्

महीभृतां सच्चरितैश्चरैः क्रियाः
स वेद निःशेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः ॥ २० ॥

न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननं ।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम् ॥ २१ ॥

निःशेषं वेद वेत्ति । विदोलटोवेति णलादेशः । स्वरहस्यन्तु न कश्चिद्वेदेत्याह । महोदयैरिति । धातुरिव तस्य दुर्य्योधनस्येहितमुद्योगोमहोदयैर्महावृद्धिभिर्हितमनुबध्नन्त्यनुबध्नन्तीति हितानुबन्धिभिस्तैरित्यर्थः । फलैः कार्य्यसिद्धिभिः प्रतीयते ज्ञायते फलानुमेयास्तस्य प्रारम्भा इत्यर्थः ॥ २० ॥

मित्रबलमाह । नेति । तेन राज्ञा क्वचित् कुत्रापि सह ज्यया मौर्व्या सज्यं । मौर्व्वी ज्या शिञ्जिनी गुणइत्यमरः । तेन सहेति तुल्ययोगइति बहुव्रीहिः । धनुर्नोद्यतं नोर्द्धीकृतं आननं वा कोपविजिह्मं कोपेन कुटिलं न कृतं यस्य कोपएव नोदेति कुतस्तस्य युद्धप्रसक्तिरिति भावः । कथन्तर्ह्याज्ञां कारयति राज्ञइत्यत्राह गुणेति । गुणेषु दयादाक्षिण्यादिषु अनुरागेण प्रेम्णा माल्यपक्षे सूत्रानुषंगेण यद्वा सौरभ्यगुणलोभेन नराधिपैरन्यभूपालैरस्य शासनं आज्ञा मालेव माल्यं तदिव । चातुर्वर्ण्यादित्वात् स्वार्थे

स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम् ॥ २२ ॥

ष्यञ् इति क्षीरस्वामी । शिरोभिरुह्यते धार्य्यते । क्वचिस्वपि यजा
दीनां क्तिोति यकि सम्प्रसारणं । अत्रोपमा स्फुटैव ॥ २१ ॥

सम्प्रत्यस्य धार्म्मिकत्वमाह । सइति । इद्धशासनः अप्रतिहताज्ञः
स दुर्य्योधनोनवयौवनोद्धतं प्रगल्भं धुरन्धरमित्यर्थः । दुःखेन
शिष्यतइति दुःशासनस्तं । भाषायां शासियुधीत्यादिना खलर्थे युच्
प्रत्ययः । यौवराज्ये युवराजकर्म्मणि । ब्राह्मणादित्वात् ष्यञ् ।
निधाय नियुज्येत्यर्थः पुरोधसा पुरोहितेन अनुमतोऽनुज्ञातस्तस्मिन्
याजके सतीत्यर्थः । तदुल्लङ्घने दोषस्मरणादिति भावः । निष्ठेति
भूतार्थे क्तः न तु मतिबुद्धीत्यादिना वर्त्तमानार्थे । अन्यथा पुरोधसे
त्यत्र क्तस्य चवर्त्तमानइति षष्ठीस्यात् । अखिन्नोऽनलसो मखेषु क्रतुषु
हव्येन हविषा हिरण्यं रेतोयस्य तं हिरण्यरेतसं अनलं धिनोति
प्रीणयति । धिवेः प्रीणनार्थात् धिन्विकृण्व्योरचेत्युप्रत्ययः । अकार
श्चान्तादेशः ॥ २२ ॥

स चेत्तादृशउद्योगी तर्हि अस्माभिर्न्न निरुद्योगैर्भाव्यमित्या
शङ्क्योद्योगाशान्दर्शयति । प्रलीनेति । स दुर्य्योधनः प्रलीनभूपालं
निःसपत्नमित्यर्थः स्थिरायति चिरस्थायीत्यर्थः भुवोमण्डलं
आवारिधिभ्यः आवारिधि । आङ् मर्यादाभिविध्योरित्यव्ययी
भावः । प्रशासदाज्ञापयन्नपि । यचित्यादयः षडित्यभ्यस्तसंज्ञा

प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलम्भुवः ।
सचिन्तयत्येव भियस्त्वदेष्यती
रहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः । लत् लत्तः एष्यतीरागमि ष्यतीरागामिनीरिति यावत् । धातूनामनेकार्थत्वादुक्तार्थसिद्धिः । अथवा आङ्पूर्व्वः पाठः एत्येधत्यूट्स्विति वृद्धिः लृटः सद्वेति शतृप्रत्ययः उगितश्चेति ङीप् आच्छीनद्योर्नुमिति विकल्पान्नुम भावः । भियो भयहेतून्विपद इत्यर्थः चिन्तयति आलोचयत्येव । सएवाह । अहो बलवद्विरोधिता दुरन्ता दुष्टावसाना । सार्व्व भौमस्यापि प्रबलैः सपत्नैः सह वैरमनर्थपर्य्यवसाय्येवेति तात्पर्य्यम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥ २३ ॥

ननु गूढाकारेङ्गितस्य तस्य भयं त्वया कथं निरधारीत्यत्राह । कथेति । कथाप्रसङ्गेन गोष्ठीवचनेन जनैः तत्रत्यैरित्यर्थः । अन्यत्र कथाप्रसङ्गेन विषवैद्येन । कथाप्रसङ्गो वार्त्तायां विषवैद्ये ऽपि वाच्यवदिति विश्वः । एकवचनस्यातन्त्रत्वाज्जनविशेषणम् । यद्वा कथाप्रसङ्ग इत्येनाश्च ते जनाश्चेत्येकम्पदम् । उदाहृतादुच्चा रितात् तवाभिधानान्नामधेयात् नामधेयस्मरणाद्धेतोः । हेता विति पञ्चमी । आख्याह्वे अभिधानञ्च नामधेयञ्च नाम चेत्यमरः । अन्यत्र तवाभिधानात नामैकदेशग्रहणे नाममात्रग्रहणमिति न्यायात् तश्च वश्च तवौ, तार्क्ष्यवासुकी तयोरभिधानं यस्मिन्पदे तस्मात् अनुस्मृताखण्डलसूनुविक्रमः स्मृतार्ज्जुनपराक्रमः सन्

कथाप्रसङ्गेन जनैरुदाहृता
दनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद्व्यथते नतानन:
स दुःसहान्मन्त्रपदादिवोरगः ॥ २४ ॥
तदाशु कर्त्तुन्त्वयि जिह्ममुद्यते
विधीयतान्तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वता
म्प्रवृत्तिसाराः खलु मादृशाङ्गिरः॥ २५ ॥

दुःसहादतिदुःसहात् मन्त्रपदात् मन्त्रशब्दात् स्मारकाद्धेतोः आख ण्डलसूनुरिन्द्रानुज उपेन्द्रो विष्णुरिति यावत् । सूनुः पुत्रेऽनुजे रवा विति विश्वः । तस्य विःपक्षी गरुड इत्यर्थः । तस्य क्रमः पादविक्षेपः सोऽनुस्मृतो येन स तथोक्तः । स्मृतगरुडमहिमा उरग इव नता ननः सन् । उरगः पन्नगो भोगीत्यमरः । व्यथते दुःखायते । पीडा बाधा व्यथा दुःखमित्यमरः । अत्युत्कटभयदोषादिविकाराद्दुर्व्वा र्य्य इति भावः । सर्व्वतो जयमन्विच्छेत् पुत्रादिच्छेत् पराजयमिति न्याया दर्ज्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्व्वमवदातम् ॥ २४ ॥

निगमयति । तदिति । तत्तस्मात्कारणात्त्वयि जिह्मं कपट ङ्कर्त्तुं उद्यते लाञ्छितांशावित्यर्थः । तत्र तस्मिन्दुर्योधने विधेयं कर्त्तव्यमुत्तरम्प्रतिक्रिया आशु विधीयतां क्रियताम् । ननु कर्त्तव्य मपि त्वयैवोच्यतामिति चेत्तत्राह । परेति । परप्रणीतानि परो क्तानि वचांसि चिन्वतां गवेषयतां मादृशां वार्त्ताहारिणामित्यर्थः ।

इतीरयित्वा गिरमात्तसत्क्रिये
गतेऽथ पत्यौ वनसन्निवासिनाम्।
प्रविश्य कृष्णासदनम्महीभुजा
तदाचचक्षेऽनुजसन्निधौ वचः ॥ २६ ॥
निशम्य सिद्धिं द्विषतामपाकृती
स्ततस्ततस्त्या विनियन्तुमक्षमा।
नृपस्य मन्युव्यवसायदीपिनी
रुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥

गिरः प्रवृत्तिसाराः वार्त्तामात्रसाराः। वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः। वार्त्तामात्रवादिनोवयन्तु कर्त्तव्यार्थोपदेशसमर्थाः अतस्त्वयैव निर्द्धार्य्यं कार्य्यमिति भावः। सामान्येन विशेषसमर्थना दर्थान्तरन्यासः ॥ २५ ॥

इतीति। वनसन्निवासिनाम्पत्यौ वनेचराधिपे इति गिरमीरयित्वा उक्त्वा आत्तसत्क्रिये गृहीतपारितोषिके गते सति। तुष्टिदानमेव चाराणां हि वेतनं ते हि तल्लोभात्स्वामिकार्य्येष्वतीवत्वरयन्त इति नीतिवाक्यात्। अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनम्प्रविश्यानुजसन्निधौ तद्वनेचरोक्तं वचो वाक्यं आचचक्षे आख्यातं अथवा कृष्णेति पदच्छेदः। सदनम्प्रविश्यानुजसन्निधौ तद्वचः कृष्णा आचचक्षे आख्याता। चक्षिङोदुहादेर्द्विकर्मकत्वादप्रधानकर्म्मणि लिट् ॥ २६ ॥

निशम्येति। अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं वृद्धिरूपान्निशम्य ततस्तदनन्तरं ततोद्विषद्भ्य आगतास्ततस्त्याः।

भवादृशेषु प्रमदाजनोदित
मभवत्यधिक्षेपइवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मा
न्निरस्तनारीसमयादुराधयः॥ २८॥

अव्ययात्त्यविति त्यप्। अपाकृतीर्व्विकारान्नियन्तुन्निरोद्धुं अक्षमा सती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोः दीपिनीः संवर्द्धिनीर्गिरो वाक्यान्युदाजहार जगादेत्यर्थः॥ २७॥

भवादृशेष्विति। भवादृशाभवद्विधाः पण्डिताइत्यर्थः। तेषु विषये। त्यदादिष्वित्यादिना कञ् आसर्व्वनाम्नइत्याकारादेशः। प्रमदाजनोदितं स्त्रीजनोक्तम्। वदेः क्तः वचिस्वपीत्यादिना सम्प्रसारणम्। अनुशासनं नियोगवचनमधिक्षेपः तिरस्कारइव भवति। अतोन युक्तं वक्तुमित्यर्थः। तथापि वक्तुमनुचितत्वेऽपि। निरस्तनारीसमयाः त्याजितस्त्रीनताहूपस्त्रीसमाचाराः। समयाः शपथाचारकालसिद्धान्तसंविदइत्यमरः। दुराधयः समयोल्लङ्घन हेतुत्वात् दुष्टामनोव्यथाः। पुंस्याधिर्मानसीव्यथेत्यमरः। मां वक्तुं व्यवसाययन्ति प्रेरयन्ति। न किञ्चिदयुक्तन्दुःखिनामिति भावः॥ २८॥

अखण्डमिति। आखण्डलतुल्यधामभिरिन्द्रतुल्यप्रभावैः। धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोरिति हेमः। स्ववंश्यैः नृपतिभिर्भरतादिभिश्चिरमखण्डमविच्छिन्नन्धृता मही त्वया मदं च्योततीति मदच्युत् क्विप् तेन मदस्राविणा मतङ्गजेन स्रगि

अखण्डमाखण्डलतुल्यधामभि
श्चिरन्धृता भूपतिभिः स्ववंशजैः ।
त्वयात्महस्तेन मही मदच्युता
मतङ्गजेन स्रगिवापवर्ज्जिता ॥ २९ ॥
व्रजन्ति ते मूढधियः पराभव
म्भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधा:
नसंवृताङ्गान्निशिता इवेषवः ॥ ३० ॥

वात्महस्तेन स्वकरेण स्वचापल्येनेत्यर्थः अपवर्ज्जिता परिहृता त्यक्ता । स्वदोषादेवायमनर्थागमइत्यर्थः ॥ २९ ॥

स्वदोषादेवायमनर्थागमइत्युक्तं स च दोषः कुटिलेष्वकौटिल्यमेवेत्याह । व्रजन्तीति । मूढधियोनिर्व्विवेकबुद्धयस्ते पराभवं व्रजन्ति । ये मायाविषु मायावत्सु विषये । अस्मायामेधेत्यादिना विनिप्रत्ययः । मायिनोमायावन्तः । व्रीह्यादित्वादिनिप्रत्ययः । न भवन्ति । अत्रैवार्थान्तरं न्यस्यति । प्रविश्येति । शठाः अपकारिणो धूर्त्तास्तथाविधान्कुटिलानसंवृताङ्गान् अवर्म्मितशरीरान्निशिता इषवइव प्रविश्य प्रवेशं कृत्वा आत्मीयाभूत्वा घ्नन्ति हि । आर्ज्जवं हि कुटिलेषु न नीतिरिति भावः ॥ ३० ॥

न च लक्ष्मीचाञ्चल्यादयमनर्थागमः किन्तु स्वोपेक्षादोषमूलत्वादित्याशयेनाह । गुणेति । अनुरक्तसाधनोऽनुकूलसहायवान् । उक्तञ्च कामन्दकीये । उद्योगादनिवृत्तस्य सुसहायस्य धीमतः ।

गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजान्नराधिपः।
परैस्त्वदन्यः क इवापहारये
न्मनोरमामात्मवधूमिव श्रियम् ॥ ३१ ॥
भवन्तमेतर्हि मनस्विगर्हिते
विवर्त्तमानन्नरदेव वर्त्मनि।
कथन्न मन्युर्ज्वलयत्युदीरितः
शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ३२ ॥

छायेवानुगता तस्य नित्यं श्रीः सहचारिणीति। कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽन्यः। अन्या-रादित्यादिना पञ्चमी। क इव नराधिपो गुणैः सन्ध्यादिभिः सौन्दर्य्या-दिभिश्चानुरक्तामनुरागिणीं कुलजां कुलक्रमादागतां कुलीनाञ्च मनोरमां श्रियमात्मवधूमिव स्वभार्य्यामिव। वधूर्ज्जाया स्नुषा चेत्यमरः। परैः शत्रुभिरन्यैश्चापहारयेत्स्वयमेवापहारं कारये-दित्यर्थः। कलत्रापहारवत्सम्पदपहारोऽपि राज्ञा मानहानिकरत्वा-दनुपेक्षणीयइति भावः ॥ ३१ ॥

अथ दशभिः कोपोद्दीपनङ्करोति। भवन्तमिति। हे नरदेव नरेन्द्र। एतर्हि इदानीमस्मिन्नापत्काल्लेऽपीत्यर्थः। एतर्हि सम्प्रती-दानीमधुना साम्प्रतन्तथेत्यमरः। इदमोर्हिलिति र्हिल्प्रत्ययः। एतेतौरथोरित्येतादेशः। आपदमेवाह। मनस्विगर्हिते शूर-जुगुप्सिते वर्त्मनि मार्गे वर्त्तमानं शत्रुकृतान्दुर्दशामनुभवन्त

अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥ ३३ ॥

मित्यर्थः । भवन्तन्त्वामुदीरितउद्दीपितोमन्युःक्रोधः शुष्कन्नीरसं । शुषेः कइति निष्ठातकारस्य ककारः । शमी चासौ तरुश्चेति विशेषण समासः तं शमीग्रहणं शीघ्रज्वलनस्वभावात् कृतं उच्छिखउद्गत ज्वालः । घृणिज्वाले अपि शिखे इत्यमरः । वह्निरिव कथन्न ज्वलयति ज्वलयितुमुचितमित्यर्थः । मितां ह्रस्वइति ह्रस्वः ॥ ३२ ॥

नन्वन्तःशत्रुत्वादयं क्रोधः त्याज्यएवेत्याशङ्क्याह । अवन्ध्येति । अवन्ध्यः कोपोयस्य तस्य अवन्ध्यकोपस्य अतएवापदां विहन्तु र्निग्रहानुग्रहसमर्थस्येत्यर्थः पुंसइति शेषः । देहिनोजन्तवः स्वयमेव वश्यावशङ्गताभवन्ति । वशङ्गतइति यत्प्रत्ययः । अतस्त्वया कोपिना भवितव्यमित्यर्थः । व्यतिरेके त्वनिष्टमाचष्टे अमर्षशून्येन निःकोपेन जन्तुना । कन्यथा शोकइतिवत् हेताविति तृतीया । हृदयस्य कर्म हार्दं स्नेहः । प्रेमा ना प्रियता हार्दं प्रेम स्नेहइत्यमरः । युवादित्वा दण् । हृदयस्य हृल्लेखयदण्लासेष्विति हृदादेशः । जातहार्देन जात स्नेहेन सता जनस्यादरोन विद्विषा द्विषता च सतादरोन । अमर्षहीनस्य रागद्वेषावकिंचित्करत्वादगण्यावित्यर्थः । अथ वा विद्विषा सतादरोभयन्न । दरोऽस्त्रियाम्भये श्वभ्रइत्यमरः । एतस्मिन्नेव प्रयोगे सन्धिवशात् द्विधा पदच्छेदः पुंवाक्येषु न दोषः। अतः स्थाने कोपः कार्य्यस्त्याज्यस्त्वस्थाने कोपइतिभावः ॥ ३३ ॥

परिभ्रमँल्लोहितचन्दनोचितः
पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानस
न्दुनोति नो कच्चिदयं वृकोदरः ॥ ३४ ॥

परिभ्रमन्निति । लोहितचन्दनोचितः उचितलोहितचन्दनः वाहिताग्न्यादिष्विति साधु । अभ्यस्तरक्तचन्दनइत्यर्थः । अभ्यस्ते त्युचितं न्याय्यमिति यादवः । महारथोरथचारी । उभयत्रापि प्रागिति शेषः । अद्य तु रेणुरूषितोधूलिच्छुरितः पद्भ्यामतति गच्छ तीति पदातिः पादचारी । अज्यतिभ्यां चेत्यनुवृत्तौ पादेचेत्यौ णादिकइन् प्रत्ययः । पादस्य पदाज्यातिगोपहतेष्विति पदादेशः । अन्तर्गिरि गिरीष्वन्तः । विभक्त्यर्थेऽव्ययीभावः । गिरेश्चेत्येकस्येति विकल्पात्समासान्ताभावः । परिभ्रमन्नयं वृकोदरोभीमः सत्य धनस्येति सोल्लुण्ठवचने । अद्यापि त्वया सत्यमेव रक्ष्यते न तु भ्रातर इति भावः । तवेति शेषः । मानसं नो दुनोति । स्वान्तं हृन्मानसं मनइत्यमरः । कच्चिन्न परितापयति । कच्चित्कामप्रवेदनइत्यमरः । स्वाभिप्रायाविष्करणं कामप्रवेदनम् ॥ ३४ ॥

विजित्येति । वासवइन्द्र उपमानं यस्य स वासवोपमइन्द्रतुल्योयो धनञ्जयः उत्तरान्कुरूनमेरोरुत्तरान्नानुपान्देशविशेषान् विजित्य प्राज्यमप्रभूतम् । प्रभूतमप्रचुरं प्राज्यमित्यमरः । कुप्यादन्यदकुप्यं हेमरूप्यात्मकम् । स्यात्कोशश्च हिरण्यञ्च हेमरूप्ये कृताकृते । ताभ्यां यदन्यत्तत्कुप्यमित्यमरः । वसु धनमयच्छद्दत्तवान् । पाघ्रे त्यादिना दाणोयच्छादेशः । स धनञ्जयतीति धनञ्जयोऽर्ज्जुनः ।

विजित्य यः प्राज्यमयच्छदुत्तरा
न्कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुना हरन्
करोति मन्युन्न कथन्धनञ्जयः ॥ ३५ ॥

वनान्तशय्याकठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ।
कथन्त्वमेतौ धृतिसंयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ॥ ३६ ॥

संज्ञायां भृतॄवृजीत्यादिना खच् प्रत्ययः। अरुर्द्विषदित्यादिना नुमागमः। अधुनास्मिन् काले। अधुनेति निपातनात्साधुः। तव वल्कवासांस्याहरन् कथन्तव मन्युं क्रोधन्दुःखं वा न करोति ॥ ३५ ॥

वनान्तेति। वनान्तोवनभूमिरेव शय्या तया कठिनीकृताकृती कठिनीकृतदेहौ। आकारोदेहआकृतिरिति वैजयन्ती। विष्वक् समन्तात्। समन्ततस्तु परितः सर्व्वतोविष्वगित्यपीत्यमरः। कचाचितौ कचव्याप्तौ विशीर्णकेशावित्यर्थः। अतएवागजौ गिरिसम्भवौ गजाविव स्थितौ। एतौ यमौ युग्मजातौ माद्रीपुत्रावित्यर्थः। यमो दण्डधरे ध्वांचे संयमे यमजेऽपि चेति विश्वः। विलोकयंल्लक्षयं धृतिसंयमौ सन्तोषनियमौ। धृतिर्य्योगान्तरे धैर्य्ये धारणेऽद्वारे तुष्टिस्थिति विश्वः। बाधितुन्नोत्सहसे न प्रवर्तसे। शकधृषेत्यादिना तुमुन्। अहो ते महद्धैर्य्यमिति भावः ॥ ३६ ॥

इमामहं वेद न तावकीन्धियं
विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्याभवदापदम्परां
रुजन्ति चेतः प्रसभम्ममाधयः ॥ ३७ ॥

अथ राज्ञोदुर्द्दशान्दर्शयितुमुपोद्घातमाह । प्रकृतार्थं वर्णयितु मर्थान्तरवर्णनमुपोद्घातः । इमामिति । इमां वर्त्तमानान्तवे मान्तावकीन्त्वदीयां । तस्येदमित्यण्प्रत्ययः । तवकममकावेक वचनइति तवकादेशः। धियन्त्वदापद्विषयां चित्तवृत्तिमहं न वेद न वेद्मि। परबुद्धेरप्रत्यक्षत्वादिति भावः । विदोलटोवेति णला देशः । नचात्मदृष्टान्तेनापन्नत्वात् दुःखित्वमनुमातुं शक्यते धीरादिष्वनैकान्तिकत्वादित्याशयेनाह । चित्तवृत्तयोविचित्ररूपाः। धीराधीराद्यनेकप्रकाराः खलु किन्तु परामुत्कृष्टाम्भवदापदं विचिन्तयन्त्याभावयन्त्याममचेतश्चित्तं आधयोमनोव्यथाः । उपसर्गे घोः किरिति किप्रत्ययः । प्रसभम्प्रसह्य रुजन्ति भञ्जन्ति । रुजोभङ्ग इति धातोर्लट् पश्यतामपि दुःसहा दुःखजननी त्वद्विपत्तिरनुभवितारन्त्वान्नाविष्करोतीति महच्चित्र मित्यर्थः। चेतइति रुजार्थानाम्भाववचनानामज्वरइति षष्ठी न भवति तत्र शेषाधिकाराच्छेषत्वस्य विवक्षितत्वादिति ॥ ३७ ॥

तदापदमेव श्लोकत्रयेणाह । पुरेति । यस्त्वं महाधनम्बहु मूल्यं श्रेष्ठम् । महाधनं महामूल्यइति विश्वः । शयनं शय्यामधि रूढः सन् स्तुतयोगीतयश्च ताएव मङ्गलानि तैः करणभूतैः पुरा विबोध्यसे वैतालिकैरिति शेषः पूर्व्वंबोधितइत्यर्थः । पुरि

पुराधिरूढः शयनम्महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रामशिवैश्शिवारुतैः ॥ ३८ ॥
पुरोपनीतं नृप रामणीयकं
द्विजातिशेषेण यदेतदन्धसा।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः ॥ ३९ ॥

लुङ्चस्मे इति भूतार्थे लट्। स त्वमदभ्रदर्भां बहुकुशाम्। अस्त्री कुशं कुशो दर्भ इति अदभ्रम्बहुलम्बह्वित्युभयत्राप्यमरः। स्थलीं मकृत्रिमभूमिं। जानपदेत्यादिना ऽकृत्रिमार्थे ङीष्। एतेन दुःसहस्पर्शत्वमुक्तम्। अधिशीङ्स्थासां कर्मेति कर्मत्वं। अधिशय्य शयित्वा। अयङ्यि क्ङितीत्ययङादेशः। अशिवैरमङ्गलैः शिवारुतैः। क्रोष्टुवाशितैः। शिवा हरीतकी क्रोष्टा शमी मद्यामलक्युभे इति वैजयन्ती। निद्राञ्जहासि अद्येति शेषः ॥ ३८ ॥

पुरेति। हे नृप यदेतत्पुरोवर्त्ति वपुः पुरा द्विजातिशेषेण द्विजभुक्तावशिष्टेनान्धसान्नेन। भिस्सा स्त्री भक्तमन्धोऽन्नमित्यमरः। द्वे जाती येषान्ते द्विजातयः। तदुक्तम् जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यत इति। दन्तविप्राण्डजा द्विजा इत्यमरः। रमणीयस्य भावो रामणीयकं मनोहरत्वमुपनीतम्प्रापितम्। नयतेर्द्विकर्मकत्वात्प्रधाने कर्मणि क्तः। प्रधानकर्मण्याख्येये लादीनाहुर्द्वि

अनारतं यौ मणिपीठशायिना
वरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते
मृगद्विजालूनशिखेषु वर्हिषाम् ॥ ४० ॥

द्विषन्निमित्ता यदियन्दशा ततः
समूलमुन्मूलयतीव मे मनः ।
परैरपर्य्यासितवीर्य्यसम्पदां
पराभवोप्युत्सवएव मानिनाम् ॥ ४१ ॥

कर्म्मकानिति वचनात् । अद्य वन्यफलाशिनस्ते तव तद्वपुर्य्यशसा समम्परं मतिमात्रं कार्श्यम्परैति प्राप्नोति उभयमपि क्षीयत इत्यर्थः । अत्र सहोक्तिरलङ्कारः । तदुक्तङ्काव्यप्रकाशे । सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकमिति ॥ ३९ ॥

अनारतमिति । अनारतमजस्रं मणिपीठशायिनौ मणिमय पीठस्थितौ यौ चरणौ राजशिरःस्रजान्नम्रभूपालमौलिस्रजां रजः परागोऽरञ्जयत् तौ ते चरणौ मृगैर्द्विजैश्च तपस्विभिरालून शिखेषु छिन्नाग्रेषु वर्हिषां कुशानाम् । वर्हिः कुशहुताशयोरिति विश्वः । वनेषु निषीदतस्तिष्ठतः ॥ ४० ॥

ननु सर्व्वप्राणिसाधारणामापदि का परिवेदनेत्यत्राह । द्विषदिति । यद्यतः कारणादियन्दशा अवस्था । दशा वर्त्ताववस्थाया मिति विश्वः । द्विषन्तो निमित्तं यस्याः सा । द्विषोनिमित्तादृति यत्प्रत्ययः । अतो मे मनः समूलन्निःशेषं उन्मूलयतीवोत्पाटय

विहाय शान्तिं नृप धाम तत्पुनः
प्रसीद सन्धेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः ॥ ४२ ॥

तीव दैविकी लापत्न दुःखायेत्याह । परैरिति। परैः शत्रुभि रपर्य्यासितापर्य्यावर्त्तिता वीर्य्यसम्पद्येषान्तेषां मानिनामपराभवो विपदप्युत्सव एवेति। वैधर्म्येणार्थान्तरन्यासः मानहानिर्दुःसहा नला पदिति भावः ॥ ४१ ॥

विहायेति। हे नृप शान्तिं शमं विहाय तत्प्रसिद्धन्धाम तेजो विद्विषां वधाय पुनः सन्धेहि अङ्गीकुरु प्रसीद । प्रार्थनायां लोट्। ननु शमेन कार्य्यसिद्धौ किं क्रोधेनेत्यत्राह । व्रजन्तीति । निःस्पृहाः मुनयः शत्रून्कामादीन्विधूय निर्ज्जित्य शमेन क्रोधवर्ज्जनेन सिद्धिं मोक्षाख्यां व्रजन्ति भूभृतस्तु न । कैवल्यकार्य्यवद्राजकार्य्यं न शान्तिसाध्यमित्यर्थः ॥ ४२ ॥

पुरदति । किञ्च धामवतान्तेजस्विनाम्परापकारासहिष्णूना मित्यर्थः। पुरः सरन्तीति पुरःसराः अग्रेसराः । पुरोऽग्रतोऽग्रेषु सर्त्तेरित्यप्रत्ययः । यशोधनाभवादृशाः सुदुःसहमतिदुःसह मीदृशमुक्तप्रकारन्निकारम्पराभवम्प्राप्य रतिं सन्तोषमधिकुर्व्वते स्वीकुर्व्वते चेत्तर्हि हन्त इति खेदे मनस्विताऽभिमानिता निरा श्रया सती हता तेजस्विजनैकशरणत्वात् मनस्वितायाइत्यर्थः । अतः पराक्रमितव्यमिति भावः । यद्यप्यत्र प्रसहनस्यामर्षणस्याकृतेरधि पूर्व्वात्करोतेरधेः प्रसहने इत्यात्मनेपदं न भवति प्रसहनम्परि

पुरःसरा धामवतां यशोधनाः
सुदुःसहम्प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्व्वते रति
न्निराश्रया हन्त हता मनस्विता ॥ ४३ ॥

अथ क्षमामेव निरस्तविक्रम
श्चिराय पर्य्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्म्मुक
ञ्जटाधरः सन् जुहुधीह पावकम् ॥ ४४ ॥

भवद्दति काशिका तथाप्यस्याः कर्त्तभिप्रायविवक्षायामेव प्रयो जकत्वात्कर्त्तभिप्राये स्वरितञितइत्यात्मनेपदम्प्रसिद्धम् ॥ ४३ ॥

अथेति। अथ पक्षान्तरे निरस्तविक्रमः सन् चिराय चिर कालेनापि क्षमां क्षान्तिमेव। क्षितिक्षान्त्यो क्षमेत्यमरः। सुखस्य साधनम्पर्य्येषि अवगच्छसि तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नङ्कार्म्मुकं विहाय। धरतीतिधरः पचाद्यच् जटानान्धरोजटाधरः सन्निह वने पावकञ्जुहुधि पावके होमं कुर्व्वित्यर्थः। अधिकरणे कर्म्म त्वोपचारः। विरक्तस्य किन्धनुषेत्यर्थः। हुझल्भ्योहेर्द्धिः ॥ ४४ ॥

अथ समयोल्लङ्घनादिभेपि तदपि न किञ्चिदित्याह। नेति। परेषु शत्रुषु निकृतिः शाठ्यं परं प्रधानं येषु तेषु तथोक्तेषु अप कारतत्परेषु सत्सु भूरिधाम्नोमहौजसः प्रतीकारक्षमस्य ते तव समयस्त्रयोदश संवत्सरान् वने वत्स्यामीत्येवंरूपा संवित् । समयाः शपथाचारकालसिद्धान्तसंविदइत्यमरः। तस्य परिरक्षणम्प्रती क्षणं न क्षमं न युक्तं । युक्ते क्षमं सत्वहिते त्रिष्वित्यमरः। हि

न समयपरिरक्षणं क्षमन्ते
निकृतिपरेषु परेषु भूरिधाम्नः।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि सन्धिदूषणानि ॥ ४५ ॥

यस्माद्विजयार्थिनो विजिगीषवः क्षितीशा अरिषु विषये सोपधि सकपटं यथा तथा। कपटोऽस्त्री व्याजदम्भोपधयः छद्मकैतवे इत्यमरः। सन्धिदूषणानि विदधति। केनचिद्व्याजेन दोषमापाद्य सन्धिन्दूषयन्ति विघट्टयन्तीत्यर्थः। शक्तस्य हि विजिगीषोः सर्व्वथा कार्य्यसाधनं प्रधानमन्यत्समयरक्षणादिकमशक्तस्येति भावः। अर्थान्तरन्यासोऽलङ्कारः। पुष्पिताग्रावृत्तम् ॥ ४५ ॥

उक्तमर्थमाशीर्व्वादपूर्व्वकमुपसंहरति। विधीति। विधिर्दैवम्। विधिर्विधाने दैवे चेत्यमरः। समयः कालस्तयोर्नियोगान्नियमनाद्धेतोस्तयोर्दुरतिक्रमत्वादिति भावः। अगाधे दुस्तरे आपत्पयोधिरिवेत्युपमितसमासः। दिनकृतमिवेति वक्ष्यमाणानुसारात्तस्मिन्नापत्पयोधौ मग्नम्। सूर्य्योऽपि सायं सागरे मज्जति परेद्युरुन्मज्जतीत्यागमः। दीप्तिः प्रतापश्चातपश्च तस्याः संहारेण जिह्ममप्रसन्नं शिथिलवसुं शिथिलधनमन्यत्र शिथिलरश्मिं। वसुर्द्देवेऽग्नौ रश्मौ च वसु तोये धने मणाविति वैजयन्ती। शिथिलबलमिति पाठे तूभयत्रापि शिथिलशक्तिकमित्यर्थः। रिपुस्तिमिरमिवेति रिपुतिमिरमुदस्य निरस्योदीयमानमुद्यन्तं। ईङ् गताविति धातोर्द्दिवादिकात्कर्त्तरि शानच्। त्वान्दिनादौ दिन

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥४६॥

कृतमिव लक्ष्मीः भूयः समभ्येतु भजतु। आशिषि लिङ्लोटाविति लोट्। चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्य श्लोके लक्ष्मीशब्दप्रयोगः। यथाह भगवान् भाष्यकारः। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीर पुरुषाण्यायुष्मत्पुरुषाणि च भवन्त्यध्येतारश्च प्रवक्तारो भवन्ति। पूर्णोपमेयम्। मालिनीवृत्तम्। सर्गान्तत्वाद्वृत्तभेदः। यथाह दण्डी। सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः। सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनमिति॥ ४६ ॥

अथ कविः काव्यवर्णनामाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति। इतीति। इतिशब्दः सर्गसमाप्तौ भारविकृताविति कवि नामकथनम्। महाकाव्यइति महच्छब्देन लक्षणसम्पत्तिः सूचिता। किरातार्ज्जुनीयइति काव्यवर्णनीययोः कथनम्। प्रथमः सर्गः समाप्त इति शेषः। एवमुत्तरत्रापि द्रष्टव्यम्। किरातार्ज्जुनावधिकृत्य कृतोऽयं ग्रन्थः किरातार्ज्जुनीयम्। शिशुक्रन्दइति द्वंद्वाच्छप्रत्ययः। राघवपाण्डवीयशब्दवत्। तथाहि। अर्ज्जुनएवात्र नायकः किरातस्तु तदुत्कर्षाय प्रतिभटतया वर्णितः। यथाह दण्डी। वंशवीर्य्यप्रतापादि वर्णयित्वा रिपोरपि। तज्जयान्नायकोत्कर्ष कृतेऽनुवर्णयन्ति हि। अथायं सङ्ग्रहश्लोकः। नेता मध्यमपाण्डवो

इति श्रीभारविकृतौ किरातार्ज्जुनीये
महाकाव्ये प्रथमस्सर्गः ॥ १ ॥

भगवतोनारायणस्यांशजस्तस्योत्कर्षकृतेनुवर्ण्यचरितोदिव्यः किरातः पुनः। शृङ्गारादिरसोयमत्र विजयी वीरप्रधानोरसः शैलाद्यानि च वर्णितानि बहुशोदिव्यास्त्रलाभः फलमिति ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायाम्प्रथमः सर्गः समाप्तः ॥ १ ॥

विहिताम्प्रियया मनःप्रिया
मथ निश्चित्य गिरङ्गरीयसीम् ।
उपपत्तिमदूर्ज्जिताश्रयं
नृपमूचे वचनं वृकोदरः ॥ १ ॥
यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्व्वचं
वचनन्तद्विदधीत विस्मयम् ॥ २ ॥

विहितामिति । अथ वृकोदरो भीमः प्रियया द्रौपद्या । प्रिया ग्रहणं अस्याहितोपदेशसूचनार्थम् । विहितामभिहितामित्यर्थः । विपूर्व्वस्य दधातेः क्रियासामान्यवाचिनो योग्यविशेषपर्य्यवसानात् मनःप्रियामभिमतार्थयोगान्मनोहरां विशेषणद्वयेनापि गिरो याह्यत्वमुक्तम् । गिरङ्गरीयसीं सारवत्तरां निश्चित्य नृपं धर्म्म राजम् उपपत्तिमत् युक्तियुक्तं ऊर्ज्जिताश्रयमुदारार्थं वचन मूचे उक्तवान् । कर्त्तरि लिट् । ब्रुवो वचिरादेशः । ब्रुविशासी त्यादिना द्विकर्म्मकत्वं अकथितञ्चेति नृपस्य कर्म्मत्वम् ॥ १ ॥

किन्तद्वचनन्तदाह । यदिति । मानिनी क्षत्रियकुलाभिमान वती द्रौपदी स्नेहमयेन स्नेहप्रचुरेण । तत्प्रकृतवचने मयट् । चक्षुषा ज्ञानचक्षुषा । एतेनाप्तत्वमुक्तम् । परितो वीक्ष्य । समन्ता द्विविच्य यद्वचनमवोचत् । ब्रुवोर्वचेर्व्वा लुङ् वचोऽहमिति उमा गमः । वागधिपस्य वृहस्पतेरपि दुर्व्वचं वक्तुमशक्यं । शेषे षष्ठीयं न

विषमोऽपि विगाह्यते नयः
कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः
सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥

कृद्योगलक्षणा । अतोन लोकेत्यादिना षष्ठीनिषेधोनाखि तद्वचनं विस्मयं विदधीत । सर्वस्यापीतिशेषः । अथवा वागधिप स्यापि विस्मयं विदधीतेति सम्बन्धः । दुर्व्वचं केनापीति शेषः । यत्स्त्रीणामपि शास्त्रं अनुरुणद्धि हितं चानुबध्नाति अतो विस्मय करं ग्राह्यञ्चैतद्वचनमिति तात्पर्य्यार्थः ॥ २ ॥

विस्मयकरत्वे हेतुमाह । विषमइति । विषमोऽपि दुर्ब्बोधोऽपि अन्यत्र दुःप्रवेशोऽपि नयोनीतिशास्त्रम्पयसामाशयोह्रदइव कृत तीर्थः कृताभ्यासाद्युपायः सन् । तीर्थं शास्त्रेऽध्वरे क्षेत्रोपायो पाध्यायमन्त्रिषु । योनौ जलावतारेषु मन्त्राद्यष्टादशस्वपि ति विश्वः । अन्यत्र कृतजलावतारः सन् । तीर्थं योनौ जलावतारे चेति हलायुधः । विगाह्यते विलुह्यते प्रविश्यते च । किन्तु तत्र नये स तादृशः पुरुषो विशेषदुर्लभः यः कृत्यं सन्धिविग्रहादिकार्य्यं स्नानादिकञ्च तस्य वर्त्म सत्साधु देशकालाद्यविरुद्धं यथार्थमित्यर्थः अन्यत्र च गर्त्तग्राहपाषाणादिरहितम् उपन्यस्यति उदाहरति । उपन्यासस्तु वाङ्मुखम् । उपोद्घातउदाहारइत्यमरः । यथा केचित् कृततीर्थे पयसि गम्भीरेऽपि प्रवेष्टारः सन्ति तीर्थकरस्तु विरलः तद्वन्नीतावपि निगूढमपि तत्त्वं सति वक्तरि बोद्धारः सन्ति वक्ता तु न सुलभः । इयञ्च साधु वक्तीति युज्यते विस्मयइति तात्पर्य्यार्थः ॥ ३ ॥

परिणामसुखे गरीयसि
व्यथकेऽस्मिन्वचसि क्षतौजसाम्।
अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥

अथ ग्राह्यत्वे हेतुमाह। परिणामेति। परिणामः फलकालः परिपाकावस्था च तत्र सुखे हिते। ग्रस्तं चाथ त्रिषु द्रव्ये पापमुण्यं सुखादि चेति सुखशब्दस्य विशेष्यलिङ्गत्वम्। गरीयसि गुर्व्वर्थ प्रतिपादकेऽर्थभूयिष्ठे श्रेष्ठे च क्षतौजसां उभयत्रापि क्षीणशक्तीनां व्यथके युद्धोपेोद्बलकत्वाद्भयङ्करे अन्यत्रादौ सन्तापादिदुःख जनके अल्पीयस्यल्पाक्षरे अल्पमात्रे च। उक्तञ्च। स्वल्पा च मात्रा बंऊ्तागुणश्चेति। अस्मिन्वचसि द्रौपदीवाक्ये अतिवीर्य्यवत्यत्यन्त सामर्थ्यवति भेषजे औषधे इव। भेषजौषधभैषज्यं इत्यमरः। बहुरधिको गुणः मानत्राणराज्यलाभादिरारोग्यबलपोषादिश्च दृश्यते। अतोग्राह्यमस्यावचनमिति भावः ॥ ४ ॥

सत्यमेवं तथापि मह्यं न रोचते किङ्करोमीत्यत्राह। इयमिति। रुचिरार्था हितार्थसम्पन्नेति रुचिहेतूक्तिः। इयम्भारती द्रौपदीवाक्यं इष्टगुणाय अभिमतगुणाय गुणग्राहिणे इत्यर्थः भवते तुभ्यम्। रुच्यर्थानाम्प्रीयमाणइति सम्प्रदानत्वाच्चतुर्थी। रोचतां स्वदताम्। विध्यर्थे लोट्। हितवचने बलादपीच्छां कुर्य्यादौषधवदिति भावः। तथापि स्त्रैणे वचसि का श्रद्धा तत्राह। नन्विति। गुणानां गृह्या गुणगृह्याः गुणपक्षपातिन इत्यर्थः। यदा स्वैरिवाह्यपक्षेषु चेति ग्रहेः क्यप्। विपश्चितो

इयमिष्टगुणाय रोचतां
रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिस्पृहा
गुणगृह्या वचने विपश्चितः ॥ ५ ॥
चतसृष्वपि ते विवेकिनी
नृप विद्यासु निरूढिमागता ।
कथमेत्य मतिर्व्विपर्य्ययं
करिणी पङ्कमिवावसीदति ॥ ६ ॥

विद्वांसः । विद्वान्विपश्चिद्दोषज्ञ इत्यमरः । वचने विषये वक्तृविशेषे स्त्रीपुंसादिलक्षणे निस्पृहाः ननु निरास्थाः खलु । बालादपि सुभाषितं ग्राह्यमिति न्यायादिति भावः ॥ ५ ॥

सम्प्रति स्वयमुपालभते । चतसृष्विति । हे नृप चतसृष्वपि विद्यासु आन्वीक्षिक्यादिषु । आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती । विद्या ह्येताश्चतस्रस्तु लोकसंस्थितिहेतवइति कामन्दकः ॥ निरूढिमागता प्रसिद्धिङ्गता अतएव विवेकिनी सदसद्विवेकवती ॥ यथाह मनुः । आन्वीक्षिक्यान्तु विज्ञानन्धर्म्माधर्म्मौ त्रयीस्थितौ । अर्थानर्थौ च वार्त्तायान्दण्डनीत्यां नयानयाविति । ते मतिः कथङ्करिणी पङ्कमिव विपर्य्ययं वैपरीत्यं अविवेकरूपमेत्य अवसीदति नश्यति । तन्न युक्तमिति भावः ॥ ६ ॥

किन्त्वच्छिन्नमिदानीं येनेत्यमुपालभ्यते तत्राह । विधुरमिति । त्वयि परैः शत्रुभिरिमामीदृशीं अवगीतां गर्हिताम् । अवगीतस्त

विधुरं किमतः परम्परै
रवगीताङ्गमिते दशामिमाम्।
अवसीदति यत्सुरैरपि
त्वयि सम्भावितवृत्ति पौरुषम् ॥ ७ ॥

निर्व्वादे मुहूर्दुष्टे च गर्हिते इति विश्वः। दशां गमिते प्रापिते सति। सुरैरपि सम्भावितवृत्ति बहुकृतप्रसारम् अथवा निश्चित सद्भावम्पौरुषम्पुरुषकारः। युवादित्वादण्प्रत्ययः। अवसीदति नश्यति इति यत् अतःपरं अतोऽन्यत् अधिकं किं विधुरं किं कष्टन्न किञ्चिदित्यर्थः। विधुरम्प्रत्यवाये स्यात्कष्टविश्लेषयोरपीति वैज यन्ती। अस्तीति शेष.। अस्ति भवतिपरः प्रथमपुरुषेऽप्रयुज्यमानो ष्यस्तीति भाष्यकारः। भवतीति लटः पूर्व्वाचार्य्याणां संज्ञा। यत् पुरुषाधिकारस्य दुर्दशा सा च अनुक्ता तदुपरि महत्कष्टं तच त्वदुपेक्षयेत्युपालम्भइत्यर्थः ॥ ७ ॥

अथापि वाकालत्वादियमुपेचेत्याशङ्क्य नायमुपेचाकालइति व कुल्लदेव तावत् श्लोकद्वयेन विविनक्ति। द्विषतामिति। भूतिमुदय मिच्छता शोभना मेधा यस्य तेन सुमेधसा सुधिया। नित्य मसिच् प्रजामेधयोरित्यसिच्प्रत्ययः। गुरुर्महानपि अस्वन्ततरः अत्यन्तदुरन्तः चयोन्मुखइत्यर्थः द्विषतामुदयः सुखेन मृष्यत इति सुमर्षणः सुसहः उपेक्ष्यइत्यर्थः। स्वतस्तु दुर्म्मर्षणइति भावः। भाषायां शासीत्यादिना खलर्थे युच्। महानपि फल सम्पत्प्रवणः फलसिद्ध्युन्मुखः। प्रनिरन्तरित्यादिना णत्वं। परिचयोन्न सुमर्षणः नोपेक्ष्यइत्यर्थः। अन्यथा तूपेक्ष्यइति भावः। नस्तु

द्विषतामुदयः सुमेधसा
गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता
फलसम्पत्प्रवणः परिक्षयः ॥ ८ ॥
अचिरेण परस्य भूयसीं
विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती
कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥

दयएव प्रतीकार्य्यः न च क्षयएवोपेक्ष्यः किन्तु स्वन्तत्वास्वन्तत्वाभ्यां उभावपि प्रतीकार्य्यौ उपेक्ष्यौ च भवतइत्यर्थः ॥ ८ ॥

अथोभयोरपि मध्ये एकतरस्योदयक्षययोर्ग्गतिमुक्त्वा इदानीं युगपत् परिक्षयागमे गतिमाह । अचिरेणेति । कृतमनेनेति कृती कुशलइत्यर्थः । इष्टादिभ्यश्चेति इनिप्रत्ययः । परस्य शत्रोः क्षययुक्तिं क्षययोगं अचिरेणाशुभाविनीं भूयसीं दुरन्ताञ्च तथा आत्मनः क्षययुक्तिं विपरीतांचिरभाविनीम् अल्पीयसीं स्वल्पाञ्च विगणय्य विचार्य्य। ल्यपि लघुपूर्व्वादित्ययादेशः । उपेक्षते अन्यथा उक्तवैपरीत्ये परस्य क्षययुक्तौ अल्पीयस्यां स्वस्य च भूयस्यामित्यर्थः तत्प्रतिकारन्तस्याः क्षययुक्तेः प्रतीकारं अचिरेणाशु कुरुते । एवं सति यदा शत्रोरभ्युदयः स्वस्य चातिपरिक्षयो यथास्माकन्तदा किं वक्तव्यमित्यर्थः। सद्यः प्रतिकारं कुरुते इत्यर्थात्सिद्धमनुसन्धेयम् ॥ ९ ॥

अनुपालयतामुदेष्यतीं
प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां
जननिर्व्वादभयादिव श्रियः ॥ १० ॥
क्षययुक्तमपि स्वभावजं
दधतं धाम शिवं समृद्धये ।
प्रणमन्त्यनपायमुत्थितं
प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥

तथाप्युपेक्षायामनिष्टमाचष्टे । अनुपालयतामिति । उदेष्यतीं वर्द्धिष्यमाणां । आच्छीनद्योर्नुमिति विकल्पान्नुमभावः । द्विषतां प्रभुशक्तिं कोषदण्डजन्तेजः । स प्रभावः प्रतापश्च यत्तेजः कोषदण्डजमित्यमरः । अनीहया अनुत्साहेन अनुपालयतां उपेक्षमाणानां महीभुजां श्रियः सम्पदो जननिर्व्वादभयात् निकृष्टपुरुषानुरागात् लोकापवादभयादिवेति हेतूत्प्रेक्षा । अचिरादपयान्ति अपसरन्ति । यथाह कामन्दकः । स्त्रीभिः षण्ढ इव श्रीभिरलसः परिभूयत इति । अतः पराक्रमितव्यमिति भावः ॥ १० ॥

ननु परिक्षीणः कथमप्रबलेनाभियुज्यते इत्याह । क्षयेति । क्षययुक्तमपि तथा क्षीणमपि सन्तं स्वभावजं सहजं शिवं सर्व्वलोकाह्लादिकम् धाम चात्त्तेजः प्रकाशञ्च दधतं समृद्धये वृद्ध्यर्थं उत्थितं मुद्युक्तं उत्सहमानमिति यावत् । अन्यत्र उत्थितमुदितं अतएव अनपायमविनाशिनं वर्द्धिष्यमाणमित्यर्थः । नृपम्प्रजाः प्रतिपच्चन्द्रं

प्रभवः खलु कोषदण्डयोः
कृतपञ्चाङ्गविनिर्णयो नयः।
स विधेयपदेषु दक्षतां
नियतिं लोक इवानुरुध्यते ॥ १२ ॥

द्वितीयाचन्द्रमिवेत्यर्थः। प्रतिपच्छब्देन द्वितीयाग्रहणम् प्रतिपदि तस्याद्दृश्यत्वादिति। प्रणमन्ति प्रह्वीभावेन वर्त्तन्त इति भावः। न तु नमस्कुर्व्वन्ति। क्षीणस्याप्युत्साहः कार्य्यसिद्धेर्निदानमित्यर्थः। श्रियं हि सततोत्साही दुर्ब्बलोऽपि समश्नुते इति कामन्दकः ॥ ११ ॥

ननु प्रभुशक्तिशून्यस्योत्साहः कुतोपयुज्यत इत्यत्राह। प्रभव इति। कर्म्मणामारम्भोपायः पुरुषद्रव्यसम्पत् देशकालविभागः विनिपातप्रतीकारः कार्य्यसिद्धिश्चेति पञ्चाङ्गानि। यथाह कामन्दकः। सहायः साधनोपायविभागो देशकालयोः। विनिपातप्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते इति पञ्चानामङ्गानां विनिर्णयः। तद्धितार्थेत्यादिना उत्तरपदसमासः। कृतः पञ्चाङ्गविनिर्णयो यस्य येन वा स तथोक्तः नयो नीतिशास्त्रमिति यावत्। कोषोऽर्थराशिः। कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोरित्यमरः। दण्डश्चतुरङ्गसैन्यम्। दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे यमे। यात्राशायां सैन्यभेदे इति वैजयन्ती। तयोः कोषदण्डयोः प्रभुशक्तेरित्यर्थः। प्रभवत्यस्मादिति प्रभवः कारणम्। ऋदोरप्। स नयः नीतिशास्त्रं विधेयपदेषु कार्य्यवस्तुषु। पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु इत्यमरः। दक्षतां चिप्रकारित्वमुत्साहमित्यर्थः। लोकः कृष्यादिप्रवृत्तो जनः नियतिन्दैवमिव। नियति

अभिमानवतो मनस्विनः
प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्त्तनक्षम
न्तममालम्बनमात्मपौरुषम् ॥ १३ ॥

नियमे दैवे इति विश्वः । अनुरुध्यते अनुसरति । रुधेर्दैवादिकात् कर्त्तरि लट् । मन्त्रस्यापि मूलमुत्साहस्तन्मूलाया: प्रभुशक्तेः मूल मिति किमु वक्तव्यम् । अतः स एवाश्रयणीयः यतोनक्तन्दिवं मन्त्रयतः तस्यापि प्रभोर्निरुत्साहस्य न किञ्चित् सिद्ध्यतीति ॥ १२ ॥

ननु सोत्साहस्यासहायस्य कथमर्थसिद्धिरित्यत्राह । अभिमान वतइति । अभिमानवतः मानधनस्य प्रियमिष्टमुच्चैरुन्नतम्पदं स्थानं राज्यादिकमारुरुक्षतः आरोढुमिच्छतः प्राप्तुकामस्य मनस्विनो धीरस्यात्मपौरुषं स्वपुरुषकार एव विनिपातनिवर्त्तनक्षमम् अनर्थप्रतीकारसमर्थं आलम्बनसहकारि तमं इष्टतमम् । यथा कस्यचित्तुरङ्गमारोहतः किञ्चित्पतनप्रतिबन्धकानुचरहस्तादिकं आलम्बनन्तद्वदिति ध्वनिः । किम्पौरुषादन्यैः सहायैः पूरणा मितिभावः ॥ १३ ॥

पौरुषानङ्गीकारे दोषमाह । विपदइति । अविक्रमम्पौरुष हीनं विपदोऽभिभवन्ति तिरस्कुर्व्वन्ति । आपदुपेतं विपन्नं आयतिः उत्तरकालः । उत्तरकाल आयतिरित्यमरः । रहयति त्यजति । निरायतेरासन्नक्षयस्येत्यर्थः लघुताऽगौरवं नियता अवश्यम्भाविनी न कश्चिदेनमाद्रियतइत्यर्थः । अगरीयान् लघीयान् नृपश्रियः पदं राजलक्ष्म्याः आस्पदं न भवति । यद्वा नयेति पदच्छेदः ।

विपदोऽभिभवन्त्यविक्रमं
रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायते
रगरीयान्न पदं नृपश्रियः ॥ १४ ॥
तदलम्प्रतिपक्षमुन्नते
रवलम्ब्य व्यवसायबन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया
न विषादेन समं समृद्धयः ॥ १५ ॥

तस्मात् पौरुषङ्कर्त्तव्यमेवेत्यर्थः । अत्र पूर्व्वपूर्व्वस्याविक्रमत्वादुत्तरो त्तरं विपदादिकम्प्रतिकारणत्वात्कारणमालाख्योऽलङ्कारः । यथा सूत्रम् । पूर्व्वपूर्व्वस्योत्तरोत्तरहेतुत्वे कारणमालेति ॥ १४ ॥

फलितमाह । तदिति । तत्तस्मादुपेक्षायान्दोषसम्भवादित्यर्थः । उन्नतेरभ्युदयस्य प्रतिपक्षमन्तरायं व्यवसायबन्ध्यतां उद्योगशून्य तामवलम्ब्य अलं उद्योगशून्यतावलम्बनेनालमित्यर्थः । अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वाप्रत्ययः तस्य ल्यवादेशः । तथाहि पराक्रमः आश्रयः कारणं यासान्तास्तथोक्ताः समृद्धयः सम्पदः विषादेन समं अनुत्साहेन सह न निवसन्ति पौरुषसाध्याः सम्पदोनानुत्साहसाध्याः उभयोः सहावस्थानविरोधादित्यर्थः । वैध र्म्येण कार्य्यकारणरूपोऽर्थान्तरन्यासः ॥ १५ ॥

ननु समयः प्रतीक्ष्यते किं वेगेनेत्यत्राह । अथेति । अथावधिः कालः प्रतीक्ष्यते चेत् । अवधिस्त्ववधाने स्यात् सीम्नि काले बलेऽपि

अथ चेदवधिः प्रतीच्यते
कथमाविष्कृतजिह्मवृत्तिना।
धृतराष्ट्रसुतेन सुत्यजा
श्चिरमास्वाद्य नरेन्द्रसम्पदः ॥ १६ ॥

द्विषता विहितन्त्वयाथवा
यदि लब्धा पुनरात्मनः पदम्।
जननाथ तवानुजन्मनां
कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥

येति विश्वः। आविष्कृतजिह्मवृत्तिना प्रकटितकपटव्यवहारेण धृतराष्ट्रसुतेन दुर्य्योधनेन नरेन्द्रसम्पदो राज्यसम्पदः नरेन्द्रेति वा पदच्छेदः चिरञ्चतुर्द्दशवर्षाण्यास्वाद्यानुभूय कथं सुत्यजाः ज्ञातास्वादेन तेन पश्चादपि सुखेन युद्धक्लेशं विना न त्यज्यन्त एवेत्यवधिप्रतीक्षणं व्यर्थमित्यर्थः ॥ १६ ॥

अथ यदि दैवात्स्वयमेवदुर्य्योधनः सम्पदो दास्यति तथापि तत्कथं रोचयेमहीत्याह। द्विषतेति। अथवा द्विषता दुर्य्योधनेन विहितं समर्पितमित्यर्थः आत्मनः पदं राज्यं पुनरपि त्वया लब्धा लप्स्यते यदि। लभेः कर्म्मणि लुट्। हे जननाथ तवानुजन्मनां अनुजानां आविष्कृतपौरुषैः प्रकटितपराक्रमैः भुजैः कृतमलं व्यर्थमिति यावत्। अस्मद्भुजैर्न किञ्चित्साध्यमित्यर्थः। राज्यदाना दानयोः द्विषतामेव स्वातन्त्र्ये अस्मद्भुजनैष्फल्यात्। क्षत्रियस्य विजितमिति शास्त्रात् क्षात्रेणैव राज्यं ग्राह्यमिति भावः। कृत

मदसिक्तमुखैर्मृगाधिपः
करिभिर्वर्त्तयते स्वयं हतैः ।
लघयन् खलु तेजसा जगन्न
महानिच्छति भूतिमन्यतः ॥ १८ ॥

मिति प्रतिषेधार्थमव्ययञ्चादिषु पठ्यते । ऋतमिति निवारणनिषेधयोरिति गणव्याख्याने । भुजैरिति गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीया । उक्तञ्च न्यासोद्योतेन । केवलं श्रूयमाणैव क्रिया निमित्तङ्कारकभावस्यापि तु गम्यमानस्यापीति ॥ १७ ॥

ननु साम्नैव कार्य्यसिद्धौ किं चात्रेण । यथाह मनुः । साम्ना दानेन भेदेन समस्तैरथवा पृथक् । विजेतुम्प्रयतेतारीन् युद्धेन कदाचनेति तत्किमाग्रहेणेत्याशङ्क्याह । मदेति । मृगाधिपः सिंहोमदसिक्तमुखैः मदवर्षिभिरित्यर्थः । स्वयं स्वेनैव हतैः करिभिर्व्वर्त्तयते वृत्तिङ्करोति तैरेव जीवतीत्यर्थः । चौरादिकात् वृत्तेर्लट् । भौवादिकस्य तु अणावकर्म्मकाच्चित्तवत्कर्त्तृकादिति परस्मैपदनियमादिति । तथाहि तेजसा प्रभावेण । तेजोबले प्रभावे च ज्योतिष्यर्च्चिषि रेतसीति वैजयन्ती । जगत् लघयन् लघू कुर्व्वन् महान् तेजस्वी अन्यतोऽन्यस्मात्पुरुषात् भूतिं वृद्धिं नेच्छति खलु । नहि तेजस्विनः परायत्तवृत्तित्वं युक्तं । मनुवचनन्तु अशूर विषयमिति भावः । विशेषेण वक्ष्यमाणसामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ १८ ॥

ननु युद्धात् पाक्षिको लक्ष्मीलाभः उपायान्तरैस्तु न तथेत्याशङ्क्याह । अभिमानेति । अभिमानधनस्य वैरिनिर्य्यातमात्रनिष्ठस्य

अभिमानधनस्य गत्वरै-
रसुभिः स्थास्नु यशश्चिचीषतः ।
अचिरांशुविलासचञ्चला
ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ १९ ॥
ज्वलितम्न हिरण्यरेतस
ञ्चयमास्कन्दति भस्मनाञ्जनः ।
अभिभूतिभयादसूनतः
सुखमुज्झन्ति न धाम मानिनः ॥ २० ॥

अतएव गत्वरैः गमनशीलैः अस्थिरैः । गत्वरश्चेति क्वसन्तो निपातः असुभिः प्राणैः करणैः । पुंसि भूम्न्यसवः प्राणा इत्यमरः । स्थास्नु स्थिरं । ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्ययः । यशश्चिचीषतः चेतुं सङ्ग्रहीतुमिच्छतः । चिनोतेः सनन्तात् शतृप्रत्ययः । अचिरं अंशवोयस्याः सा अचिरांशुर्व्विद्युत् तस्या विलासः स्फुरणन्तद्वच्चञ्चला क्षणिका इत्यर्थः । लक्ष्मीः सम्पत् अनुषङ्गादागतं आनुषङ्गिकं अन्वाचयशिष्टमल्पम्फलं मानत्राणाय यश एव मुख्यम्फलं अभ्युच्चयस्तु लक्ष्मीरिति मानिनामिदमेव श्लाघ्यमित्यर्थः । अनास्थिरप्राणत्यागेन स्थिरयशः स्वीकाराभिधानान्न्यूनाधिकविनिमयाख्यः परिवृत्त्यलङ्कारः । उक्तञ्च काव्यप्रकाशे । परिवृत्तिर्व्विनिमयोयोर्थानां स्यात्समासमैरिति ॥ १९ ॥

नन्वल्पस्य मानस्य हेतोः कथम्प्राणत्यागः शक्यते कर्त्तुं यतोजीवन्नरोभद्रशतानि पश्येदित्याशङ्क्याह । ज्वलितमिति । जनोभस्मनाञ्चयं

किमपेक्ष्य फलम्पयोधरान्
ध्वनतः प्रार्थयते मृगाधिपः।
प्रकृतिःखलु सा महीयसः
सहते नान्यसमुन्नतिं यया ॥ २१ ॥

पुञ्जमास्कन्दति पादादिना आक्रमति। अदाहकत्वादिति भावः। ज्वलितं ज्वलन्तं। कर्त्तरि क्तः मतिबुद्धीत्यादिसूत्रे चकाराद्वर्त्तमानार्थत्वं। हिरण्यं रेतोयस्य तं हिरण्यरेतसं अग्निं न आस्कन्दति दाहकत्वादिति भावः। अतोहेतोर्मानिनः अभिभूतिभयात्प्राणलोभेन तेजस्त्यागे परिभवोभविष्यतीति भयादसूनेव सुखमक्लिष्टं उज्झन्ति त्यजन्ति धाम तेजस्तु नोज्झन्ति मानहानिकराज्जीवनात् स्वतेजसा मरणमेव वरमित्यर्थः। पूर्व्ववत्श्लोकवत् अर्थान्तरन्यासः ॥ २० ॥

अथवा किमत्र प्रयोजनञ्चिन्तया किन्तु तेजस्विनामेवायं स्वभावोयज्जिगीषुत्वमित्याशयेनाह। किमिति। मृगाधिपः सिंहः किम्फलम्प्रयोजनमपेक्ष्य ध्वनतोगर्ज्जतः। धरन्तीति धराः पचाद्यच्। पयसां धरास्तान् पयोधरान् मेघान्प्रार्थयते अभियाति। याच्ञायामभियाने च प्रार्थना कथ्यते बुधैरिति केशवः। अथवा प्रार्थयते अवरुणद्धीत्यर्थः अभियाच्ञावरोधयोरित्यभिधानात्। तथाहि। महीयसोमहत्तरस्य सा प्रकृतिः खलु स्वभावः यया प्रकृत्या अन्यसमुन्नतिम्परवृद्धिन्न सहते। महतः परभञ्जनमेव पुरुषार्थइत्यर्थः। पूर्व्ववदलङ्कारः ॥ २१ ॥

कुरु तन्मतिमेव विक्रमे
नृप निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषा
न्त्वदनुत्साहहताविपत्तयः ॥ २२ ॥
द्विरदानिव दिग्विभावितां
श्चतुरस्तोयनिधीनिवायतः ।
प्रसहेत रणे तवानुजान्
द्विषतां कः शतमन्युतेजसः ॥ २३ ॥

उक्तप्रयोजनं निगमयति । कुरु तदिति । हे नृप तत्तस्मात् उक्तरीत्या पराक्रमावसरत्वाद्धेतोः । यस्माद्यतस्ततो हेताविति मरः । प्रमादजन्तमोमोहं निर्धूय निरस्य विक्रमे पौरुषे एव मतिं कुरु विक्रममेवाङ्गीकुरु नत्पायान्तरमित्यर्थः । नेच विक्रम वैफल्यमित्याह । ध्रुवमिति । विद्विषां विपत्तयस्त्वदनुत्साहहताः तवानुत्साहेनाव्यवसायेन हताः प्रतिवद्धाः अन्यथा प्रागेव विपद्येरन्निति भावः । इत्येतद्ध्रुवं निश्चितं अवेहि विद्धि । ध्रुवं नित्ये निश्चिते चेति शाश्वतः ॥ २२ ॥

नच नः पराजयशङ्का कार्य्येत्याह । द्विरदानिति । दिग्विभाविताम् दिक्षु प्रसिद्धांस्तान् आयतः आगच्छतः । आङ्पूर्व्वादिण् धातोः शतृप्रत्ययः । चतुरो द्विरदान्दिग्गजानिव तथाब्धिविशेषणांश्चतुरस्तोयनिधीनिव रणे दिग्विभावितान् शतमन्युतेजस इन्द्रविक्रमान् चतुरस्तवानुजान् द्विषतां मध्ये कः प्रसहेत सोढुं

ज्वलतस्तव जातवेदसः
सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा
रिपुनारीनयनाम्बुसन्ततिः ॥ २४ ॥

भ्रश्नुयादित्यर्थः । शकिलिङ् चेति शक्यर्थे लिङ् । अतो निःशङ्क-स्त्वं वर्त्तस्वेति भावः ॥ २३ ॥

आशीर्व्वादव्याजेन फलितमाह । ज्वलतइति । तव चेतसि सततं ज्वलतो वैरिकृतस्य जातवेदसः क्रोधाग्नेः शिवेतरा अशिवा अमङ्गला वैधव्यदुःखजनकत्वादिति भावः । रिपुनारीनयनाम्बुसन्ततिः वैरिवनिताश्रुप्रवाहः शमं विदधातु । वैरिकृतस्य क्रोधस्य वैरिवधमन्तरेण शान्त्यसम्भवादवश्यन्तद्वधस्त्वया कर्त्तव्यइत्यर्थः । क्रोधस्य विषयनिगरणेन विषयिणो जातवेदसएवोपनिबन्धनादतिशयोक्तिरलङ्कारः । तदुक्तम् । विषयस्यानुपादानात् विषय्युपनिबध्यते । यत्र सातिशयोक्तिः स्यात् कवेः प्रौढोक्तिजीवितेति । तत्रापि क्रोधस्य जातवेदसो भेदेऽप्यभेदाध्यवसायात् भेदेऽभेदरूपा तत एवाम्बुनिर्व्वाप्यत्वोक्तिश्च घटते । तथाच यथाम्बुसेकेनाग्निः सम्यक् शाम्यति तथा शत्रुवधेन क्रोधइत्यौपम्यं गम्यते ॥ २४ ॥

इतीति । इत्युक्तरीत्या दर्शिता विक्रिया विकारोवागारम्भात्मको येन तं कोपपरीतमानसं कोपाक्रान्तचित्तं । इदं विशेषणद्वयं द्विरदेऽपि योज्यम् । मरुतः सुतं भीमं महीपतिर्युधिष्ठिरोदुष्टं द्विरदमिव । एतेनास्य शौर्य्यमेव न बुद्धिरस्तीति गम्यते । उपसान्त्वयितुं अनुनेतुमुपचक्रमे प्रवृत्तः प्रोपाभ्यां समर्थाभ्यामित्यात्मने

इति दर्शितविक्रियं सुतं
मरुतः कोपपरीतमानसम् ।
उपसान्त्वयितुम्महीपति
र्द्विरदन्दुष्टमिवोपचक्रमे ॥ २५ ॥
अपवर्ज्जितविप्लवे शुचौ
हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरा
म्मतिरादर्श इवाभिदृश्यते ॥ २६ ॥

पदम् । राज्ञाभाव्युपकारविशेषापेक्षया कथं चिदवशोजनः शनैः शनैः द्विरदवदशीकरणीयो नतु त्याज्यइति भावः ॥ २५ ॥

प्रथमन्तावत् स्तुत्यादिभिः प्रसादयति । अपवर्ज्जितेति । विप्लवः प्रमाणबाध. अन्यत्र वाह्यमलसङ्क्रमः सोऽपवर्ज्जितोयस्य तस्मिन्नप वर्ज्जितविप्लवे । शुचौ शुचिः शब्दसौष्ठ्यं लोहशुद्धिश्च तद्दति । अतएव हृदयग्राहिणि मनोरमे मङ्गलास्पदे एकत्र हितार्थप्रति पादकत्वादन्यत्र मङ्गलवस्तुत्वाच्च श्रेयस्करे । रोचनञ्चन्दनं हेम मृदङ्गन्दर्पणं मणिम् । गुरुमग्निं तथा सूर्य्यम्प्रातः पश्येत्सदा बुध इति पुराणवचनात् । तव गिरां विस्तरे वाक्यप्रपञ्चे । प्रथने वा शब्दइति घञ्प्रतिषेधात् ऋदोरबित्यप् । अतएव विस्तारो विग्रहोव्यासः स तु शब्दस्य विस्तरइत्यमरः । मतिस्त्वद्बुद्धिरादर्शे दर्प्पणे इव । दर्प्पणे मुकुरादर्शावित्यमरः । अमला विशदा अभि दृश्यते वाग्वैषद्यादेव मतिवैषद्यमनुमीयते । तत्पूर्व्वकत्वात्तस्येत्यर्थः ॥ २६ ॥

स्फुटता न पदैरपाकृता
नच न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरा
नच सामर्थ्यमपेक्षितं क्वचित् ॥ २७ ॥

अथ युग्मेनाह। स्फुटतेति। उपपत्तिरिति च। पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता न अपाकृता न त्यक्ता अर्थगौरवं अर्थभूयस्त्वं वा नच न स्वीकृतं स्वीकृतमेवेत्यर्थः। वैषद्यप्रसक्तार्थगौरवाभावनिवर्त्तनार्थं नञ्द्वयं सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधाविति वामनः। गिरांपदानां अवान्तरवाक्यानाञ्च पृथगर्थता भिन्नार्थता अपुनरुक्तार्थतेति यावत्। रचिता कृता। तथा क्वचिदपि सामर्थ्यं गिरां अन्योन्यसामर्थ्यं साकाङ्क्षत्वान्नापेक्षितन्न वर्ज्जितम्। अन्यथा दशदाडिमादिशब्दवदेकवाक्यता न स्यात्। यथाहुः अर्थैकत्वादेकवाक्यं साकाङ्क्षं चेद्विभागे स्यात् इति। ननु अर्थगौरवमित्यत्र कथं षष्ठीसमासः पूरणगुणेत्यादिना प्रतिषेधान्नैष दोषः। ये शुक्लादयः शब्दाः गुणे गुणिनि च वर्त्तन्ते यथा पटस्य शुक्लं शुक्लः पटः इति च तेषामेवात्र निषेधात् ये च सदा गुणमात्रवचनाः यथा गौरवम्प्राधान्यं रसोगन्धः स्पर्श इत्येवमादयस्तेषामनिषेधात्। तथा तत्स्थैश्च गुणैः षष्ठी समस्यत इति वचनात्। बहुलमभियुक्तप्रयोगदर्शनाच्च बलाकायां शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमासः। अतएवाह वामनः। अत्र प्रीतिमादिषु गुणवचन समासोबली स्यादिति ॥ २७ ॥

उपपत्तिरुदाहृता बला-
दनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः
प्रसभं वक्तुमुपक्रमेत कः ॥ २८ ॥

उपपत्तिरिति । किञ्च बलात् स्वबलमाश्रित्य कर्मणि ल्यबूलोपे पञ्चमी वक्तव्या । उपपत्तिर्युक्तिरुदाहृता पराक्रमपक्ष एव श्रेयानिति युक्तिरुक्तेत्यर्थः । उचितञ्चैतन्महावीरस्येति भावः । तथा अनुमानेन युक्त्या आगमः शास्त्रं न क्षतोन हतः किन्त्वागमा विरुद्धमेवोक्तं । अन्यथा तद्विरोधादनुमानस्यैव प्रामाण्यभङ्गप्रसङ्गा दिति भावः । ईदृगित्यं चात्रयुक्तमिदं वचनं अविद्यमानः ईदृगा शयइत्यंचाचयुक्ताभिप्रायोयस्य सः अनीदृगाशयः । अभिप्राय श्छन्दआशयइत्यमरः । कः प्रसभं हठात् वक्तुं उपक्रमेत न कोऽपीत्यर्थः । इत्यं वक्तुमुपक्रमितैव नास्ति वक्ता तु दूरापास्त एवेति भावः । केचिदेतत् श्लोकत्रयं निन्दापरत्वेनापि योजयन्ति । तदसत् हितोपदेशमात्रतत्परस्यातिवत्सलस्य राज्ञोमत्सरिणइव महावीरे भ्रातरि विधेये सर्व्वानर्थमूलभूतनिन्दातात्पर्य्यकल्पना नौचित्यादिति ॥ २८ ॥

यदि साधूक्तन्तर्हि तथैव क्रियतामित्याशङ्क्याह । अविहृप्त तयेति । तथापि त्वया सम्यक् निर्णीतेऽपि मे हृदयमविहृप्ततया असन्तुष्टतया अद्यापि संशयगतत्वेनेत्यर्थः । निर्णयमेव धावत्यनु सरति अपेक्षतइति यावत् । अद्यापि निर्णयस्य अनुदयादिति भावः । निर्णयानुदये हेतुमाह । अवेति । विधेयेषु सन्धिविग्र

अविदग्धतया तथापि मे
हृदयन्निर्णयमेव धावति ।
अवसाययितुं क्षमाः सुखं
न विधेयेषु विशेषसम्पदः ॥ २९ ॥

इत्यादिकर्त्तव्यार्थेषु या विशेषसम्पदः अवान्तरभेदानां समृद्धयोवाङ्म्यानि ताः सुखसङ्क्लेशेनावसाययितुमुरुषान् प्रत्यानुकूल्येन स्वस्वरूपं स्वयमेव शीघ्रमत्याययितुमित्यर्थः । स्यतेर्ण्यन्तादणिकर्म्मकर्त्तृकात्तुमुन् णेरनादिसूत्रस्यायं विषयः । क्षमन्तइति क्षमाः पचाद्यच् । शक्ता भवन्ति । क्षमं शक्ते हिते त्रिष्वित्यमरः । विधेयमात्रस्य सुगमत्वेऽपि तद्विशेषाणां सौक्ष्म्यात् बाहुल्याच्च दुर्ज्ञेयत्वाद्यापि निर्णयाकाङ्क्षेति तात्पर्य्यार्थः । अत्र निर्णयधावनस्योत्तरवाक्यार्थस्य हेतुत्वाभिधानात् वाक्यार्थहेतुकङ्काव्यलिङ्गमलङ्कारः । तदुक्तम् । हेतोर्व्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतमिति ॥ २९ ॥

वस्तुविशेषावधारणमन्तरेणैव प्रवृत्तिरित्याशङ्क्याह । सहसेति । क्रियतइति क्रिया कार्य्यं तां सहसा अविमृश्येत्यर्थः । सहसेत्याकस्मिकाविमर्षयोरिति गणव्याख्याने स्वरादिपाठादव्ययम् । न विदधीत न कुर्व्वीत । कुतः अविवेकः अविमृश्यकारित्वं परमत्यन्तमापदाम्पदं स्थानं विपत्तिकारणमित्यर्थः । व्यतिरेकेणोक्तमर्थमन्वयेनाह । वृणतइति । गुणलुब्धा गुणगृध्नागुणगृध्नवइति स्वयंवरणहेतूक्तिः सम्पदः श्रियः विमृश्य करोतीति विमृश्यकारी उपपदमतिङिति समासः । तं स्वयमेव वृणते

सहसा विदधीत न क्रिया
मविवेकः परमापदाम्पदम्।
वृणते हि विमृष्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥ ३० ॥
अभिवर्षति योऽनुपालयन्
विधिवीजानि विवेकवारिणा
स सदा फलशालिनीं क्रियां
शरदं लोकइवाधितिष्ठति ॥ ३१ ॥

भजन्ते। वृङ् सम्भक्ताविति धातुः। तस्माद्विमृश्यैव प्रवर्त्तितव्यमित्यर्थः। अत्र सहसा विधाननिषेधलब्धविमृश्यकारित्वरूपकारणस्यापद्रूपव्यतिरेककार्य्येण समर्थनाद्वैधर्म्म्येणार्थान्तरन्यासः। इतोऽग्रिमेण च स एव साधर्म्म्येणेति ज्ञेयम्॥ ३०॥

ननु साहसिकस्यापि फलसिद्धिर्दृश्यतएव तत्किं विवेकेनेत्यत आह। अभीति। यः पुमान् विधीयन्तइति विधयः कृत्यवस्तूनि वीजानीवेत्युपमितसमासः। शरदं लोकइवेति वाक्यगतोपमानुसारात्। तानि विधिवीजानि विवेकोवारीव विवेकवारि तेन विवेकवारिणा पूर्ववत्समासः। अनुपालयन् प्रतीक्षमाणः संरक्षन् यः अभिवर्षति सिञ्चति स पुमान् फलं साधननिष्पाद्योऽर्थः शस्यञ्च। शस्ये हेतुकृते फलमित्युभयत्राप्यमरः। तच्छालिनीं क्रियां कर्म्म लोकोजनः। लोकस्तु भुवने जनइत्यमरः। शरदमिव सदा नित्यमधितिष्ठति सदा क्रियाफलम्प्राप्नोत्येव न कदाचिद्व्यभिचरतीत्यर्थः। साहसिकस्य काकतालीयन्यायेन फलसिद्धिर्विवेकिनस्तु

शुचि भूषयति श्रुतं वपुः
प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणम्पराक्रमः
स नयापादितसिद्धिभूषणः ॥ ३२ ॥

नियतेति भावः । अत्र फलशब्देन शस्यहेतुकृतयोरर्थयोरभेदाध्यवसायात् श्लेषमूलातिशयोक्तिस्तदनुगृहीता चोपमेत्यनुसन्धेयम् ॥ ३१ ॥

नियता विवेकिनः फलसिद्धिरित्युक्तं सम्प्रति तामेव त्र्यर्थं स्तौति । शुचीति । शुचि सम्प्रदायशुद्धं श्रुतं शास्त्रश्रवणं कर्त्तृ वपुर्भूषयति अन्यथा अविद्वान् पुरुषः शोच्यइति भावः । तस्य श्रुतस्य प्रशमः क्रोधोपशान्तिः अलङ्क्रिया भूषणम्भवति अन्यथा श्रुतवैफल्यादिति भावः । पराक्रमः सत्यवसरे शौर्य्यं प्रशमस्याभरणम्भवति । अन्यथा सर्व्वः परिभूयतइति भावः । स पराक्रमः नयापादिता नीतिसम्पादिता विवेकपूर्व्विकेति यावत् सा चासौ सिद्धिश्च सैव भूषणं यस्य स तथोक्तः अन्यथा साहसिकस्य सिद्धेः काकतालीयत्वेन पक्षे पराक्रमवैयर्थ्यादिति भावः । वपुषोभूष्यत्वैवाच सिद्धेर्भूषणत्वैव तु । उभयं मध्यमानां तु तत् पूर्व्वोत्तरपक्षयोरिति विवेकः । एवं विशिष्टसिद्धेरनन्यभूषितायाएव भूषणत्वोक्त्या सर्व्वाभरणतया स्तुतिर्गम्यते । अत्रोत्तरोत्तरस्य पूर्व्वपूर्व्वविशेषणत्वात् एकावल्यलङ्कारः । तदुक्तं । यत्र विशेषणभावम्पूर्व्वम्पूर्व्वम्प्रति क्रमेणैव भजति परम्परमेषालङ्कृतिरेकावली कथितेति ॥ ३२ ॥

मतिभेदतमस्तिरोहिते
गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः
कुरुते दीप इवार्थदर्शनम् ॥ ३३ ॥

स्पृहणीयगुणैर्महात्मभि
श्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां
विनिपातोऽपि समः समुन्नतेः ॥ ३४ ॥

विमृश्य कुर्य्यादिति स्थितन्तत्र विमर्शोपायः क इत्युक्ते शास्त्रमेवेत्याह । मतीति । मतिभेदः कार्य्यविप्रतिपत्तिः । मतिभेदस्तम इवेत्युपमितिसमासः दीप इवेत्युपमानुसारात् तेन तिरोहिते आच्छन्ने अतएव गहने दुरवगाहे कृत्यविधौ कार्य्यानुष्ठाने विवेकिनां सुकृतः स्वभ्यस्तः अतएव परिशुद्धो निश्चितः अन्यत्र सुविहितः प्रवातादिदोषरहितः आगमः शास्त्रम् । आगमः शास्त्रमाम्नातमिति विश्वः । दीप इवार्थदर्शनं कार्य्यज्ञानं वस्तुप्रतिभासनञ्च कुरुते ॥ ३३ ॥

एवं विमृश्य कुर्व्वतो दैवादर्थनाशेऽपि न कश्चिदपराध इत्याह । स्पृहणीयेति । स्पृहणीयगुणैर्लोकश्लाघ्यगुणैर्महात्मभिः सज्जनैश्चरिते अनुष्ठिते वर्त्मनि आचारे मनो यच्छतान्निदधतां सन्मार्गेण व्यवहरतामित्यर्थः । विधिहेतुर्दैवनिमित्तकः । विधिर्विधाने दैवे चेत्यमरः । अतएव आगसामपराधानामहेतुर्विनिपातो

शिवमौपयिकं गरीयसीं
फलनिष्पत्तिमदूषितायतीम्।
विगणय्य नयन्ति पौरुषं
विजितक्रोधरया जिगीषवः ॥ ३५ ॥

ऽपि दैविकानर्थोऽपि । विनिपातोऽवपाते स्याद्दैवादिव्यसनेऽपि चेति विश्वः । समुन्नतेरतिवृद्धेः समस्तुल्यः । दैविके पुरुषस्यानुपालभ्यत्वादिति भावः । यथाह कामन्दकः । यत्तु सम्यगुपक्रान्तं कार्य्यमेति विपर्य्ययम् । पुमांस्तत्रानुपालभ्यो दैवान्तरितपौरुष इति ॥ ३४ ॥

सम्प्रति यदिदमित्यन्तदाह । शिवमिति । जिगीषवो जयेच्छवो नृपाः विजितक्रोधरया विजितक्रोधवेगाः सन्तो गरीयसीमभूतां अदूषितायतीं अव्रतोत्तरकालां स्वमामित्यर्थः । फलनिष्पत्तिम्फलसिद्धिं विगणय्य फलतत्त्वं निश्चित्येत्यर्थः । पौरुषं पुरुषकारं शिवमनुकूलं औपयिकं उपायं । विनयादित्वात्स्वार्थे ठक् उपायाद्ध्रस्वत्वञ्च । नयन्ति प्रापयन्ति पौरुषमुपायेन योजयन्तीत्यर्थः । नानिश्चितफलं कर्म्म कुर्व्वीतेति भावः । यथाह कामन्दकः । निष्फलं क्लेशबहुलं सन्दिग्धफलमेव च । न कर्म्म कुर्य्यान्मतिमान्सदा वैरानुबन्धि चेति । नयतिः प्रापणार्थे द्विकर्म्मकः । अत्र पौरुषस्य कर्त्तृस्थकर्म्मत्वेऽप्युपायस्यातथात्वात् क्रोधं विनयतेत्यादिवत् । कर्त्तृस्थेवाशरीरे कर्म्मणीत्यात्मनेपदं न भवति ॥ ३५ ॥

यदुक्तं विजितक्रोधरया इति तदावश्यकमाह । अपनेयमिति । उदेतुं अभ्युदेतुं इच्छता पुरुषेण पुरः प्रथमं रोषमयं रोषात्मकं ।

अपनेयमुदेतुमिच्छता
तिमिरं रोषमयन्धिया पुरः ।
अविभिद्य निशाकृतन्तमः
प्रभया नांशुमताप्युदीयते ॥ ३६ ॥

बलवानपि कोपजन्मन
स्तमसोनाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः
सकलाहन्ति स शक्तिसम्पदः ॥ ३७ ॥

मयडिति मयट् । तिमिरमज्ञानं धिया विवेकबुद्ध्या करणेनापनेयं अपनोद्यम् तथाहि अंशुमतापि कर्त्रा प्रभया तेजसा करणेन निशाकृतन्तमोध्वान्तमविभिद्य नोदीयते किन्तु विभिद्यैवेत्यर्थः । सूर्य्यस्याप्येवङ्किमुतान्येषामित्यपिशब्दार्थः । इणोभावे लट् ॥ ३६ ॥

ननु दुर्बलस्यैवमस्तु बलीयसस्तु क्रोधादेव कार्य्यसिद्धिरित्यत आह । बलवानिति । बलवान् शूरोऽपि यः कोपाज्जन्म यस्य तस्य कोपजन्मनः । अवर्ज्यो बहुब्रीहिर्व्यधिकरणोजन्माद्युत्तरपद इति वामनः । तमसोमोहस्य । कृद्योगात्कर्त्तरि षष्ठी । अभिभवमाक्रान्तिं न रुणद्धि न निवारयति स नृपः क्षयस्य पक्षः क्षयपक्षः कृष्णपक्षः ऐन्दवीः इन्दुसम्बन्धिनीः कलाइव । कला तु षोडशो भागइत्यमरः । सकलाः समग्राः शक्तिसम्पदः प्रभुमन्त्रोत्साह शक्तीः तिस्रोऽपि हन्ति नाशयति । अन्धस्य जङ्घाबलमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थमेवेत्यर्थः अत्र कालस्य

समवृत्तिरुपैति मार्द्दवं
समये यश्च तनोति तिग्मताम्।
अधितिष्ठति लोकमोजसा
स विवस्वानिव मेदिनीपतिः ॥ ३८ ॥
क्व चिरायपरिग्रहः श्रियां
क्व च दुष्टेन्द्रियवाजिवश्यता।
शरदभ्रचलाश्चलेन्द्रियै-
रसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

सर्व्वकारणत्वात् चयपक्षस्य कलाचयकारित्वमस्त्येव तमसस्तु तत्काल विजृम्भणात्तथा व्यपदेशः ॥ ३७ ॥

विग्रह्य कुर्व्वतः क्रियाप्रकारमाह। समेति। यः समो नाति मृदुर्नातितिग्मा वृत्तिर्यस्य स समवृत्तिः सन् समये सत्यवसरे मार्द्दवं मृदुवृत्तित्वमुपैति तिग्मतान्तीक्ष्णवृत्तित्वञ्च तनोति स मेदिनीपतिर्व्विवस्वानिव ओजसा तेजसा लोकमधितिष्ठति आक्रामति। सूर्य्योऽपि ऋतुभेदेन समवृत्तिरित्यादि योज्यम् ॥ ३८ ॥

उक्तान्यथाकरणे अनिष्टमाह। क्वेति। श्रियां सम्पदाञ्चिराय बहुकालम्परिग्रहः स्वायत्तीकरणं क्व। इन्द्रियाणि वाजिनइवेत्युपमितसमासः। दुष्टानां अमार्गधाविनां इन्द्रियवाजिनां वश्ये वशङ्गतस्तस्य भावस्तत्ता क्व। नोभयमेकत्र तिष्ठतीत्यर्थः। कुतः हि यस्मात् शरदभ्रवच्चलाश्चञ्चलाः किञ्च बहुच्छलाः बहुव्याजाबहुरन्ध्राइति यावत्। छलन्तु स्खलिते व्याजइति विश्वः। श्रियोलक्ष्म्याः

किमसामयिकं वितन्वता
मनसः क्षोभमुपात्तरंहसः ।
क्रियते पतिरुच्चकैरपां
भवता धीरतयाऽधरीकृतः ॥ ४० ॥
श्रुतमप्यधिगम्य ये रिपून्
विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय सम्पदा
मयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥

चलेन्द्रियैरजितेन्द्रियैः असुरचारयितुमशक्याः कथञ्चित्प्राप्ता अपि श्रियोऽनाविनीतेषु तिष्ठन्तीत्यर्थः । वाक्यार्थहेतुकङ्काव्यलिङ्गमलङ्कारः ॥ ३९ ॥

क्रोधस्य दुष्टतामुक्ता तस्य त्यागमुपदिशति । किमिति । उपात्तरंहसः प्राप्तत्वरस्य मनसः । समयोऽस्य प्राप्तः सामयिकः । समयस्तदस्य प्राप्तमिति ठक् । स न भवतीत्यसामयिकस्तमप्राप्तकालं क्षोभं वितन्वता भवता धीरतया धैर्य्यगुणेन । मनसोनिर्व्विकारत्वं धैर्य्यं सत्स्वपि हेतुष्विति रसिकाः । अधरीकृतः तिरस्कृतः प्रागिति शेषः । अपाम्पतिः समुद्रः किमर्थं उच्चकैरधिकः क्रियते । न पराजितं पुनरुच्चकैः कुर्य्यादिति भावः । अत्र वितन्वतेति भीमविशेषणत्वेन पदार्थस्योच्चैःकरणे हेतुत्वात् काव्यलिङ्गमलङ्कारः ॥ ४० ॥

श्रुतमिति । किञ्च । ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनः शरीरप्रभवान् रिपून् कामक्रोधलोभमोहमात्सर्य्यादीन् विनयन्ते

अतिपातितकालसाधना
स्वशरीरेन्द्रियवर्गतापनी ।
जनवन्न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

न नियच्छन्ति । कर्तृस्थे वाशरीरे कर्म्मणीत्यात्मनेपदम् । ते खल्वं चिराय झटिति सम्पदां श्रियाश्चापलाश्रयमस्थैर्य्यनिबन्धनमयशो दुष्कीर्त्तिं जनयन्ति । आश्रयदोषादस्थैर्य्यं सम्पदां न स्वदोषा दित्यर्थः । अजितारिषड्वर्गस्य कुतः सम्पदइति भावः ॥ ४१ ॥

तथा क्रोधात्कार्य्यहानिरित्याशयेनाह । अतिपातितेति अतिपाति तान्यतिक्रान्तानि कालः समयोऽनन्तरूपः साधनानि सहायादीनि च यया सा तथोक्ता तापयतीति तापनी । कर्त्तरि ल्युट् टित्वात् ङीप् । स्वस्य यच्छरीरमिन्द्रियवर्गस्य तयोस्तापनी. अक्षमा क्रोधोभवन्तञ्जन वत् पृथग्जनमिव । तेन तुल्यमिति वतिप्रत्ययः तेनैवार्थोलभ्यते । तद्धितश्चाऽसर्व्वविभक्तिरित्यव्ययम् । नयसिद्धेर्नयसाध्यफलादपने तुमपृथक्कर्त्तुं नार्हति । असमयक्रोधस्यात्मसन्तापातिरिक्तम्फलन्ना स्तीत्यर्थः ॥ ४२ ॥

दुष्टः क्रोधइत्युक्तं अथ क्षमायागुणानाह । उपकारकमिति । आयतेरुत्तरकालस्य भृशमत्यन्तमुपकारकं स्थिरफलहेतुरित्यर्थः । भूरिणः प्रभूतस्य कर्म्मफलस्य प्रसूयतेऽनेनेति प्रसवः कारणम् । अपायि न भवतीत्यनपायि स्वयमविनश्यदेव द्विषां निवर्हणं विनाशकं एवङ्गुणकं साधनं तितिक्षासमं क्षमातुल्यं नास्ति । क्षान्ति स्तितिक्षेत्यमरः । तिजनिशानइति धातोर्गुप्तिज्किद्भ्यः

उपकारकमायतेर्भृशं
प्रसवः कर्म्मफलस्य भूरिणः।
अनपायिनिवर्हणं द्विषां
न तितिक्षासममस्ति साधनम् ॥ ४३ ॥

प्रणतिप्रवणान्विहाय नः
सहजस्नेहनिबद्धचेतसः।
प्रणमन्ति सदा सुयोधनं
प्रथमे मानभृतां न वृष्णयः ॥ ४४ ॥

सनिति "सर्मार्थे सन्प्रत्ययः। तितिक्षासममित्यनुक्तोपमेया समासे आर्थी लुप्तोपमा भृशमायत्यनपायिशब्दैः साधनान्तरवैलक्षण्यात् व्यतिरेकस्य व्यज्यते। भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्य्यये च व्यतिरेकः ॥ ४३ ॥

ननु तितिक्षया कालक्षेपे दुर्य्योधनः सर्व्वान् राज्ञोवशी कुर्य्यादित्यत्राह। प्रणतीति। सहजस्नेहेनाकृत्रिमप्रेम्णा निबद्ध चेतसोऽस्मासु गाढं लग्नचित्ताः सुयोधने तु न तथेति भावः। किञ्च मानभृतामहङ्कारिणाम्प्रथमे अग्रेसराः सुयोधनस्या पीति भावः वृष्णयः यादवाः प्रणतिप्रवणान्प्रणामपरान् सुयो धनस्तु न तथेति भावः। नोऽस्मान् विहाय सुयोधनं सदा न प्रणमन्ति न नमन्तिनानुसरन्ति किन्तु कार्य्यकाले स्यप्यन्यथे वेत्यर्थः। सति यादवविग्रहे न किञ्चिदस्माकमसाध्यम्भवेदिति भावः। अनेकपदार्थहेतुकङ्काव्यलिङ्गमलङ्कारः ॥ ४४ ॥

सुहृदः सहजास्तथेतरे
मतमेषां न विलङ्घयन्ति ये ।
विनयादिव यापयन्ति ते
धृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥
अभियोगइमान्महीभुजो
भवता तस्य कृतः कृतावधेः ।
प्रविघाटयिता समुत्पतन्
हरिदश्वः कमलाकरानिव ॥ ४६ ॥

किञ्च कारणान्तरमाह । सुहृदइति । किञ्चैषां नृपाणीमां ये सहजाः सहजाताः सहजाः मातृपितृपचाइत्यर्थः । अन्येष्वपि दृश्यतइति डप्रत्ययः । सुहृदोमित्राणि तथा इतरे कृत्रिम सुहृदश्च मतं वृष्णिपचं न विलङ्घयन्ति नातिक्रामन्ति । ते द्वयेऽपि नृपाः दुर्य्योधनोपजीविनोऽपीति भावः । आत्मसिद्धये आत्मजीवनार्थन्धृतराष्ट्रात्मजं दुर्य्योधनं विनयादानुकूल्यादिव यापयन्ति कालङ्गमयन्ति । कार्य्यकाले तु वृष्णिपचप्रवेशिन एवेत्यर्थः । यातेर्ण्यन्तात्लट् अर्त्तिह्रीत्यादिना पुगागमः ॥ ४५ ॥

किञ्च नायमभियोगकालइत्याशयेनाह । अभियोगइति । कृतावधेः परिभाषितकालस्य । अवधिस्त्ववधाने स्यात्सीम्नि काले बिलेऽपि चेति विश्वः । तस्य सुयोधनस्य कर्म्मणि षष्ठी । भवता कृतः अवधिमनपेक्ष्येति शेषः । अभियोगः आर्द्राभिभवइति यावत् । अभियोगस्तु शपथे स्यादार्द्रेच पराभवइति विश्वः । इमान्पूर्व्वो

उपजापसहान्विलङ्घयन्
स विधाता नृपतीन्मदोद्धतः ।
सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम् ॥ ४७ ॥

असमापितकृत्यसम्पदां
हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां
मदमुत्तम्भयितुं विभूतयः ॥ ४८ ॥

कान् महीभुजो राज्ञः हरिदश्वः उष्णरश्मिः कमलाकरानिव समुत्पतन्नुद्यन्नेव प्रविघाटयिता भेत्स्यति । घाटयतेर्भ्वादिकाल्लुट् । चैरादिकस्य तु मितां ह्रस्वइति ह्रस्वत्वं स्यात् ॥ ४६ ॥

अथ न ये दृष्णिपक्षास्तानप्यत्याह । उपजापेति । मदोद्धतः स दुर्योधनो नृपतीनन्यान् नृपान्विलङ्घयन्मदादवमानयन् सहन्त इति सहाः पचाद्यच् । उपजापस्य सहान् भेदयोग्यान् । समौ भेदोपजापावित्यमरः । विधाता विधास्यति । विपूर्ब्बस्य दधाते र्लुट् अवमानितो जनः सुभेद्यइति भावः । न च ते सहिष्णवइत्याह । जनः प्राकृतोऽपि अधःक्रियामपमानं न सहते लोकाधिकधाम लोकोत्तरप्रतापं राजकं राजसमूहः । गोत्रोक्षोष्ट्रेत्यादिना वुञ् प्रत्ययः । किमुत सहते इति किं वक्तव्यमित्यर्थः । तथा सति कृत्स्नमेव राजमण्डलमस्मानेवावलम्बिष्यते इति भावः ॥ ४७ ॥

ननु सखीनिवेत्यादिवनेचरोक्त्या तस्य मदसम्भावनापि कथमित्यत्राह । असमापितेति । असमापितकृत्यसम्पदामकृतकृत्यानां

मदमानसमुद्धतं नृपं
न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नया
न्नयहीनादपरज्यते जनः ॥ ४९ ॥
अपरागसमीरणेरितः
क्रमशीर्णाकुलमूलसन्ततिः।
सुकरस्तरुवत्सहिष्णुना
रिपुरुन्मूलयितुम्महानपि ॥ ५० ॥

अभिमानशालिनामहंकारिणां विभूतयः सम्पद एव तावता स्वल्पेन विनयेन कार्य्यवशादारोपितेनेति शेषः। हतवेगम्प्रतिबद्ध वेगन्तु स्वरूपतो हतं मदमुत्तम्भयितुं वर्द्धयितुम्प्रभवन्ति सर्व्वथा दुर्ज्जनसम्पर्दो विकारयन्तीति भावः ॥ ४८ ॥

अथ मदस्यानर्थहेतुतां युग्मेनाह। मदेति। अपरागेति च। मदमानाभ्यां दर्पाहङ्काराभ्यां समुद्धतं नृपं मूढता कार्य्यापरिज्ञानं नियमेनावश्यन्न वियुङ्क्ते न विमुञ्चति। अतिमूढानयान्नीतिमार्गादुदस्यते उत्क्षिप्यते। कर्म्मकर्त्तरि लट्। नयहीनाज्जनो लोकोऽपरज्यतेऽपरक्तोभवति। स्वरितञितेत्यादिना आत्मनेपदम् ॥ ४९ ॥

अपरागोऽप्रीतिर्द्वेषइति यावत्। समीरणइव तेनेरितश्चोदितः अतएव क्रमेण शीर्णा शीर्णीभूता आकुला चला च मूलसन्ततिः प्रकृत्यादिस्वजनवर्गः शिफासङ्घातश्च यस्य स तथोक्तः।

अणुरप्युपहन्ति विग्रहः
प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं
तरुशाखान्तनिघर्षजोऽनलः ॥ ५१ ॥

मूलं वशीकृते स्वीये शिफातारान्तिकादिष्विति वैजयन्ती । रिपु महानपि तरुवद्वृद्धइव सहिष्णुना क्षमावता उन्मूलयितुमुद्धर्त्तुं सुकरः सुसाध्यः सुकरोन्मूलनइत्यर्थः । अत्र मदादेः पूर्व्वपूर्व्व स्योत्तरोत्तरम्प्रति कारणत्वात् कारणमाला तरुवदित्युपमाचेति द्वयोः संसृष्टिः ॥ ५० ॥

नन्वन्तर्भेदमात्रेण कथं सुसाध्यस्तत्राह । अणुरिति । अणुरल्पो प्यन्तः प्रकृतिप्रकोपजोऽन्तरङ्गामात्याद्यपरागसमुत्थः । प्रकृतिः पञ्च भूतेषु स्वभावे मूलकारणे । छन्दःकारणगुह्येषु जन्तुजात्यादि केष्वपीति वैजयन्ती । विग्रहोवैरम्प्रभुमुपहन्ति नाशयति । अत्र दृष्टान्तमाह । तरुशाखान्तानां निघर्षोघर्षणन्तज्जोऽनलोऽग्निः । भूधरङ्गिरिमखिलं साकल्येन हिनस्ति हि दहतीत्यर्थः । अत्रोप मानोपमेयसमानधर्म्माणां प्रतिविम्बतया निर्द्देशेन दृष्टान्तालङ्कारः ॥ ५१ ॥

तथापि कथं वर्द्धमानं शत्रुमुपेक्षेत इत्याशङ्क्य दुर्व्विनीतत्वा दित्याह । मतिमानिति । मतिमान्प्राज्ञोविनयम्प्रमथ्नाति त्यज तीति विनयप्रमाथिनोदुर्व्विनीतस्य द्विषः समुन्नतिं वृद्धिमुपेक्षेत । उपेक्षायाः फलमाह । तादृगविनीतोऽन्तरे कश्चिदन्ये सुजयः सुखेन

मतिमान विनयप्रमाथिनः
समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे
विपदन्ता ह्यविनीतसम्पदः ॥ ५२ ॥

लघुवृत्तितया भिदाङ्गतं
वहिरन्तश्च नृपस्य मण्डलम् ।
अभिभूय हरत्यनन्तरः
शिथिलं कूलमिवापगारयः ॥ ५३ ॥

अनुशासतमित्यनाकुलं
नयवर्त्माकुलमर्ज्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छित
स्तमभीयाय पराशरात्मजः ॥ ५४ ॥

जेतुं शक्यः । खलु हि यस्मादविनीतसम्पदः विपदन्ताः अनर्थो दर्क्काः ॥ ५२ ॥

कथन्दुर्व्विनीतस्य शत्रोः सुजयत्वमित्याशङ्क्य भेदजर्ज्जरितत्वादित्याह । लघ्विति । लघुवृत्तितया खस्य दुर्वृत्तरूपतया वहिर्मित्रादिजनपदेषु अन्तरमात्यादिषु च भिदाम्भेदङ्गतं । षिद्भिदादिभ्योऽङित्यङ् प्रत्ययः । नृपस्य मण्डलं राष्ट्रमनन्तरः सन्निहितोजिगीषुरापगारयोनदीवेगः । शिथिलमन्तर्भेदजर्ज्जरं कूलमिवाभिभूयाक्रम्य हरति ॥ ५३ ॥

अन्विति । इतीत्थं आकुलं अरिनिकारस्मरणात् क्षुभितमर्ज्जुनाग्रजं भीमसेनन्नयवर्त्म नीतिमार्गमनाकुलमसङ्कीर्णं यथा तथा

मधुरैरवशानि लम्भय
न्नपि तिर्य्यञ्चि शमन्निरीक्षितैः।
परितः पटु बिभ्रदेनसा
न्दहनन्धाम विलोकनक्षमम् ॥ ५५ ॥
सहसोपगतः सविस्मयं
स्तपसां सूतिरसूतिरापदाम्।
ददृशे जगतीभुजा मुनिः
स वपुष्मानिव पुण्यसञ्चयः ॥ ५६ ॥

अनुशासतं उपदिशन्तं। अचित्यादयः षडित्यभ्यस्तानुमभावः। तं युधिष्ठिरम्पराशरात्मजो वेदव्यासः। स्वयमभिवाञ्छितोऽर्थइव साक्षान्मनोरथइवेत्युत्प्रेक्षा। अभीयाय प्राप्तः ॥ ५४ ॥

अथ युग्मेनाह। मधुरैरिति। मधुरैः शान्तैर्निरीक्षितैरवलोकनैः। नपुंसके भावे क्तः। न विद्यते वशं आयत्तत्वं येषान्तानि अवशानि प्रतिकूलानि। वश आयत्ततायाञ्चेति विश्वः। तिर्य्यञ्चि मृगपक्ष्यादीनि शमं शान्तिं लम्भयन् प्रापयन्। लभेश्चेति नुमागमः। गत्यर्थेत्यादिना द्विकर्म्मकत्वं परितः पटूज्ज्वलं एनसाम्। दह्यतेऽनेनेति दहनं निवर्त्तकन्तथापि विलोकनक्षमन्दर्शनीयं वह्न्यादिविलक्षणमिति भावः। धाम तेजो बिभ्रत् ॥ ५५ ॥

सहसेति। पुनः सहसोपगतः अकस्मादागतः तपसां सूतिः प्रसवः आपदां असूतिः अप्रभवः निवर्त्तकइति यावत्। स मुनिर्व्यासः वपुष्मान् देहधारी पुण्यसञ्चयः पुण्यराशिरिवेत्युत्प्रेक्षा जगतीभुजा राज्ञा सविस्मयन्ददृशे दृष्टः ॥ ५६ ॥

अथोच्चकैरासनतः परार्द्धा-
दुद्यन्स धूतारुणवल्कलाग्रः ।
रराज कीर्णाकपिशांशुजालः
शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥ ५७ ॥
अवहितहृदयोविधाय सोऽर्हा-
मृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलञ्चकार पश्चा-
त्प्रशमइव श्रुतमासनन्नरेन्द्रः ॥ ५८ ॥

अथेति । अथ दर्शनानन्तरम् । उच्चकैरुन्नतात्परार्द्ध्यात्श्रेष्ठात् । अर्द्धाच्च परावराधमोत्तमपूर्व्वाच्चेति यत्प्रत्ययः । आसनतः सिंहासनादुद्यन्नुत्तिष्ठन् अतएव धूतानि कम्पितान्यरुणानि वल्कलाग्राणि यस्य स तथोक्तः । स नृपः कीर्णं विस्तृतमाकपिशमंशुजालं यस्य स तथोक्तः सुमेरोः शृङ्गादुद्यन्तिग्मरश्मिरिव रराज ॥ ५७ ॥

अवहितेति । स नरेन्द्रोऽवहितहृदयोऽप्रमत्तचित्तः सन् । चित्तन्तु चेतोहृदयं स्वान्तं हृन्मानसं मनइत्यमरः । ऋषिप्रवरे मुनिश्रेष्ठे । ऋषिवदृष्यर्हाम् । अर्हत्यर्थे वतिप्रत्ययः । गुरूपदिष्टां शास्त्रीयामित्यर्थः । अर्हाम्पूजां । गुरोश्च हलइत्यकारप्रत्ययः । विधाय पश्चादनन्तरं तदनुमतन्तेनानुज्ञातमासनं । प्रशमः शान्तिः श्रुतं शास्त्रश्रवणमिवालञ्चकार । उक्तञ्च पूर्व्वम् । प्रशमस्य भवत्यलङ्क्रियेति । मुन्याज्ञयोपविष्टवानित्यर्थः ॥ ५८ ॥

व्यक्तेति । व्यक्तोदितैः स्फुटोद्गतैः स्मितमयूखैर्विभासितोष्ठो यस्य स तथोक्तः । विकीर्णधाम्नोविस्ततेजसो मुनेरभिमुखं

व्यक्तोदितस्मितमयूखविभासितोष्ठ
स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ।
तन्वन्तमिद्धमभितोगुरुमंशुजालं
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्त्तेः ॥ ५९ ॥
इति श्रीभारविकृतौ किरातार्ज्जुनीये
महाकाव्ये द्वितीयः सर्गः ॥ २ ॥

तिष्ठन्स नृपः इद्धं समृद्धन्दीप्तमिति यावत् । अंशुजालन्तन्वन्तं गुरुं गीष्पतिम् । गुरुर्गीष्पतिपित्राद्याविव्यमरः । अभितः परित इत्यादिना द्वितीया । अभितोऽभिमुखं तिष्ठतः इति शेषः । सकलस्य सम्पूर्णस्य शशाङ्का मूर्त्तिर्यस्य तस्येन्दोर्लक्ष्मीमुवाह वहतिस्म । अत्रापि मेयस्य राज्ञः उपमानेन्दुधर्म्मेण लक्ष्म्याः साक्षात्सम्बन्धासम्भवात्त इशीं लक्ष्मीमिवेति प्रतिविम्बकरणाक्षेपादसम्भवद्वस्तुसम्बन्धात् पदार्थ वृत्तिर्निदर्शनालङ्कारः । तदुक्तं प्रतिविम्बस्य करणं यत्रार्थस्य च वस्तुयोगेनागम्यमसम्भविता निदर्शना द्विधाभिमतेति ॥ ५९ ॥

इति श्रीमहोपाध्यायमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां द्वितीयः सर्गः ॥ २ ॥

ततः शरच्चन्द्रकराभिरामै-
रुत्सर्प्पिभिः प्रांशुमिवांशुजालैः।
बिभ्राणमानीलरुचम्पिशङ्गी-
र्ज्जटास्तडित्वन्तमिवाम्बुवाहम् ॥ १ ॥
प्रसादलक्ष्मीन्दधतं समग्रां
वपुः प्रकर्षेण जनातिगेन।
प्रसह्य चेतस्सु समासजन्त-
मसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥

अथ त्रिभिर्मुनिं विशिनष्टि। चतुर्भिः कलापकमाह। तदुक्तम्। द्वाभ्यां युग्ममिति प्रोक्तन्त्रिभिः श्लोकैर्विशेषकम्। कलापकश्चतुर्भिः स्यात्तदूर्द्ध्वं कुलकं स्मृतमिति। तत इति। ततउपवेशनानन्तरं शरच्चन्द्रकराभिरामैराह्लादकैरित्यर्थः। उत्सर्प्पिभिरूर्द्ध्वं प्रसारिभिः अंशुजालैः प्रभापटलैः प्रांशुमुन्नतमिव स्थितमित्युत्प्रेक्षा। पुनः आनीलरुचं कृष्णवर्णं पिशङ्गीः पिङ्गलवर्णाः। गौरादित्वात् ङीष्। जटाः बिभ्राणन्धारयन्तमतएव तडित्वन्तं विद्युद्युक्तमम्बुवाहमिव स्थितमित्युत्प्रेक्षा। धर्म्मात्मजो युधिष्ठिरः एतादृशं मुनिमावभाषे इति चतुर्थश्लोकेनान्वयः ॥ १ ॥

प्रसादेति। पुनः समग्रां सम्पूर्णां प्रसादः सौम्यता तस्य लक्ष्मीं सम्पदन्दधतम्। अतएव जनमतिगच्छतीति जनातिगेन लोकातिशायिना। अन्येष्वपि दृश्यतइति डप्रत्ययः। वपुःप्रकर्षेण आकारसम्पदा असंस्तुतानामपरिचितानामपि व्यासोऽयमित्यजानतामित्यर्थः। संस्तवः स्यात्परिचयइत्यमरः। चेतस्सु चित्तेष्वार्द्रम्भावं

अनुद्धताकारतया विविक्ता
न्तन्वन्तमन्तःकरणस्य वृत्तिम् ।
माधुर्य्यविस्रम्भविशेषभाजा
कृतोपसम्भाषमिवेक्षितेन ॥ ३ ॥
धर्म्मात्मजो धर्म्मनिबन्धिनीना
मसूतिमेनः प्रणुदां श्रुतीनाम् ।
हेतुन्तदभ्यागमने परीप्सुः
सुखोपविष्टं मुनिमावभाषे ॥ ४ ॥
॥ चतुर्भिः कलापकम् ॥

स्नेहार्द्रभावमभिप्रायमस्य बलात् समासजन्तं लगयन्तमिति यावत् । दंशसञ्जस्वञ्जांश पीत्युपधालोपः । प्रसन्नाकारेषु सर्व्वोऽपि स्निह्यतीति भावः ॥ २ ॥

अनुद्धतेति । पुनरनुद्धताकारतया शान्ताकारत्वेन लिङ्गेनान्तःकरणस्य वृत्तिं विविक्तां पूतां शान्तामिति यावत् । विविक्तौ पूतविजनावित्यमरः । तन्वन्तम्प्रकटयन्तमाकृतिरेवास्य चित्तशुद्धिं कथयतीत्यर्थः । पुनः माधुर्य्यं निसर्गसौम्यतां विस्रम्भो विश्वासः । समौ विस्रम्भविश्वासावित्यमरः । तयोर्विशेषमतिशयम्भजतीति तथोक्तेनेक्षितेन दर्शनेनैव कृताउपसम्भाषा सम्भाषणं येन तमित्युत्प्रेक्षा दृष्टिविशेषेणैवोपसम्भाषणमिव स्थितमित्यर्थः । काशिकायां तूपसम्भाषा उपसान्त्वनमिति भासनादिसूत्रे ॥ ३ ॥

धर्म्मेति । पुनः धर्म्मं निबध्नन्तीति धर्म्मनिबन्धिनीनामग्निहोत्रादिधर्म्मप्रतिपादिकानां एनःप्रणुदामघच्छिदां क्विप् ।

अनाप्तपुण्योपचयैर्दुरापा
फलस्य निर्द्धूतरजाः सवित्री ।
तुल्या भवद्दर्शनसम्पदेषा
वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥

श्रुतीनां वेदानां । श्रुतिः स्त्री वेद आम्नायइत्यमरः । प्रश्रुतिम्प्रभवं सुखेनोपविष्टं मुनिन्तदभ्यागमने तस्य मुनेरागमने हेतुङ्कारणम्परीप्सुर्जिज्ञासुः । आप्नोतेः सन्नन्तादुप्रत्ययः । आप्ज्ञप्यधामीदितीकारः अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः । आवभाषे उवाच ॥ ४ ॥

अनाप्तेति । अनाप्तपुण्योपचयैरकृतपुण्यसञ्चयैर्दुरापा दुर्लभा फलस्य सवित्री श्रेयस्करीत्यर्थः । निर्द्धूतरजाः हृतरजोगुणा । एकत्र रजो धूलिरन्यत्र गुणः । रजो रजोगुणे धूलौ परागार्त्तवयोरपीति विश्वः । एषा भवद्दर्शनसम्पत्सम्पत्तिर्लाभइति यावत् । सम्पदादिभ्यः क्विपो भावार्थत्वात् । वीतबलाहकाया गतमेघाया दिवः आकाशस्य सम्बन्धिन्याः वृष्टेस्तुल्येत्युपमालङ्कारः । अनभ्रवृष्टिवदतर्क्कितोपपन्नम्भवद्दर्शनं सर्व्वथा कस्यचिच्छ्रेयसो निदानमित्यर्थः । वारि वहतीति बलाहकः । पृषोदरादित्वात्साधुः ॥ ५ ॥

अथेति । अद्य क्रतूनां क्रियाः अनुष्ठानानि कामान् दुहन्तीति कामदुघाः फलदाइत्यर्थः । दुहेः कप् घश्चेति कप् प्रत्ययः घादेशश्च । सम्प्रत्यद्य भूमिदेवा ब्राह्मणाः । द्विजात्यग्रजन्मभूदेववाडवाः विप्रश्च ब्राह्मणइत्यमरः । सत्याशिषो जाताः ब्राह्मणाशिषोऽद्य फलिताइत्यर्थः । यद्यतः कारणात् त्वय्यागते सति त्वदागमनेन

अद्य क्रियाः कामदुघाः क्रतूनां
सत्याशिषः सम्प्रति भूमिदेवाः ।
आसंसृतेरस्मि जगत्सु जात
स्त्वय्यागते यद्बहुमानपात्रम् ॥ ६ ॥
श्रियं विकर्षत्यपहन्त्यघानि
श्रेयः परिस्नौति तनोति कीर्त्तिम् ।
सन्दर्शनं लोकगुरोरमोघ
न्तवात्मयोनेरिव किन्न धत्ते ॥ ७ ॥

निमित्तेनेत्यर्थः । अस्मि अहमित्यर्थेऽव्ययम् । अस्मीत्यस्मदर्थानुवादे ऽहमर्थेऽपीति गणव्याख्याने । दासे कृतागसि भवत्युचितः प्रभूणा म्पादप्रहारइति सुन्दरि नास्मि दूये इति प्रयोगात् । आसंसृतेरा संसारात् यावत्संसारमित्यर्थः । अभिविधावाङ् विकल्पादसमासः। जगत्सु बहुमानपात्रम्बहुयोग्यताभाजनञ्जातः । सकलसत्कर्म्मफलं भूतन्त्वदागमनं येन मे जगन्मान्यतेति भावः ॥ ६ ॥

श्रियमिति । आत्मयोनेर्ब्रह्मणइव लोकगुरोस्तव अमोघ मविफलं सन्दर्शनं श्रियं विकर्षति आकृष्य ददाति । अघानि दुःखा न्यपहन्ति । अंहोदुःखव्यसनेष्वघमित्यमरः । श्रेयः पुरुषार्थम्परि स्नौति स्रवति धातूनामनेकार्थत्वात् परिस्नौतीति पाठेऽपि सए वार्थः । कीर्त्तिन्तनोति । किं बहुना किन्न धत्ते किञ्चिं न करोति सर्व्वङ्करोतीत्यर्थः ॥ ७ ॥

ज्योतिर्मयूखेऽपि हिमद्युतौ मे
न निर्वृतं निर्वृतिमेति चक्षुः ।
समुज्झितज्ञातिवियोगखेद
न्त्वत्सन्निधावुच्छ्वसतीव चेतः ॥ ८ ॥
निरास्पदम्प्रश्नकुतूहलित्व
मस्मास्वधीनङ्किमु निःस्पृहाणाम् ।
तथापि कल्याणकरीङ्गिरन्ते
मां श्रोतुमिच्छा मुखरीकरोति ॥ ९ ॥

ज्योतिरिति । हे भगवन् ज्योतिर्मयूखे सुधास्राविकरे हिमद्युताविन्दावपि विषये न निर्वृतम् । नञर्थस्य नञ्शब्दस्य सुप्सुपेति समासः मे चक्षुस्त्वत्सन्निधौ निर्वृतिं सुखमेति । तथा चेतश्च समुज्झितज्ञातिवियोगखेदन्त्यक्तबन्धुविरहदुःखं समुच्छ्वसतीव अनुरोधेन प्राणितीवेत्युत्प्रेक्षा । पूर्व्वार्द्धे तु निर्वृतिकारणे सत्यपि इन्दावनिर्वृतिकथनाद्विशेषोक्तिः । तदुक्तम् । तत्सामग्र्याम निर्वृत्तिर्विशेषोक्तिर्निगद्यतइति ॥ ८ ॥

निरास्पदमिति । प्रश्नकुतूहलित्वं निरास्पदं आगमनप्रयोजनप्रश्नोनिरास्पदइत्यर्थः । आस्पदं प्रतिष्ठायामिति निपातः । प्रश्नानवकाशे हेतुमाह । निस्पृहाणां युष्मत्सदृशामित्यर्थः । अस्मास्वधीनमायत्तङ्किमु न किञ्चिदस्मत्तोलभ्यमित्यर्थः । आधारत्वविवक्षायां सप्तमी । तथापि कल्याणकरीगसङ्गिरैकहेतुमित्यर्थः । निस्पृहवृत्तेः पारार्थ्यादिति भावः । कर्म्मेहेलिति टप्रत्यये ङीप् ।

इत्युक्तवानुक्तिविशेषरम्यं
मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां
द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥

अतस्ते गिरं श्रोतुमिच्छामीं मुखं वागस्यास्तीति मुखरो निरन्तर भाषी। मुखकुञ्जेभ्यो रो वक्तव्य इति रः। दुर्मुखे मुखरावद्धमुखावित्य मरः। ततः च्विप्रत्ययः मुखरीकरोति व्यापारयतीत्यर्थः। निःस्पृह स्यापि ते वाक्यमसङ्कितकरत्वाच्छ्रोतव्यमिति भावः ॥ ९ ॥

इतीति। इतीत्थमुक्तिविशेषरम्यमुक्तिवैचित्र्यचारु यथा तथोक्त वान्। उदारचेता महामना नरेन्द्रो द्वैपायनेन व्यासेन द्वीपमयनं स्थानञ्जन्मभूमिर्यस्य स द्वीपायनः सएव द्वैपायनः। प्रज्ञादिभ्य इति स्वार्थेऽण्प्रत्ययः नापत्यार्थे नडादिभ्यः फक् तेष्वेव पाठात् बाधि तार्थत्वाच्च। जयोपपत्तौ मनः समाधाय जयसिद्धिमपेक्ष्येत्यर्थः। इति वक्ष्यमाणप्रकारामुदारामर्थवतीं गिरमभिदधे उक्तः। दुह्या दित्वादप्रधाने कर्म्मणि लिट्। प्रधानकर्म्मण्याख्येये लादीनाहुर्द्वि कर्म्मणाम्। अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्म्मण इति वचनात् ॥ १० ॥

आदौ तावत्तस्य माध्यस्थताभङ्गदोषं युग्मेन परिहरति। चिचीषतामिति। अलघ्वीं गुर्व्वीं। वोतोगुणवचनादिति ङीष्। यशो वतंसाङ्गीर्त्तिभूषणां उभयत्र इहचामुत्र च भूतिं श्रेयश्चिची षतां सञ्चेतुं सङ्ग्रहीतुमिच्छतां चिनोतेः सन्नन्तात्कर्त्तरि प्रत्ययः। जन्म वतां शरीरिणामन्येषु विषये तुल्यरूपा एकविधा वृत्तिर्व्यवहारो

चिचीषतां जन्मवतामलघ्वीं
यशोवतंसामुभयत्र भूतिम् ।
अभ्यर्हिता बन्धुषु तुल्यरूपा
वृत्तिर्विशेषेण तपोधनानाम् ॥ ११ ॥
तथापि निघ्नं नृप तावकीनैः
प्रह्वीकृतं मे हृदयं गुणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां
भवन्ति भव्येषु हि पक्षपाताः ॥ १२ ॥
॥ युग्मम् ॥

ऽभ्यर्हिता उचिता तपोधनानान्त्वस्मत्सदृशां विशेषेण नियमेनाभ्यर्हिता ॥ ११ ॥

तथापीति । तथापि तुल्यवृत्तौ चित्तेऽपि हे नृप तावकीनैस्त्वदीयैः । युष्मदस्मदोरन्यतरस्यां खञ् चेति खञ् प्रत्ययः तवकममकावेकवचनइति तवकादेशः । गुणौघैः प्रह्वीकृतमावर्ज्जितं मे हृदयन्निघ्नं त्वदायत्तम् । अधीनोनिघ्नआयत्तइत्यमरः । ननु निस्पृहस्य कोऽयम्पक्षपातइत्यत्राह । वीतेति । वीतस्पृहाणां विरक्तानां मुक्तिभाजां मुमुक्षूणामपीत्यर्थः । भवन्तीति भव्याः साधवः । भव्यगेयेत्यादिना कर्त्तरि निपातः । तेषु पक्षपाताः स्नेहाभवन्ति नतु साध्वनुग्रहोमहतां माध्यस्थभञ्जकइति भावः ॥ १२ ॥

अथ नृपस्य गुणवत्तां प्रकटयितुन्धृतराष्ट्रस्य दुश्चेष्टामुद्घाटयति । सुतादिति । यूयन्तस्य राज्ञोधृतराष्ट्रस्य सुतान किम् अपि तु सुताएवेत्यर्थः । गुणैः क्षान्तिदमदाक्षिण्यादिभिः सुयोधन

सुतान यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुणैरतीताः ।
यस्त्यक्तवान्वः स वृथा बलाद्वा
मोहं विधत्ते विषयाभिलाषः ॥ १३ ॥
जहातु नैनङ्कथमर्थसिद्धिः
संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगाहि जयान्तरायाः
प्रमाथिनीनां विपदाम्पदानि ॥ १४ ॥

आतीताभातिक्रान्तावा अतीताएवेत्यर्थः । कर्त्तरि क्तः । असुतत्व मगुणत्वञ्च त्यागे हेतुः युष्मासु तन्नास्तीत्यर्थः । उपालम्भे कारण माह । य इति । यः धृतराष्ट्रोवोयुष्मान्वृथा निष्कारणमेव त्यक्त वान् यदि वयं सुताः गुणाधिकाश्च तर्हि कथमत्याक्षीत्तत्राह । बलादिति । स विषयाभिलाषोभोगतृष्णा बलाद्बलात्कारादिव । वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये इति विश्वः । मोह मविवेकं विधत्ते विषयाभिलाषातिरिक्तोन कश्चिद्युष्मत्त्यागहेतु रस्तीत्यर्थः । अत्र कार्य्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥ १३ ॥

अथ राज्ञउत्साहवर्द्धनाय शत्रोर्हानिं सूचयति । जहा त्विति । एनं धृतराष्ट्रमर्थसिद्धिः कथं न जहातु जहात्वेवेत्यर्थः । प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति प्राप्तकाले लोट् । तस्य हानि कालः प्राप्तइत्यर्थः । कुतः योधृतराष्ट्रः संशय्य सन्दिह्य कर्णादिषु तिष्ठते कर्णादीन्मन्त्रिणः सन्दिग्धार्थे निर्णेतृत्वेनावलम्बतइत्यर्थः ।

पथश्च्युतायां समितौ रिपूणां
धर्म्यान्दधानेन धुरञ्चिराय ।
त्वया विपत्स्वप्यविपत्तिरम्य
माविष्कृतम्प्रेम परं गुणेषु ॥ १५ ॥

प्रकाशनस्थेयाख्ययोश्चेति स्थेयाख्यायामात्मनेपदम् प्रकाशस्थेया ख्ययोश्चेति तङ् तिष्ठतेऽस्मिन्निति स्थेयोविवादपदनिर्णेता । तथाहि असाधुयोगादुर्ज्जनसंसर्गाजयान्तरायाः जयविघातकाः । किञ्च प्रमाथिनीनामुन्मूलनशीलानां विपदाम्पदानि स्थानानि । पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वित्यमरः । न केवलं जय घातिनः किन्त्वनर्थकारिणश्चेत्यर्थः । धृतराष्ट्रोऽपि दुर्ज्जनविधेयत्वा द्विनङ्क्ष्यतीति भावः ॥ १४ ॥

एवं शत्रोरनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति । पथ इति । रिपूणां समितौ सभायां । सभासमितिसंसदइत्यमरः । पथश्च्युतायां मार्गाद्भ्रष्टायाम्दुरात्मनोदुःशासनस्य स्त्रीग्रहण साहसमङ्गीकृतवत्यामित्यर्थः । चिराय धर्म्या धर्मादनपेतां । धर्म पथ्यर्थन्यायादनपेतइति यत्प्रत्ययः । धुरम्भारन्दधानेन कृच्छ्रे ऽपि धर्मादचलतेत्यर्थः । त्वया विपत्स्वपि अविपत्ति अविनाशि अतएव रम्यं गुणेषु शान्त्यादिषु विषये परमुत्कृष्टम्प्रेमाविष्कृतं प्रकटीकृतं दुःसहमपि सोढवता त्वया साधु कृतमिति भावः॥१५॥

विधायेति । किञ्च शमएव एका मुख्या वृत्तिर्यस्य तस्य अपरोपतापिनइत्यर्थः । भवतः छलेन कपटेन आत्मने हित आत्मनीनः स न भवतीत्यनात्मनीनः स्वस्यैवानर्थहेतुरित्यर्थः

विधाय विध्वंसमनात्मनीनं
शमैकवृत्तेर्भवतश्छलेन ।
प्रकाशितत्वन्मतिशीलसाराः
कृतोपकाराइव विद्विषस्ते ॥ १६ ॥
लभ्या धरित्री तव विक्रमेण
ज्यायांश्च वीर्य्यास्त्रबलैर्विपक्षः ।
अतः प्रकर्षाय विधिर्विधेयः
प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ १७ ॥

नं । आत्मविश्वजनभोगोत्तरपदात्खइति खप्रत्ययः । विध्वंसमप कारं विधाय कृत्वा प्रकाशितः प्रख्यापितस्त्वन्मतिशीलयोस्तव प्रज्ञास्वभावयोः सारः प्रकर्षोयैस्ते तथोक्ताः ते तव विद्विषः कृतोपकाराइवोपकृतवन्तइव जाताइति शेषः अपकारायैव संवृत्तः यदेषां दौर्जन्यं युष्मत्सौजन्यञ्च जगति सुव्यक्तमासी दित्यर्थः । विद्यमानस्यापि सुजनस्य चन्दनदारुणइव गुणाः परिभवे एव प्रचुराभवन्तीति भावः ॥ १६ ॥

अथ प्रयोजनान्तरमाह । लभ्येति । तव त्वयेत्यर्थः । कृत्यानां कर्त्तरि वेति षष्ठी । धरित्री विक्रमेण लभ्या प्राप्या नच सुलभ्या.तं विनेत्यर्थः । विपक्षश्च शत्रुरपि वीर्य्यं शौर्य्यं अस्त्राण्याग्नेयादीनि बलानि सैन्यानि तैर्ज्यायान् प्रशस्ततरोऽधिकतरइति यावत् । ज्येष्ठस्य ज्यादादीयसइति ज्यादेशः । अतः प्रकर्षायाधिक्याय विधिरुपायोविधेयः कर्त्तव्यः हि यस्माद्रणे जयश्रीः प्रकर्षतन्त्रा

त्रिःसप्तकृत्वोजगतीपतीनां
हन्ता गुरुर्यस्य स जामदग्न्यः।
वीर्य्यावधूतः स्म तदा विवेद
प्रकर्षमाधारवशङ्गुणानाम् ॥ १८ ॥

प्रकर्षप्रधाना उत्कर्षायत्तेत्यर्थः। तन्त्रम्प्रधाने सिद्धान्तेइत्यमरः। बलिनएव जयोनतु दुर्ब्बलस्येति भावः ॥ १७ ॥

अथ त्रिरित्यादिना श्लोकचतुष्टयेन विपक्षज्यायस्त्वं वर्णयति। त्रिःसप्तेति। त्रिरावृत्तान्सप्त वारान् त्रिःसप्तकृत्वः एकविंशतिकृत्व इत्यर्थः। त्रिसप्तशब्दयोः सुप्सुपेति समासः सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति कृत्वसुच् प्रत्ययः। जगतीपतीनां महीपतीनां हन्ता नाशकः गुरुरस्त्रवेदोपदेष्टा स प्रसिद्धइत्यर्थः। अतएव यच्छब्दानपेक्षत्वं तदुक्तङ्काव्यप्रकाशे। अप्रसिद्धानुभूतार्थविषयस्तच्छब्दोयच्छब्दोपादानं नापेक्षतइति। जमदग्नेरपत्यं पुमान् जामदग्न्यः। गर्गादिभ्योयञिति यञ्प्रत्ययः। यस्य भीष्मस्य वीर्य्यावधूतोविक्रमाभिभूतः अम्बिकास्वयम्वरे इत्यर्थः। तदा भङ्गप्राप्तिसमये गुणानां शौर्य्यादीनाम्प्रकर्षमतिशयं वीर्य्यातिशयम्। आधारवशमाश्रयाधीनं विवेद जज्ञे स्वविद्यायाः स्वशिष्ये भीष्मे स्वस्मादपि प्रकर्षाधानदर्शनादिति भावः। स्म पादपूरणे भूतेऽर्थेचेति विश्वः ॥ १८ ॥

यस्मिन्निति। यस्मिन्भीष्मे विषये अनीश्वरस्य भावोऽनैश्वर्य्यमसामर्थ्यं नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानामिति विकल्पान्नञः पूर्व्वपदवृद्ध्यभावः। तेन कृतव्यलीकोजनितवैलक्ष्यः। दुःखे वैलक्ष्ये

यस्मिन्ननैश्वर्य्यकृतव्यलीकः
पराभवम्प्राप्त इवान्तकोऽपि ।
धुन्वन्धनुः कस्य रणे न कुर्य्या-
न्मनो भयैकप्रवणं स भीष्मः ॥ १९ ॥
सृजन्तमाजाविषुसंहतीर्वः
सहेत कोपज्वलितं गुरुं कः ।
परिस्फुरल्लोलशिखाग्रजिह्वं
जगज्जिघत्सन्तमिवान्तवह्निम् ॥ २० ॥

व्यलीकमिति यादवः । अन्तकोऽपि यमोऽपि पराभवम्प्राप्त इव भीष्मस्येच्छामरणत्वादन्तकोऽपि पराजित इवास्ते किमुतान्य इति भावः । स भीष्मो रणे धनुर्धुन्वन् कस्य मनो भयैकप्रवणम्भये एकप्रवणमेकोन्मुखं शिवभागवतवत्समासः । न कुर्य्यात्सर्व्वस्यापि मनसि भयं कुर्य्यादेवेत्यर्थः ॥ १९ ॥

सृजन्तमिति । आजौ रणे इषुसंहतीर्बाणसङ्घान् सृजन्तं वर्षन्तं कोपज्वलितमत एव परिस्फुरन्त्यो लोलाश्च शिखाग्राण्येव जिह्वा यस्य तन्तथोक्तञ्जगत् लोकञ्जिघत्सन्तमत्तुमिच्छन्तम् । अदेः सन्नन्ताच्छत्रृप्रत्ययः लुङ्सनोर्घस्लृ इति घस्लृआदेशः । अन्तवह्निं कालाग्निमिव स्थितं गुरुं द्रोणं वो युष्माकं मध्ये कः सहेत सोढुं शक्नुयात् न कोऽपीत्यर्थः । शकि लिङ् चेति शक्यर्थे लिङ् ॥ २० ॥

निरीक्ष्येति । संरम्भेण कोपेन निरस्तन्त्याजितन्धैर्य्यं निर्व्विकारचित्तत्वं येन तन्तथोक्तम् । आकारेणैव परधैर्य्यापहारिण

निरीक्ष्य संरम्भनिरस्तधैर्य्यं
राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभम्भयेषु
जायेत मृत्योरपि पक्षपातः ॥ २१ ॥
यया समासादितसाधनेन
सुदुश्चरामाचरता तपस्याम् ।
एते दुरापं समवाप्य वीर्य्य
मुन्मूलितारः कपिकेतनेन ॥ २२ ॥

मित्यर्थः । आराधितजामदग्न्यं शुश्रूषितभार्गवं जामदग्न्यादधि गतास्त्ररहस्यमित्यर्थः । राधेयं राधासुतं कर्णम् । स्त्रीभ्योढक् । निरीक्ष्य मृत्योरप्यसंस्तुतेषु अपरिचितेषु । संस्तवः स्यात्परिचय इत्यमरः । भयेषु प्रसभम्पक्षपातः परिचयोजायेत । मृत्युरप्यस्मा द्बिभीयात्किमुतान्यइति भावः । सम्भावनायां लिङ् । अत्रजनि क्रियापेक्षया समानकर्तृकत्वाभावेऽपि पक्षपातक्रियापेक्षया तत्सम्भ वान्निरीक्ष्येति ल्यप्निर्देशः समर्थनीयप्रधानोपसर्जनभावस्त्वप्रयो जकइति व्यक्तिविवेककारः । अत्र भयसम्बन्धरहितस्य मृत्योर्भय सम्बन्धाभिधानादसम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारः ॥ २१ ॥

अथानन्तरङ्करणीयमागमनप्रयोजनञ्च युग्मेनाह । यये त्यादि । यया विद्यया करणेन सुदुश्चरामतिदुष्करान्तपस्यां तपश्चर्यां कर्म्मणोरोमन्थतपोभ्यां वर्तिचरोरिति क्यङ् । अप्रत्यया दिति स्त्रियामप्रत्ययः । आचरता पशुपतिं प्रति तपः कुर्व्वते

महत्त्वयोगाय महामहिम्ना
माराधनीन्तां नृप देवतानाम्।
दातुम्प्रदानोचित भूरिधाम्नी
मुपागतः सिद्धिमिवास्मि विद्याम्॥ २३ ॥
॥ युग्मम् ॥

त्यर्थः । अतएव समासादितं साधनम्पाशुपतास्त्ररूपं येन तेन कपिर्हनुमान् केतनञ्चिह्नं यस्य तेनार्ज्जुनेनेत्यर्थः । दुरापमन्यस्य दुर्लभं वीर्य्यन्तेजः समवाप्य एते पूर्व्वोक्ताभीष्मादयः उन्मूलितारः उन्मूलयिष्यन्ते । उन्मूलयतेर्ण्यन्तात्कर्मणि लुट् अत्र चिण्वदि डागमेऽपि तस्यासिद्धवदत्राभादिति असिद्धत्वात् णेरनिटि इति णिलोपः तन्निमित्तस्यैवानिटीति निषेधात् । उक्तञ्च वृद्धिश्चिण्वदु कहन्तेषु यत्वं दीर्घश्चोक्तोयोमितां वा चिण्णीति । इट्चासिद्ध त्वेन मे लुप्यते णिर्नित्यश्चाऽयं वलनिमित्तोविघातीति ॥ २२ ॥

महत्त्वेति । हे नृप महत्त्वयोगाय प्रकर्षलाभाय महामहिम्नां महानुभावानान्देवतानामिन्द्रादीनां आराध्यतेऽनयेत्याराधनीं तां प्रसादयित्रीमित्यर्थः । करणे ल्युट् ङीप् । भूरिधाम्नीं महा प्रभावां । धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोरिति विश्वः। अनउपधालोपिनोऽन्यतरस्यामिति वा ङीप् । विद्यामैन्द्रमन्त्ररूपां सिद्धिं साक्षात्कार्य्यसिद्धिमिवेति विद्यायाः अमोघत्वोक्तिः हे प्रदानोचित दानपात्र प्रभूतफलभोक्तृत्वादस्य पात्रत्वोक्तिः । दातु मुपागतोऽस्मि ॥ २३ ॥

इत्युक्तवन्तं व्रज साधयेति
प्रमाणयन्वाक्यमजातशत्रोः ।
प्रसेदिवांसन्तमुपाससाद
वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥

निर्य्याय विद्याथ दिनादिरम्या
दिम्बादिवार्क्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता
दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥

इतीति । इत्युक्तवन्तम्प्रसेदिवांसम्प्रसन्नं । भाषायां सदवसश्रुव इति क्वसुः । तं मुनिञ्जिष्णुर्जयनशीलोऽर्ज्जुनः । ग्लाजिस्थश्चेति ग्स्नुप्रत्ययः । व्रज साधयानुतिष्ठेत्येवं रूपं अजातशत्रोर्धर्म्मराजस्य वाक्यमविद्वेषणशीलत्वादियं संज्ञा । वाक्यं प्रमाणयन् तदादिष्टः सन्नित्यर्थः । अन्ते वसन् छात्रइव । छात्रान्तेवासिनौ शिष्यइत्य मरः । विनयेनानौद्धत्येनोपाससाद समीपम्प्राप ॥ २४ ॥

निर्य्यायेति । अथ वह्निकणावदाता स्फुलिङ्गवदुज्ज्वला देवता सान्निध्यादिति भावः । विद्या ऐन्द्रमन्त्ररूपा दिनादिरम्यात् प्रभातभास्करस्य बिम्बादिव महर्षेर्व्यासस्य मुखान्निर्य्याय निर्गत्य समासेऽनञ्पूर्व्वे क्त्वोल्यप् । दीप्तिरर्क्कदीप्तिरर्क्कदीधितिः स्फुर द्विकसत्पद्ममिव पार्थाननमर्ज्जुनस्य मुखमभिपेदे प्रविष्टा ॥ २५ ॥

योगञ्चेति । स योग्यतमाय अर्हतमाय तस्मै पार्थाय तं वक्ष्यमाणं महिमानं योगं ध्यानं विधिवत् । योगः संहननोपायध्यानसङ्गति

योगञ्च तं योग्यतमाय तस्मै
तपःप्रभावाद्वितताार सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे
समुन्मिमीलेव चिराय चक्षुः ॥ २६ ॥
आकारमाशंसितभूरिलाभ-
मधानमन्तःकरणानुरूपम् ।
नियोजयिष्यन्विजयोदये तं
तपःसमाधौ मुनिरित्युवाच ॥ २७ ॥

युक्तिरित्यमरः । तपःप्रभावात्सद्यो वितताार ददौ चिरकालसाध्यमपीति भावः । येन योगेन तत्त्वेषु प्रकृतिमहदादिषु । तथा च । मूलप्रकृतिर्महानहंकारो मनश्च पञ्च तन्मात्राणि पञ्च बुद्धीन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि पञ्च महाभूतानीति चतुर्विंशति तत्त्वानि । तत्रावभासे साक्षात्कारे कृते सति अस्यार्ज्जुनस्य चक्षुरक्षि चिराय समुन्मिमीलेवोन्मिषितमिवेत्युत्प्रेक्षा । तदा तस्य कोऽपि महानखिलाज्ञानभञ्जनसत्त्वावभासश्चिरादन्धस्य दृष्टिलाभ इवाभवदिति भावः ॥ २६ ॥

आकारमिति । आशंसित आख्यातो भूरिलाभोऽनेकश्रेयःप्राप्तिर्येन तं तथोक्तं महाभाग्यसूचकमित्यर्थः । अन्तःकरणशब्देन तद्वृत्तिरुत्साहो लक्ष्यते । तदनुरूपं तत्सदृशं तुल्यमुत्साहानुगुणव्यापारक्षममित्यर्थः । आकारं मूर्त्तिं दधानं तमर्ज्जुनं मुनिर्विजयोदये विजयफलके तपःसमाधौ तपोनियमे । समाधिर्नियमे ध्याने मौने चैव

अनेन योगेन विवृद्धतेजा
निजां परस्मै पदवीमयच्छन् ।
समाचराचारमुपात्तशस्त्रो
जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥
करिष्यसे यत्र सुदुश्चराणि
प्रसत्तये गोत्रभिदस्तपांसि ।
शिलोच्चयं चारु शिलोच्चयन्त-
मेष क्षणान्नेष्यति गुह्यकस्त्वां ॥ २९ ॥

समर्थनद इति विश्वः । नियोजयिष्यन् नियोजयितुमिच्छन्नित्यर्थः । लृट् शेषे चेति लृट् लृटः सद्वेति शतृप्रत्ययः । इति वक्ष्यमाण मुवाच ॥ २७ ॥

अनेनेति । अनेन मयोपदिष्टेन योगेन विवृद्धतेजाः निजा म्पदवीम्परस्मै अयच्छन् परस्य प्रवेशमयच्छन्नित्यर्थः । उपात्त शस्त्रो निगृहीतायुधः सन् हे अर्जुन जपोपवासाभिषवैः स्वाध्यायान शनस्नानैर्मुनीनामाचारं समाचरानुतिष्ठ ॥ २८ ॥

क्षेत्रविशेषे तपःसिद्धिरित्याशयेन तन्निदर्शयन्नाह । करिष्य स इति । यत्र शिलोच्चये गोत्रभिद इन्द्रस्य प्रसत्तये प्रसादाय सुदुश्च राणि तपांसि करिष्यसे चारुशिलोच्चयं रम्यशिखरन्तं शिलोच्चयं गिरिं इन्द्रकीलम् । अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयादित्य मरः । त्वामेष गुह्यकोयक्षः अनन्तरमेवास्य पुरः प्रादुर्भावादेष इति निर्देशः क्षणान्नेष्यति प्रापयिष्यति ॥ २९ ॥

इति ब्रुवाणेन महेन्द्रसूनु
म्महर्षिणा तेन तिरोबभूवे।
तं राजराजाऽनुचरोऽस्य साक्षात्
प्रदेशमादेशमिवाधितष्ठौ ॥ ३० ॥

कृतानतिर्व्याहृतसान्त्ववादे
जातस्पृहः पुण्यजनः स जिष्णौ।
इयाय सख्याविव सम्प्रसादं
विश्वासयत्याशु सतां हि योगः ॥ ३१ ॥

इतीति। इतीत्थं महेन्द्रसूनुमर्ज्जुनं ब्रुवाणेनोक्तवता वर्त्तमानसामीप्ये इति भूते वर्त्तमानप्रत्ययस्तिरोधानस्याविलम्बसूचनार्थः। तेन महर्षिणा व्यासेन तिरोबभूवेऽन्तर्दधे। भावे लिट्। राजराजो यक्षराजः। राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियराजयोरिति विश्वः। तस्यानुचरः पूर्व्वोक्तयक्षोऽस्य मुनेरादेशं साक्षादिव प्रदेशमर्ज्जुनाधिष्ठितस्थानमधितष्ठौ प्राप्तइत्यर्थः। स्थाद्यभ्यासेन चाभ्यासस्येति षत्वम् ॥ ३० ॥

कृतेति। स पुण्यजनो यक्षः कृतानतिः कृतप्रणामः जातस्पृहो जाता स्पृहा आकाङ्क्षा यस्य स तथा सन् व्याहृतः उक्तः सान्त्ववादः प्रियवचनं येन तस्मिन्। व्याहार उक्तिर्लपितमित्यमरः। जिष्णावर्ज्जुने सख्यौ सुहृदीव। अथ मित्रं सखासुहृदित्यमरः। सम्प्रसादं विश्रम्भमियाय प्राप। तथाहि सतां साधूनां योगः सङ्गतिराशु विश्वासयति विश्वासञ्जनयति। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३१ ॥

अथोष्णभासेव सुमेरुकुञ्जा-
न्विहीयमानानुदयाय तेन ।
बृहद्द्युतीन् दुःखकृतात्मलाभ-
न्तमःशनैः पाण्डुसुतान्प्रपेदे ॥ ३२ ॥

अथेति । अथ उष्णभासा सूर्य्येणोदयाय पुनरुद्गमाय विहीयमानान् त्यज्यमानानिति तमःप्राप्तिकारणोक्तिः । बृहद्द्युतीन्सौवर्ण्ण्यादीप्यमानानित्यर्थः । इति तमसः सङ्कोचकारणोक्तिः । सुमेरुकुञ्जानिव अत्र सुमेरुग्रहणं कुञ्जानां सौवर्णत्वद्योतनार्थन्तेनार्ज्जुनेनोदयाय श्रेयसे विहीयमानान् बृहद्द्युतीन् अनेकविधप्रकाशान् पूर्व्ववद्विशेषणद्वयस्य प्रयोजनमनुसन्धेयम् । पाण्डुसुतान् चतुर इतिशेषः दुःखेन कृच्छ्रेण कृत उत्पादितः आत्मलाभ उत्पत्तिर्येषां तत्तथोक्तम् । तेषां विवेकित्वात् कथञ्चित् विलम्बादयमित्यर्थः । तमः शोकोऽन्धकारश्च । तमोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तरे इत्युभयत्रापि विश्वः । शनैर्मन्दम्प्रपेदे तेषां विवेकित्वाद्भीतमिवेति भावः । अत्र तमःशब्दस्य श्लिष्टत्वात् श्लेषानुप्राणितेयमुपमा ॥ ३२ ॥

असंशयेति । असंशयमसन्दिग्धं यथा तथा आलोचितं विवेचितं यत् कार्य्यन्तेन नुन्नोनिरस्तः इति लघुत्वहेतूक्तिः । नुदविदोन्द्रात्राभ्योन्यतरस्यामिति निष्ठानत्वम् । कार्य्यगौरवमालोच्य निरस्त इत्यर्थः । तथापि प्रेम्णा भ्रातृवात्सल्येन कर्त्रा समानीय पुनराकृष्य विभज्यमानः । समशोकभागीक्रियमाणः तुल्येन प्रेम्णा तुल्यदुःखत्वश्चवतीति भावः । स पूर्व्वोक्तोदुःखमेवातिभारोऽप्यतिभार

असंशयालोचितकार्य्यनुन्नः
प्रेम्णा समानीय विभज्यमानः।
तुल्याद्विभागादिव तन्मनोभि
र्दुःखातिभारोऽपि लघुः स मेने॥ २३॥
धैर्य्येण विश्वास्यतया महर्षे
स्तीव्रादरातिप्रभवाच्च मन्योः।
वीर्य्यञ्च विद्वत्सु सुते मघोनः
स तेषु न स्थानमवाप शोकः २४॥

भूतमपि दुःखमित्यर्थः। तन्मनोभिस्तेषाञ्चतुर्णाम्पार्थानाम्मनोभि
स्तुल्याद्विभागादिव पूर्ब्बोक्तात्प्रेमकृतात्समविभागादिवेत्यर्थः। वस्तु
तस्तु विवेकादेवेति भावः पुनर्विभागग्रहणन्तस्य हेतुत्वोत्प्रेक्षार्थमनु
वादाददोषः। लघुर्मेने;मानि। यथा एकोऽनेकधा विभज्य बहुभि
रुह्यमानोमहानपि भारोलघुर्मन्यते तद्वदित्यर्थः॥ २३॥

अथैवम्प्रेम्णा आह्रियमाणमपि शोकं विवेको निर्ज्जिगायेत्याह।
धैर्य्येणेति। धैर्य्येण तेषां निसर्गतोनिर्विकारचित्तत्वेन तथा महर्षे
र्व्यासस्य प्रवर्त्तकस्येति शेषः विश्वास्यतया अद्वैधवचनत्वेनेत्यर्थः।
अरातिप्रभवादरातिहेतुकात् तीव्राद्दुःसहान्मन्योः क्रोधाद्धेतोस्तथा
अर्ज्जुनप्रभावपरिज्ञानाच्चेति हेत्वन्तरं विशेषणमुखेनाह। मघोनः
सुतेऽर्ज्जुने वीर्य्यम्। न लोकेत्यादिना षष्ठीप्रतिषेधः विद्वत्सु ज्ञात
वत्स्विति यावत् विदेः शतुर्वसुरिति वैकल्पिकोवस्वादेशः। तेषु
पार्थेषु स शोकः स्थानं स्थितिं नावाप न प्राप॥ २४॥

तान् भूरिधाम्नश्चतुरोऽपि दूरं
विहाय यामानिव वासरस्य ।
एकौघभूतन्तदशर्म्म कृष्णां
विभावरीं ध्वान्तमिव प्रपेदे ॥ ३५ ॥

तुषारलेखाकुलितोत्पलाभे
पर्य्यश्रुणी मङ्गलभङ्गभीरुः ।
अगूढभावाऽपि विलोकने सा
न लोचने मीलयितुं विषेहे ॥ ३६ ॥

तानिति । तत् पार्थत्यागवत् शर्म्म सुखं । शर्म्मशातसुखानि चेत्यमरः । तद्विरुद्धमशर्म्म दुःखं । न ञिति नञ्समासः । भूरिधाम्न स्तेजस्विनइति हानिहेतुलोक्तिः चतुरस्तान्पार्थान्वासरस्य भूरिधाम्नश्चतुरोयामानहरानिव विहाय त्यक्त्वा एकौघभूतमेकराशिभूतं सत् । श्रेण्यादयः कृतादिभिरित्यर्थे कर्म्मधारयः श्रेण्यादिराकृतिगण इति शाकटायनः । कृष्णां विभावरीं कृष्णपक्षरात्रिं ध्वान्तमिव कृष्णान्द्रौपदीं प्रपेदे प्राप ॥ ३५ ॥

तुषारेति । सा द्रौपदी विलोकनेऽर्ज्जुनावलोकनेऽगूढभावा अगूढाभिप्रायापि स्फुटाभिलाषिणीति यावत् । भावोलीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुष्विति वैजयन्ती । मङ्गलभङ्गभीरुर्मङ्गलहानेर्भीता सती पर्य्यश्रुणी परिगताश्रुके वाष्पावृते इत्यर्थः । अतएव तुषारलेखाकुलितोत्पलाभे हिमबिन्दुसहितेन्दीवरसन्निभे इत्युपमालङ्कारः । लोचने निमीलयितुन्न विषेहे न शशाक अश्रुणोर्द्दर्शा

अकृत्रिमप्रेमरसाभिरामं
रामार्प्पितं दृष्टिविलोभि दृष्टम् ।
मनःप्रसादाञ्जलिना निकाम
ञ्जग्राह पाथेयमिवेन्द्रसूनुः ॥ ३७ ॥
धैर्य्यावसादेन हृतप्रसादा
वन्यद्विपेनेव निदाघसिन्धुः ।
निरुद्धवाष्पोदयसन्नकण्ठ
मुवाच कृच्छ्रादिति राजपुत्री ॥ ३८ ॥

वरकलेऽपि तन्निपातस्यामङ्गलत्वात्तन्निवर्त्तकं निमीलनं सा न चकारेत्यर्थः ॥ ३६ ॥

अकृत्रिमेति । इन्द्रसूनुरर्ज्जुनः क्रियया निर्वृत्तः कृत्रिमः । ड्वितः क्त्रिरिति क्त्रिः त्रेर्मम् नित्यमिति मम्प्रत्ययः तद्भिन्नं । प्रेमैव रसः अकृत्रिमेण प्रेमरसेनाभिरामम् अन्यत्र प्रेमरसेन मधुरादिना चाभिरामम् । रामया रमण्यार्प्पितं दृष्टिं विलोभयतीति दृष्टिविलोभि दृष्टिप्रियमित्यर्थः दृष्टं दर्शनम् । नपुंसके भावे क्तः । मनःप्रसादः प्रसन्नमनइत्यर्थः । सोऽञ्जलिरिवेत्युपमितसमासः । तेन मनःप्रसादाञ्जलिना पथि साधु पाथेयं शम्बलमिव । पथ्यतिथिवसतिस्वपतेर्ढञ् । निकाममतिशयेन जग्राह रामार्प्पितम्पाथेयम्पथि क्षेमाय भवतीत्यागमः ॥ ३७ ॥

धैर्य्येति । वन्यद्विपेन वन्यग्रहणमुच्छृङ्खलत्वद्योतनार्थं निदाघसिन्धुर्ग्रीष्मनदीव निदाघग्रहणन्दौर्बल्यद्योतनार्थं । धैर्य्यावसादेन धैर्य्य

मग्नां द्विषच्छद्मनि पङ्कभूते
सम्भावनाम्भूतिमिवोद्धरिष्यन् ।
आधिद्विषामातपसाम्प्रसिद्धे
रस्मद्विना मा भृशमुन्मनीभूः ॥ ३९ ॥

भ्रंशेन कर्त्रा कृतप्रसादा क्षोभङ्गमितेत्यर्थः । राजपुत्री क्षत्रिय सुता द्रौपदी अतः क्षात्रयुक्तमेव वक्ष्यतीति भावः । निरुद्धबाष्पोदयं संरुद्धरोदनं सन्नकण्ठं क्षीनकण्ठस्वरं अथ तयोरुभयोः कृतबहुव्रीह्योः क्रियाविशेषणयोर्विशेषणसमासः कृच्छ्रात्कथञ्चिदिति वक्ष्यमाणमुवाच ॥ ३८ ॥

मग्नामिति । पङ्कभूते पङ्कोपमिते । भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोरिति विश्वः । द्विषच्छद्मनि शत्रुकपटे मग्नां दुरुद्धरामित्यर्थः । सम्भावनां योग्यतां गौरवमिति यावत् । भूतिं सम्पदमिव । भूतिर्भस्मनि सम्पदीत्यमरः । उद्धरिष्यन् उद्धारकस्त्वमेवेति शेषः । आधिद्विषां दुःखच्छिदान्तपसामा प्रसिद्धेः सम्यक् सिद्धिपर्य्यन्तमस्मद्विना अस्माभिर्विनेत्यर्थः । पृथग्विनेत्यादिना विकल्पात्पञ्चमी । भृशं माउन्मनीभूः अस्मद्विरहात् दुर्म्मना माभूरित्यर्थः । दौर्मनस्यस्य तपःपरिपन्थित्वादिति भावः । माङीत्याशीरर्थे लुङ् न माङ्योगे इत्यडागमप्रतिषेधः । अनुन्मना उन्मनाः सम्पद्यमान उन्मनी अभूततद्भावे च्विः अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्चेति सकारलोपः अस्य च्वावितीकारः ॥ ३९ ॥

यशोऽधिगन्तुं सुखलिप्सया वा
मनुष्यसङ्ख्यामतिवर्त्तितुं वा।
निरुत्सुकानामभियोगभाजां
समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ४० ॥
लोकं विधात्रा विहितस्य गोप्तुं
क्षत्रस्य मुष्णन् वसु जैत्रमोजः।
तेजस्विताया विजयैकवृत्ते
र्निघ्नन्प्रियम्प्राणमिवाभिमानम् ॥ ४१ ॥

अथानौत्सुक्यदार्ढ्यार्थं तस्य सर्वार्थसिद्धिनिदानत्वमाह। यश इति। यशोऽधिगन्तुं कीर्त्तिं लब्धुमित्यर्थः। सुखस्य लिप्सया लब्धुमिच्छया वा मनुष्यसङ्ख्यां मनुष्यगणनामतिवर्त्तितुमतिक्रमितुं अमानुषं कर्म्म कर्त्तुं वेत्यर्थः। अभियोगभाजामभिनिवेशवतां निरुत्सुकानामदुर्मनायमानानामित्यर्थः। सिद्धिः पूर्व्वोक्तयशःसुखाद्यर्थसिद्धिः समुत्सुकेवानुरक्तकान्तेवाङ्कमन्तिकमुपैति। तस्मादस्माभिरत्र दुःखमातपःसिद्धेः सोढव्यमिति भावः ॥ ४० ॥

अथास्य मन्यूद्दीपनद्वारा तपःप्रवृत्तिम्प्रथयितुमरिनिकारत्वावचतुर्भिरुद्घाटयति। लोकमिति। विधात्रा ब्रह्मणा लोकं गोप्तुं विहितस्य सृष्टस्य क्षत्रस्य क्षत्रियजातेः सम्बन्धि जयनशीलं जेतृ तदेव जैत्रम्। जेतृशब्दात्तृजन्तात्प्रज्ञादिभ्यश्चेति स्वार्थेऽण्प्रत्ययः। ओजोबलं दीप्तिर्वा। ओजो बले च दीप्तौ चेति विश्वः। तदेव वसु धनं इति रूपकालङ्कारः। मुष्णन्नपहरन्। अरिनिकृतस्य कुतः

व्रीडानतैराप्तजनोपनीतः
संशय्य कृच्छ्रेण नृपैः प्रपन्नः ।
वितानभूतं विततं पृथिव्यां
यशः समूहन्निव दिग्विकीर्णम् ॥ ४२ ॥

स्यान्तेज इति भावः । किञ्च विजयैकवृत्तेर्विजयैकजीविताया: क्षत्रियस्य विजितमिति स्मरणादिति भावः । वृत्तिर्वर्त्तनजीवने इत्यमरः । तेजस्वितायास्तेजस्विनामित्यर्थः । तेजः प्राधान्यद्योतनार्थं भावप्रधानो निर्देशः प्रियम्प्राणमिव प्राणसममित्यर्थः । अभिमानमहंकारं निघ्नन् खण्डयन् । तेजस्विनां प्राणहानिप्राया मानहानिरिति भावः ॥ ४१ ॥

अधिक्षेपाय सहनन्तेजः प्राणात्ययेष्वपि न त्याज्यमित्याह । व्रीडेति । पुनश्च आप्तजनोपनीतः आवितः प्रापितइत्यर्थः । तथापि संशय्य संदिह्यासम्भावितबुद्धेति भावः । व्रीडानतैर्जुगुप्सितवृत्तान्तश्रवणादिति भावः नृपैर्देशान्तरस्थैः कृच्छ्रेण प्रपन्नः प्राप्तः आप्तोक्तत्वात्कथञ्चिद्विश्वस्तइत्यर्थः । यः श्रृण्वतामपि दुःसहः किमुतानुभवतामितिभावः । इत्येषा पूर्व्वेषां व्याख्या । अन्यथापि व्याख्यायते । आप्तजनोपनीतः ज्ञातिकृतः संशय्य कथमिदमन्याय्यमुपेक्ष्यमिति विचार्य्य व्रीडानतैर्जुगुप्सितकर्म्मदर्शनादिति भावः । नृपैः सभास्थैः कृच्छ्रेण प्रपन्नोऽङ्गीकृतः गोत्रकलहेषु मध्यस्थैरुदासितव्यमिति बुद्ध्या उपेक्षितइत्यर्थः । पक्षद्वयेऽपि प्रपन्न इत्यत्राप्तजनोपनीतत्वस्य पदार्थभूतस्य विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारः । पृथिव्यां वितानभूतमुल्लोचतुल्यम् । अस्त्री वितानमुल्लोच

वीर्य्यावदानेषु कृतावमर्ष-
स्तन्वन्नभूतामिव सम्प्रतीतिम् ।
कुर्व्वन्प्रयामक्षयमायतीना-
मर्कत्विषामह्न इवावशेषः ॥ ४३ ॥
प्रसह्य योऽस्मासु परैः प्रयुक्तः
स्मर्त्तुं न शक्यः किमुताधिकर्त्तुम् ।
नवीकरिष्यत्युपशुष्यदार्द्रः
स त्वद्विना मे हृदयन्निकारः ॥ ४४ ॥

॥ कलापकम् ॥

इत्यमरः । दिग्विकीर्णं दिगन्तलग्नं वितानमपि दिगन्तलग्नमिति भावः । विततमप्रथितं यशः समूहन्निव सङ्कोचयन्निवेत्युत्प्रेक्षा अरातिपरिभूतस्य कुतः कीर्त्तिरिति भावः ॥ ४२ ॥

वीर्य्येति । पुनश्च वीर्य्याण्येवावदानानि तेषु कृतावमर्षः कृतास्कन्दनः पुराकृतपराक्रमोद्भूतान्यपि प्रमृजन्नित्यर्थः । अवदानं कर्म्मवृत्तमित्यमरः । अतएव सम्प्रतीतिं ख्यातिम् । प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताइत्यमरः । अभूतामविद्यमानामिवेत्युत्प्रेक्षा सतोऽप्यसत्त्वमुत्प्रेक्ष्यते । तन्वन् कुर्व्वन् । पुनश्चाह्नोऽवशेषो दिनान्तोऽर्कत्विषामिवायतीनामुत्तरकालानां प्रयामक्षयं दैर्घ्यनाशं कुर्व्वन् इति श्रौती पूर्णोपमा । अरिनिराकृतस्य कुतश्चिरावस्थानमिति भावः ॥ ४३ ॥

प्रसह्येति । पुनश्च परैः शत्रुभिरस्मासु प्रसह्य प्रयुक्तः आचरितो यो निकारः परिभवः केशाकर्षणरूपः स्मर्त्तुं न शक्यः अधिकर्त्तुं

THE ASIATIC SOCIETY OF BOMBAY LIBRARY

प्राप्तोऽभिमानव्यसनादसह्य
न्दन्तीव दन्तव्यसनाद्विकारम्।
द्विषत्प्रतापान्तरितोरुतेजाः
शरद्घनाकीर्णइवादिरह्नः ॥ ४५ ॥

मनुभवितुङ्किमुत । यस्य स्मरणमपि दुःसहमनुभवस्तु सुतरां दुःसहइति किमु वक्तव्यमित्यर्थः। स निकारस्त्वद्विना त्वया विना। पृथग्विनेत्यादिना पञ्चमी। आर्द्रः सन् कुतश्चिदभिभूतात्पुराण प्रहारइव त्वद्विरहदुःखात्पुनर्नवीकरिष्यति नवीभविष्यतीत्यर्थः। उपगूढ्यत् त्वया विना शुष्कमिति भावः। दुःखसम्भनं शोषपदार्थः मे हृदयन्नवीकरिष्यति आर्द्रीकरीष्यति व्रणमिवेति भावः। दुःखि तस्य पुनर्दुखोपचयः शोषप्रायमपि दुःखहेतुम्पुनरुद्घाटयतीत्यर्थः। अत्र शोषादिविशेषणसाम्यात्क्षणाप्रस्तुतार्थप्रतीतेः समासोक्तिरलङ्कारः ॥ ४४ ॥

पुनः प्रकारान्तरेण मन्युमुद्दीपयति। प्राप्तइत्यादिभिस्त्रिभिः। तत्र वक्ष्यमाणप्रत्यभिज्ञानहेतुभिर्द्धनञ्जयं विशिनष्टि। अभिमानस्य व्यसनाद्भ्रंशात्। व्यसनं विपदि भ्रंशे दोषे कामजकोपज इत्यमरः। दन्तव्यसनाद्दन्तभङ्गाद्दन्तीवासह्यं विकारं वैरूप्य म्प्राप्तः। अतोऽन प्रत्यभिज्ञायतइति भावः। एवमुत्तरत्राप्यनुसन्धेयम्। पुनश्च द्विषत्प्रतापेन शत्रुतेजसान्तरितन्तिरस्कृतं उरु तेजः प्रतापोयस्य स तथोक्तः अतएव शरद्घनाकीर्णः शरन्मेघच्छन्नोऽह्न आदिः प्रत्यूषइव स्थितः। तद्वदेवाप्रत्यभिज्ञायमानइत्यर्थः। मध्याह्नस्तु मेघावरणेऽपि कथञ्चित्प्रत्यभिज्ञायतएवेत्यादिग्रहणेनोक्त मादिरिति ॥ ४५ ॥

सव्रीडमन्दैरिव निष्क्रियत्वा
न्नात्यर्थमस्त्रैरवभासमानः ।
यशःक्षयक्षीणजलार्णवाभ
स्त्वमन्यमाकारमिवाभिपन्नः ॥ ४६ ॥
दुःशासनाकर्षरजोविकीर्णै
रेभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्य्यसारः
कच्चित्स एवासि धनञ्जयस्त्वम् ॥ ४७ ॥
॥ विशेषकम् ॥

सव्रीडेति । पुनश्च निष्क्रियत्वादर्थक्रियाशून्यत्वात्सव्रीडमन्दैरिव सव्रीडैरतएव मन्दैरपटुभिरिव स्थितैरित्युत्प्रेक्षा । मूढाल्पा पटुनिर्भाग्यामन्दाः स्युरित्यमरः । अस्त्रैरत्यर्थं नावभासमानः न प्रकाशमानः पूर्व्वन्तु नैवमिति भावः । किन्तु यशःक्षयाद्धेतोः क्षीणजलोयोऽर्णवस्तदाभस्तत्सदृशस्त्वमन्यमाकारमभिपन्नः प्राप्त इव स्थितइवेत्युत्प्रेक्षा तस्य क्षीणजलार्णवाभइत्युपमासंसृष्टिः ॥ ४६ ॥

दुःशासनेति । पुनश्च दुःशासनस्य हर्त्तुराकर्षश्चाकर्षणं सएव रजोधूलिः मालिन्यहेतुत्वादिति भावः । तेन विकीर्णैर्विक्षिप्तैरत एव विनाथैरिव स्थितवतां युष्माकमसत्त्वप्रायत्वादनाथैरिव स्थितै रित्युत्प्रेक्षा अन्यथा कथमियन्दुर्द्दशेति भावः । किन्तु भाग्यनाथै र्दैवमात्रशरणैः अन्यथा स्वरूपमपि लुप्येतेति भावः । एभिः परि दृश्यमानैरसंयमितैरिति भावः । केशैः शिरोरुहैः कुत्सितोऽर्थो

स क्षत्रियस्त्राणसहः सतां य
स्तत्कार्म्मुकं कर्म्मसु यस्य शक्तिः ।
वहन् द्वयीं यद्यफलेऽर्थजाते
करोत्यसंस्कारहतामिवोक्तिं ॥ ४८ ॥

वस्तु कदर्थः । अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः । कोः कत्तत्पुरुषेऽचीति कुशब्दस्य कदादेशः । कदर्थीकृतौ गर्हार्थीकृतौ वीर्य्यशास्त्रौ शौर्य्यबले यस्य स तथोक्तः । इत्यपूर्व्वविलक्षणस्त्वं सएव धनञ्जयोऽसि कच्चित् । कच्चित्कामप्रवेदनइत्यमरः । सएव चेत्त्वं नैनमस्मानुपेक्षसे इति भावः ॥ ४७ ॥

अथाप्युपेक्षणे दोषमाह । सइति । क्षतात्त्रायतइति क्षत्रं क्षत्रियकुलम् । सुपीति योगविभागात्कप्रत्ययः पृषोदरादित्वात्पूर्व्वपदस्याकारलोपः । अथवा क्षदिति क्विबन्तोपपदात्कप्रत्ययः । क्षत्रे जातः क्षत्रियः । क्षत्रात् घइति घप्रत्ययः । कर्म्मणे प्रभवतीति कार्म्मुकं । कर्म्मणउकञित्युकञ्प्रत्ययः । एवं स्थिते वाक्यार्थः कथ्यते यस्सतां साधूनां सहतइति सहः पचाद्यच् । यस्त्राणस्य सहस्त्राणसहोरक्षणक्षमः सएव क्षत्रियशब्दवाच्यः । तथा यस्य कार्म्मुकस्य कर्म्मसु रणक्रियासु शक्तिः अस्तीति शेषः । तदेव कार्म्मुकशब्दवाच्यं । अत्रैवैतौ शब्दौ मुख्यौ नान्यत्रेत्यर्थः । एवंस्थिते द्वयीं द्विविधामुक्तं द्वाविमौ क्षत्रियकार्म्मुकशब्दावित्यर्थः । अफले पूर्व्वोक्तावयवार्थशून्यइत्यर्थः । अर्थजाते स्वाभिधेयसामान्यजातिमात्रइत्यर्थः । जातजात्योघजन्मस्विति विश्वः । वहन् वर्त्तयन् संस्कारहतामयुत्पत्तिदूषितामिव करोतीत्युत्प्रेक्षा । तस्मात्त्वमस्मद्रक्षणेनोक्तदोषादात्मानं मोचयस्वेत्यर्थः ॥ ४८ ॥

वीतौजसः सन्निधिमात्रशेषा
भवत्कृतां भूतिमपेक्षमाणाः ।
समानदुःखा इव नस्त्वदीयाः
सरूपतां पार्थ गुणा भजन्ते ॥ ४९ ॥
आक्षिप्यमाणं रिपुभिः प्रमादा
न्नागैरिवालूनसटं मृगेन्द्रं ।
त्वां धूरियं योग्यतयाधिरूढा
दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥ ५० ॥

अथ त्वद्गुणा अपि नोज्जीवयेयुरित्याह । वीतेति । हे पार्थ वीतौजसो निष्प्रभाः सन्निधिमात्रशेषाः सत्तामात्रावशिष्टाः भवत्कृतां भवता करिष्यमाणां । आशंसायां भूतवच्चेति भूतवत्प्रत्ययः । भूतिमभ्युदयमपेक्षमाणास्त्वदीया गुणाः समानदुःखाः समदुःखभाज इव नोऽस्माकं सरूपतां वीतौजस्त्वादिसाधर्म्यं भजन्त इत्युपमा सा च समानदुःखा इवेत्युत्प्रेक्षया वीतौजस्त्वादिसम्भावितयानुप्राणितेत्यनुसन्धेयम् ॥ ४९ ॥

तथापि ममैव कोऽयम्भार इत्यत आह । आक्षिप्येति । प्रमादा अज्ञाहीनत्वान्न तु दौर्बल्यादितिभावः । रिपुभिराक्षिप्यमाणमधिक्षिप्यमाणमतएव प्रमादान्नागैर्गजैः । मतेभा दिग्गजा नागा इति वैजयन्ती । आलूनसटमाछिन्नकेसरम् । सटा जटाकेसरयोरिति विश्वः । मृगेन्द्रं सिंहमिव स्थितन्त्वामियन्धूः कार्य्यभारस्तिग्मरश्मिं सूर्य्यं दीप्त्या दिनश्रीरिव योग्यतया निर्व्वाहकतया । अधिरूढा आरूढवती । कर्त्तरि क्तः । त्वदधीनेत्यर्थः ॥ ५० ॥

करोति यः सर्व्वजनातिरिक्तां
सम्भावनामर्थवतीं क्रियाभिः ।
संसत्सु जाते पुरुषाधिकारे
न पूरणी तं समुपैति सङ्ख्या ॥ ५१ ॥
प्रियेषु यैः पार्थ विनोपपत्ते
र्विचिन्त्यमानैः क्लममेति चेतः ।
तव प्रयातस्य जयाय तेषां
क्रियादघानां मघवा विघातम् ॥ ५२ ॥

पर्व्वं निर्व्यवसायस्य स क्षत्रियइत्यादिना दोषउक्तः सम्प्रति व्यवसायिनोगुणमाह । करोतीति । यः पुमानशेषजनादितरजनादतिरिक्तामधिकां सर्व्वातिशायिनीमित्यर्थः । सम्भावनां योग्यतां क्रियाभिश्चरितैरर्थवतीं सफलाङ्करोति । तं पुमांसं संसत्सु सभासु । सभासमितिसंसद इत्यमरः । पुरुषाधिकारे योग्यपुरुषगणनाप्रस्तावे जाते सति पूर्य्यतेऽनेनेति पूरणी सङ्ख्या द्वित्वादिसङ्ख्या न समुपैति न गच्छति । अद्वितीयोभवतीत्यर्थः । तस्मादश्लाघारणलाभाय त्वयापि महानुत्साहआस्थेयइति भावः ॥ ५१ ॥

अथ द्वाभ्यां सुलभविपत्तस्य प्रोषितस्यार्ज्जुनस्य कर्त्तव्यमुपदिशति । प्रियेष्विति । हे पार्थ प्रियेष्वस्मासु विषये उपपत्तेः कारणाद्विनैव विचिन्त्यमानैरकस्मादेवाशङ्क्यमानैर्यैरघैश्चेतः क्लममङ्गेदमेति जयाय प्रयातस्य तव सम्बन्धिना तेषामघानां व्यसनानाम् । दुःखैनो व्यसनेष्वघमित्यमरः । मघवा इन्द्रः योऽस्माभिरुपास्यइति भावः विघातं निवारणं क्रियात्करोतु । आशिषिलिङ् । तस्मादस्मच्चिन्तया

मागाश्चिरायैकचरः प्रमादं
वसन्नसम्बाधशिवेऽपि देशे ।
मात्सर्य्यरागोपहतात्मनां हि
स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥

न चेतः खेदयितव्यञ्जयार्थिना त्वया अन्यथा तदसम्भवादिति भावः ॥ ५२ ॥

मागादिति । असम्बाधोऽसङ्कटः विजनइत्यर्थः । सङ्कटं ना तु सम्बाधइत्यमरः । शिवो निर्बाधः द्वयोरन्यतरस्य विशेष्यत्वविवक्षायां विशेषणसमासः । अस्मिन्नसम्बाधशिवेऽपि देशे चिराय चिरं एकचरः एकाकी वसन् प्रमादन्दौर्बल्यं मागाः । इणोगालुङीति गादेशः । ननु निःस्पृहस्य ममाकिञ्चित्करः प्रमादइति वाच्यमित्याशङ्क्याह । मात्सर्य्येति । मत्सरएव मात्सर्य्यं द्वेषः रागः स्नेहः ताभ्यां उपहतात्मनां रागद्वेषदूषितस्वभावानां मानसानि मनांसि साधुषु सज्जनेष्वपि विषये स्खलन्ति विकुर्वन्ते । अत्र प्रमादनिषेधलक्षणप्रमादरूपकारणेनार्थप्राप्तिरूपकार्य्यस्य व्यतिरेककारणसमर्थनाद्वैधर्म्येण कार्य्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५३ ॥

निगमयति । तदिति । तत्तस्मात्कारणात् । आशु शीघ्रं महर्षिवचनं कुर्व्वन् तपस्यन्नित्यर्थः । नोऽस्माकं मनोरथान्सफलीकुरुष्व अरिनिर्य्यातनेनास्मान् प्रतिष्ठापयेत्यर्थः । प्रार्थनायां लोट् । किञ्च कृतार्थं कृतकृत्यं प्रत्यागतमेव त्वा त्वाम् । त्वामौ द्वितीयायाइति त्वादेशः । स्तनयोरुपपीड्य इति स्तनोपपीडम् । सप्तम्याञ्चोपपीडरुधकर्षइति णमुल् । परिरब्धुङ्कामोयस्याः सा परिरब्धुकामाऽस्मि ।

तदाशु कुर्व्वन्वचनं महर्षे
र्मनोरथान्नः सफलीकुरुष्व।
प्रत्यागतन्त्वास्मि कृतार्थमेव
स्तनोपपीडम्परिरब्धुकामा ॥ ५४ ॥

उदीरितान्तामिति याज्ञसेन्या
नवीकृतोद्गाहितविप्रकाराम्।
आसाद्य वाचं स भृशन्दिदीपे
काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥

आलिङ्गितुमिच्छामीत्यर्थः। तुङ्कामममनसोरपीति मकारलोपः। प्राकाम्यसिद्धेः प्रमदालिङ्गनमपि न प्रीतिदमिति भावः ॥ ५४ ॥

उदीरितामिति। सोऽर्ज्जुनः इतीत्थं यज्ञसेनस्यापत्येन स्त्रिया द्रौपद्या उदीरितामुक्ताम्। नवीकृतः पुनरुद्घाटनेन तथा प्रत्यायितं अतएव उद्गाहितोमनसि निधापितश्च विप्रकारः परिभवोययासा तां वाचमासाद्याकर्ण्येत्यर्थः। उदीचीङ्काष्ठान्दिशम्। दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताइत्यमरः। तिग्मरश्मिरिव भृशं दिदीपे जज्वाल चुकोधेत्यर्थः ॥ ५५ ॥

अथेति। अथ विद्विषः शत्रून् पुरोऽभिपश्यन्निव स्थितः तथा पुरोधसा धौम्येनारोपिता समन्त्रं समाहिता हेतिसंहतिरायुध कलापोयस्य स तथोक्तः। हेतिर्ज्वालाङ्कुरायुधइति वैजयन्ती। सोऽर्ज्जुनोरम्यः सौम्यः सन्नपि अभिचारः परहिंसा प्रयोजनं यस्याः सा आभिचारिकी। तदस्य प्रयोजनमिति ठक्। तां क्रियाङ्गतः अभिचारकर्म्मणि नियुक्तइत्यर्थः। मन्त्रइव रम्यः प्रकृत्या रमणीयः

अथाभिपश्यन्निव विद्विषः पुरः
पुरोधसारोपितहेतिसंहतिः ।
बभार रम्योऽपि वपुः स भीषण
ङ्गतः क्रियामन्त्रइवाभिचारिकीम् ॥ ५६ ॥

अविलङ्घ्यविकर्षणम्परैः
प्रथितज्यारवकर्म्म कार्म्मुकम् ।
अगतावरिदृष्टिगोचरं
शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥

भीषयतइति भीषणम् । नन्द्यादित्वात् ल्युप्रत्ययः । वपुर्बभार प्रशान्तोमन्त्रः प्रयोगभेदादिव सोऽप्यवस्थाभेदाद्भीषणोबभूवेत्यर्थः ॥ ५६ ॥

उक्तमायुधारोपणं विदृण्वन्प्रस्थानमाह त्रिभिः । अविलङ्घ्येति । शत्रुभिरविलङ्घ्यमनतिक्रमणीयं विकर्षणं यस्य तत् । अमोघाकर्षणमित्यर्थः । किञ्च प्रथितोज्यारवोगुणध्वनिः कर्म्म बाणमोचणादिकञ्च यस्य तत्कार्म्मुकञ्चोदहन्नित्यन्वयः । तथाऽरीणां दृष्टिगोचरं दृष्टिपथमगतौ आहवेष्वनिवर्त्तित्वादक्षीणे भावः । निर्गतस्त्रिंशतोऽङ्गुलिभ्योनिस्त्रिंशः खड्गः । डप्रत्यये सङ्ख्यायास्तत्पुरुषस्योपसङ्ख्यानात्समासान्तः । तेन शितेन तीक्ष्णेन युक्तइति शितनिस्त्रिंशयुजौ । सत्सूद्विषेत्यादिना क्विप् । महेषुधी महानिषङ्गौ इषवोधीयन्तेऽनयोरिति विग्रहः कर्म्मण्यधिकरणेचेति किप्रत्ययः । तूणोपासङ्गतूणीरनिषङ्गाइषुधिर्द्वयोः । तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासाऽसिरिष्टयइत्यमरः ॥ ५७ ॥

यशसेव तिरोदधन्मुहु-
र्महसा गोत्त्रभिदायुधक्षतीः ।
कवचञ्च सरत्नमुद्वहन्
ज्वलितज्योतिरिवान्तरन्दिवः ॥ ५८ ॥
अलकाधिपभृत्यदर्शितं
शिवमुर्व्वीधरवर्त्म सम्प्रयान् ।
हृदयानि समाविवेश स
क्षणमुद्वाष्पदृशान्तपोभृताम् ॥ ५९ ॥
॥ विशेषकम् ॥

यशसेति । किञ्च । गोत्त्रभिदइन्द्रस्यायुधक्षतीः वज्रप्रहार-रन्ध्राणि खाण्डवदाहसम्भवादिति भावः । महसा स्वकान्त्या यशसेव मूर्त्तया कीर्त्त्येव मुहुस्तिरोदधत् आच्छादयन् । सरत्नं रत्न-सहितं अतएव ज्वलितज्योतिर्दीप्ततारकम् । ज्योतिस्ताराग्निभा-ज्वालादृक्पुत्रार्थधरास्विति वैजयन्ती । दिवोऽन्तरन्नभोमध्य-मिवावस्थितम् । अन्तरं परिधानीये वाह्ये स्वीयेऽन्तरात्मनि । क्लीवे मध्ये प्रकाशे चेति वैजयन्ती । कवचञ्चोद्वहन् ॥ ५८ ॥

अलकेति । सोऽर्ज्जुनोऽलकाधिपभृत्येन यक्षेण दर्शितमतः शिवं निर्वाधमुर्व्वीधरवर्त्म हिमवन्मार्गम्प्रति सम्प्रयान् प्रगच्छन् क्षणमुद्वाष्पदृशां वियोगदुःखात्साश्रुनेत्राणान्तपोभृतां दैतवननिवा-सिनान्तपस्विनां हृदयानि समाविवेश खेदयामासेत्यर्थः । सम्पूर्व्वस्य विशः खेदार्थत्वमवसेयम् ॥ ५९ ॥

अनुजगुरथ दिव्यन्दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥
इति श्रीभारविकृतौ किरातार्ज्जुनीये
महाकाव्ये तृतीयः सर्गः ॥ ३ ॥

अनुजगुरिति। अथाशादिशः दिवि भवं दिव्यं। दिवादिभ्योयत्। दुन्दुभिध्वानमनुजगुः दध्वनुः। अनुगायतेर्लिट्। व्योम्नि सुरकुसुम निपातैर्लक्ष्मीर्वितेने । पुष्पवृष्टिश्चाजनिष्टेत्यर्थः । किञ्च अनिभृताश्चञ्चलावेलायां कूले या वीचयस्ताएव बाहवोयस्य स तथोक्तः। वेला कूलविकारयोरिति शाश्वतः। पयोधिः स्फुरन्ती मुल्लसन्तीं हर्षात् स्पन्दमानाञ्च भुवम्प्रियमिष्टं भारावतारणरूप ङ्कथयिष्यन्निव कथयितुमिवेत्यर्थः। लृट् शेषे चेति चकारात्क्रिया र्थायां क्रियायां लृट्। आलिलिङ्ग सर्व्वञ्चेदं शिवन्दैवकार्य्यप्रवृत्तत्वा दस्येति भाव.। अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात्समासोक्ति रलङ्कारः। तत्र चाप्रकृतयोर्भूमिसमुद्रयोः प्रतिपन्नाभ्यां नायकाभ्या म्भेदे लक्षणातिशयोक्तिवशादालिङ्गनोक्तिरिति रहस्यम्। एवमति शयोक्त्यनुप्राणितासमासोक्तिः प्रियकथनात् स्नेहवञ्जीवयति तदङ्ग भावमजतद्दत्युभयोरङ्गाङ्गिभावेन सङ्करइति विवेचनीयम् ॥ ६० ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां तृतीयः सर्गः ॥ ३ ॥

ततः स कूजत्कलहंसमेखलां
सपाकशस्याहितपाण्डुतागुणाम्।
उपाससादोपजनञ्जनप्रियः
प्रियामिवासादितयौवनाम्भुवम् ॥ १ ॥
विनम्रशालिप्रसवौघशालिनी
रपेतपङ्काः ससरोरुहाम्भसः।
ननन्द पश्यन्नुपसीम स स्थली
रुपायनीभूतशरद्गुणश्रियः ॥ २ ॥

ततइति। ततः प्रस्थानानन्तरञ्जनप्रियः सोऽर्ज्जुनः कलहंसाः मेखलाइवेत्युपमितसमासः। अन्यच कलहंसाइव ताइति विशेषण समासः। कूजन्ती कलहंसमेखला यस्यास्ताम्। सह पाकेन वर्त्तन्त इति सपाकानि शस्यानि तैः शस्यैराहितः सम्पादितः पाण्डुतैव गुणोयस्यास्ताम्भुवमासादितयौवनाम्प्राप्तयौवनाम्प्रियामिव "उपजन ञ्जनसमीपेऽन्यत्र सखीसमचं। समीपार्थेऽव्ययीभावः। उपाससादोप गतवान्। उपमालङ्कारः ॥ १ ॥

विनम्रेति। सोऽर्ज्जुनोविनम्रशालिप्रसवौघशालिनीरवनतकलम फलस्तोमशोभिनीरपेतपङ्काः निष्पङ्काः ससरोरुहाण्यम्भांसि यासु तास्तथोक्ताः। उपायनीभूताश्अर्ज्जुनस्यत्युपहारीभूताः शरद्गुण श्रियः पूर्व्वोक्तशरद्धर्म्मसम्पदोयासु ताः उपसीम ग्रामसीमासु। विभक्त्यर्थेऽव्ययीभावः समासान्तविधेरनित्यत्वादनश्चेति समासान्तोन भवति। केचित्तु अप्यन्येषां कठिनवपुषां दुर्गमे ग्रामसीम्नीत्यादौ

निरीक्ष्यमाणाइव विस्मयाकुलैः
सरोभिरुन्मीलितपद्मलोचनैः ।
हृतप्रियादृष्टिविलासविभ्रमा
मनोऽस्य जह्रुः शफरीविवृत्तयः ॥ ३ ॥

तुतोष पश्यन् कलमस्य सोऽधिकं
सवारिजे वारिणि रामणीयकम् ।
सुदुर्लभे नार्हति कोऽभिनन्दितु
प्रकर्षलक्ष्मीमनरूपसङ्गमे ॥ ४ ॥

नपुंसकप्रयोगदर्शनान्नपुंसकादन्यतरस्यामिति विकल्पाच्च साधुरित्याङः । स्थलीरकृत्रिमाभुवः । जानपदेत्यादिना अकृत्रिमार्थे ङीष् । पश्यन्ननन्द जहर्ष । अत्र शरद्गुणेषु तादात्म्येनारोप्यमाणस्योपायनस्य प्रकृतेर्नन्दनक्रियोपयोगित्वात्परिणामालङ्कारः ॥ २ ॥

निरीक्ष्यमाणाइति । विस्मयाकुलैराश्चर्यरसाविष्टैरतएवोन्मीलितानि पद्मान्येव लोचनानि येषान्तैः सरोभिर्निरीक्ष्यमाणाइव स्थिताः हृतः प्रियादृष्टिविलासानां विभ्रमः शोभा याभिस्तास्तथोक्ताइति मनोहरणलहेतूक्तिः। विभ्रमः संशये भ्रान्तौ शोभायाञ्चेति वैजयन्ती । शफरीविवृत्तयः प्रोष्ठीस्फुरितान्यस्यार्ज्जुनस्य मनोजह्रुः ॥ ३ ॥

तुतोषेति। सोऽर्ज्जुनः सवारिजे साम्बुजे वारिणि कलमस्य शालिविशेषस्य। शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमीत्यमरः। रमणीयस्य भावोरामणीयकम्। योपधाद्गुरूपोत्तमाद्वुञ्। तत्पश्यन्नधिकं

नुनोद तस्य स्थलपद्मिनीगतं
वितर्कमाविष्कृतफेनसन्तति ।
अवाप्तकिञ्जल्कविभेदमुच्चकै
र्विवृत्तपाठीनपराहतम्पयः ॥ ५ ॥

तुतोष । अनुरूपसङ्गमादिति भावः । तथाहि सुदुर्लभेऽनुरूप सङ्गमे योग्यसमागमे लब्धे सतीति शेषः प्रकर्षलक्ष्मीं योग्यसमागमनिमित्तामुत्कर्षसम्पदमभिनन्दितुं स्तोतुङ्कोनार्हति सर्वोऽप्यभिनन्दत्येवेत्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४ ॥

नुनोदेति । आविष्कृता प्रकटीकृता फेनसन्ततिर्हिण्डीरसमूहो यस्य तत्तथोक्तम् । हिण्डीरोऽब्धिकफः फेनइत्यमरः । अवाप्तः किञ्जल्कविभेदः केसरापगमो येन तत्तथोक्तम् । उच्चकैरुच्चकं यथा तथा विवृत्तेन लुठितेन पाठीनेन मत्स्यविशेषेण पराहतन्ताडितं । सहस्रदंष्ट्रः पाठीनइत्यमरः । पयः कर्तृ तस्यार्ज्जुनस्य स्थलपद्मिनीगतन्तद्गोचरमित्यर्थः वितर्कं संशयं नुनोद चिच्छेद । पाठीनपराहत्या किञ्जल्कापायेन जलदर्शनात् स्थलपद्मिनीशङ्का निवृत्तेत्यर्थः । अत्र निश्चयोत्तरसन्देहालङ्कारः ॥ ५ ॥

कृतेति । सोऽर्ज्जुनः शिथिलत्वमायता गच्छता दिने दिने क्षीयमाणेनेत्यर्थः । अतएव शनैः शनैः शान्तरयेण अन्यथोर्म्मिरेखानुदयादिति भावः वारिणा कृताः ऊर्म्मयः तरङ्गाएव रेखाराजयो यस्य तत्तथोक्तन्तरङ्गाश्रय सञ्जाताश्चरङ्कितभङ्गिमत् । तदस्य

कृतोर्म्मिरेखं शिथिलत्वमायता
शनैः शनैः शान्तरयेण वारिणा ।
निरीक्ष्य रेमे स समुद्रयोषिता
न्तरङ्गितं चौमविपाण्डु सैकतम् ॥ ६ ॥
मनोरमम्प्रापितमन्तरं भ्रुवो
रलङ्कृतं केसररेणुनाऽणुना ।
अलक्तताम्राधरपल्लवश्रियां
समानयन्तीमिव बन्धुजीवकम् ॥ ७ ॥

संजातमिति इतच् । यत्चौमन्दुकूलन्तद्वद्विपाण्डु शुभ्रमित्युपमालङ्कारः । समुद्रयोषितान्नदीनां सिकताऽस्यास्तीति सैकतम्पुलिनं । सिकताशर्क्कराभ्याञ्चेत्यण्प्रत्ययः । तोयोत्थितन्तत्पुलिनं सैकतं सिकतामयमित्यमरः । निरीक्ष्य रेमे तुतोष ॥ ६ ॥

ततस्त्रिभिः शालिगोप्त्रीं वर्णयति । मनोरममिति । अणुना सूक्ष्मेण केसरेषु किञ्जल्केषु । किञ्जल्कः केसरोऽस्त्रियामित्यमरः । योरेणुः परागस्तेनालङ्कृतमतएव मनोरमयतीति मनोरमं । कर्म्मण्यणित्यण् । भ्रुवोरन्तरं प्रापितं भ्रूमध्ये निवेशितम्बन्धुजीवकं बन्धूकपुष्पम् । बन्धूकोबन्धुजीवकमित्यमरः । अलक्तताम्रस्य लाक्षारागरक्तस्य अधरपल्लवस्य श्रिया शोभया समानयन्तीं समीकुर्व्वतीमिव साम्यपरीक्षां कुर्व्वतीमिवेत्यर्थः । उत्प्रेक्षालङ्कारः ॥ ७ ॥

नवेति । महान्निवेशः स्थानं ययोस्तौ महानिवेशौ पीवरावित्यर्थः । पयोधरौ परितः स्तनयोः समन्तादित्यर्थः । अभितः

नवातपालोहितमाहितं मुहु
र्म्महानिवेशौ परितः पयोधरौ।
चकासयन्तीमरविन्दजं रजः
परिश्रमाम्भःपुलकेन सर्प्पता ॥ ८ ॥
कपोलसंश्लेषि विलोचनत्विषा
विभूषयन्तीमवतंसकोत्पलम्।
सुतेन पाण्डोः कलमस्य गोपिकां
निरीक्ष्य मेने शरदः कृतार्थता ॥ ९ ॥
॥ विशेषकम् ॥

परितःसमयानिकषाहाप्रतियोगेऽपीति द्वितीया। मुहुराहित न्निःक्षिप्तं नवातपालोहितं बालातपताम्रमरविन्दजं रजः परागं सर्प्पता प्रसरता परिश्रमाम्भःपुलकेन खेदोद्भवेन पुलकेन चकासयन्तीं शोभयन्तीं। चकास्तेर्ण्यन्ताच्छतरि ङीप्। अलङ्करण ङ्कुर्व्वतीं तत्रापि विकृततेति भावः॥ ८॥

कपोलेति। पुनः कपोलसंश्लेषि यदवतंसकोत्पलङ्कर्णोत्पल न्तद्विलोचनत्विषा विभूषयन्तीं आभरणस्यापि आभरणमिति भावः। कलमं गोपायतीति गोपिकां शालिगोप्त्रीं ण्वुल्प्रत्ययः। निरीक्ष्य पाण्डोः सुतेनार्ज्जुनेन शरदः कृतार्थायाभावः कृतार्थता साफल्यम् शरदः स्वगुणसम्पत्सिद्धिर्नियोगलाभादिति भावः। त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः। मेनेऽमानि। मन्यतेः कर्म्मणि लिट्॥ ९॥

उपारताः पश्चिमरात्रिगोचरा
दपारयन्तः पतितुञ्जवेन गाम्।
तमुत्सुकाश्चक्रुरवेक्षणोत्सुक
ङ्गवां गणाः प्रस्नुतपीवरोधसः ॥१०॥

उपारताइति। पश्चिमा चाऽसौ रात्रिश्चेति विशेषणसमासः अपररात्रइत्यर्थः। पूर्व्वा दिक् पश्चिमं नभइत्यादिवत् एकदेशिशब्दस्यैकदेशशब्दसामानाधिकरण्यादेकदेशे पर्य्यवसानन्तु पश्चिमं रात्रेरित्येकदेशिसमासः। तद्विधायके पूर्व्वापरादिसूत्रे पश्चिमशब्दाग्रहणादतएव अहःसर्व्वैकदेशेत्यादिना न समासान्तोऽपि तस्यापि पूर्व्वापरादिसूत्रेणोक्तसमासविषयत्वादिति। प्रकाशवर्षस्त्वेकदेशिसमासमेवाश्रित्य समासान्तमाह तन्मृग्यम्। गावश्चरन्त्यत्रेति गोचरोगवाञ्चरिस्थानं वनं पश्चिमरात्रौ योगोचरस्तस्मादुपारताः सन्निवृत्ताः जवेन गाम्भुवम्पतितुन्धावितुमपारयन्तोऽशक्नुवन्तः प्रस्नुतपीवरोधसोवत्सस्मरणात् स्रवत्क्षीराः। ऊधस्तु क्लीवमापीनमित्यमरः। ऊधसोऽनङिति स्त्रीग्रहणङ्कर्त्तव्यमिति नियमान्नानङादेशः। उत्सुकाः वत्सेषूत्कण्ठितागवां गणास्तमर्ज्जुनमवेक्षणोत्सुकन्दर्शनलालसञ्चक्रुः। स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्या स्त्रियाम्पुंसि गौरित्युभयत्राप्यमरः। अत्र स्वभावोक्तिरलङ्कारः। स्वभावोक्तिरलङ्कारो यथावद्वस्तुवर्णनमिति लक्षणात्॥ १०॥

परीतमिति। सोऽर्ज्जुनः उच्चापजये उच्चान्तरभङ्गे सति जयश्रिया परीतं वेष्टितमश्वैर्नदन्तं क्षतसिन्धुरोधसं रुग्णपरिक्षत

परीतमुच्चापजये जयश्रिया
नदन्तमुच्चैः चतसिन्धुरोधसम् ।
ददर्श पुष्टिन्दधतं स शारदीं
सविग्रहन्दर्प्पमिवाधिपङ्गवाम् ॥ ११ ॥
विमुच्यमानैरपि तस्य मन्थर
ङ्गवां हिमानीविशदैः कदम्बकैः ।
शरन्नदीनाम्पुलिनैः कुतूहल
ङ्गलद्दुकूलैर्जघनैरिवादधे ॥ १२ ॥

शरदि भवां शारदीं पुष्टिमवयवोपचयन्दधतं गवामधिपं महोक्षं सविग्रहं मूर्त्तिमन्तम् । कायो देहः क्लीवपुंसोः शरीरं वर्ष्म विग्रह इत्यमरः । दर्प्पमिवेत्युत्प्रेक्षा । ददर्श ॥ ११ ॥

विमुच्यमानैरिति । हिमानीविशदैर्हिमसङ्घातशुभ्रैः । हिमानी हिमसंहतिरित्यमरः । इन्द्रवरुणेत्यादिना ङीष् । तत्स न्नियोगादानुगागमश्च । गवां कदम्बकैः कर्दभिः । कदम्बकं समूहे श्रीफले पुष्पविशेषके इत्यमरः । मन्थरं मन्दं विमुच्यमानैरपि किमुताविमुच्यमानैरिति भावः । शरन्नदीनां सम्बन्धिभिः । शर द्ग्रहणम्प्रावृट्निवृत्त्यर्थन्तत्र पुलिनादर्शनादिति भावः । पुलिनैः कर्दभिर्गलद्दुकूलैर्ज्जघनैरिव तस्यार्ज्जुनस्य कुतूहलङ्कौतुकमादधे आहितम् ॥ १२ ॥

गतानिति । पाण्डवोऽर्ज्जुनः पशूनाङ्गवां सह जन्म येषां ते सहजन्मानः सोदरास्तएव बन्धवस्तेषाम्भावस्तत्ता ताङ्गतान्पशुषु

गतान्पशूनां सहजन्मबन्धुतां
गृहाश्रयम्प्रेम वनेषु बिभ्रतः ।
ददर्श गोपानुपधेनु पाण्डवः
कृतानुकारानिव गोभिरार्ज्जवे ॥ १३ ॥

परिभ्रमन्मूर्द्धजषट्पदाकुलैः
स्मितोदयादर्शितदन्तकेसरैः ।
मुखैश्चलत्कुण्डलरश्मिरञ्जितै
र्नवातपामृष्टसरोजचारुभिः ॥ १४ ॥

सोदराभिमानवत इत्यर्थः । गृहाश्रयं गृहविषयम्प्रेम वनेषु बिभ्रतः वनेषु गृहाभिमानिन इत्यर्थः । आर्ज्जवे ऋजुत्वे विधेयत्वे गोभिः पशुभिः कृतानुकारानकृतावस्थितानित्युत्प्रेक्षा । ततोविधेया नित्यर्थः । गाः पातीति गोपाः गोपालकाः । आतोऽनुपसर्गे क इति कप्रत्ययः । तानुपधेनु धेनुसमीपे । समीपार्थेऽव्ययीभावः । ददर्श । अत्रोत्प्रेक्षानुप्राणिता स्वभावोक्तिरलङ्कारः ॥ १३ ॥

अथ चतुर्भिर्वल्लवीर्नर्त्तकीसाम्येन वर्णयति । परिभ्रमदिति । मूर्द्धजाः षट्पदा इवेत्युपमितसमासः । सरोजचारुभिरित्युपमानुसारात् । परिभ्रमद्भिश्चलद्भिर्मूर्द्धजैः षट्पदैराकुलानि तैः दन्ताः केसरा इवेति पूर्ववत्समासः । स्मितोदयेनादर्शितार्ईषत्प्रकाशिताः दन्तकेसरा येषान्तैस्तथोक्तैश्चलत्कुण्डलरश्मिरञ्जितैश्चञ्चलकनककर्णवेष्टनप्रभानुलिप्तैरतएव नवातपामृष्टम्बालातपस्पृष्टं यत्सरोजन्तद्वच्चारुभिर्मुखैरुपलक्षिताः ॥ १४ ॥

निबद्धनिःश्वासविकम्पिताधरा
लता इव प्रस्फुरितैकपल्लवाः ।
व्यपोढपार्श्वैरपवर्त्तितत्रिका
विकर्षणैः पाणिविहारहारिभिः ॥ १५ ॥
व्रजाजिरेष्वम्बुदनादशङ्किनीः
शिखण्डिनामुन्मदयत्सु योषितः ।
मुहुः प्रणुन्नेषु मथां विवर्त्तनै
र्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥ १६ ॥

निबद्धेति । निबद्धेनानुरुद्धेन निःश्वासेन विकम्पिताअधरा यासान्तास्तथोक्ताः अतएव प्रस्फुरितैकपल्लवाः प्रचलितैकैकपल्लवा इत्यर्थः । क्वचित्सङ्ख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवदिति कैयटः दैवादेकपल्लवस्फुरणस्यापि लोके सम्भवात् । लता इव स्थिता इत्युपमैवेयं नोत्प्रेक्षा किञ्च व्यपोढानि विपरीतानि पार्श्वानि येषु तैः पाणिविहारहारिभिः पाणिविक्षेपमनोहरैः । अङ्गहारो ऽङ्गविक्षेपइत्यमरः । विकर्षणैर्मन्थगुणकर्षणैरपवर्त्तितत्रिकाः सञ्चलितनितम्बाः । यद्यपि पृष्ठवंशाधरे त्रिकमित्यमरः तथाप्यत्र नितम्बोलक्ष्यते तन्निकट्यादिति भावः ॥ १५ ॥

व्रजेति । व्रजाजिरेषु गोष्ठप्राङ्गणेषु । अधिकरणे सप्तमी । व्रजो गोष्ठाध्ववृन्देष्विति विश्वः । अम्बुदनादशङ्किनोर्गर्ज्जितभ्रमवती रिति भ्रान्तिमदलङ्कारः । शिखण्डिनां योषितोमयूरीः योषि द्ग्रहणं मौग्ध्यातिशयार्थं । उन्मदयत्सु उन्मदाः कुर्व्वत्सु । तत्करो

स मन्थरावल्गितपीवरस्तनीः
परिश्रमक्लान्तविलोचनोत्पलाः ।
निरीक्षितुन्नोपरराम बल्लवी
रभिप्रनृत्ता इव वारयोषितः ॥ १७ ॥

॥ कलापकम् ॥

तीति ण्यन्ताच्छतृप्रत्ययः । मथ्नाम्मन्थनदण्डानां । वैशाखमन्थमन्थान मन्थानो मन्थदण्डक इत्यमरः । विवर्त्तनैः परिभ्रमणैः मुहुः प्रणु न्नेषु कम्पितेष्विति स्वभावोक्तिः । कुम्भेषु कलशेषु मृदङ्गवन्मन्थरं ईषन्नदत्सु स्तनवत्सु सत्सु इति नाथसाम्योक्तिः । भावलक्षणे सप्तमीयम् ॥ १६ ॥

स इति । मन्थरं मन्दमावल्गिताश्चञ्चलाः पीवराः स्तना यासान्ता स्तथोक्ताः । स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधादिति ङीष् । परि श्रमेण क्लान्तानि ग्लानानि विलोचनोत्पलानि यासान्तास्तथोक्ताः बल्लवीर्गोपीः । गोपे गोपालगोसङ्ख्यगोधुगाभीरवल्लवा इत्यमरः । अभिप्रनृत्तानृत्यन्तीः । गत्यर्थादकर्म्मकेत्यादिना कर्त्तरि क्तः गति बुद्धिपूजार्थेभ्यश्चेति चकाराद्वर्त्तमानार्थत्वम् । वारयोषितो वेश्या इव । वारस्त्रीगणिकावेश्या इत्यमरः । सोऽर्ज्जुनो निरीक्षितुमीक्षितुमीक्षितुं मुन् । नोपरराम न विरमति स्म । उपाच्च विभाषाकर्म्मकादिति परस्मैपदं । अत्र चतुःश्लोक्यामुपमास्वभावोक्त्योः संसृष्टिः ॥ १७ ॥

पपातेति । सोऽर्ज्जुनः पूर्व्वां प्रावृषेण्यां विजिह्मतां वक्रतां जहतस्त्यजतः । शरदि निष्पङ्कत्वेन समरेखयैव सुगमत्वादिति भावः । जहातेः शतृप्रत्ययः । वृषोपभुक्तान्तिकशस्यसम्पदः वृषभं

पपात पूर्व्वां जहतोविजिह्मतां
वृषोपभुक्तान्तिकशस्यसम्पदः ।
रथाङ्गसीमन्तितसान्द्रकर्द्दमा
न्प्रसक्तसम्पातपृथक्कृतान्पथः ॥ १८ ॥
जनैरुपग्राममनिन्द्यकर्म्मभि
र्विविक्तभावेङ्गितभूषणैर्वृताः ।
भृशं ददर्शाश्रममण्डपोपमाः
सपुष्पहासाः स निवेशवीरुधः ॥ १९ ॥

चर्वितप्रान्तशस्यसम्पद्बीन् । सुकृते वृषभे वृषइत्यमरः । सीमन्ता इव सीमन्ताश्चक्राङ्गपद्धतयः सीमन्तवन्तः कृताः सीमन्तिताः । मलन्तात्तत्करोतीति णिचि क्तः णाविष्टवद्भावान्मतुपोलुक् । रथाङ्गैश्चक्रैः सीमन्तिताः सान्द्राः कर्दमाघनीभूताः पङ्कायेषु तान्प्रसक्तसम्पातेन सन्ततसञ्चारेण पृथक्कृतान्पथोमार्ग्गान्पपात जगामेति स्वभावोक्तिः ॥ १८ ॥

जनैरिति । सोऽर्ज्जुनः उपग्रामं ग्रामेषु विभक्त्यर्थेऽव्ययीभावः । अनिन्द्यकर्म्मभिरनिषिद्धवृत्तिभिः वृत्तिस्तैकत्र वृत्त्यादिरन्यत्र शिलोञ्छादिः विविक्तान्येकाग्राणि भावोऽभिप्रायः इङ्गितञ्चेष्टा भूषणमलङ्कारश्च येषान्तैस्तथोक्तैर्जनैर्वृता अधिष्ठिता इत्यर्थः । अतएवाश्रमेषु मुनिस्थानेषु ये मण्डपाः तदुपमाः । मण्डपोऽस्त्री जनाश्रयइत्यमरः । सपुष्पहासाः पुष्पविकाशसहिताः । तेन सहेत्यादिनाबहुव्रीहिः । निवेशवीरुधोगृहगुल्मिनीः

ततः स सम्प्रेक्ष्य शरद्गुणश्रियं
शरद्गुणालोकनलोलचक्षुषम् ।
उवाच यक्षस्तमनोदितोऽपिगां
न हीङ्गितज्ञोऽवसरेऽवसीदति ॥ २० ॥

इयं शिवायानियतेरिवायतिः
कृतार्थयन्ती जगतः फलैः क्रियाः ।
जयश्रियम्पार्थ पृथूकरोतु ते
शरत्प्रसन्नाम्बुरनम्बुवारिदा ॥ २१ ॥

वीरुधोवल्लिगुल्मिन्याविति वैजयन्ती । भृशं सादरन्ददर्श । उपमालङ्कारः ॥ १९ ॥

ततइति । ततः स पूर्व्वोक्तोयक्षः शरद्गुणश्रियं सम्प्रेक्ष्य दर्शनीयां वर्णनीयाञ्च विचार्य्येत्यर्थः । शरद्गुणालोकने लोलचक्षुषं सतृष्णदृष्टिं । लोलश्चलसतृष्णयोरित्यमरः । तमर्ज्जुनमनोदितोऽप्यपृष्टोऽपि गां वाचमुवाच । तथाहि इङ्गितज्ञोभावज्ञः । इङ्गितं हृद्गतोभावइति विश्वः । अवसरे उक्तियोग्ये काले नावसीदति न वाचं यच्छति । नापृष्टः कस्यचिद्ब्रूयादिति निषेधस्तु नाकाङ्क्षितोक्तिविषयइति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ २० ॥

इयमिति । हे पार्थ शिवायाः कल्याणकारिण्याः नियतेः । दैवन्दिष्टम्भागधेयं भाग्यं स्त्री नियतिर्विधिरित्यमरः । शुभावहदैवस्यायतिः फलदानकालः सेव जगतः क्रियां कृष्यादिकर्म्माणि

उपैति शस्यम्परिणामरम्यता
न्नदीरनौद्धत्यमपङ्कता महीम्।
नवैर्गुणैः सम्प्रति संस्तवस्थिर
न्तिरोहितम्प्रेम घनागमश्रियः ॥ २२ ॥
पतन्ति नास्मिन् विशदाः पतत्रिणो
धृतेन्द्रचापान पयोदपङ्क्तयः।
तथापि पुष्णाति नभः श्रियम्परां
न रम्यमाहार्य्यमपेक्षते गुणम् ॥ २३ ॥

फलैर्लाभैः। लाभनिष्पत्तियोगेषु बीजभावे धने फलमिति वैजयन्ती। कृतार्थयन्ती सफलयन्ती प्रसन्नाम्बुर्निर्मलोदका अन म्बुवारिदा निर्जलमेघा अनेन विशेषणद्वयेन द्यावापृथिव्योरानु कूल्यं सूचयति। इयं शरत्ते जयश्रियम्पृथूकरोतु। आशीःऽर्थे लोट् ॥ २१ ॥

उपैतीति। शस्यं ब्रीह्यादिकम्परिणामेन परिपाकेन रम्यता मुपैति। नदीरनौद्धत्यं गम्यरूपत्वमुपैति। महीमपङ्कता निष्पङ्क त्वमुपैति। तथाहि। सम्प्रति नवैर्गुणैः पूर्व्वोक्तैः शरद्धर्म्मैः संस्तवेन परिचयेन स्थिरं दृढमपि घनागमश्रियः प्रावृड्लक्ष्म्याः सम्बन्धि तद्विषयमित्यर्थः प्रेम तिरोहितन्निरर्थकं कृतमित्यर्थः। गुण तन्त्राः प्रेमाणो न परिचयतन्त्रा इति भावः। वास्तवालङ्कारः ॥ २२ ॥

पतन्तीति। अस्मिन्नभसि विशदाः पतत्रिणो लोकाप्न पतन्ति न प्रसरन्ति धृतेन्द्रचापाः पयोदपङ्क्तयश्च न पतन्ति। तथापि श्रीकारणाभावेऽपि नभः परां श्रियं शोभाम्पुष्णाति।

विपाण्डुभिर्म्लानतया पयोधरै-
श्च्युताचिराभागुणहेमदामभिः ।
इयं कदम्बानिलभर्त्तुरत्यये
न दिग्वधूनां कृशता न राजते ॥ २४ ॥

तथाहि रम्यं स्वभावसुन्दरं वस्तु आहार्य्यमारोप्यमाणं गुणन्नापेक्षते । तत्र स्वभावस्यैव समर्थत्वादिति भावः । अर्थान्तरन्यासः ॥ २३ ॥

विपाण्डुभिरिति । कदम्बानिलशब्देन वर्षर्तुरुपलक्ष्यते सएव भर्त्ता तस्यात्यये विरहे म्लानतया निर्ज्जलतया दुर्ब्बलतया च विपाण्डुभिः च्युतानि अचिराभा विद्युतस्ता गुणाएव हेमदामानि सुवर्णसूत्राभरणानि येभ्यस्तैः पयोधरैरम्बोदैरन्यत्र स्तनैरुपलक्षितानां । स्तनाम्भोदौ पयोधराविति वैजयन्ती । दिशएव वध्वस्तासामियं कृशता न राजतइति न किन्तु राजतएव भर्त्तृवियुक्तत्वात् । आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशेति स्मरणादिति भावः । सामान्यतः प्रसक्तमरञ्जनं सङ्कार्य्यस्यैकेन नञानूद्य द्वितीयेन निषेधति । यथाह वामनः । सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधाविति । अत्र रूपकालङ्कारः स्फुटएव ॥ २४ ॥

विहायेति । मदात्ययात् मदक्षयाद्रक्तकण्ठस्य अग्राम्यस्वरस्य कण्ठशब्देनात्र तद्गतः स्वरोलक्ष्यते शिखण्डिनोमयूरस्य सन्निधिनि रुदिते उच्चैस्तरे रुते कूजिते वाञ्छां विहाय श्रुतिः श्रोत्रम् । कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवइत्यमरः । उन्मदहंसनिःस्वनं मत्तमरालकूजितं श्रयति भजते । नन्वकाण्डे परिचित

विहाय वाञ्छामुदिते मदात्यया
दरक्तकण्ठस्य रुते शिखण्डिनः ।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं
गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥ २५ ॥
श्रमी पृथुस्तम्बभृतः पिशङ्गता
ङ्गताविपाकेन फलस्य शालयः ।
विकासि वप्राम्भसि गन्धसूचित
न्नमन्ति निघ्रातुमिवासितोत्पलम् ॥ २६ ॥

ननु हरिणापरिचिते कथं प्रीत्युदयइत्याशङ्क्यार्थान्तरं न्यस्यति । गुणाइति । प्रीणातीति प्रियः । इगुपधज्ञाप्रीकिरः कइति कप्रत्ययः । प्रियत्वे प्रीतिकरणे गुणाअधिकृतानियुक्ताः संस्तवः परिचयोनाधिकृतः न समर्थः प्रेमाधाने गणवत्त्वम्प्रयोजकन्न परिचयइत्यर्थः ॥ २५ ॥

श्रमीति । श्रमी पृथून् स्तम्बान् गुच्छान् बिभ्रतीति पृथुस्तम्बभृतः । स्तम्बोगुच्छस्तृणादिनइत्यमरः । फलस्य प्रसवस्य विपाकेन परिणामेन पिशङ्गताङ्गताः शालयोव्रीहिविशेषाः । वप्राम्भसि केदारोदके । पुन्नपुंसकयोर्वप्रः केदारः चेत्रइत्यमरः । विकसतीति विकासि विकसितं गन्धेन सूचितं ज्ञापितमसितोत्पलन्निघ्रातुमिव नमन्ति । निध्यातुमिवेति पाठे द्रष्टुमित्यर्थः । निर्वर्णयितुं वा । निर्वर्णनन्तु निध्यानन्दर्शनालोचनेक्षणमित्यमरः । अत्र फलभारानमनस्य निघ्राणफलकत्वमुत्प्रेक्ष्यतइति फलोत्प्रेक्षा ॥ २६ ॥

मृणालिनीनामनुरञ्जितं त्विषा
विभिन्नमम्भोजपलाशशोभया।
पयः स्फुरच्छालिशिखापिशङ्गितं
द्रुतन्धनुष्खण्डमिवाहिविद्विषः ॥ २७ ॥

अथ चतुर्भिः कलापकमाह । मृणालिनीनामिति । मृणालिनीनाम्पद्मलतानान्त्विषा हरितवर्णेन अनुरञ्जितन्तद्वर्णतामापादितमित्यर्थः । तथाऽम्भोजपलाशशोभया पद्मदलकान्त्या आरुण्येनेत्यर्थः । विभिन्नं मिश्रितम् । तथा स्फुरच्छालिशिखापिशङ्गितं स्फुरद्भिः कलमाग्रैः पिङ्गलीकृतमित्थं नानावर्णत्वात् द्रुतं विगलितमहिविद्विषो वृत्रशत्रोरिन्द्रस्य । सर्पे वृत्रासुरेऽप्यहिरिति वैजयन्ती । धनुष्खण्डमिव स्थितम् । नित्यं समासेऽनुत्तरपदस्थस्येति विसर्जनीयस्य षत्वम् । पयोवप्राम्भोऽपदिश्य व्याजीकृत्य धावतामित्यागामिना सम्बन्धः । अत्र धनुष्खण्डस्य द्रुतस्य लोकेऽप्रसिद्धत्वादुत्प्रेक्षेयं नोपमा ॥ २७ ॥

विपाण्डुभिरिति । विपाण्डु शुभ्रमनिलोद्धूतमनिलोत्क्षिप्तं सप्त सप्त पलाशानि पत्राणि पर्वसु येषान्ते वृक्षाः सप्तपलाशाः । क्वचित्सप्तशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवदित्युक्तम् । तेषाम्पुष्पाणि सप्तपलाशानि । द्विहीनम्प्रसवे सर्वमित्यमरः । फले लुगित्यणो लुक् । तेषु जातं सप्तपलाशजं रजः परागं संव्यानमुत्तरीयमिव । संव्यानमुत्तरीयञ्चेत्यमरः । निरुन्धतीर्निवारयन्तीः प्रावृतवतीरिति यावत् । अनाविलान्यकलुषाणि उन्मीलितानि चक्षूंषीव याः स्वान्तास्तथोक्ताः । नीलसरोरुहाणि नीलसैरेयकाणि चक्षूंषीव यासान्तास्तथोक्ताः । नीलत्वञ्च

विपाण्डु संव्यानमिवानिलोद्धतं
निरुन्धतीः सप्तपलाशजं रजः ।
अनाविलोन्मीलितबाणचक्षुषः
सपुष्पहासा वनराजियोषितः ॥ २८ ॥

अदीपितं वैद्युतजातवेदसा
सिताम्बुदच्छेदतिरोहितातपम् ।
ततान्तरं सान्तरवारिशीकरैः
शिवं नभोवर्त्म सरोजवायुभिः ॥ २९ ॥

गलोदासीबाणओदनपाक्यपीति धन्वन्तरिः । पुष्पाणि हासाइव तैः सह वर्त्तन्तइति सपुष्पहासाः वनराजयोयोषितइव वनराजियोषितः ता अपदिश्येत्यन्वयः । अत्र संव्यानमिवेत्युपमैव अन्यत्रोपमितसमासे लिङ्गम् । यथा काचित् केनचित्कामुकेनाचिप्तं स्तनांशुकं निरुन्धे तद्वदिति भावः ॥ २८ ॥

अदीपितमिति । वैद्युतजातवेदसा वैद्युताग्निना अदीपितम् प्रकाशितं विद्युत्प्रकाशस्य दृष्टिविघातकत्वात्तदाहित्यं गुणइति भावः । सिताम्बुदानाञ्छेदैः खण्डैः तिरोहितातपम् । न दृष्टि बाधोनाप्यातपबाधइति भावः । सान्तरवारिशीकरैः विरलाम्बुकणैस्ततान्तरं व्याप्तमध्यं सरोजवायुभिः शिवं रम्यं नभोवर्त्मचापदिश्येति । स्वभावोक्तिरलङ्कारः ॥ २९ ॥

सितेति । अपदिश्यधावतामिति पूर्व्वश्लोकत्रयोक्तमन्वयःप्रभृतिकमुद्दिश्य धावताममीषां सितच्छदानामपत्रीणां हंसानाम् ।

सितच्छदानामपदिश्य धावतां
रुतैरमीषां ग्रथिताः पतत्रिणाम् ।
प्रकुर्व्वते वारिदरोधनिर्गताः
परस्परालापमिवामलादिशः ॥ ३० ॥

॥ कलापकम् ॥

विहारभूमेरभिघोषमुत्सुकाः
शरीरजेभ्यश्च्युतयूथपङ्क्तयः ।
असक्तमूधांसि पयः क्षरन्त्यमू
रुपायनानीव नयन्ति धेनवः ॥ ३१ ॥

हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकस इत्यमरः । रुतैः शब्दैर्ग्रथिताः दृब्धाः । ग्रथितं गुम्फितं दृब्धमित्यमरः । वारिदरोधनिर्गता मेघोपरोधनिर्मुक्ताः अत एवामलाः प्रसन्नाः दिशः परस्परालापं प्रकुर्व्वत इव दिश्या मेघोपरोधनिर्मुक्ताश्चिरादुच्छ्वसिता इति हंसकूजितव्याजेन परस्परमालपन्तीत्युत्प्रेक्षा ॥ ३० ॥

विहारेति । विहारभूमेरपरात्रगोचरादित्यर्थः । आगच्छन्त्य इति शेषः । अभिघोषमुत्सुकाः व्रजम्प्रत्युत्कण्ठिताः वत्सप्रेम्णेति भावः । घोष आभीरपल्ली स्यादित्यमरः । च्युता त्रुटिता यूथानां कुलानाम्पङ्क्तिः श्रेणीर्यासां तास्तथोक्ताः । सजातीयैः कुलं यूथमित्यमरः । अमूः धेनवोऽसक्तमप्रतिबन्धम्यथः क्षीरं क्षरन्ति स्रवन्ति वत्सस्मरणात्प्रस्रवन्तीत्यर्थः । क्षरतेः शतृप्रत्ययः । ऊधांसि शरीरजेभ्योऽपत्येभ्य उपायनानीवा तितोषकारिणीवेत्युत्प्रेक्षा ।

जगत्प्रसूतिर्ज्जगदेकपावनी
व्रजोपकण्ठन्तनयैरुपेयुषी ।
द्युतिं समग्रां समितिर्गवामसा
वुपैति मन्त्रैरिव संहिताहुतिः ॥ ३२ ॥

नयन्ति प्रापयन्ति । यथा लोके कुतश्चित्प्रवासादेत्य मातरः किञ्चि त्स्वाद्यमानयन्ति तद्वदिति भावः ॥ ३१ ॥

जगदिति । जगत्प्रसूतिर्जगत्कारणमाज्यादिहविर्द्वारेणेति भावः । जगतामेकपावनी मुख्यशोधनी व्रजोपकण्ठं गोष्ठान्तिकम् । दूरान्तिकार्थेभ्योद्वितीया चेति द्वितीया । उपकण्ठान्तिकाभ्यर्णा भ्यग्रादृत्यमरः । तनयैर्वत्सैरुपेयुषी सङ्गता । उपेयिवाननाश्वानन् चानश्चेति क्वसुप्रत्ययान्तोनिपातः । उगितश्चेति ङीप् । असौ गवां समितिः संहतिः । मन्त्रैरृग्यजुषादिभिः । मन्त्रोहृगादिगृह्यो क्तिरिति वैजयन्ती । संहिता योजिता आहुतिरिव समग्रां द्युति मुपैति । आहुतिरपि जगत्प्रसूतिर्ज्जगदेकपावनी च । अग्नौ प्रास्ता हुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नन्ततः प्रजाइति स्मरणादिति भावः ॥ ३२ ॥

कृतेति । जितबर्हिणध्वनौ केकानुकारिणीत्यर्थः । एतेन षड्ज स्वरप्रायङ्गायतीति गम्यते । यथाह मातङ्गः । षड्जं मयूरोवदतीति । गाः पान्तीति गोपास्तेषाम्भार्य्यागोप्यः आतोनुपसर्गे कइति कप्रत्ययः । पुंयोगादाख्यायामिति ङीष् । ताएव जनः सुस्वरो मधुरकण्ठोयोगोपीजनोवल्लवीजनस्तस्य गीतनिःस्वने गाने कृता वधानमेकाग्रचित्तमिदम्पुरोवर्त्ति स्वर्गीकदम्बकङ्कर्ट भूयसीमति

कृतावधानञ्जितबर्हिणध्वनौ
सुरक्तगोपीजनगीतनिःस्वने ।
इदञ्जिघत्सामपहाय भूयसीं
न शस्यमभ्येति मृगीकदम्बकम् ॥ ३३ ॥
असावनास्थापरयावधीरितः
सरोरुहिण्या शिरसा नमन्नपि ।
उपैति शुष्यन् कलमः सहाम्भसा
मनोभुवा तप्त इवाभिपाण्डुताम् ॥ ३४ ॥

महतीं जिघत्सामत्तुमिच्छाम् । अदः सन्नन्तात्प्रत्ययः लुङ्सनो र्घस्लृ इति घसादेशः अपहाय हित्वा शस्यं नाभ्येति नोपैति । गीता सक्त्या क्षुधामपि न गणयतीत्यर्थः ॥ ३३ ॥

असाविति । शिरसाग्रेण मूर्द्ध्नाऽवनमन्प्रणमन्नपि अनास्थापरया ऽनादरपरया सरोरुहिण्या अवधीरितोऽवज्ञातः अम्भसा सहचर भूतेनेति भावः । शुष्यन्नसौ कलमः शालिविशेषो मनोभुवा तप्त इव कामार्त्त इवाभिपाण्डुतामुपैति । अत्रानास्थापरयेति प्रकृत सरोरुहिणीविशेषणसामर्थ्यादप्रस्तुतनायिकाप्रतीतेस्समासोक्तिरुत्ति ष्ठमानायाः सरोरुहिण्याः प्रतीयमानया नायिकया शुद्धभेदेऽप्यभेद लक्षणातिशयोक्तिमहिम्नाऽवधीरणक्रियासम्बन्धान्निर्वहन्ती मनो भुवा तप्त इवेत्युत्प्रेक्षानिर्वाहिकेत्यतिशयोक्त्यनुप्राणितसमासोक्त्युप मयोरङ्गाङ्गिभावेन सङ्करः ॥ ३४ ॥

अमीति । समुद्धूतसरोजरेणुनेति सौरभ्योक्तिः हृतासारकणे नोपात्ताम्बुकणेनेति शैत्योक्तिः । धारासम्पात आसार इत्यमरः । वायुना

अमी समुद्भूतसरोजरेणुना
हृताहृतासारकणेन वायुना।
उपागमे दुश्चरिताइवापदा
ङ्गतिन्न निश्चेतुमलं शिलीमुखाः ॥ ३५॥
मुखैरसौ विद्रुमभङ्गलोहितैः
शिखाः पिशङ्गीः कलमस्य बिभ्रती।
शुकावलिर्व्यक्तशिरीषकोमला
धनुःश्रियङ्गोत्रभिदोऽनुगच्छति ॥ ३६ ॥

हृता आकृष्टा अमी शिलीमुखा भृङ्गाः आपदामुपागमे राजादिभयागमे दुश्चरितादुष्टकर्म्माणश्चौरादय इव गम्यतइति गतिङ्गन्तव्यदेशम्। देशोपायगमे गतिरिति वैजयन्ती। निश्चेतुन्नालन्न समर्थाः एकत्र वायोः सार्व्वत्रिकत्वेनोपादानादनिश्चयादन्यत्र भयान्धत्वादिति भावः ॥ ३५ ॥

मुखैरिति। विद्रुमभङ्गलोहितैर्मुखैः पिशङ्गीः पिशङ्गवर्णाः कलमस्य शिखाः शाल्यग्राणि बिभ्रती व्यक्तशिरीषकोमला विकसितशिरीषसवर्णाऽसौ शुकावलिर्गोत्रभिदइन्द्रस्य धनुषः श्रियमनुगच्छत्यनुकरोति नानावर्णत्वादिन्द्रधनुरिवाभातीत्युपमालङ्कारः ॥ ३६ ॥

इतीति। अथ तत्र तस्मिन्पूर्व्वोक्तयत्ने इतीत्यङ्कथयति सति नातिदूरादनतिदूरादीषद्दूरइत्यर्थः। नञर्थस्य नशब्दस्य सुप्सुपेति समासः। पिहितोष्णरश्मिविम्बस्तिरोहितार्कमण्डलइत्यौन्नत्यो

इति कथयति तत्र नातिदूरा
दथ ददृशे पिहितोष्णरश्मिबिम्बः ।
विगलितजलभारशुक्लभासा
न्निचयइवाम्बमुचान्नगाधिराजः ॥ ३७ ॥

तमतनुवनराजिश्यामितोपत्यकान्त
न्नगमुपरि हिमानीगौरमासाद्य जिष्णुः ।
व्यपगतमदरागस्यानुसस्मार लक्ष्मी
मसितमधरवासोबिभ्रतः सीरपाणेः ॥ ३८ ॥

क्तिः । नगाधिराजोहिमाद्रिः विगलितोजलभारोयेषान्ते तथोक्ताः । अतएव शुक्लभासः द्वयोरन्यतरस्य विशेष्यत्वविवक्षया विशेषण समासः । तेषां विगलितजलभारशुक्लभासां शुभ्राणामम्बुमुचां निचयइव मेघवृन्दमिव ददृशे दृष्टः ॥ ३७ ॥

तमिति । जिष्णुरर्ज्जुनोऽतनुभिर्महतीभिर्वनराजिभिः श्यामिताः श्यामला उपत्यकान्ता आसन्नभूमिप्रदेशाः यस्य तन्तथोक्तम् । उपत्यकाऽद्रेरासन्ना भूमिरूर्द्ध्वमधित्यकेत्यमरः । उपाधिभ्यान्त्यकन्नासन्नारूढयोरिति त्यकन्प्रत्ययः । उपरि हिमानीभिर्हिमसङ्घातैः गौरं शुभ्रन्नगं हिमाद्रिमासाद्यापगतोनिवृत्तोमदरागोयस्य तस्य । असितन्नीलमधरं वासः उत्तरीयं बिभ्रतोधृतवतः सीरं हलम्पाणौ यस्य तस्य सीरपाणेर्हलायुधस्य । हलायुधः नीलाम्बरोरौहिणेयस्तालाङ्कोमुषली हली । सङ्कर्षणः सीरपाणिरित्यमरः । सप्तमीविशेषणइति ज्ञापकाद्व्यधिकरणपदोबहु

इति श्रीभारविकृतौ किरातार्ज्जुनीये
महाकाव्ये शरद्दर्शनोनाम चतुर्थस्सर्ग्गः ॥ ४ ॥

व्रीहिः प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ स्त इति सप्तम्याः पर निपातः । लक्ष्मीं शोभामनुसस्मार स्मृतवान् । अत्र सदृशदर्शनेन सदृशान्तरस्य स्मरणात्स्मरणालङ्कारः । सदृशं सदृशानुभवाद्यत्र स्मर्य्यते तत् स्मरणमिति विद्याधरः ॥ ३८ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायाञ्चतुर्थस्सर्ग्गः ॥ ४ ॥

अथ जयाय नु मेरुमहीभृतो
रभसया नु दिगन्तदिदृक्षया ।
अभिययौ स हिमाचलमुच्छ्रितं
समुदितं नु विलङ्घयितुन्नभः ॥ १ ॥

तपनमण्डलदीपितमेकतः
सततनैशतमोवृतमन्यतः ।
हसितभिन्नतमिस्रचयम्पुरः
शिवमिवानुगतङ्गजचर्म्मणा ॥ २ ॥

अथ हिमवद्दर्शनमारभते तत्र पञ्चदशभिः कुलकमाह । ।अथेति। अथानन्तरं सोऽर्जुनः मेरुमहीभृतो हेमाद्रेर्जयाय नु जयार्थं वा। नुशब्दोऽत्र वितर्के । नु पृच्छायां वितर्के चेत्यमरः। रभसोवेगः । रभसोवेगहर्षयोरिति वैजयन्ती । तद्वत्या रभसयातीवोत्कटतयेति यावत् । अर्शआदित्वादच्प्रत्ययः । दिगन्तानान्दिदृक्षया नु द्रष्टुमिच्छया वा नभोऽन्तरिक्षं विलङ्घयितुं नु अतिक्रमितुं वा समुदितं समुत्पतितमिव स्थितमित्यर्थः। कुतः उच्छ्रितमुन्नतं हिमस्याचलं हिमाचलमभिययौ अत्रानिर्द्धारितानेकफलविशिष्टा अनन्यगुणनिमित्तोदितादिक्रियोत्प्रेक्षा सा च व्यञ्जकाप्रयोगात्प्रतीयमानेति सङ्क्षेपः। द्रुतविलम्बितं वृत्तम् । द्रुतविलम्बितमाह नभौ भराविति लक्षणात् ॥ १ ॥

तपनेति । एकतः एकस्मिन्भागे । सार्व्वविभक्तिकस्तसिः । तपनमण्डलेन दीपितम्प्रकाशितं अन्यतोऽन्यस्मिन् भागे सततेनानि

क्षितिनभस्सुरलोकनिवासिभिः
कृतनिकेतमदृष्टपरस्परैः ।
प्रथयितुं विभुतामभिनिर्म्मित
म्प्रतिनिधिञ्जगतामिव शम्भुना ॥ २ ॥

षिद्धेन नैशेन निशिभवेन तमसावृतं एकत्रान्हा रात्र्या चान्यत्र व्याप्तमित्यर्थः । अतएव पुरोऽग्रे हसितेनाट्टहासेन विभिन्नतमि स्रचयन्निरस्ततमस्तोमं तथा गजचर्म्मणा अनुगतम्पश्चाद्भागं । पश्चा त्वादृशयोरन्वित्यमरः । शिवमिव स्थितम् । तपनतेजःप्रसरो प्यस्य कारणमिव क्वचित्परिसमाप्यतइति महत्त्वातिशयोक्तिः । ॥ १ ॥

क्षितीति । परस्परेऽन्योन्ये । कर्म्मव्यतिहारे सर्व्वनाम्नोद्वे भवत इति वक्तव्यत्वात्परशब्दस्य द्विर्भावः समासवच्च बहुलं यदा समासवत्प्रथमैकवचनन्तदा पूर्व्वपदस्येति वक्तव्यत्वात् प्रथमैकवच नम् सुट् कस्कादित्वाद्विसर्ज्जनीयस्य सत्वम्बहुवचनञ्चान्योन्यशब्द वत् । यथा माघे अन्योन्येषां पुष्करैरामृशन्तइति । अदृष्टाः परपस्परे यैस्ते अदृष्टपरस्परास्तैस्तथोक्तैः । क्षितौ नभसि सुर लोके च निवसन्तीति तैस्तथोक्तैः भूर्भुवःस्वर्लोकवासिभिरित्यर्थः । कृतनिकेतं कृतास्पदं अतएव शम्भुना विभुतां स्वसामर्थ्यम्प्रथयितुं अभिनिर्मितञ्जगताम्प्रतिनिधिम्प्रतिकृतिमिव स्थितमित्युत्प्रेक्षा । प्रतिकृतिरर्च्चाः पुंसि प्रतिनिधिरुपमोपमानं स्यादित्यमरः । त्रैलोक्यसाम्योपममपरिच्छेद्यञ्चेति भावः ॥ २ ॥

भुजगराजसितेन नभःश्रिता
कनकराजिविराजितसानुना ।
समुदितन्निचयेन तडित्वतीं
लघयता शरदम्बुदसंहतिम् ॥ ४ ॥
मणिमयूखचयांशुकभासुराः
सुरवधूपरिभुक्तलतागृहाः ।
दधतमुच्चशिलान्तरगोपुराः
पुर इवोदितपुष्पवनाभुवः ॥ ५ ॥

भुजगेति । पुनश्च भुजगराजसितेन शेषाहिधवलेन नभःश्रिता गगनस्पृशा कनकस्य राजिभिः रेखाभिः विराजिताः सानवो यस्य तेन तथोक्तेन अतएव तडित्वतीं शरदम्बुदसंहतिं लघयता लघूकुर्वता तत्तुल्येनेत्यर्थः । अतएवोपमालङ्कारः । निचयेन शिखरसमुच्चयेन समुदितं समुन्नतम् ॥ ४ ॥

मणीति । पुनर्मणिमयूखचया एव अंशुकानि पटकाण्डादीनि तैर्भासुराः सुरवधूभिः परिभुक्ता लताः गृहाणीव यासु ताः तथोक्ताः । उच्चानि शिलान्तराणि शिलामध्यानि गोपुराणीव यासु ताः उदितान्यूर्ज्जितानि पुष्पाणां वनानि यासु ताः अत एव पुर इव नगराणीव स्थिताः भुवो दधतम् ॥ ५ ॥

अविरतेति । पुनश्च अविरतं अविच्छिन्नं उज्झितं वारि यैस्तेऽविरतोज्झितवारयोवृष्टिमन्त इत्यर्थः अतएव विपाण्डवश्च

अविरतोज्झितवारिविपाण्डुभि-
र्विरहितैरचिरद्युतितेजसा ।
उदितपक्षमिवारतनिःस्वनैः
पृथुनितम्बविलम्बिभिरम्बुदैः ॥ ६ ॥
दधतमाकरिभिः करिभिः क्षतैः
समवतारसमैरसमैस्तटैः ।
विविधकामहिता महिताम्भसः
स्फुटसरोजवना जवना नदीः ॥ ७ ॥

तैरविरतोज्झितवारिविपाण्डुभिः । अतो हिमवत्यचलं सम्भवतीति भावः । अचिरद्युतितेजसा विरहितैः विद्युत्तेजोरहितैः । आरतनिःस्वनैः प्रशान्तगर्जितैश्च अन्यथा पक्षत्वहानिः स्यादिति भावः । पृथुनितम्बविलम्बिभिः महाकटकसङ्गिभिः । कटकोऽस्त्री नितम्बोऽद्रेरित्यमरः । अम्बुदैरुदितपक्षं सञ्जातपक्षमिव स्थितम् । प्राक्छिन्नपक्षस्यापि हिमाद्रेर्धवलाम्बुदसम्बन्धात्पुनः पक्षोत्थानमुत्प्रेक्ष्यते ॥ ६ ॥

दधतमिति । पुनश्चाकरः खनिरेषामस्ति येनिलैर्नेत्या करिभिराकरजैः । खनिः स्त्रियामाकरः स्यादित्यमरः । करिभिर्गजैः फर्त्तृभिः क्षतैर्व्रणैः समवतारेषु तीर्थेषु समैरविषमैः असमैरसदृशैरतादृशैरनुपमैरित्यर्थः तटैरुपलक्षिताः तथा महिताम्भसः श्लाघ्योदकाः अतएव विविधेभ्यः कामेभ्यः अवगाहनाद्युपभोगेभ्यो हिताः अनुकूलाः । चतुर्थी तदर्थेत्यादिना समासः ।

नवविनिद्रजपाकुसुमत्विषां
द्युतिमतां निकरेण महाश्मनाम्।
विहितसान्ध्यमयूखमिव क्वचि
न्निचितकाञ्चनभित्तिषु सानुषु ॥ ८ ॥

स्फुटानि विकसितानि सरोजवनानि यासु ताः जवनावेगवतीः। सुयजोर्ङ्वनिबित्यादिना युच्। नदीर्दधतम्। यमकवृत्त्यनुप्रासभेदत्वात्स्वयमेवालङ्कारः। अर्थालङ्कारस्त्वभ्युच्चयः तस्यातिदुष्करत्वादसपोषेऽपि नाद्रियते। तदुक्तं। प्रायशोयमके चित्रे रसपुष्टिर्न दृश्यते ॥ ७ ॥

नवेति। पुनश्च नवानि विनिद्राणि च यानि जपाकुसुमानि ताम्रपुष्पिकाकुसुमानि तेषां त्विषइव त्विषोयेषान्ते तेषाम् ओड्रपुष्पञ्जपापुष्पं रूपिका ताम्रपुष्पिका चेति वाग्भटः। द्युतिमतां महाश्मनां मणीनां पद्मरागाणामित्यर्थः विशेषणसामर्थ्यात्। निकरेण समूहेन हेतुना क्वचित् निचिताः सङ्घटिताः काञ्चनभित्तयोयेषु तेषु सानुषु विहिताः सान्ध्याः सन्ध्यासम्भवाः मयूखायस्मिन् तमिव स्थितं। काञ्चनभित्तिषु पद्मरागप्रभाप्रसरादुदितसन्ध्यारागइव भातीत्युत्प्रेक्षा ॥ ८ ॥

पृथ्विति। पुनश्च पृथुभिः कदम्बकदम्बकैः नीपकुसुमसमूहैः राजितं। कदम्बसाङ्कः सिद्धार्थे नीपे च निकुरम्बकइत्युभयत्रापि विश्वः। ग्रथितमालैर्बद्धपङ्क्तिभिः तमालवनैस्तापिच्छवनैराकुलमाकीर्णम्। कालस्कन्धस्तमालः स्यात्तापिच्छोपीत्यमरः। लघुतुषारं अल्पसीकरं यत्तुषारजलं हिमोदकन्तत्

पृथुकदम्बकदम्बकराजितं
ग्रथितमालतमालवनाकुलम् ।
लघुतुषारतुषारजलश्च्युत
न्धृतसदानसदाननदन्तिनम् ॥ ९ ॥
रहितरत्नचयान्न शिलोच्चया
नपलताभवनान न दरीभुवः ।
विपुलिनाम्बुरुहान सरिद्वधू
रकुसुमान्दधतन्न महीरुहः ॥ १० ॥

श्च्योतति वर्षति तन्तथोक्तम् । तुषारौ हिमसीकराविति शाश्वतः । अन्येभ्योऽपि दृश्यतइति क्विप् । सदानाः समदाः सदाननाः शोभनाननाश्च ये दन्तिनः ते धृतायेन तन्तथोक्तम् ॥ ९ ॥

रहितेति । पुनश्च रहितरत्नचयान् रहितः परित्यक्तोरत्नचयो यैस्तान् रत्नराशिरहितान् शिलोच्चयान् शिखराणि न दधतं अपलताभवनाः लतागृहरहिताः दरीभुवोगुहाप्रदेशान्न दधतम् । दरी तु कन्दरोवा स्त्री देवखातबिले गुहेत्यमरः । विगतानि पुलिनानि अम्बुरुहाणि च यासान्ताः सरितोवध्वइव ताः सरिद्वधूर्न दधतं । अत्र सरितान्वध्वौपम्यात्पुलिनाम्बुरुहाणां वदनजघनौपम्यं गम्यते । अकुसुमान्महीरुहोवृक्षान्न दधतं किन्तु रत्नादिसम्पन्नानेव शिलोच्चयादीन् दधतमित्यर्थः । महाविभाषया नात्र नञ् समासः ॥ १० ॥

व्यथितेति । पुनश्चानीरशनैरनिर्मेखलैः स्वरशनैरित्यर्थः । घनैर्निबिडैः अमरलोकवधूजघनैः शनैर्मन्दं मन्दं व्यथितसिन्धुं चोभित

व्यथितसिन्धुमनीरशनैः शनै
रमरलोकवधूजघनैर्घनैः ।
फणभृतामभितोविततन्ततं
न्दयितरम्यलताबकुलैः कुलैः ॥ ११ ॥

ससुरचापमनेकमणिप्रभै
रपपयोविशदं हिमपाण्डुभिः ।
अविचलं शिखरैरुपबिभ्रतं
ध्वनितसूचितमम्बुमुचाञ्चयम् ॥ १२ ॥

मरीकं अयमपरः स्वर्ग इति भावः । दयिताः प्रियारम्या लतावीरुधोबकुलाः केसराश्च येषान्तैस्तथोक्तैः । विशारदोमद्य गन्धोबकुलः स च केसर इति वैद्यके । फणभृतां कुलैरभितस्ततं व्याप्तन्तया विततं विस्तृतम् ॥ ११ ॥

ससुरेति । अनेकाविचित्रामणिप्रभायेषां तैस्तथोक्तैः हिमेन पाण्डुभिः शिखरैः ससुरचापं सेन्द्रचापं अपपयोनिर्ज्जलः अतै एव विशदश्च तमपपयोविशदं अविचलं दैवान्निश्चलञ्च अतः शिखरशङ्कास्याभूदित्यर्थः । किन्तु ध्वनितेन गर्ज्जितेन सूचितं ज्ञापितं अम्बुमुचाञ्चयमुपबिभ्रतं । अत्र कविकल्पितसादृश्यात् शिख रैर्मेघसन्देहे मेघनिश्चयात् सन्देहालङ्कारः ॥ १२ ॥

विकचेति । पुनश्च विकचवारिरुहं नित्यविकसितारविन्द मित्यर्थः वृत्तिसामर्थ्यात् । कलहंसगणैः सह वर्त्तत इति सकल हंसगणम् । कादम्बः कलहंसः स्यादित्यमरः । यद्वा सकलाः

विकचवारिरुहन्दधतं सरः
सकलहंसगणं शुचि मानसम् ।
शिवमगात्मजया च कृतेर्ष्यया
सकलहं सगणं शुचिमानसम् ॥ १३ ॥
ग्रहविमानगणानभितो दिवं
ज्वलयतौषधिजेन कृशानुना ।
मुहुरनुस्मरयन्तमनुक्षप
न्त्रिपुरदाहमुमापतिसेविनः ॥ १४ ॥

सर्व्वे हंसगणा यस्मिन् तत्तथोक्तम् । शुचि नित्यनिर्मलं मानसं मानसाख्यं सरो दधतम् । किञ्च कृतेर्ष्यया कुतश्चिन्निमित्तात्कुपितश्चेत्यर्थः अगात्मजया पार्वत्या सकलहं सविवादं सगणं सप्रमथम् । गणाः प्रमथसङ्घौघाइति वैजयन्ती । शुचिमानसम् अविद्याविनिर्मुक्तचित्तं शिवञ्च दधतम् । एतेन सकलशैलवैलक्षण्यमस्योक्तम् ॥ १३ ॥

ग्रहेति । दिवमभितो दिवोऽभिमुखम् । अभितः परितइत्यादिना द्वितीया । ग्रहाश्चन्द्रादयो विमानानि देवयानानि च । व्योमयानं विमानोऽस्त्रीत्यमरः । तेषाङ्गणान् ज्वलयता प्रदीपयता । मितां ह्रस्वइति ह्रस्वः । ओषधिजेन तृणविशेषजन्येन कृशानुना अनुक्षप मतिक्षपं । वीप्सायामव्ययीभावः । उमापतिसेविनः प्रमथादीन् गतिबुद्धीत्यादिना द्विकर्मत्वम् । त्रयाणाम्पुराणां समाहारस्त्रिपुरं । तद्धितार्थेत्यादिना समासः पात्रादिभ्यः प्रतिषेधोवक्तव्यइति

विततशीकरराशिभिरुच्छ्रितै-
रुपलरोधविवर्त्तिभिरम्बुभिः ।
दधतमुन्नतसानुसमुद्धता
न्धृतसितव्यजनामिव जाह्नवीम् ॥ १५ ॥
॥ कुलकम् ॥

अनुचरेण धनाधिपतेरथो
नगविलोकनविस्मितमानसः ।
स जगदे वचनम्प्रियमादरा
न्मुखरतावसरे हि विराजते ॥ १६ ॥

स्त्रीलिङ्गप्रतिषेधः । तस्य दाहन्तिपुरदाहं मुहुरनुस्मारयन्तम् । नन्वधीगर्थेत्यादिना दाहमित्यत्र षष्ठी किन्न स्यात् तस्याः शेषार्थे विधानात् शेषस्याविवक्षितत्वात् । अत्र कविसम्मतसादृश्यात् स्मृतिरिति स्मरणालङ्कारः ॥ १४ ॥

विततेति । विततशीकरराशिभिः विस्तृतशीकरपुञ्जैरुच्छ्रितै रुत्पतितैः, कुतः उपलरोधेनाविवर्त्तिभिरम्बुभिर्हेतुभिः धृतसितव्यजनामिव गृहीतामलचामरामिव स्थितामित्युत्प्रेक्षा । उन्नतसानुषु समुद्धतां वहन्तीं जाह्नवीं गङ्गान्दधतम् ॥ १५ ॥

अनुचरेणेति । अथो अनन्तरं । मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः । धनाधिपतेरनुचरेण यक्षेण नगविलोकनविस्मितमानसः सोऽर्जुनः । आदरात्प्रियं वचनञ्जगदे गदितः । गदतेर्द्रुवर्थस्य दुहादित्वात्प्रधाने कर्म्मणि लिट् । अपृष्टपरिभाषणदोषं परिहरति । मुखरतेति । मुखरता वाचालत्वं अपृष्टपरि

अलमेषविलोकितः प्रजानां
सहसा सन्ततिमंहसां विहन्तुम् ।
घनवर्त्म सहस्रधेव कुर्व्वन्
हिमगौरैरचलाधिपः शिरोभिः ॥ १७ ॥
इह दुरधिगमैः किञ्चिदेवागमैः
सततमसुतरं वर्णयन्त्यन्तरम् ।
अमुमतिविपिनं वेद दिग्व्यापिन
म्पुरुषमिव परम्पद्मयोनिः परम् ॥ १८ ॥

भाषितमिति यावत् अवसरे श्रोतुराकाङ्क्षासमये विराजते हि । आकाङ्क्षितमपृष्टोऽपि ब्रूयादिति भावः ॥ १६ ॥

अलमिति । हिमेन गौरैः शुभ्रैः शिरोभिः शिखरैः घनवर्त्म खं सहस्रधा कुर्व्वन् विपाटयन्निवेत्युत्प्रेक्षा । एषोऽचलाधिपो हिमवान् विलोकितो दृष्टमात्र एव प्रजानामंहसां सन्ततिम्पाप सङ्घातं सहसा विहन्तुमलं समर्थः । पर्य्याप्तिवचनेष्वलमर्थेषु इति तुमुन् । औपच्छन्दसिकं वृत्तं । पर्य्यन्ते य्यौ तथैव शेषञ्चौपच्छन्दसिकं सुधीभिरुक्तमिति स्मरणात् ॥ १७ ॥

इहेति । इहास्मिन्पर्व्वते सुतरं न भवतीत्यसुतरं दुस्तरमित्यर्थः । तरतेः खल्प्रत्ययः । अन्तरं मध्यभागं पुरुषे त्वन्तरन्तत्त्वं दुरधिगमैर्दुर्ग्रहैर्दुःखेनाधिगन्तुमशक्यैः आगमैः पुराणादिभिः किञ्चिदेव सततं वर्णयन्ति । नतु कदाचित्प्रत्यक्षेणापि निःशेषं ज्ञातुमशक्यत्वादिति भावः । किन्तु अतिविपिनमतिगहनं दिग्व्यापिनममुङ्गिरिम्परम्पुरुषम्परमात्मानमिव परङ्केवलम् । परमव्ययमिच्छन्ति

रुचिरपल्लवपुष्पलतागृहै
रुपलसज्जलजैर्जलराशिभिः ।
नयति सन्ततमुत्सुकतामय
न्धृतिमतीरुपकान्त मपि स्त्रियः॥ १९ ॥
सुलभैस्सदा नयवताऽयवता
निधिगुह्यकाधिपरमैः परमैः ।
अमुना धनैः क्षितिभृताऽतिभृता
समतीत्य भाति जगती जगती ॥ २० ॥

केवलइति विश्वः । पद्मयोनिर्ब्रह्मैव वेद नान्यइत्यर्थः । विद्रो लटोवेति णलादेशः । अत्रोपमायमकयोः संसृष्टिः । चमाहत्तं । तुरगरसयति नौ ततौ गः चमा ॥ १८ ॥

रुचिरपल्लवेति । अयं गिरिः । रुचिराणि पल्लवानि पुष्पाणि च येषान्ते तथाभूतालतागृहाश्येषु तैस्तथोक्तैरुपलसज्जलजैर्जलराशिभिः सरोभिः करणैः उपकान्तङ्कान्तसमीपे धृतिमतीर्धैर्यवतीरपि समीपस्थानपि प्रियान्न गणयन्तीः मानिनीरित्यर्थः । स्त्रियः सन्ततं उत्सुकतां नयति तासां मानग्रन्थिं शिथिलयतीत्यर्थः । अथवा उपकान्तम्रतमतीस्तुष्टिमतीरपि सुरतहप्ताअपि पुनरुत्सुकतां नयतीत्यर्थः । उभयत्राप्युद्दीपकत्वातिशयोक्तिः । हत्तमुक्तम् ॥ १९ ॥

सुलभैरिति । नयवता नीतिमता अयवता भाग्यवता च सदा सुलभैर्नान्यैरित्यर्थः । अयः शुभावहोविधिरित्यमरः । निधीनां महापद्मादीनां । अस्त्री पद्मोमहापद्मः शङ्खोमकरकच्छपौ । मुकु

अखिलमिदममुष्य गौरीगुरो
स्त्रिभुवनमपि नैति मन्ये तुलाम्।
अधिवसति सदा यदेनञ्जनै
रविदितविभवो भवानीपतिः ॥ २१ ॥

न्दनन्दनीलाश्च वर्गाः स्युर्निधयो नवेत्यमरः। गुह्यकानाञ्चाधिपं कुबेरं रमयन्तीति तथोक्तैः। कर्म्मण्यण्। परमैरुत्कृष्टैर्धनैः करणैरमुना चितिभृता हेतुना अतिभृता पूर्णा सती जगती मही जगती स्वर्गपातालनोकौ समतीत्यातीत्य भाति। अमानुषै रपि दुर्लभाः सम्पदोऽत्र सम्भवन्तीति भावः। अत्र धनाधिप तैरिति पदार्थस्य विशेषणगत्या जगदतिक्रमणहेतुलोक्त्या काव्य लिङ्गन्तस्य यमकेन संसृष्टिः। प्रमिताक्षरा वृत्तं। प्रमिताक्षरा सजससैरुदितेति लक्षणात् ॥ २० ॥

अखिलमिति। अमुष्य गौरीगुरोर्हिमवत इदमखिलन्त्रयाणां भुवनानां समाहारस्त्रिभुवनमपि। तद्धितार्थेत्यादिना समासः पात्रादित्वात् स्त्रीत्वप्रतिषेधः। तुलां साम्यं नैति इति मन्ये। यत् यतोजनैरविदितविभवोऽज्ञातमहिमा भवानीपतिः सदा एनं गिरिमधिवसति अस्मिन्वसतीत्यर्थः। उपान्वध्याङ् वस इति कर्म्मत्वं। अतोयमस्मादपि विचित्रमिति भावः। प्रभावृत्तं। स्वरशरविरतिर्न्नौ रौ प्रभेति लक्षणात् ॥ २१ ॥

वीतेति। वीते निवृत्ते जन्मजरसी यस्य तद्वीतजन्मजरसं। जराया जरसन्यतरस्यामिति जरसादेशः। अत्र तदन्तविधेरिष्ट त्वात्परत्वेन स्यादेशबाधकत्वाच्च। तथाहि टाङसिङसामि

वीतजन्मजरसम्परं शुचि
ब्रह्मणः पदमुपैतुमिच्छताम् ।
आगमादिव तमोपहादितः
सम्भवन्ति मतयोभवच्छिदः ॥ २२ ॥

नात् स्यादेशबाधनात् । परत्वाज्जरसादेशं बभाषे भाष्य कृत्स्वयम् । सूत्रकारमते यत्तु ज्ञापकात्परबाधनम् । भवेत्तदपि टाङसोर्न पुनर्ङसि सम्भवेत् । मतद्वयेऽपि तत्तुल्यं ङसि यत्पूर्व्व बाधनम् । परत्वाज्जरसादेशस्तस्यात्स्यादेशबाधनात् । ज्ञापकञ्चात्र टाङसोर्यावादेशाविनादिति । ईकारदीर्घयोस्तत्र वैयर्थ्यं तत्तु तौ विना । एत्वे सवर्णदीर्घे च रूपसिद्धिर्भवेद्यतः । व्यर्थ सूत्राक्षरत्यागात्तेन तज्ज्ञापकम्मणी । स्यातत्याज्जरसादेशे जगौ पूर्व्वस्यबाधनात् । समर्थनप्रपञ्चस्तु भाष्यकैयटयोः स्फुटः । एवञ्च यदत्र जरसइति केषाञ्चित्पाठान्तरकल्पनन्तदज्ञानवि जृम्भितमेव । ब्रह्मणः परमात्मनः सम्बन्धि परमुत्कृष्टं शुचि निष्कलङ्कमव्ययतइति पदं स्थानन्तादात्म्यलक्षणम् । मुक्तिमित्यर्थः । उपैतुमाप्तुमिच्छतां मुमुक्षूणां आगमात् शास्त्रादिव तमोऽप हन्ति इति तमोऽपहादविद्यानिवर्त्तकत्वात् । अपे क्लेशतमसो रिति डप्रत्ययः । इतोऽस्माद्गिरेः भवं छिन्दन्तीति भवच्छिदः संसारनिवर्त्तकाः । सत्सूद्विषेत्यादिना क्विप् । मतयः तत्त्वज्ञा नानि सम्भवन्ति । क्षेत्रविशेषस्यापि ज्ञानोपपादकत्वादित्याशयः । नच केवलम्भोगभूमिः किन्तु मुक्तिक्षेत्रमपीति तात्पर्यार्थः । रथो द्धताहत्तम् । तल्लक्षणं रान्नरात्विह रथोद्धता लगाविति ॥ २२ ॥

दिव्यस्त्रीणां सचरणलाक्षारागा
रागायाते निपतितपुष्पापीडाः ।
पीडाभाजः कुसुमचिताः साशंसं
शंसन्त्यस्मिन्सुरतविशेषं शय्याः ॥ २३ ॥

दिव्येति । अस्मिन्गिरौ चरणलाक्षारागैस्सह वर्त्तन्ते तास्त-थोक्ताः धेनुकपुरुषायितादिबन्धेषु स्त्रियः पादतलस्पर्शात्तद्रागा-ङ्किता इत्यर्थः । निपतिताः व्यानतकरणे स्त्रीणामधोमुखत्वात् भ्रष्टाः पुष्पापीडाः कुसुमशेखरा यासु तास्तथोक्ताः । शिखास्वा-पीडशेखरावित्यमरः । पीडाभाजो विमर्द्दभाजो भङ्गिमत्य इत्यर्थः । भ्रमरप्रेङ्खोलितादौ सर्व्वतः कटिपरिभ्रमणसम्भवादिति भावः । कुसुमैश्चिताः कुसुमचिताः । इभमार्ज्जारादिकरणेषु स्तनभुजाद्य-वयवानां शय्यातलस्पर्शायितत्वान्मार्द्दवाय कुसुमचिताः कुसुमास्तृता इत्यर्थः । दिव्यस्त्रीणां सम्बन्धिन्यः शेरते आस्विति शय्याः तल्पानि । संज्ञायां समजनिपदेत्यादिना क्यप् । रागायाते रागोद्रेके सति यस्मात्संसः सटष्णः सुरतविशेषस्तं जातावेकवचनं सुरतविशेषा नित्यर्थः । शंसन्ति सूचयन्ति विष्टखन्तीत्यर्थः । अत्र लाक्षा रागादिपदार्थानां सुरतविशेषसंशनम्प्रति विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारः यमकेन संसृज्यते । जलधरमालावृत्तम् । भ्मौ स्मौ चेत् स्याज्जलधरमाला ख्यातेति लक्षणात् । धेनुकादिबन्ध लक्षणन्तु रतिरहस्ये । न्यस्तहस्तयुगला निजे पदे योषिदेति कटि रुद्धवल्लभा । अग्रतो यदि शनैरधोमुखी धेनुकं वृषवदुन्नते प्रिये १ स्वेच्छया भ्रमति वल्लभेऽपि या योषिदाचरति वल्लभायितम् ।

गुणसम्पदा समधिगम्य परं
महिमानमत्र महिते जगताम्।
नयशालिनि श्रिय इवाधिपतौ
विरमन्ति न ज्वलितुमौषधयः ॥ २४ ॥

ध्यानतं रतमिदं यदि प्रिया स्यादधोमुखचतुष्पदाकृतिः २ तत्कटिं समधिरुह्य वल्लभः स्याद्वृषादिपशुसंस्थितिस्थितः चक्रवद्भ्रमति कुञ्चितत्रिका भ्रामरं निगदितं समुद्धतम् ३ सर्व्वतः कटिपरिभ्रमो यदि प्रेङ्खपूर्व्वमिदमुक्तमारतम् । भुगत स्तनभुजास्यमस्तकामन्नतां स्वयमधोमुखीं स्त्रियम् ४ क्रामति स्वकरहृष्टमेहने वल्लभे करिरतन्तदुच्यते ऽऽ प्रसारिते पाणिपादे मध्यास्पर्शिमुखोरसि। उन्नतायाः स्त्रियाः कथ्यां मार्जारीक्रमणं विदुरिति ग्रन्थान्तरे ॥ २३ ॥

गुणेति । जगतां महिते जगद्भिः पूजिते पूज्यमाने । मतिबुद्धीत्यादिना वर्त्तमाने क्तः क्तस्य च वर्त्तमानइति षष्ठी । अत्र हिमवति औषधयस्तृणज्योतींषि नयशालिनि अधिपतौ नीतिसम्पन्ने राज्ञि श्रियः सम्पदइव गुणसम्पदा चेतगुणसम्पत्त्या अन्यत्र सन्ध्यादिगुणसम्पदा परं महिमानं उभयत्रापि प्रकाशसामर्थ्यं समधिगम्य ज्वलितुम्प्रकाशितुन्न विरमन्ति अविरतं ज्वलन्तीत्यर्थः । छन्दश्च रात्रादावेवेति भावः ॥ २४ ॥

कुररीति । इहाद्रौ कुररीगणः उत्क्रोशवत्त्वः । उत्क्रोशकुररौ समावित्यमरः । कृतरवः कृतारवः तरवः कुसुमैरानताः कमलं जलं सकमलं सपद्मम् । कमलञ्जलपद्मयोरिति विश्वः । वरणाः

कुररीगणः कृतरवस्तरवः
कुसुमानताः सकमलङ्कमलम्।
इह सिन्धवश्च वरणावरणाः
करिणां मुदे सनलदानलदाः ॥ २५ ॥
सादृश्यङ्गतमपनिद्रचूतगन्धै
रामोदं मदजलसेकजन्दधानः।
एतस्मिन्मदयति कोकिलानकाले
लीनालिः सुरकरिणां कपोलकाषः ॥२६॥

द्रुमाः आवरणं यासान्तावरणावरणाः। वरणोवरणः सेतुस्ति क्तशाकः कुमारकइत्यमरः। सनलदाः सोशीराः। मूलेऽस्यो शीरमस्त्रियाम्। अभयन्नलदं सेव्यमित्यमरः। अनलं सन्तापं द्यन्ति खण्डयन्ति शमयन्तीत्यनलदाः सनलदाश्च ताः अनलदाः सिन्धवोनद्यः करिणां मुदे भवन्तीति शेषः। न कुत्राप्युक्तैपरी त्यमिति भावः ॥ २५ ॥

सादृश्यमिति। एतस्मिन्पर्व्वते अपनिद्रचूतगन्धैः सादृश्यङ्गतं फुल्लाम्रपुष्पसदृशं मदजलसेकजमामोदं परिमलं दधानोबिभ्राणः। अतएव लीनालिः संसक्तभृङ्गः सुरकरिणां कष्यते अनेनेतिकाषः। कपोलानां काषः कषणस्थानन्द्रुमस्कन्धादि। अकाले वसन्ताति रिक्ते कालेऽपि कोकिलान्मदयति। मितां ह्रस्वइति ह्रस्वः। अत्र वसन्तरूपकारणाभावेऽपि मदाख्यकार्य्योत्पत्तिकथनाद्विभाव नालङ्कारः। तदुक्तम्। कारणेन विना कार्य्यस्योत्पत्तिः स्याद्विभा वनेति। सा च चूतगन्धैः सादृश्यं इत्युपमया आमोदन्दधानइति

सनाकवनितन्नितम्बरुचिर
ञ्चिरं सुनिनदैर्न्नदैर्वृतममुम्
मता फणवतोऽवतो रसपरा
परास्तवसुधा सुधाधिवसति ॥ २७ ॥

पदार्थहेतुककाव्यलिङ्गेन चाङ्गाङ्गिभावेन सङ्कीर्य्यते । किञ्च कोकिलानां मदगन्धकृतनूतनगन्धभ्रान्त्या भ्रान्तिमदलङ्कारो व्यज्यते। प्रहर्षिणीवृत्तम् । म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयमिति लक्षणात् ॥ २६ ॥

सनाकेति । पुनश्च सनाकवनितं साप्सरस्कन्नितम्बैः कटकैः रुचिरम्। सुनिनदैः सुघोषैर्नदैः प्रवाहैर्वृतं अमुममुष्मिन् गिरावित्यर्थः। उपान्वध्याङ्वस इति कर्म्मत्वम्। अवतः अधोलोकरक्षकस्य फणवतो नागराजस्य मता दृष्टा। मतिबुद्धीत्यादिना वर्त्तमाने क्तः तद्योगात् षष्ठी । रसेन परा उत्कृष्टा । परास्तवसुधा त्यक्तभूर्लोका सुधा अमृतञ्चिरमधिवसति । अतोऽन्यत्र भूमण्डले कुत्रापि सुधा नास्तीत्यर्थः । मेरुप्रभावोऽयङ्गिरिरिति भावः। अत्र प्रस्तुतविशेषणसामर्थ्यादप्रस्तुतमेरुप्रतीतेः समासोक्तिरलङ्कारः स च यमकेन संसृज्यते । जलोद्धतगतिवृत्तम् । रसैर्जसजसा जलोद्धतगतिरिति लक्षणात् ॥ २७ ॥

ग्रामदिति । अस्मिन्नद्रौ ओमसलताएव भवनम् ओषधयस्तृणज्योतींष्येव प्रदीपाः नवानि हरिचन्दनपल्लवानि सुरतरुकिसलयान्येव शय्याः । हरिचन्दनमाख्यातं गोशीर्षे सुरपादप इति विश्वः । रतिश्रमनुदः सुरतश्रमहारिणः सरोजवाताश्च

श्रीमल्लताभवनमोषधयः प्रदीपाः
शय्यानवानि हरिचन्दनपल्लवानि ।
अस्मिन्रतिश्रमनुदश्च सरोजवाताः
स्मर्त्तुन्दिशन्ति न दिवः सुरसुन्दरीभ्यः ॥२८॥
ईशार्थमम्भसि चिराय तपश्चरन्त्या
यादोविलङ्घनविलोलविलोचनायाः ।
आलम्बताग्रकरमत्र भवोभवान्याः
श्च्योतन्निदाघसलिलाङ्गुलिना करेण ॥२९॥

सुरसुन्दरीभ्यः । क्रियाग्रहणाच्चतुर्थी । दिवोदिवम् । अधीगर्थेत्यादिना कर्म्मणि षष्ठी । स्मर्त्तुन्न दिशन्ति । विस्मारयन्तीत्यर्थः । स्वर्गादपि अतिरिच्यतेऽसाविति भावः । अत्र पूर्व्वार्द्धे रूपकत्रयं स्फुटमेव ॥ २८ ॥

ईशार्थमिति । ईशायेति ईशार्थं यथा तथेति क्रियाविशेषणम् । अर्थेन सह नित्यसमासः सर्व्वलिङ्गता च वक्तव्या चिराय चिरमम्भसि तपश्चरन्त्या अतएव यादोविलङ्घनविलोलविलोचनायाः जलजन्तुविघट्टितचलेक्षणाया स्तपसोऽप्यधिकदुःखैव विलोभयन्त्यादिति भावः । यादांसि जलजन्तवइत्यमरः । भवान्याः भवपत्न्याः प्रयोगकालापेक्षोऽयं निर्द्देशः । इन्द्रवरुणभवेत्यादिना ङीप् आनुगागमश्च । करैकदेशस्यापि करमादयस्थो कर स्येति समानाधिकरणे समासः । अतएव वामनः । हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदाविति समग्रकरं भवः शिवः श्च्योतन्निदाघसलिलाङ्गुलिना स्वदस्वेदाङ्गुलिनेति सात्विकोक्तिः । करे

येनापविद्धसलिलः स्फुटनागसद्मा
देवासुरैरमृतमम्बुनिधिर्ममन्थे ।
व्यावर्त्तनैरहिपतेरयमाहिताङ्कः
खं व्यालिखन्निव विभाति स मन्दराद्रिः ॥ ३० ॥

णात्र गिरावालम्बनं गृहीतवान् । अत्राद्भुतातीतवृत्तान्तस्य प्रत्यक्षवदभिधानाद्भाविकालङ्कारः । अतीतानागते यत्र प्रत्यक्षवदलक्षिते । अत्यद्भुतार्थकार्यत्वाद्भाविकन्तदुदाहृतमिति लक्षणात् । वसन्ततिलकावृत्तम् उक्ता वसन्ततिलका तभजाजगौ गइति लक्षणात् ॥ २९ ॥

येनेति । देवाश्चासुराश्च तैर्देवासुरैः । येषां च विरोधोऽशाश्वतिक इति नैकवद्भावः एषां यतः कार्य्यत एव विरोधोन गोव्याघ्रादिवच्छाश्वतिकइत्याहुः । येन मन्दराद्रिणा मन्थदण्डीकृतेनेति भावः अपविद्धसलिलः क्षिप्तजलः अत एव स्फुटनागसद्म पातालं यस्मिन् सोऽम्बुनिधिरमृतं ममन्थे मथितः । मथ्नातेर्द्विकर्म्मकत्वाद्दुहादित्वादप्रधाने कर्म्मणि लिट् । अहिपतेर्मन्थगुणीकृतस्य वासुकेरित्यर्थः । मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिमिति भारतवचनात् । व्यावर्त्तनैर्वेष्टनैराहिताङ्कः कृतचिह्नः सोऽयं मन्दराद्रिः खं आकाशं व्यालिखन् व्यापाटयन्निव विभाति । अत्रोल्लेखनोपादानेनैव खलेखनेनोत्प्रेक्षणादनुपात्तगुणनिमित्ता क्रियास्वरूपोत्प्रेक्षा ॥ ३० ॥

नीतेति । इहाद्रावशिशिररश्मेरुष्णांशोरुस्त्रैर्मयूखैः मयूखैरित्यर्थः । नीतोच्छ्रायमुच्छ्रायन्नीता विस्तारितेत्यर्थः । तथा

नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रै-
रानीलाभैर्विरचितपरभागा रत्नैः ।
ज्योत्स्नाशङ्कामिह वितरति हंसश्येनी
मध्येऽप्यह्नः स्फटिकरजतभित्तिच्छाया ॥ ३१ ॥

दधत इव विलासशालि नृत्यं
मृदु पतता पवनेन कम्पितानि ।
इह ललितविलासिनीजनभ्रू-
गतिकुटिलेषु पयःसु पङ्कजानि ॥ ३२ ॥

आनीलाभैरसितप्रभै रत्नैरिन्द्रनीलैर्विरचितपरभागा तत्सन्निधानाल्लब्धोत्कर्षेत्यर्थः । हंसइव श्येनी श्वेतवर्णा विशदश्येतपाण्डुराद्इत्यमरः । वर्णादनुदात्तात्तोपधात्तो नइति श्येतशब्दात् ङीप् तकारस्य च नकारः । स्फटिकानां रजतानाञ्च भित्तयस्तासाञ्छाया कान्तिः अह्नोमध्ये मध्याह्नेऽपीत्यर्थः मुहुर्ज्योत्स्नाशङ्कां वितरति । ज्योत्स्नाकृते भ्रान्तिञ्जनयतीति भ्रान्तिमदलङ्कारः ॥ ३१ ॥

दधतइति । इहाद्रौ मृदु पतता मन्दं वहता पवनेन कम्पितानि पङ्कजानि ललितविलासिनीजनस्य भ्रूगतिवत्कुटिलेषु ईषत्तरङ्गितेष्वित्यर्थः पयस्सु विलासशालि नृत्यं दधतइव सविलासं नृत्यन्तीवेत्युत्प्रेक्षा । पुष्पिताग्रावृत्तम् ॥ ३२ ॥

अस्मिन्निति । अस्मिन्नद्रौ पिनाकभृता शिवेनाधीरविलोचनाया शङ्कितदृष्टेरुरगदर्शनादिति भावः । ईश्वराया गौर्य्याः । स्थेशभासेत्यादिना वरच् । पुंयोगविवक्षाभावान्न ङीष् । आबद्धवेपथुः

अस्मिन्नगृह्यत पिनाकभृता सलील
मावद्धवेपथुरधीरविलोचनायाः ।
विन्यस्तमङ्गलमहौषधिरीश्वरायाः
स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ ३३ ॥

क्रामद्भिर्घनपदवीमनेकसङ्ख्यै
स्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः ।
उस्राणां व्यभिचरतीव सप्तसप्तेः
पर्य्यस्यन्निह निचयः सहस्रसङ्ख्याम् ॥ ३४ ॥

प्राप्तकम्पइति सात्विकोक्तिः । ङ्कितोऽथुजित्यथुच्प्रत्ययः । विन्यस्ता मङ्गलमहौषधिर्यवाङ्कुरादिर्यस्मिन्स पाणिः स्रस्तोगलितः उरग एव प्रतिसरः कौतुकसूत्रं यस्य तेन । आह्नः प्रतिसरोहस्तसूत्रे मूल्ये च मण्डनइति विश्वः । करेण सलीलमगृह्यतेति देवस्य पार्वतीपरिणयनवर्णनम् । ईश्वार्थमित्यत्र लनुग्रहमाचोक्तिरित्य पौनरुक्त्यम् । भाविकमेवालङ्कारः ॥ ३३ ॥

क्रामद्भिरिति । घनपदवीमाकाशं क्रामद्भिर्व्याप्नुवानैरनेकसङ्ख्यैः परःसहस्रैरित्यर्थः । क्वचिदनेकवर्णैरिति पाठस्तु प्रामादिकएव वैयर्थ्याद्व्याघाताच्चेति । शुचिमणिभ्यः स्फटिकेभ्योजन्म येषान्तैः । जन्माद्युत्तरपदोवक्षीहिर्व्यधिकरणोपीष्यतइति वामनः । तेजोभिर्विभिन्नोविमिश्रः अतएव पर्य्यस्यन्प्रसर्प्पन्निहाद्रौ सप्तसप्तेः सवितुरुस्राणां किरणानान्निचयोनिकरः । सहस्रमिति सङ्ख्या सहस्रसङ्ख्या तां स्वनियतामिति शेषः । व्यभिचरति अतिक्रामतीवेत्युत्प्रेक्षा ॥ ३४ ॥

व्यधत्त यस्मिन्पुरमुच्चगोपुर
म्पुरां विजेतुर्धृतये धनाधिपः ।
स एष कैलास उपान्तसर्प्पिणः
करोत्यकालास्तमयं विवस्वतः ॥ ३५ ॥
नानारत्नज्योतिषां सन्निपातै
श्छन्नेष्वन्तःसानु वप्रान्तरेषु ।
बद्धां बद्धां भित्तिशङ्कामयुष्मि
न्नावानावान्मातरिश्वा निहन्ति ॥ ३६ ॥

व्यधत्तेति । यस्मिन् कैलासे धनाधिपः कुवेरः पुरां विजेतुः शिवस्य धृतये सन्तोषायोच्चगोपरमुन्नतपुरद्वारम् । पुरद्वारन्तु गोपुरमित्यमरः । पुरमलकाख्याम्पुरीं व्यधत्त निर्मितवान् तस्य खिलादिति भावः । स एष कैलास उपान्तसर्प्पिणः प्रान्तचारिणो विवस्वतोऽकाले प्रसिद्धेतरकाले अस्तमयङ्करोतीवेत्युत्प्रेक्षा । वस्तुतस्तु तत्कारणाभावाद्व्यञ्जकाप्रयोगाद्गम्योत्प्रेक्षा । सा चोपान्तवर्तितयाऽसम्बन्धे सम्बन्धलक्षणातिशयोक्त्युत्थापितेति विवेकः । अस्तमिति मकारान्तमव्ययम् । तस्य पचाद्यजन्तेनायशब्देन षष्ठीसमासः । वंशस्थं वृत्तमुक्तम् ॥ ३५ ॥

नानेति । अमुष्मिन् कैलासे अन्तःसानु सानुष्वित्यर्थः । विभक्त्यर्थेऽव्ययीभावः । नानारत्नज्योतिषां सन्निपातैर्व्यतिकरैः छन्नेषु छादितेषु । वा दान्तशान्तेत्यादिना निपातः । वप्रान्तरेषु कटकान्तरेषु बद्धाम्बद्धामभीक्ष्णं बद्धां दृढीकृतामित्यर्थः । नित्य

रम्या नवद्युतिरपैति न शाद्वलेभ्यः
श्यामीभवन्त्यनुदिनं नलिनीवनानि ।
अस्मिन्विचित्रकुसुमस्तवकाचितानां
शाखाभृतां परिणमन्ति न पल्लवानि ॥२७॥

वीप्सयोरिति नित्यार्थे द्विर्भावः नित्यमाभीक्ष्णमिति काशिका । एकपदञ्चैतत् । भित्तिशङ्काभित्तिरिति सन्देहमावानावानभीक्ष्णमापतन् । आङ्पूर्ब्बाद्दाधातोः शतृप्रत्ययः द्विर्भावादि पूर्ब्बवत् । मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः । कनिन्प्रत्ययः । तत्पुरुषे कृति बहुलमित्यलुक् । निहन्ति निवर्त्तयति वायुसञ्चाराद्भित्त्यभावोऽवधार्यतइत्यर्थः । अतोनिश्चयान्तः सन्देहालङ्कारः । शालिनीवृत्तम् । २६ ॥

रम्येति । अस्मिन्नद्रौ शादाः शष्पाणि सन्त्येष्विति शाद्वलास्तेभ्यः । शाद्वलः शादहरितइत्यमरः । नडशादाड्ड्वलच् । रम्या नवा द्युतिर्नापैति किन्तु नित्येत्यर्थः । नलिनीवनान्यनुदिनं सर्व्वदा श्यामीभवन्ति न कदाचित्पाण्डुरीभवन्तीत्यर्थः । विचित्रकुसुमस्तवकैराचितानां व्याप्तानां शाखाभृतान्तरूणाम् पल्लवानि न परिणमन्ति न जीर्णानि भवन्तीत्यर्थः सर्व्वदा नूतनान्येवेत्यर्थः । अत्र प्रस्तुतस्यैव तद्वस्तुगतकान्तिस्थैर्य्यरूपकार्य्यवर्णनात् प्रस्तुतमित्र कारणं किञ्चिदसाधारणः कैलासस्य महिमावगम्यतइति पर्य्यायोक्तिरलङ्कारः । तदुक्तम् । कारणं गम्यते यत्र प्रस्तुतात्कार्य्यवर्णनात् । प्रस्तुतत्वेन सम्बन्धस्तत्पर्यायोक्तमुच्यतइति ॥२७॥

परिसरविषयेषु लीढमुक्ता
हरिततृणोद्गमशङ्कया मृगीभिः ।
इह नवशुककोमला मणीनां
रविकरसम्वलिताः फलन्ति भासः ॥ ३८ ॥

उत्फुल्लस्थलनलिनीवनादमुष्मा
दुद्धूतः सरसिजसम्भवः परागः ।
वात्याभिर्वियति विवर्त्तितः समन्ता
दाधत्ते कनकमयातपत्रलक्ष्मीम् ॥ ३९ ॥

परिसरेति । इहाद्रौ परिसरविषयेषु पर्य्यन्तदेशेषु । विषयो देश इति निपातः । मृगीभिर्हरिततृणोद्गमशङ्कया नीलतृणाङ्कुरभ्रान्त्येति भ्रान्तिमदलङ्कारः । लीढा पूर्व्वमास्वादिताः पश्चान्मुक्ता लीढमुक्ताः । दग्धप्ररूढइत्यादिवत्पूर्व्वकालेत्यादिना समानाधिकरणसमासः । नवशुककोमलाः शुकसवर्णाइत्यर्थः मणीनां मरकतमणीनाम्भासो रविकरैः सम्वलिताः मिश्रिताः सत्यः फलन्ति सम्मूर्च्छन्ति वर्द्धन्तइति यावत् ॥ ३८ ॥

उत्फुल्लेति । वात्याभिर्वातसमूहैः । वातादिभ्योयदिति यत्प्रत्ययः । अमुष्मादुत्फुल्लस्थलनलिनीवनात् । जलपतितस्य परागस्योत्थानासम्भवात् स्थलग्रहणम् । उत्फुल्लसम्फुल्लयोरुपसङ्ख्यानान्निष्ठालत्वम् । उद्धूतउत्थापितो वियति समन्ताद्विवर्त्तितः परिमण्डलितः । अन्तराले तु दण्डायमानएवेति भावः । सरसिजसम्भवः पद्मोद्भवः परागः । रूढ्यभिप्रायेणात्र सरसिजशब्दप्रयोगो द्रष्टव्यः । कनकमयातपत्रलक्ष्मीमाधत्ते । अत्र परागस्य आतपत्र

इह सनियमयोः सुरापगाया
मुषसि सयावकसव्यपादलेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥ ४० ॥

लक्ष्मीसम्बन्धासम्भवात् तत्सदृशीं लक्ष्मीमिति प्रतिविम्बनाक्षेपा दसम्भविधर्म्मसम्बन्धेयं निदर्शना । तदुक्तम् । असम्भवद्धर्म्मयोगा दुपमानोपमेययोः । प्रतिविम्बक्रियागम्या यत्र सा स्यान्निदर्शनेति ॥३९ ॥

इहेति । इहाद्रौ उषसि प्रभाते सुरापगायां लक्षणया तत्कच्छे सयावका सालक्तका सव्यपादस्य रेखा वामचरणमुद्रा यस्यां सा । यावोऽलक्तोद्रुमामय इत्यमरः । तथा विषमाणि मह दल्पानि पदानि यस्यां सा विवर्त्तनेषु प्रदक्षिणक्रियासु पदवी शिवयोः प्रदक्षिणपद्धतिरित्यर्थः सनियमयोः सन्ध्यायाम्प्रणमतो रित्यर्थः. शिवा च शिवश्च तयोः शिवयोरुमाशङ्करयोः । पुमान् स्त्रियेत्येकशेषः । शरीरयोगं अर्द्धाङ्गसङ्घटनारूपङ्कथयति । सनियमयोरिति नियमविषयेऽपि विरहासहाविह विहरतः शिवा विति भावः । अत्र पदवीविशेषणपदार्थयोः कथनं प्रति हेतु त्वात्काव्यलिङ्गमलङ्कारः ॥ ४० ॥

सम्मूर्च्छितामिति । इहाद्रौ रजतभित्तिमयूखजालैः सम्मूर्च्छ तामेकीभवताम् आलोलानां पादपलतानान्तरुशाखानां अन्त रेषु रन्ध्रेषु निर्गतानाम्प्रसृतानां घर्म्मद्युतेरुष्णांशोरंशूनान्तजसां आदर्शमण्डलनिभानि दर्पणविम्बसदृशानीत्युपमालङ्कारः । पट

सम्मूर्च्छतां रजतभित्तिमयूखजालै
रालोलपादपलतान्तरनिर्गतानाम् ।
घर्म्मद्युतेरिह मुहुः पटलानि धाम्ना
मादर्शमण्डलनिभानि समुल्लसन्ति ॥ ४१ ॥

शुक्लैर्मयूखनिचयैः परिवीतमूर्त्ति
र्वप्राविघातपरिमण्डलितोरुदेहः ।
शृङ्गाण्यमुष्य भजते गणभर्त्तुरुक्षा
कुर्व्वन् वधूजनमनस्सु शशाङ्कशङ्काम् ॥ ४२ ॥

लानि मण्डलानि मुहुर्वारंवारं समुल्लसन्ति पुनः पुनः स्फुरन्ति नतु सातत्येन लतानामालोलत्वाभावात् । तच्च नान्यैस्त्पाषाणादिप्रायाणां सम्भवतीति भावः ॥ ४१ ॥

शुक्लैरिति । शुक्लैर्मयूखनिचयैः शुभ्रकिरणसमूहैः परिवीतमूर्त्तिर्व्याप्तदेहः । वप्राभिघातेन वप्रक्रीडया परिमण्डलितो वर्त्तुलीकृतः उरुदेहोवृहच्छरीरोयस्य तथोक्तोगणभर्त्तुः प्रमथनाथस्योक्षा वृषभः । उक्षानड्वान्बलीवर्द्दः ऋषभोवृषभोवृषइत्यमरः । वधूजनमनस्सु शशाङ्कशङ्काञ्चन्द्रभ्रान्तिङ्कुर्व्वन् तेषां मौग्ध्यादिति भावः । अमुष्याद्रेः शृङ्गाणि भजते सेवते । अत्र शङ्काशब्दस्य सन्देहार्थत्वे सन्देहालङ्कारः । भ्रान्तिपरत्वे भ्रान्तिमदलङ्कारः । यथेच्छसि तथास्तु । सचाचविशेषणोत्थेन काव्यलिङ्गेनाङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ ४२ ॥

सम्प्रतीति । द्वन्द्वैः विविधानानावर्णाः शिखरमणिरुचः सम्प्रति शरदीत्यर्थः । लघुन्यगुरुणि कुतः क्षीणपयसि अतएव भिद्रा

सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि
क्षीणपयस्युपेयुषि भिदां जलधरपटले।
खण्डितविग्रहं वलभिदो धनुरिह विविधाः
पूरयितुम्भवन्ति विभवः शिखरमणिरुचः॥४३॥
स्नपितनवलतातरुप्रवाले
रमृतलवस्रुतिशालिभिर्मयूखैः।
सततमसितयामिनीषु शम्भो
रमलयतीह वनान्तमिन्दुलेखा॥ ४४ ॥

भेदम्। षिद्भिदादिभ्योऽङ् इत्यङ्प्रत्ययः। उपेयुषि गते जलधर पटले मेघमण्डले कथमपि शनकैर्लब्धजन्म उत्पन्नमित्यर्थः। अतएव खण्डितविग्रहच्छिन्नस्वरूपं वलभिद इन्द्रस्य धनुः पूरयितुं विभवः समर्था भवन्ति। अत्रेन्द्रधनुषो मणिरुचीनामसम्बन्धे सम्बन्धकथनादतिशयोक्तिरलङ्कारः। वंशपत्रपतितं वृत्तम्॥ दिङ्मुनिवंशपत्रपतितम्भरनभनलगैरिति लक्षणात्॥ ४३ ॥

स्नपितेति। इहाद्रौ शम्भोरिन्दुलेखा स्नपितानि नवानि लता नान्तरूणाञ्च प्रवालानि यैस्तैः। अमृतलवस्रुत्याऽमृतबिन्दु निःस्यन्देन शालन्ते ये तैर्मयूखैः सततं सर्व्वकालं असितयामिनीषु कृष्णपक्षरात्रिष्वपि वनान्तममलयति धवलयति। अन्यत्र नैतद स्तीति भावोऽव्यज्यते॥ ४४ ॥

क्षिपतीति। अथ योऽद्रिरनुवनं विततां रोचनिकीं रुचं सैवार्णामित्यर्थः। रोचनया रक्तां रौचनिकीम् लाक्षारोचना इगिति ठक्। टिड्ढाणञित्यादिना ङीप्। उत्प्रेक्षते। बृहद्बृ

क्षिपति योऽनुवनं विततां बृह-
द्बृहतिकामिव रौचनिकीं रुचम्।
अयमनेकहिरण्मयकन्दर-
स्तव पितुर्दयितो जगतीधरः॥ ४५ ॥

सक्तिं जवादपनयत्यनिले लतानां
वैरोचनैर्द्विगुणिताः सहसा मयूखैः।
रोधोभुवां मुहुरमुत्र हिरण्मयीनां
भासस्तडिद्विलसितानि विडम्बयन्ति॥ ४६ ॥

तिकामुत्तरासङ्गमिव। द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथेत्यमरः। क्षिपति प्रसारयति। अनेकाहिरण्मय्यः कन्दरा यस्य सः। हिरण्मयशब्दो दाण्डिनायनेत्यादिना निपातनात्साधुः। अयम्मुरो वर्त्तिगिरिरित्यर्थः। तव पितुरिन्द्रस्य दयितः प्रियः जगत्याधरो जगतीधरः। यस्ते गन्तव्य इन्द्रकीलाख्य इत्यर्थः॥४५॥

सक्तिमिति। अमुत्रामुष्मिन्नद्रौ अनिले जवात् झटिति लतानां सक्तिं अन्योऽन्यरङ्गमपनयति सति सहसा हठात् वैरोचनैः सावित्रैर्मयूखैर्द्विगुणिताद्विरावृत्ताः कृता इति द्विगुणिताः। गुण स्त्वावृत्तिशब्दादिविन्द्रियामुख्यतन्तुष्विति वैजयन्ती। हिरण्मयीनां हिरण्यविकाराणाम्। दाण्डिनायनेत्यादिना निपातनात्साधुः। रोधोभुवान्तटभुवां भासो मुहुस्तडिद्विलसितानि विडम्बयन्ति अनुकुर्वन्तीत्यर्थः। उपमालङ्कारः॥ ४६ ॥

कषणकम्पनिरस्तमहाहिभिः
क्षणविमत्तमतङ्गजवर्ज्जितैः ।
इह मदस्नपितैरनुमीयते
सुरगजस्य गतं हरिचन्दनैः ॥ ४७ ॥
जलदजालघनैरसिताश्मना
मुपहतप्रचयेह मरीचिभिः ।
भवति दीप्तिरदीपितकन्दरा
तिमिरसंवलितेव विवस्वतः ॥ ४८ ॥

कषणेति । इहाद्रौ कषणेन कण्डूयनेन यः कम्पस्तेन निरस्ता महाहयोमहासर्प्पायेभ्यस्तैः । क्षणं विमत्तमतङ्गजवर्ज्जितैर्मत्त मतङ्गजरहितैः कुतः मदस्नपितैरैरावतमदसिक्तैरित्यर्थः । मितां ह्रस्वइति ह्रस्वः । हरिचन्दनैश्चन्दनद्रुमैः सुरगजस्य ऐरावतस्य गतम्प्राप्तिरनुमीयते । हरिचन्दनविशेषणैः काव्यलिङ्गमन्वेयम् ॥ ४७ ॥

जलदेति । इहास्मिन्नद्रौ जलदजालघनैर्मेघवृन्दसान्द्रैरसिताश्मनामिन्द्रनीलानां मरीचिभिर्दीधितिभिः । भानुः करोमरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियामित्यमरः । उपहतप्रचया विघट्टितसङ्घाता अतएवादीपितकन्दरा अप्रकाशितगह्वरा विवस्वतो दीप्तिस्तिमिरैः संवलिता व्यामिश्रितेव भवतीत्युत्प्रेक्षा ॥ ४८ ॥

भव्यइति । इहाद्रौ भव्यः शान्तोभवन्नपि मुनेर्व्यासस्य शासनेन इन्द्राराधनरूपेण क्षात्रे पथि क्षत्रियमार्गे स्थितोगृहीतशस्त्र एवेत्यर्थः । हतप्रमादोऽप्रमत्तः सन् तपस्य तपश्चर्य्याङ्कुरु ।

भव्योभवन्नपि मुनेरिह शासनेन
क्षात्रे स्थितः पथि तपस्य हतप्रमादः ।
प्रायेण सत्यपि हितार्थकरे विधौ हि
श्रेयांसि लब्धुमसुखानि विनाऽन्तरायैः ॥ ४९ ॥
मा भूवन्नपथहरास्तवेन्द्रियाश्वाः
सन्तापे दिशतु शिवः शिवामसक्तिम् ।
रक्षन्तस्तपसि बलञ्च लोकपालाः
कल्याणीमधिकफलां क्रियां क्रियासुः ॥ ५० ॥

तपस्येति कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरोरिति क्यङ् । तदन्ता ल्लोट् । नच सर्व्वभूतहितकारिणो मे प्रमादः किङ्करिष्यतीति विश्वसितव्यमित्यर्थान्तरन्यासेनाह । प्रायेणेति । हि यस्मात्प्रायेण बाहुल्येन । प्रायोवयस्यनशने मृतौ बाहुल्यतुल्ययोरिति हेम चन्द्रः । हितमर्थङ्करोतीति तस्मिन्विधौ व्यापारे सति अन्तरायै र्विना श्रेयांसि लब्धुमसुखानि अशक्यानीत्यर्थः । अतएव शकधृषे त्यादिनाऽसमानकर्त्तृकेषु तुमुन् । अकारणवैरिणः सर्व्वत्र सर्व्व स्यापि सन्तीति भावः ॥ ४९ ॥

माभूवन्निति । तव इन्द्रियाण्येव अश्वास्ते अपथेन हरन्तीत्य पथहरामा भूवन् त्वामपथं मा निनीषुरित्यर्थः । माङि लुङित्या शीरर्थे लुङ् । सन्तापे तपःक्लेशे सति शिवः शिवां साधीयसीम् असक्तिमप्रवृत्तिमुत्साहन्दिशतु । किञ्चेति चार्थः । लोकपालाइन्द्रा दयः तपसि विषये बलं शक्तिं रक्षन्तोवर्द्धयन्तः सन्तः कल्याणीं

इत्युक्त्वा सपदि हितम्प्रियम्प्रियार्हे
धाम स्वङ्गतवति राजराजभृत्ये ।
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ
सन्धत्ते भृशमरतिं हि सद्वियोगः ॥ ५१ ॥
तमनतिशयनीयं सर्व्वतः सारयोगा
दविरहितमनेकेनाङ्कभाजा फलेन ।
अकृशमकृशलक्ष्मीश्चेतसा शंसितं स
स्वमिव पुरुषकारं शैलमभ्याससाद ॥ ५२ ॥

साध्वीं क्रियां अनुष्ठानमधिकफलां क्रियासुः कुर्व्वन्तु । करोते राशिषि लोट् ॥ ५० ॥

इतीति । प्रियार्हे राजराजभृत्ये इति पूर्व्वोक्तम् । हितम्प्रियं वचनमिति शेषः । उक्त्वा सपदि स्वं स्वकीयन्धाम स्थानङ्गतवति सति पृथासुतोऽर्जुनः सोत्कण्ठं सौत्सुक्यङ्किमपि प्रदध्यौ चिन्तयामास । तथाहि । सद्वियोगः सुजनवियोगो भृशमरतिं व्यथां सन्धत्ते करोतीत्यर्थः । अर्थान्तरन्यासः ॥ ५१ ॥

तमिति । अकृशाः पूर्णाः लक्ष्म्यः शोभायस्य सः अकृशलक्ष्मी रिति बहुवचनाश्रितो बहुव्रीहिः । एवञ्च उरः प्रभृतिभ्यश्चेति कप्प्रत्ययानवकाशः तत्र लक्ष्मीशब्दस्यैकवचनान्तपाठात् । नापिनद्यृतश्चेत्यस्यावकाशः उरः प्रभृतिपाठसामर्थ्यादेव । शेषिकस्तु वैभाषिकइत्यविरोधः । सोऽर्जुनः सर्व्वतः सर्व्वत्र सारयोगादुत्कृष्टबलप्रयोगात् । सारो बले स्थिरांशे च न्याय्ये क्लीवे वरे त्रिष्वित्यभयत्राप्य

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये हिमवद्वर्णनं नाम पञ्चमः सर्गः ॥ ५ ॥

मरः । अनतिशयनीयमनतिक्रमणीयम् अनेकेन बहुना अङ्गभाजा समर्पिकृतेन शीघ्रभाविनेति यावत् । फलेन कार्य्यसिद्ध्या अविरहितमशून्यङ्कार्य्यसिद्धेरवश्यं साधकमित्यर्थः । अक्लममतनुचेतसा आशंसितमाप्तुमिष्टं शैलमिन्द्रकीलं स आत्मीयम्पुरुषस्य कारः कर्म्म तं पुरुषकारमुक्तविशेषणविशिष्टमौरुषमिवाभ्याससाद अधिष्ठितवान् । मालिनीवृत्तम् ॥ ५२ ॥

इति श्रीमहोपाध्यायमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां पञ्चमस्सर्गः ॥ ५ ॥

---

रुचिराकृतिः कनकसानुमथो
परमः पुमानिव पतिम्पतताम् ।
धृतसत्पथस्त्रिपथगामभित
स्स तमारुरोह पुरुहूतसुतः ॥ १ ॥
तमनिन्द्यवन्दिन इवेन्द्रसुतं
विहिताळिनिक्वणजयध्वनयः ।
पवनेरिताकुलविजिह्मशिखा
जगतीरुहोऽवचकरुः कुसुमैः ॥ २ ॥

रुचिराकृतिरिति । अथो आसदनानन्तरम् रुचिराकृति स्सौम्यविग्रहः धृतसत्पथोऽवलम्बितसन्मार्गः आकारानुरूपगुणवा नित्यर्थः । यत्राकृतिस्तत्र गुणावसन्तीति सामुद्रिकाः । उपमाने ऽपि समानमेतत् । स पुरुहूतसुतोऽर्ज्जुनः कनकस्य विकारास्सान वोयस्य तङ्कनकसानुम् । गरुडसावर्ण्यार्थं विशेषणमेतत् । समुद्रा यविकारषष्ठ्यास्येति बहुव्रीहिरुत्तरपदलोपश्च । तमिन्द्रकील म्परमः पुमान् विष्णुः पतताम्पक्षिणाम्पतिङ्गरुडमिव । त्रिभिः पथिभिर्गच्छतीति त्रिपथगा भागीरथी । अन्येष्वपि दृश्यतइति डप्रत्ययः उपपदसमासश्च । तामभितोऽभिमुखमारुरोह । समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितइत्यमरः । प्रमिताक्षरा वृत्तम् । प्रमिताक्षरा सजससैरुदितेति लक्षणात् ॥ १ ॥

अथास्य कार्य्यसिद्धिनिमित्तानि सूचयन्मार्गं वर्णयति । तमिति । विहिताअलिनिक्वणाजयध्वनयइव यैस्ते तथोक्ताः ।

अवधूतपङ्कजपरागकणा
स्तनुजाह्नवीसलिलवीचिभिदः ।
परिरेभिरेऽभिमुखमेत्य सुखाः
सुहृदः सखायमिव तं मरुतः ॥ ३ ॥

पवनेरिताः पवनेन वायुना नुन्ना अतएवाकुला लोलाविजिह्मा वक्राश्च शिखाः अग्राणि येषान्ते तथोक्ताः । शिखा ज्वालाकेकिमौल्योः शिखाशाखाग्रमौलिष्विति वैजयन्ती । जगतीरुहो भूरुहः । किप् । अनिन्द्या अनवद्याये वन्दिनः स्तुतिपाठकास्तइव तमिन्द्रसुतमर्जुनं कुसुमैरवचकरुः अभिववृषुरित्यर्थः । ऋच्छत्यृतामिति गुणः । अत्र किरतेर्वृष्ट्यर्थत्वात्कुसुमानाङ्करणत्वं विक्षेपार्थत्वे तु कर्मत्वमेव यथा कटाक्षान्वामा किरतीति इष्यतेच धातूनामर्थभेदात्कारकं व्यत्ययः यथा सिञ्चतेः क्षरणार्द्रीकरणयोरर्थयोर्द्रवद्रव्यस्य कर्म त्वकरणत्वे यथा मेघा घृतं सिञ्चति गौः पयश्च सिञ्चति मेघा अमृतैर्ववृषुरिति । अत्र वाक्ये समासगतयोरुपमयोः साध्यसाधन भावादङ्गाङ्गिभावेन सङ्करः ॥ २ ॥

अवधूतेति । अवधूताः प्रसारिताः पङ्कजपरागकणाः यैस्ते तथोक्ताः इति सौरभ्योक्तिः । तनूर्ज्जाह्नव्याः सलिलवीचीर्भिन्दन्तीति तथोक्ताः इति शैत्योक्तिः । सुखयन्तीति सुखाः सुखस्पर्शा इति मान्द्योक्तिः । पचाद्यच् । मरुतो वाताः तमर्जुनं सुहृदः सखायमिवाभिमुखमेत्यागत्य परिरेभिरे आलिङ्गितवन्तः ॥ ३ ॥

उदितेति । उदितोपलेषून्नतपाषाणेषु स्खलनेन प्रतिघातेन सम्वलिताश्चूर्णिताः अतस्तूर्यघोषइव धुमधुमायमानादित्यर्थः स्फुटै

उदितोपलस्खलनसम्बलिताः
स्फुटहंससारसविरावयुजः ।
मुदमस्य माङ्गलिकतूर्य्यकृतां
ध्वनयः प्रतेनुरनुवप्रमपाम् ॥ ४ ॥

अवरुग्णतुङ्गसुरदारुतरौ
निचये पुरः सुरसरित्पयसाम् ।
स ददर्श वेतसवनाचरिता
म्प्रणतिं बलीयसि समृद्धिकरीम् ॥ ५ ॥

हंसानां सारसानाञ्च विरावैर्युज्यन्त इति तथोक्ताः । क्विप् । अनुवप्रमपां भित्तिः पतन्तीनामिति शेषः । ध्वनयोऽस्यार्जुनस्य मङ्गलम्प्रयोजनमेषान्ते माङ्गलिकाः । प्रयोजनमिति ठञ् । तैस्तूर्य्यैः कृतां मुदं हर्षम्प्रतेनुः । अत्रान्यस्यान्यकार्य्यकरणासम्भवात् तूर्य्यकृतमुत्सदृशीं मुदमिति प्रतिबिम्बनाक्षेपान्निदर्शनालङ्कारः ॥ ४ ॥

अवरुग्णेति । सोऽर्जुनः पुरोऽग्रे अवरुग्णतुङ्गसुरदारुतरौ भग्नोन्नतदेवदारुद्रुमे, बलीयसि बलवत्तरे । मत्वन्तादीयसुनि विन्मतोर्लुगिति मतोर्लुक् । सुरसरित्पयसान्निचये पूरे विषये वेतसवनेन वानीरवनेनाचरितां । अथ वेतसे रथाभ्रपुष्पविदुलशीतवानीरवंजुलाइत्यमरः । समृद्धिकरीं श्रेयस्करीं लोके यथा दृष्टामित्यर्थः । प्रणतिन्ददर्श । या सर्व्वलोकदृष्टान्तभूतेति भावः ॥ ५ ॥

प्रबभूवेति । सोऽर्ज्जुनः परितस्सरोजरजसा कमलरेणुनाऽरुणितं पाटलितं उत्तरीयञ्च कुसुमादिना अरुणितं संहतिमन्तोरम्भन्तरङ्गभङ्गि वारितरङ्गशोभि सरितउत्तरीयं स्तनांशुक



* CIVI
EXAMINATION CO
BOM

प्रबभूव नालमवलोकयितु
मरितः सरोजरजसाऽरुणितम् ।
सरिदुत्तरीयमिव संहतिम
त्स तरङ्गभङ्गि कलहंसकुलम् ॥ ६ ॥
दधति च्चतीः परिणतद्विरदे
मुदितालियोषिति मदस्रुतिभिः ।
अधिकां स रोधसि बबन्ध धृतिं
महते रुजन्नपि गुणाय महान् ॥ ७ ॥

मिव स्थितं कलहंसकुलं कादम्बकुलमवलोकयितुमलमत्यर्थन्न प्रबभूव न शशाक तत्सौन्दर्य्यैद्दिलत्वादिति भावः ॥ ६ ॥

दधतीति । सोऽर्ज्जुनः च्चतीः च्चतानि दधति धारयति कुतः परिणतास्तिर्य्यग्दन्तप्रहारिणो द्विरदा यस्मिंस्तस्मिन् । तिर्य्यग्दन्त प्रहारस्तु गजः परिणतो मतइति हलायुधः । मदस्रुतिभिर्मुदिता लियोषिति रोधस्यधिकाम्धृतिं प्रीतिम्बबन्ध निश्चलीकृतवानित्यर्थः। तथाहि । महान् जनो रुजन्पीडयन्नपि महते गुणायोत्कर्षाय भवति । महत्कृता पीडापि शुभावहैवेत्यर्थः । तदुक्तं गज रुग्णस्यापि रोधसः प्रीतिकरत्वमिति भावः ॥ ७ ॥

अन्विति । सोऽर्ज्जुनोऽनु हैमवप्रङ्कनकसानुसमीपे । समीपार्थे ऽव्ययीभावः । अरुणैः कनककान्त्युपरञ्जनादिति भावः । पृथुभि रूर्म्मिभिः समतान्तुल्यरूपताङ्गतम् । सादृश्याद्दुर्वचनीयमिति भावः । सहभूतं सहचरमियं सहशब्दस्य पचाद्यजन्तेन चर शब्देन समासः। करुणैर्दीनैः रुतैः कूजितैरनुबध्नतीमन्विष्यन्तीं रथाङ्ग

अनुहेमवप्रमरुणैः समता-
ङ्गतमूर्म्मिभिः सहचरम्पृथुभिः ।
स रथाङ्गनामवनिताङ्गरुणै-
रनुवघ्नतीमभिननन्द रुतैः ॥ ८ ॥

सितवाजिने निजगदूरुचय-
श्चलवीचिरागरचनापटवः ।
मणिजालमम्भसि निमग्नमपि
स्फुरितं मनोगतमिवाकृतयः ॥ ९ ॥

नामवनितां चक्रवाकीं अभिननन्द प्रकृष्टप्रेमदर्शनात्कस्य नानन्द इति भावः। अत्र तावदूर्म्मीणां स्वधावल्यत्यागेनारुण्यस्वीकारात्तद्गुणालङ्कारः । तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाश्रयादिति लक्षणात्तन्मूलाचेयञ्चक्रवाक्याः स्वकान्ते तरङ्गभ्रान्तिरिति तद्गुणभ्रान्तिमतोरङ्गाङ्गिभावेन सङ्करः ॥ ८ ॥

सितवाजिन इति । चलवीचीनां रागो रञ्जनं वर्णान्तरापादनन्तस्य रचना क्रिया तत्र पटवः समर्थाः रुचयः प्रभा अम्भसि निमग्नमपि मणिजालं स्वाश्रयभूतमिति भावः । मनोगतं स्फुरितं रोषादिविकारमाकृतयो भ्रूभङ्गादिवाह्यविकारा इव सितवाजिनेऽर्ज्जुनाय निजगदुः ज्ञापयामासुरित्यर्थः आकृत्या हि मनोगतं विचक्षणा जानन्तीति भावः ॥ ९ ॥

उपलेति । उपलैराहता अत एवोद्धतास्य ये तरङ्गास्तैर्धृतं निर्गमरोधादित्यर्थः । जविना वेगवता मरुता वातेन विधूतं विततञ्च केतकस्य शिखा तद्वद्विशदमपाम्फेनं डिण्डीरम् । डिण्डी

उपलाहतोद्धततरङ्गधृत
ज्जविना विधूतविततं मरुता ।
स ददर्श केतकशिखाविशदं
सरितः प्रहासमिव फेनमपाम् ॥ १० ॥
बहुवर्हिचन्द्रकनिभम्विदधे
धृतिमस्य दानपयसाम्पटलम् ।
अवगाढमीक्षितुमिवेभपतिं
विकसद्विलोचनशतं सरितः ॥ ११ ॥
प्रतिबोधजृम्भणविभिन्नमुखी
पुलिने सरोरुहदृशा ददृशे ।
पतदच्छमौक्तिकमणिप्रकरा
गलदश्रुबिन्दुरिव शुक्तिवधूः ॥ १२ ॥

रोऽब्धिकफः फेनइत्यमरः । सरितः प्रहासमट्टहासमिवेत्युत्प्रेक्षा । सोऽर्ज्जुनोददर्श ॥ १० ॥

बहिति । वर्हिचन्द्रकनिभं मयूरमेचकसदृशं । समौ चन्द्रकमेचकावित्यमरः । बहु अनेकधा दानपयसाम्पटलं । जातावेकवचनं । बहवो मदाम्बुविन्दव इत्यर्थः । अवगाढमन्तः प्रविष्टं । गाहेः कर्त्तरि क्तः । इभपतिमीक्षितुं विकसदुन्मिषत्सरितो विलोचनशतमिवेत्युत्प्रेक्षा अस्यार्ज्जुनस्य धृतिम्प्रीतिं विदधे ॥ ११ ॥

प्रतिबोधेति । प्रतिबोधः स्फुटनन्निद्रापगमश्च तत्र यज्जृम्भणमच्छूनता जृम्भा च तेन विभिन्नमुखी विश्लिष्टाग्रा विवृत्तास्या च

शुचिरप्सु विद्रुमलताविटप
स्तनुसान्द्रफेनलवसम्बलितः ।
स्मरदायिनः स्मरयति स्म भृश
न्दयिताधरस्य दशनांशुभृतः ॥ १३ ॥
उपलभ्य चञ्चलतरङ्गधृतं
मदगन्धमुत्थितवतामपयसः ।
प्रतिदन्तिनामिव स सम्बुबुधे
करियादसामभिमुखान् करिणः ॥ १४ ॥

अतएव पतन्प्रसरन् स्वच्छोमौक्तिकमणीनाम्प्रकरः स्तोमोयस्याः सा तथोक्ता अतएव गलदश्रुबिन्दुरिव स्थितेत्युत्प्रेक्षा । शुक्तिर्वधूरिव पुलिने शयनीयद्वेति भावः । सरोरुहदृशाऽर्ज्जुनेन ददृशे दृष्टा अत्र प्रतिबोधादिविशिष्टपदोपात्तानां प्रकृतानां शुक्तिवध्वोस्सोपमारूपकयोः साधकबाधकाभावात्सन्देहालङ्कारस्तत्सापेक्षा चाश्रुगलनोत्प्रेक्षेति तयोरङ्गाङ्गिभावः ॥ १२ ॥

शुचिरिति । अप्सु शुचिः स्वच्छः तनुना सान्द्रेण च फेनस्य लवेन शकलेन सम्बलितः सङ्गतोविद्रुमलतायाः विटपः पल्लवः । विटपः पल्लवे षिड्गे विस्तारे स्तम्बशाखयोरिति विश्वः । स्मरदायिनः कामोद्दीपकस्य दशनांशुभृतोदन्तकान्तिकलितस्येत्यर्थः । दयिताधरस्य । अधीगर्थेत्यादिना षष्ठी । भृशं स्मरयति स्म । लट् स्मे इति भूतार्थे लट् मितां ह्रस्वइति ह्रस्वः । स्मरणालङ्कारः ॥ १३ ॥

उपलभ्येति । सोऽर्ज्जुनस्य चञ्चलतरङ्गैर्धृतन्तत्सङ्क्रान्तमित्यर्थः । मदगन्धमुपलभ्याघ्राय पयसः उत्थितवतां रोषादिति शेषः ।

स जगाम विस्मयमुदीक्ष्य पुरः
सहसा समुत्पिपतिषोः फणिनः ।
प्रहितन्दिवि प्रजविभिः श्वसितैः
शरदभ्रविभ्रममपाम्पटलम् ॥ १५ ॥
स ततार सैकतवतीरभितः
शफरीपरिस्फुरितचारुदृशः ।
ललिताः सखीरिव बृहज्जघनाः
सुरनिम्नगामुपयतीः सरितः ॥ १६ ॥

करिणां यादसां । शाकपार्थिवादिषु द्रष्टव्यः । प्रतिदन्तिनामिवाभिमुखानभियातानित्यर्थः । करिणः सम्बुबुधे ददर्शेत्यर्थः ॥ १४ ॥

सइति । सोऽर्ज्जुनः पुरोऽग्रे सहसा समुत्पिपतिषोः समुत्पतितुमिच्छोः । पतेः सन्नन्तादुप्रत्ययः तनिपतिदरिद्रातिभ्यः सनइड्वा वक्तव्यइति विकल्पादिडागमः । फणिनः प्रजविभिरतिवेगवद्भिः श्वसितैः फूत्कारैर्दिवि आकाशे प्रहितम्प्रेरितं शरदभ्रस्य विभ्रमइव विभ्रमः सौन्दर्य्यं यस्य तत् शुभ्रमभ्रव्यापकञ्चेत्यर्थः । अपाम्पटलम्पुरउदीक्ष्य विस्मयञ्जगाम । अत्रोपमानुप्राणिता स्वभावोक्तिरलङ्कारः ॥ १५ ॥

सइति । सोऽर्जुनः सैकतवतीः पुलिनवतीरभितः शफरीणां प्रोष्ठीनाम्परिस्फुरितान्येव चारवो दृशो यासान्ताः । सुरनिम्नगां गङ्गामुपयतीर्भजन्तीः । इणः शतुरुगितत्वात् ङीप् । अतएव बृहज्जघनाल्ललिताः सखीरिव स्थिताः सरितस्तताराभिचक्रमे ॥ १६ ॥

अधिरुह्य पुष्पभरनम्रशिखैः
परितः परिष्कृततलान्तरुभिः ।
मनसः प्रसत्तिमिव मूर्द्धि गिरेः
शुचिमाससाद स वनान्तभुवम् ॥ १७ ॥
अनुसानु पुष्पितलताविततिः
फलितोरुभूरुहविविक्तवनः ।
धृतिमाततान तनयस्य हरे
स्तपसेऽधिवस्तुमचलामचलः ॥ १८ ॥

अधिरुह्येति । सोऽर्ज्जुनोऽधिरुह्य अर्थात् गिरिमिति शेषः । पुष्पभरेण नम्रशिखैर्नताग्रैस्तरुभिः परितः परिष्कृततलाम्भूषितस्वरूपाम् । अधःस्वरूपयोरस्त्रीतलमित्यमरः । सम्पर्य्युपेभ्यः करोतौ भूषणे इति सुडागमः । शुचिं शुद्धां अतएव मनसः प्रसत्तिमिव मूर्त्तं मनःप्रसादमिव स्थितान्तद्धेतौ तद्भावोत्प्रेक्षा । गिरेर्मूर्द्धि वनान्तभुवमाससाद । अन्तःशब्दः स्वरूपवचनः । अन्तो, ध्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिवदिति वैजयन्ती ॥ १७ ॥

अनुसान्विति । अनुसानु प्रतिसानु वीप्सार्थेऽव्ययीभावः । पुष्पिताः संजातपुष्पाः लताविततयो यस्मिन्सः फलिताः उरुभूरुहाः येषु तानि विविक्तानि विजनानि पूतानि वा वनानि यस्मिन्स तथोक्तः । विविक्तौ पूतविजनावित्यमरः । अचलद्रन्द्रकीलः हरेस्तनयस्यार्ज्जुनस्य तपसे तपश्चर्यार्थमधिवस्तुमधिष्ठातुम् । क्रियार्थोपपदस्य च कर्म्मणि स्थानिन इति चतुर्थी । समानकर्तृकत्वात्तुमुन् । अचलाम्धृतिमुत्साहमाततान ।

प्रणिधाय तत्र विधिनाथ धिय
न्दधतः पुरातनमुनेर्म्मुनिताम् ।
श्रममादधावसुकरन्न तपः
किमिवावसादकरमात्मवताम् ॥ १९ ॥

शमयन् धृतेन्द्रियशमैकसुखः
शुचिभिर्गुणैरघमयं स तमः ।
प्रतिवासरं सुकृतिभिर्ववृधे
विमलः कलाभिरिव शीतरुचिः ॥ २० ॥

अत्राचलविशेषणपदार्थस्य धृतिकरणहेतुत्वात्काव्यलिङ्गमलङ्कारः ॥ १८ ॥

प्रणिधायेति । अथ तत्राद्रौ विधिना योगशास्त्रानुसारेण धियश्चित्तवृत्तिर्म्प्रणिधाय ध्येयविषये धियं नियम्य । नेर्गदेत्यादिना णत्वम् । मुनितान्दधतस्तपस्यतरित्यर्थः । पुरातनमुनेरर्ज्जुनस्येत्यर्थः । असुकरं दुष्करन्तपः श्रमं खेदन्नादधौ न चकार । तथाहि आत्मवताम्मनस्विनां अवसादकरमशान्तिजनकङ्किमिव न किञ्चिदित्यर्थः । इवशब्दोवाक्यालङ्कारे ॥ १९ ॥

शमयन्निति । धृतमिन्द्रियशमो विषयव्यावृत्तिरेवैकमद्वयं सुखं आह्लादो येन तथोक्तः आत्माराम इत्यर्थः । अन्यत्र धृतो हतमिन्द्रियशमः सन्तापनिवर्त्तनमेकमद्वितीयं सुखमाह्लादस्य येन स तथोक्तः । शुचिभिर्निर्म्मलैर्गुणैर्मैत्र्यादिभिरन्यत्र कान्त्यादिभिरघमयम्पापरूपन्तमः अज्ञानमन्यत्रान्धकारञ्च शमयन्निवर्त्तयन् । विमलो

अधरीचकार च विवेकगुणा
दगुणेषु तस्य धियमस्तवतः ।
प्रतिघातिनीं विषयसङ्गरतिं
निरुपप्लवः शमसुखानुभवः ॥ २१ ॥

मनसा जपैः प्रणतिभिः प्रयत
स्समुपेयिवानधिपतिं स दिवः ।
सहजेतरौ जयशमौ दधती
बिभराम्बभूव युगपन्महसी ॥ २२ ॥

ऽमलिनः पापरहितः षड्भ्योऽन्यत्र सोऽर्ज्जुनः प्रतिवासरं सुकृतिभिः सुकृतैस्तपोभिरित्यर्थः । स्त्रियां क्तिन् । कलाभिः शीतरुचि श्चन्द्र इव ववृधे ॥ २० ॥

अधरीचकारेति । किञ्चेति चार्थः विवेकस्तत्त्वावधारणं सएव गुणस्तस्मात्तेन हेतुनेत्यर्थः । विभाषागुणेऽस्त्रियामिति पञ्चमी । अगुणेषु कामक्रोधादिदोषेषु विषये । तद्विरोधेन नञ् समासः । धियश्चित्तवृत्तिमस्तवतो निवारितवतस्तस्यार्जुनस्य निरु पप्लवो निर्बाधः शमसुखानुभवः शान्त्यानन्दानुभवः प्रतिघातिनीं सोपप्लवां विषयसङ्गरतिं शब्दाद्युपभोगरुचिमधरीचकार विषय निस्पृहश्चकारेत्यर्थः । उत्कृष्टसुखलाभस्य अपकृष्टवैराग्यहेतुत्वा दिति भावः ॥ २१ ॥

मनसेति । प्रयतः अहिंसादिनिरतो मनसा ध्यानेन जपैर्विधि ष्टमन्त्राभ्यासैः प्रणतिभिर्नमस्कारैः एवं मनोवाक्कायकर्मभि

शिरसा हरिन्मणिनिभः स वहन्
कृतजन्म नोऽभिषवणेन जटाः ।
उपमां ययावरुणदीधितिभिः
परिमृष्टमूर्द्धनि तमालतरौ ॥ २३ ॥

धृतहेतिरप्यधृतजिह्ममति
श्चरितैर्मुनीनधरयन् शुचिभिः ।
रजयाञ्चकार विरजाः स मृगान्
कमिवेशते रमयितुं न गुणाः ॥ २४ ॥

दिवोऽधिपतिमिन्द्रं समुपेयिवान् उपसेदिवान्सोऽर्जुनः सहजेतरौ नैसर्गिकागन्तुकौ जीयते अनेनेति जयो वीररसः । एरजित्यच् । शम्यतेऽनेनेति शमः जयशमौ वीरशान्तिरसौ दधती पुष्णती महसी तेजसी युगपद्बिभरांबभूव बभार । भीह्रीभृहुवामिति विकल्पादाम्प्रत्ययः । अत्र युगपद्वीरशान्ताधिकरणत्वाभिधानादस्य लोकाद्भुतमहिमत्वं व्यज्यते ॥ २२ ॥

शिरसेति । हरिन्मणिनिभो मरकतमणिश्यामः अभिषवणेन स्नानेन कृतजन्मनो जनिताः अतः पिशङ्गीरिति भावः जटाः शिरसा वहन् सोऽर्जुनोऽरुणस्यानूरोर्दीधितिभिः परिमृष्टमूर्द्धनि व्याप्तशिरसि तमालतरौ उपमान्तमालतरोः सादृश्यं ययावित्यार्थीयमुपमा । तरोरौपम्याधिकरणत्वात्तदपेक्षया सप्तमी ॥ २३ ॥

धृतेति । धृतहेतिर्धृतायुधोऽपि अधृता जिह्ममतिः कुटिलमतिर्येन सः शुचिभिः चरितैः मुनीनधरयन् तिरस्कुर्वन् । वेषे

अनुकूलपातिनमचण्डगति
ङ्किरता सुगन्धिमभितः पवनम् ।
अवधीरितार्त्तवगुणं सुखता
न्नयता रुचां निचयमंशुमतः ॥ २५ ॥

ण्वं भीषणेनतु कर्मणेति भावः । कुतोविरजाः रजोगुणरहितः सोऽर्ज्जुनोमृगान् रञ्जयाञ्चकार रमयामास । रञ्जेर्णौ मृगरमणे नलोपोवक्तव्यइति नलोपः । तथाहि गुणाः दयादयः कमिव रमयितुं न ईशते कंवा वशीकर्त्तुंन्न शक्नुवन्तीति भावः । शुद्धिरेव हि परं विश्वासवीजम्परस्य न वेषेणापि संस्तवइति भावः ॥ २४ ॥

अथास्य त्रिभिः तपःसिद्धिमाह । अनकूलेत्यादिना । अनुकूलपातिनन्नतु प्रतिकूलपातिनमचण्डगतिं मन्दगामिनं सुगन्धिं । गन्धस्येत्येतदेकान्तग्रहणेऽपि कवीनां निरङ्कुशत्वात्समासान्तः । अथवा केचिदागन्तुकत्वेप्येकवचनेन समासान्तमिच्छन्ति । पवनमभितः किरता प्रवर्त्तयतेत्यर्थः । ऋतुरस्य प्राप्तः आर्त्तवः । ऋतोरणित्यण्प्रत्ययः । स चासौ गुर्णस्तिग्मलरूपः सोऽवधीरितस्तिरस्कृतोयस्य तं अंशुमतोरुचान्निचयं सुखतां सुखस्पर्शतान्नयता प्रापयता । नयतेर्द्विकर्म्मकत्वम् ॥ २५ ॥

नवेति । प्रचये पुष्पावचयप्रसङ्गे नवपल्लवाण्वाञ्जलयस्तान् विभ्रतीति तथोक्तान्वृक्षतः उच्चांस्तरून्नवनतिक्रमयता । गतिबुद्धीत्यादिना तरूणाङ्कर्मत्वं । प्रतिनिशं निशि निशि शयनीयतामुपयती

नवपल्लवाञ्जलिभृतः प्रचये
बृहतस्तरून् गमयतावनतिम् ।
स्तृणता तृणैः प्रतिनिशम्मृदुभिः
शयनीयतामुपयतीं वसुधाम् ॥ २६ ॥

पतितैरपेतजलदान्नभसः
पृषतैरपां शमयता च रजः ।
स दयालुनेव परिगाढकृशः
परिचर्य्ययानुजगृहे तपसा ॥ २७ ॥

महते फलाय तदवेक्ष्य शिवं
विकसन्निमित्तकुसुमं स पुरः ।
न जगाम विस्मयवशं वशिनां
न निहन्ति धैर्य्यमनुभावगुणाः ॥ २८ ॥

शयनस्थानीभूतामित्यर्थः वसुधां मृदुभिस्तृणैः स्तृणता आच्छादयता ॥ २६ ॥

पतितैरिति । अपेतजलदान्निरभ्रान्नभसः पतितैरपाम्पृषतैर्जलबिन्दुभिः रजश्च शमयता तपसा कर्त्रा दयालुनेवेत्युत्प्रेक्षा । दयालुत्वं सूचयति । परिगाढकृशोऽतिचीणः सोऽर्जुनः परिचर्य्यया उक्तविधया शुश्रूषया अनुजगृहेऽनुगृहीतः । अनुग्रहोऽत्र सहकारित्वमेव सर्व्वभूतानुकूल्यलिङ्गात्पचेलिमन्तपोऽस्येति भावः । अत्र श्लोकत्रयस्याप्येकवाक्यत्वादुत्प्रेक्षैव प्रधानालङ्कारः ॥ २७ ॥

महतइति । सोऽर्जुनोमहते फलाय श्रेयसे शस्ताय च विकसत्पूर्व्वोक्तं शिवन्निमित्तमेव कुसुमं पुरोऽग्रेऽवेक्ष्य विस्मयवशं न

तदभूरिवासरकृतं सुकृतै-
रुपलभ्य वैभवमनन्यभवम् ।
उपतस्थुरास्थितविषादधियः
शतयज्वनो वनचरा वसतिम् ॥ २९ ॥
विदिताः प्रविश्य विहितानतयः
शिथिलीकृतेऽधिकृतकृत्यविधौ ।
अनपेतकालमभिरामकथाः
कथयाम्बभूवुरिति गोत्रभिदे ॥ ३० ॥

जगाम । तथाहि । वशिनामनुभावएव गुणः स च धैर्य्यं न निहन्ति विस्मयादिविकारं न जनयतीत्यर्थः । तपः चरति विस्मयादिति स्मरणादिति भावः ॥ २८ ॥

तदिति । सुकृतैस्तपोभिः करणैरभूरिभिः कतिपयैरेव वासरैः कृतन्तत्पूर्व्वोक्तं वैभवमतोऽन्यस्य न भवतीत्यनन्यभवमन्यस्यासाध्य मित्यर्थः । पचाद्यजन्तोत्तरपदेन नञ्समासः । उपलभ्य निश्चित्य आस्थितविषादाः प्राप्तखेदाः धियो येषान्ते वनचराः । तत्पुरुषे कृति बहुलमिति बहुलग्रहणाल्लुक् । शतेन शतस्य वा मखानां यज्वनः शतक्रतोः । अत्र सङ्ख्येयविशेषलाभोऽर्थजिसन्निधानादवगन्तव्यः । यज्वा तु विधिनेष्टवानित्यमरः । सुयजोर्ङ्वनिप् । वसतिमुपतस्थुः प्रापुः ॥ २९ ॥

विदिताइति । वनचराइत्यनुवर्त्तनीयम् । विदिताः ज्ञाताः अनुमतप्रवेशाः सन्तइत्यर्थः । प्रविश्य विहितानतयः कृतप्रणामाः

शुचिवल्कवीतवपुरन्यतम
स्तिमिरच्छिदामिव गिरौ भवतः ।
महते जयाय मघवन्ननघः
पुरुषस्तपस्यति तपन् जगतीम् ॥ ३१ ॥
स बिभर्त्ति भीषणभुजङ्गभुजः
पृथु विद्विषांभयविधायि धनुः ।
अमलेन तस्य धृतसच्चरिता
श्चरितेन चातिशयिता मुनयः ॥ ३२ ॥

अधिकृतकृत्यस्य नियुक्तकर्मणः शैलरक्षणात्मकस्य विधावनुष्ठाने शिथिलीकृते सति अनपेतकालमनतिक्रान्तकालं यथा तथा गोत्रभिदे शक्राय इति वक्ष्यमाणप्रकारेण अभिरामकथाः श्राव्यवाचः । चिन्तिपूजिकथिकुम्बिचर्चश्चेत्यङ् प्रत्ययः । कथयाम्बभूवुः ॥ ३० ॥

शुचीति । शुचिना वल्केन वल्कलेन वीतमाच्छादितं वपुर्यस्य सः । तिमिरच्छिदां सूर्य्यादीनामन्यतमइव स्थितइत्युत्प्रेक्षा । अनघः पुरुषः हे मघवन् भवतो गिरौ इन्द्रकीले जगतीं भवस्तपन् तापयन्महते जयाय तपस्यति तपश्चरति । कर्मणोरोमन्थेत्यादिना क्यङि लट् ॥ ३१ ॥

जयाय तपस्यतीत्युक्तन्तत्र हेतुमाह । सइति । भीषयेते इति भीषणौ । नन्द्यादित्वात् ल्युप्रत्ययः । तौ च तौ भुजङ्गौ च ताविव भजौ यस्य स तथोक्तः पुरुषो विद्विषांभयविधायि पृथु धनु

मरुतः शिवा नवतृणा जगती
विमलन्नभो रजसि वृष्टिरपाम् ।
गुणसम्पदाऽनुगुणताङ्गमितः
कुरुतेऽस्य भक्तिमिव भूतगणः ॥ ३३ ॥
इतरेतरानभिभवेन मृगा
स्तमुपासते गुरुमिवान्तसदः ।
विनमन्ति चास्य तरवः प्रचये
परवान्स तेन भवतेव नगः ॥ ३४ ॥

बिभर्त्ति अतोजयार्थीत्यर्थः । अमलेन तस्य पुरुषस्य चरितेन भूतानि सच्चरितानि यैस्ते मुनयोऽतिशयिता अतिक्रान्ताः ॥ ३२ ॥

अथास्य तपःसिद्धिं वर्णयति । मरुत इत्यादिना । मरुतो वाताः शिवाः सुखाः जगती पृथ्वी नवतृणा अयेनासनाद्यनुकूले त्यर्थः । नभो विमलन्नीहारादिरहितं रजसि सति अपां वृष्टिर्भ वतीति शेषः । किम्बहुना अस्य पुरुषस्य गुणसम्पदा भूतहितादिगुणसम्पत्त्यानुगुणतामनुकूलताङ्गमितो वशीकृत इत्यर्थः । भूतगणः पृथिव्यादिपञ्चकं भक्तिं सेवां कुरुत इवेत्युत्प्रेक्षा ॥ ३३ ॥

इतरेतरेति । किञ्च मृगाः पशवस्तं अन्तेऽन्तिके सीदन्तीत्यन्तसदोऽन्तेवासिनः । सत्सूद्विषेति क्विप् । गुरुमिव इतरेतरेषामनभिभवेनाद्रोहेणोपासते सेवन्ते । प्रचये पुष्पावचये तरवोऽस्य विनमन्ति करप्रचेया भवन्तीत्यर्थः । अस्येति सम्बन्धसामान्ये षष्ठी । किम्बहुना । स नग इन्द्रकीलो भवतेव तेन परवान्पराधीनः सात्विकस्यापि तवेव तस्यातिशयो वर्त्तत इत्यर्थः ॥ ३४ ॥

उरु सत्त्वमाह विपरिश्रमता
परमं वपुः प्रथयतीव जयम् ।
शमिनोऽपि तस्य नवसङ्गमने
विभुतानुषङ्गि भयमेति जनः ॥ ३५ ॥

ऋषिवंशजः स यदि दैत्यकुले
यदि वान्वये महति भूमिभृताम् ।
चरतस्तपस्तव वनेषु सदा
न वयन्निरूपयितुमस्य गतिम् ॥ ३६ ॥

उर्विति । किञ्च विपरिश्रमता आयासेऽपि श्रमराहित्यं उरु महत्सत्त्वमन्तःसारमाह दुर्बलस्य श्रमजयासम्भवादिति भावः । परमं वपुः जयम्प्रथयति च आकारेणैव जिष्णुत्व ज्ञायते इत्यर्थः । शमिनः शान्तस्यापि तस्य नवसङ्गमनेऽपूर्व्वप्राप्तौ जनो विभुतायाः प्रभावस्यानुषङ्गि व्यापकं नतु हिंस्रकत्वानुषङ्गीति भावः भयमेति । शान्तोऽप्ययम्पराभवङ्गमयतीति भावः ॥ ४५ ॥

अथेदृशोऽसौ क इति चेत्तत्र विप्रदृत्याह । ऋषीति । स पुरुषः ऋषिवंशजोवेति शेषः काकुर्वा । यदिवा दैत्यकुले जात इति शेषः । यदिवा महति भूमिभृतामन्वये जातः । तव वनेषु तपश्चरतोऽस्य गतिं स्वरूपं निरूपयितुं वयं सहन्त इति सदाः । पचादच् । न सहाः स्म इति शेषः ॥ ३६ ॥

अदृष्टपरिभाषणापराधम्परिहरति । विगणय्येति । अनेक गुणं बहुफलं इन्द्रत्वाद्यनेकफलसाधकत्वेन योग्यमित्यर्थः । कारण

विगणय्य कारणमनेकगुणं
निजयाथवा कथितमल्पतया।
असदप्यदः सहितुमर्हसि नः
क वनेचराः क निपुणामतयः ॥ ३७ ॥
अधिगम्य गुह्यकगणादिति त
न्मनसः प्रियम्प्रियसुतस्य तपः।
निजुगोप हर्षमुदितं मघवा
नयवर्त्मगाः प्रभवतां हि धियः ॥ ३८ ॥

त्तपोरूपं विगणय्य विचार्य्य अथवा निजया नैसर्गिक्या अल्पतया बालिश्येन वा कथितं नोऽस्माकं, अदः इदं वचनमित्यर्थः। असदसाध्वपि सहितुं सोढुं। तीषसहेत्यादिना विकल्पादिडागमः। अर्हसि योग्योऽसि। तर्हि सदैव किन्नोक्तन्तत्राह। वनेचराः क निपुणामतयोविवेकवुद्धयः क नोभयं सङ्गच्छतइत्यर्थः। अज्ञाने नापराध्यन्तीति भावः। अर्थान्तरन्यासोऽलङ्कारः॥ ३७ ॥

अधिगम्येति। मघवा इन्द्रइति पूर्व्वोक्तगुह्यकगणात्तन्मनसः प्रियम्प्रियसुतस्यार्ज्जुनस्य तपः अधिगम्य ज्ञात्वा। गुप्त्यपेचया समानकर्तृकत्वात् क्त्वाप्रत्ययनिर्देशः। उदितन्तत्तपसोदेवकार्य्यार्थत्वादुत्पन्नं हर्षं निजुगोप गोपयामास। तथाहि। प्रभवताम्प्रभूणान्धियोनयवर्त्मगानीतिमार्गानुसारिण्योहि। अन्यथा मन्त्रभेदे कार्य्यहानिः स्यादिति भावः॥ ३८ ॥

प्रणिधायेति। अथ हरिरिन्द्रश्चित्तम्प्रणिधाय विषयान्तरपरिहारेण आत्मन्यवस्थाप्य तत्र तस्मिन्नर्जने भक्ततया विदिते

प्रणिधाय चित्तमथ भक्ततया
विदितेऽप्यपूर्व्व इव तत्र हरिः ।
उपलब्धुमस्य नियमस्थिरतां
सुरसुन्दरीरिति वचोऽभिदधे ॥ ३९ ॥

सुकुमारमेकमणु मर्म्मभिदा
मतिदूरगं युतममोघतया ।
अविलक्ष्यमस्त्रमपरङ्कतमं
विजयाय यूयमिव चित्तभुवः ॥ ४० ॥

सत्यपि । उपलक्षणे तृतीया । अपूर्व्व इवाविदित इवेत्यर्थः । पूर्व्वा-दिभ्योनवभ्योवेति विकल्पान्न स्मिन्नादेशः । अस्यार्ज्जुनस्य नियमे स्थिरतान्दार्ढ्यमुपलब्धुम्परीक्षितुमित्यर्थः । लोकप्रतीत्यर्थमिति भावः । सुरसुन्दरीरिति वक्ष्यमाणप्रकारं वचोऽभिदधे ॥ ३९ ॥

सुकुमारमिति । मर्म्मभिदां मर्म्मच्छेदिनामस्त्राणां मध्य इत्यर्थः । यतश्च निर्द्धारणमिति षष्ठी । अपरमन्यत्कतमम् वा बहूनाञ्जातिपरिप्रश्ने डतमच् । यूयमिव सुकुमारं नतु कठिनम् । अन्यत्तु कठिनम्भवति । तथा एकं न बहु तत्तु अनेकम्भवति तथाऽणु सूक्ष्मन्न स्थूलम् अलक्ष्यप्रवेशित्वादिति भावः । तत्तु लक्ष्यप्रवेशि । तथा अतिदूरगं दूरलक्ष्यभेदि. तत्तु समीपलक्ष्य भेदि । तथा अमोघतया अमोघत्वगुणेन युतं युक्तन्न कदाचिद्व्यभि चरतीति भावः । अन्यत्तु कदाचिदपि लक्ष्यादपराध्यति । तथा अविलक्ष्यमप्रतिकारं । अन्यद्विद्यमानप्रतीकारं अस्त्रञ्चित्तभुवः

भववीतये हतबृहत्तमसा
मवबोधवारि रजसः शमनम् ।
परिपीयमाणमिव वोऽसकलै
रवसादमेति नयनाञ्जलिभिः ॥ ४१ ॥
बहुधा गताञ्जगति भूतसृजा
कमनीयतां समभिहृत्य पुरा ।
उपपादिता विदधता भवतीः
सुरसद्मयानसुमुखी जनता ॥ ४२ ॥

कामस्य । कर्त्तरि षष्ठी । विजयाय अस्तीति शेषः नकिञ्चिद स्तीत्यर्थः । अत्रोपमालङ्कारः । साभिप्रायविशेषणत्वात्परिकरा लङ्कारश्च । तयोरुभयोरङ्गाङ्गिभावेन सङ्करः ॥ ४० ॥

अथासामर्थ्यशङ्कां परिहरति । भवेति । भववीतये संसारनिवृत्तये हतबृहत्तमसां निरस्तमहामोहानां योगिनां सम्बन्धि रजो गुणः रजोधूलिरिति श्लिष्टरूपकम् तस्य शमनं निवर्त्तकं अवबोधं तत्त्वज्ञानमेव वारि तद्वो युष्माकमसकलैरसमग्रैर्नयनान्येवाञ्जलयस्तैः परिपीयमाणमिवेत्युत्प्रेक्षा । अवसादं क्षयमेति । मुक्तानपि बध्नतीनां वः कथमसामर्थ्यमिति भावः । अत्रोत्प्रेक्षारूपकयोः सङ्करः ॥ ४१ ॥

बहुधेति । किञ्च पुरा जगति बहुधा गतानानामुखेन विप्रकीर्णां कमनीयताञ्चन्द्राद्युपमानद्रव्यगतलावण्यं समभिहृत्य संगृह्य भवतीर्विदधता भूतसृजा ब्रह्मणा जनता जनसमूहः ।

तदुपेत्य विघ्नयत तस्य तपः
कृतिभिः कलासु सहिताः सचिवैः ।
हृतवीतरागमनसान्ननु वः
सुखसङ्गिनम्प्रति सुखावजितिः ॥ ४२ ॥

ग्रामजनेत्यादिनातल् । सुरसद्मयानसुमुखी स्वर्लोकयात्राप्रवणा उपपादिता कृता । स्वर्गस्यापि यत्प्रसादात्सर्व्वलोकश्लाघ्यत्वन्ताभौ वः कथमसामर्थ्यमिति भावः । अत्राप्सरसां प्रकोर्षलावण्यसङ्गृहासम्बन्धेऽपि तत्सम्बन्धाभिधानादतिशयोक्तिः ॥ ४२ ॥

अथ कार्य्यशक्तिमाह । तदिति । तत्तस्मात्समर्थत्वात्कलासु गीतवाद्यादिषु कृतिभिः कुशलैः सचिवैर्गन्धर्व्वैः सहिताउपेत्य तस्य पुरुषस्य तपोविघ्नयत विघ्नवत्कुरुत विहतेत्यर्थः । विघ्नवच्छब्दान्मत्वन्तात्तत्करोतीति णिचि लोट् णाविष्टवद्भावान्मतुपोलुक् । नचात्रासामर्थ्यशङ्का कार्य्येत्यर्थान्तरन्यासेनाह । हृतेति । ननु सम्बोधने हे अप्सरसो हृतानि वशीकृतानि वीतरागाणान्निस्पृहाणां मुमुक्षूणां मनांसि चित्तानि याभिस्तासां वोयुष्माकमप्सरसां सुखसङ्गिनम्पुरुषम्प्रति सुखाभिलाषिणम्प्रत्यवजितिर्विजयः सुखा नतु दुःकरा खलु । तेनायं सुखार्थो न मुमुक्षुरित्युक्तम् ॥ ४३ ॥

अथ सुखसङ्गित्वलिङ्गमाह । अविमृश्येति । हे अप्सरसः स पुरुषो द्विषतां शत्रूणाम्बधेन शत्रुहननद्वारा विषयाभिरतिं विषयसुखमभिलष्यति वाञ्छति । वा भ्राशेत्यादिना श्यन्प्रत्ययः । एतद्विषयसकलं अविमृश्यमसन्दिग्धं । ऋदुपधाच्चाकॢपिचृतेरिति क्यप् । हि यस्मात्स विधिः स विभर्त्ति भीषणभुजङ्गभुजेत्यादिश्लोकोक्तोऽस्

अविमृष्यमेतदभिलष्यति स
द्विषताम्बधेन विषयाभिरतिम् ।
भववीतये नहि तथा स विधिः
क्व शरासनं क्व च विमुक्तिपथाः ॥ ४४ ॥
पृथुधाम्नि तत्र परिबोधि च मा
भवतीभिरन्यमुनिवद्विकृतिः ।
स्वयशांसि विक्रमवतामवतां
न बधूष्वघानि विमृषन्ति धियः ॥ ४५ ॥

ष्ठानप्रकारो भववीतये संसारमुक्तये न भवति । कुत इत्याह । शरासनन्धनुः क्व विमुक्तेः पन्थाश्च क्व परस्परं विरुद्धमित्यर्थः । न खलु हिंसासाध्या मुक्तिरिति भावः । अर्थान्तरन्यासोऽलङ्कारः ॥ ४४ ॥

नच शापभयमपि सम्भाव्यमस्मादित्याह । पृथ्विति । पृथुधाम्नि महातेजसि तत्र तस्मिन्पुरुषविषये अन्यमुनिवदन्यस्मिन्मुनाविव । तत्र तस्येवेति वतिप्रत्ययः । विकृतिः कोपविकारश्च भवतीभिर्मा परिबोधि मा विज्ञायि मा शङ्कीति यावत् । बुध्यतेः कर्म्मणि लुङ् माङ्योगादाशीरर्थे अडागमाभावश्च । तथाहि । स्वयशांसि अवतां रक्षतां यशोधनानामित्यर्थः विक्रमवताञ्चिय श्चित्तानि बधूषु स्त्रीविषये अघानि व्यसनानि । दुःखेनोव्यसने ष्वघमिति वैजयन्ती । न विमृषन्ति । अर्थान्तरन्यासः । स्त्रीहिंसायाः शूराणां यशोहानिकरत्वान्न सर्व्वथा वो हिनस्ति स इत्यर्थः ॥ ४५ ॥

आशंसितापचितिचारु पुरः सुराणा
मादेशमित्यभिमुखं समवाप्य भर्त्तुः ।
लेभे परां द्युतिममर्त्यबधूसमूहः
सम्भावना ह्यधिकृतस्य तनोति तेजः ॥४६॥

प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः
स्तनभरनमिताङ्गीरङ्गनाः प्रीतिभाजः ।
अचलनलिनलक्ष्मीहारि नालम्बभूव
स्तिमितममरभर्त्तुर्द्रष्टुमक्ष्णां सहस्रम् ॥ ४७ ॥

आशंसितेति । अमर्त्यबधूसमूहोऽप्सरसाङ्गणः सुराणाम्पुरोऽग्रे आशंसितापचितिभिरपेक्षितसम्भावनाभिश्चारु यथा तथा । पूजार्च्चयोरपचितिरित्यमरः । अभिमुखं समक्षम्भर्त्तुः स्वामिनः इति पूर्व्वोक्तमादेशन्नियोगं समवाप्य परां द्युतिं लेभे । तथाहि । अधिकृतस्य क्वचिदधिकारे नियुक्तस्य सम्भावना स्वामिकृता पूजा तेजः कान्तिं तनोति ॥ ४६ ॥

प्रणतिमिति । अथ प्रणतिं विधाय सद्मनः इन्द्रभवनात्प्रस्थिताः प्रचलिताः स्तनभरैर्नमितानि अङ्गानि यासान्ताः । अंगगात्र कण्ठेभ्योवक्तव्यमिति ङीष् । प्रीतिभाजः स्वामिसम्भावनया सन्तुष्टाः ताः अङ्गनाः अचलनलिनानां स्थिरकमलानां लक्ष्मीर्हरतीति तत्तथोक्तम् तद्वन्मनोहरमित्यर्थः कुतस्तिमितं निस्पन्दनिश्चलममरभर्त्तुरक्ष्णां सहस्रं कर्त्तृ द्रष्टुमलं समर्थन्न बभूव । तासां सौन्दर्य्य सागरस्योद्वेलत्वादिति भावः । अत्रोपमालङ्कारः ॥ ४७ ॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये युवतिप्रस्थानं नाम षष्ठस्सर्गः ॥ ६ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां षष्ठस्सर्गः ॥ ६ ॥

---

श्रीमद्भिः सरथगजैस्सुराङ्गनानां
गुप्तानामथ सचिवैस्त्रिलोकभर्त्तुः।
सम्मूर्च्छन्नलघुविमानरन्ध्रभिन्नः
प्रस्थानं समभिदधे मृदङ्गनादः ॥ १ ॥
सोत्कण्ठैरमरगणैरनुप्रकीर्णा
न्निर्य्याय ज्वलितरुचः पुरान्मघोनः।
रामाणामुपरि विवस्वतः स्थिताना
न्नासेदे चरितगुणत्वमातपत्रैः ॥ २ ॥

श्रीमद्भिरिति। अथ प्रस्थानानन्तरं श्रीमद्भिः शोभावद्भिः सह रथगजेन सरथगजास्तैः। तेन सहेति तुल्ययोगइति बहुव्रीहिः। त्रयाणां लोकानां भर्त्तुस्त्रिलोकभर्त्तुरिन्द्रस्य। तद्धितार्थेत्यादिना उत्तरपदसमासः। सचिवैर्गन्धर्व्वैर्गुप्तानां सुराङ्गनानाम्प्रस्थानङ्गमनमलघुषु महत्सु विमानरन्ध्रेषु विमानानां कुक्षिषु कुहरेषु भिन्नः प्रतिध्वानैरनेकीभूतानां अतएव सम्मूर्च्छन् व्याप्नुवन्मृदङ्गनादः समभिदधे आचख्यौ। पौरेभ्यइतिशेषः। अस्मिन्सर्गे प्रहर्षिणीवृत्तम्। म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयमिति लक्षणात् ॥ १ ॥

सोत्कण्ठैरिति। सोत्कण्ठैरवरुणोत्सुकैरित्यर्थः अमरगणैरनुप्रकीर्णादाकीर्णाज्ज्वलितरुचोदीप्तप्रभान्मघोनः इन्द्रस्य पुरादमरावत्याः निर्याय निर्गत्य। यतेः ल्यप्। विवस्वतः उपरि स्थितानां रामाणां आतपात्त्रायन्तइत्यातपत्रैः। सुपीति योगविभागा

धूतानामभिमुखपातिभिः समीरै
रायासाद्विशदलोचनोत्पलानां।
आनिन्ये मदजनितां श्रियम्बधूना
मुष्णांशुद्युतिजनितः कपोलरागः ॥ ३ ॥
तिष्ठद्भिः कथमपि देवतानुभावा
दाकृष्टैः प्रजविभिरायतन्तुरङ्गैः।
नेमीनामसति विवर्त्तने रथौघै
रासेदे नभसि विमानवत्प्रवृत्तिः ॥ ४ ॥

त्कप्रत्ययः। चरितगुणत्वं सार्थकत्वं नासेदे न प्रापे। आतपत्राणां सम्भवादिति भावः ॥ २ ॥

धूतानामिति। अभिमुखपातिभिः समीरैः प्रतिकूलवायुभिर्धूतानामिति दुर्निमित्तसूचनं। आयासाद्गतिप्रयासाद्विशदलोचनोत्पलानां बधूनां उष्णांशुद्युतिजनितः आतपकृतः कपोलानां रागः पाटलत्वं मदेन जनितां श्रियन्तत्सदृशीं श्रियमित्यर्थः। अतएव निदर्शनालङ्कारः। आनिन्ये आनीतवान् बधूरिति शेषः। आङ्पूर्व्वान्नयतेः कर्त्तरि लिट् ञकारानुबन्धत्वादात्मनेपदम् ॥ ३ ॥

तिष्ठद्भिरिति। कथमपि वाढं। कथमादौ तथाप्यन्ते यत्ने गौरववाढयोरिति वैजयन्ती। देवतानामनुभावात्तिष्ठद्भिरपतद्भिरित्यर्थः। रथविशेषणमेतत्। प्रजविभिर्वेगवद्भिस्तुरङ्गैरायतं दूरमाकृष्टैः रथौघैर्वियत्याकाशे नेमीनाञ्चक्रधाराणां। चक्रधारा प्रधि

कान्तानां कृतपुलकः स्तनाङ्गरागे
वक्त्रेषु च्युततिलकेषु मौक्तिकाभः।
सम्पेदे श्रमसलिलोद्गमो विभूषा
रम्याणां विकृतिरपि श्रियन्तनोति ॥ ५ ॥
राजद्भिः पथि मरुतामभिन्नरूपै
रुल्कार्च्चिःस्फुटगतिभिर्ध्वजांशुकानाम्।
तेजोभिः कनकनिकाषराजिगौरै
रायामः क्रियतइव स्म सातिरेकः ॥ ६॥

र्नेमिरिति यादवः। विवर्त्तने भ्रमणेऽस्रति विमानैवर्द्धिमानाना मिवेत्युपमा। तस्येवेति वतिप्रत्ययः। प्रवृत्तिर्गतिराषेदे प्राप्ता। षदेः कर्म्मणि लिट् ॥ ४ ॥

कान्तानामिति। कान्तानां स्तनानामङ्गरागे कृतपुलकोजनितोद्भेदः कृतरोमाञ्चइत्यर्थः। च्युताः प्रभ्रष्टास्तिलकायेषान्तेषु वक्त्रेषु मौक्तिकाभः श्रमसलिलोद्गमः स्वेदोद्भेदोविभूषा भूषणं सम्पेदे संपन्नः। कर्त्तरि लिट्। तथाहि। रम्याणां स्वभावसुन्दराणां विकृतिरपि श्रियन्तनोति। अतः स्वेदस्यापि विभूषणत्वमुपपद्यतइति भावः ॥ ५ ॥

राजद्भिरिति। मरुताम्पथि आकाशे राजद्भिर्दीप्यमानैरभिन्नरूपैरविच्छिन्नाकारैः अतएवोल्कानामर्च्चींषीव स्फुटगतीनि दीप्तमार्गाणि तैः कनकस्य निकाषः कषणन्तस्य राजी रेखा तद्वद्गौरैररुणैः। गौरः पीतेऽरुणे श्वेते इति विश्वः।

रामाणामवजितमाल्यसौकुमार्य्ये
सम्प्राप्ते वपुषि सहत्वमातपस्य।
गन्धर्व्वैरधिगतविस्मयः प्रतीये
कल्याणी विधिषु विचित्रता विधातुः ॥७॥
सिन्दूरैः कृतरुचयः सहेमकक्ष्याः
स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः।
सादृश्यं ययुररुणांशुरागभिन्नै
र्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥ ८ ॥

ध्वजांशुकानान्तेजोभिः पताकाकान्तिभिरायामस्तेषामेव दैर्घ्यं सातिरेकः सातिशयः क्रियते स्मेव कृतइव दीर्घाध्वजपटाः स्वतेजः प्रसारेण दीर्घतमाइव लक्ष्यन्तइत्युत्प्रेक्षा साचोल्काद्युपमानुप्राणिता ॥ ६ ॥

रामाणामिति। मालेव माल्यन्तस्य सौकुमार्य्यमवजितं येन तस्मिन् कुसुमादपि मनोहरइत्यर्थः। रामाणां वपुषि आतपस्य। कृद्योगे कर्म्मणि षष्ठी। सहतइति सहः क्षमः। पचाद्यच्। तस्य भावः सहत्वम्। तत्सम्प्राप्ते सति अधिगतविस्मयैः सम्प्राप्ताश्चर्य्यैर्गन्धर्व्वैः विधातुर्विधिषु सृष्टिषु कल्याणी साध्वी श्रेयसी उपकारकत्वादिति भावः विचित्रता नानाविधत्वम्प्रतीये अवगता ज्ञाता। प्रति पूर्व्वादिणः कर्म्मणि लिट् ॥ ७ ॥

सिन्दूरैरिति। सिन्दूरैर्नागसम्भवाख्यैरागद्रव्यैः। सिन्दूरन्ना गसम्भवमित्यमरः। कृतरुचयोऽलङ्कृताइत्यर्थः। सह हेम्नः कक्ष्या भिर्मध्येभबन्धनैः सहेमकक्ष्याः। तेन सहेति तुल्ययोगइति

अत्यर्थं दुरुपसदादुपेत्य दूर
मर्यन्तादहिममयूखमण्डलस्य ।
आशानामुपरि चितामिवैकवेणीं
रम्योर्म्मिस्त्रिदशनदीं ययुर्बलानि ॥ ९ ॥
आमत्तभ्रमरकुलाकुलानि धुन्व
न्नुद्धूतग्रथितरजांसि पङ्कजानि ।
कान्तानाङ्गगननदीतरङ्गशीतः
सन्तापं विरमयति स्म मातरिश्वा ॥ १० ॥

बहुव्रीहिः । कच्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धनदत्य मरः । स्रोतोभिः सप्तभिर्मदनाडीभिः । करात्कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदच्युतिरिति पालकाव्ये । करानासारन्ध्राभ्यामित्यर्थः । मदं चरन्तोवर्षन्तस्त्रिदशगजाः अरुणस्यार्कस्यांशूनां रागेणारुणेन भिन्नैः संसृष्टैर्वर्षद्भिः स्फुरितशतह्रदैः स्फुरिततडिद्भिः पयोदैः सादृश्यं ययुरित्युपमालङ्कारः ॥ ८ ॥

अत्यर्थमिति । बलानि सैन्यानि अत्यर्थं दुरुपसदाद्दुःसहादहिममयूखमण्डलस्य सूर्य्यविम्बस्य पर्य्यन्तात्समीपात् दूरमुपेत्यागत्य आशानामुपरिचितां गुम्फितामेकवेणीमिव स्थितामित्युत्प्रेचा । रम्याऊर्म्मयस्तरङ्गाः यस्यास्तान्त्रिदशनदीं मन्दाकिनीं ययुः प्रापुः ॥ ९ ॥

आमत्तेति । आमत्तैर्भ्रमरकुलैराकुलानि उद्धूतानि उत्थापितानि ग्रथितानि अन्योन्यसम्बद्धानि च रजांसि येषु तानि पङ्क

सम्भिन्नैरिभतुरगावगाहनेन
प्राप्योर्व्वीरनु पदवीं विमानपङ्क्तीः ।
तत्पूर्व्वं प्रतिविदधे सुरापगाया
वप्रान्तस्खलितविवर्त्तनम्पयोभिः ॥ ११ ॥

जानि धुन्वन् कम्पयन्सुरभिरित्यर्थः गगननदीतरङ्गैः शीतोमात रिश्वा वायुः कान्तानां सन्तापं विरमयति स्म शमयामास मातर्य्यन्त रिचे श्वयतीति निरुक्तिः ॥ १० ॥

सम्भिन्नैरिति । इभतुरगावगाहनेन हस्त्यश्वावलोडनेन स म्भिन्नैः संक्षुभितैः सुरापगायाः पयोभिः कर्त्तृभिः पदवीमनु पद व्यामित्यर्थः । लक्षणेत्यम्भूतेत्यादिना कर्म्मप्रवचनीयत्वाद्द्वितीया । उर्व्वीर्व्विपुला विमानपङ्क्तीः प्राप्य तदेव पूर्व्वन्तत्पूर्व्वमिदम्प्रथमं यथा तथा आकाशगङ्गायास्तटाभावादिति भावः वप्रान्तेषु रोधो भूमिषु स्खलितानि तैर्व्विवर्त्तनं प्रत्यावृत्तिः वप्रान्त स्खलित विवर्त्तनन्तटान्तस्खलनप्रतिवर्त्तनं । वप्रः पितरि केदारे वप्रः प्राकाररोधसोरिति वैजयन्ती । प्रतिविदधे चक्रे इत्यतिशयोक्तिः ॥ ११ ॥

क्रान्तानामिति । ग्रहैः सूर्य्यादिभिश्चरितादाश्रितात् । कर्म्मणि क्तः । पयोमार्गात् । क्रान्तानां निष्क्रान्तानां अत्ताश्चक्रधरा दारुविशेषास्तेषामग्रैः क्षतादारिताः सुरवेश्मवेदिकायैस्तेषां रथानाम्प्रधिभिर्नेमिभिश्चक्रान्तैः । चक्रं रथाङ्गन्तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमानित्यमरः । सम्पीडेन नोदनेन क्षुभितानि जलानि येषान्तेषु तोयदेषु निःसङ्गमप्रतिघातं यथा तथा

क्रान्तानां ग्रहचरितात्पथो रथाना
मक्षाग्रक्षतसुरवेश्मवेदिकानाम्।
निस्सङ्गम्प्रधिभिरुपाददे विवृत्तिः
सम्पीडक्षुभितजलेषु तोयदेषु ॥ १२ ॥
तप्तानामुपदधिरे विषाणभिन्नाः
प्रह्लादं सुरकरिणाङ्घनाः क्षरन्तः।
युक्तानाङ्खलु महतामपरोपकारे
कल्याणी भवति रुजत्स्वपि प्रवृत्तिः ॥ १३ ॥

विवृत्तिः परिभ्रमणमपाददे स्वीकृतेत्यतिशयोक्तिः स्वभावोक्त्या संसृज्यते ॥ १२ ॥

तप्तानमिति। विषाणभिन्नागजदन्तक्षताः विषाणं दन्तशृङ्गयो रिति हलायुधः। अतएव क्षरन्तः स्रवन्तोघनास्तप्तानां सुर करिणाम्प्रह्लादमुपदधिरे उपचक्रिरे तथाहि। परोपकारे युक्ता नामासक्तानां रुजत्स्वपि पीडयत्स्वपि विषये कल्याणी हितका रिणी खलु प्रवृत्तिर्व्यापारो भवतीत्यर्थान्तरन्यासोऽलङ्कारः। ततो युक्तं मेघानाङ्गजदन्तक्षतानामपि तदाह्लादकत्वमिति भावः ॥ १३ ॥

संवातेति। संवाता संवहता। वातेर्गत्यर्थाच्छ्रक्तप्रत्ययः। अनिलेन कामिनेवेति भावः। दिव्यस्त्रीणाञ्जघनेषु वरं श्रेष्ठं यदंशुकन्तस्मिन् विवृत्तिमपसारं मुहुर्नीयमान सति पर्य्यस्तप्रसर त्पशु विशालं मणिमेखलांशुजालमूर्द्ध्वयुतकं चलनाख्यमिव। युतकं संशये युग्मे यौतके चलनेऽपि चेति विश्वः। अन्तरे भवं

संवाता मुहुरनिलेन नीयमाने
दिव्यस्त्रीजघनवरांशुके विवृत्तिम् ।
पर्य्यस्यत्पृथुमणिमेखलांशुजालं
सञ्जज्ञे युतकमिवान्तरीयमूर्वोः ॥ १४ ॥

प्रत्यार्द्रीकृततिलकास्तुषारपातैः
प्रह्लादं शमितपरिश्रमा दिशन्तः ।
कान्तानां बहुमतिमाययुः पयोदा
नाल्पीयान् बहु सुकृतं हिनस्ति दोषः ॥ १५ ॥

अन्तरीयमधोंशुकम् । गहादिभ्यश्चेति छप्रत्ययः । अन्तरीयो पसंव्यानपरिधानान्यधोंशुकइत्यमरः । संजज्ञे सञ्जातं । जनि धातोः कर्त्तरि लिट् । उत्प्रेक्षालङ्कारः ॥ १४ ॥

प्रतीति । तुषारपातैः शीकरवर्षैः । तुषारौ हिमशीकराविति विश्वः । प्रत्यार्द्रीकृततिलकामार्जितविशेषकाअपि शमितपरिश्रमाः प्रह्लादमानन्दं दिशन्तः पयोदाः कान्तानां । कर्त्तरि षष्ठी । बहुमतिं सम्मानमाययुः । तथाहि । अल्पीयानल्पो दोषो बहु प्रभूतं सुकृतमुपकारं न हिनस्ति न हन्ति । अर्थान्तरन्यासो ऽलङ्कारः ॥ १५ ॥

यातस्येति । प्रथिततरङ्ग बद्धोर्मि यस्यैकतन्तस्याभेवाभा यस्य तस्मिन्विगतानि पयांसि यस्मात्तस्मिन्विजले । शेषाद्विभाषेत्यस्य पाक्षिकत्वान्न समासान्तः । उरःप्रभृतिपाठस्तु पयःशब्दस्यैकवचना न्तस्यैवेति न कश्चिद्विरोधः । वारिवाहजाले मेघवृन्दे विच्छेद

यातस्य ग्रथिततरङ्गसैकताभे
विच्छेदं विपयसि वारिवाहजाले।
आतेनुश्चित्रदशवधूजनाङ्गभाजां
सन्धानं सुरधनुषः प्रभामणीनाम् ॥ १६ ॥
संसिद्धाविति करणीयसन्निबद्धै
रालापैः पिपतिषतां विलङ्घ्य वीथीम्।
आसेदे दशशतलोचनध्वजिन्या
जीमूतैरपिहितसानुरिन्द्रकीलः ॥ १७ ॥

स्फुटिं यातस्य सुरधनुषइन्द्रचापस्य चित्रदशवधूजनाङ्गभाजां मणीनां तदङ्गसङ्गिविभूषामणीनामित्यर्थः प्रभाः कान्तयः सन्धानमातेनुस्सक्रुः। अत्राभरणप्रभाणामिन्द्रधनुषोऽसम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिरलङ्कारः ॥ १६ ॥

संसिद्धाविति। संसिद्धौ कार्य्यसिद्धिविषये इतीत्थं भाविना प्रकारेण कर्त्तव्यमिति करणीयत्वेन सन्निबद्धैः संयोजितैरित्यर्थः आलापैराभाषणैरुपलक्षितया। स्यादाभाषणमालापइत्यमरः। दशशतानि सङ्ख्येषु तानि लोचनानि यस्य सः सहस्रलोचन इत्यर्थः तस्य ध्वजिन्या सेनया पिपतिषतामपक्षिणां वीथीं मार्ग्गं। पितसन्तानभसंगमाइत्यमरः। तनिपतीत्यादिना विकल्पादिडागमः। विलङ्घ्य जीमूतैः जीवस्योदकस्य मूतः पटबन्धोयेषान्ते तैः। पृषोदरादित्वात्साधुः। अपिहितसानुराच्छादिततट उन्नतइत्यर्थः। इन्द्रकीलआसेदे प्राप्तः। सीदतेः कर्म्मणि लिट् ॥ १७ ॥

आकीर्णा मुखनलिनैर्विलासिनीना
मुद्धूतस्फुटविशदातपत्रफेना।
सा तूर्य्यध्वनितगभीरमापतन्ती
भूभर्त्तुः शिरसि नभोनदीव रेजे॥ १८॥
सेतुत्वन्दधति पयोमुचां विताने
संरम्भादभिपततोरथान् जवेन॥
आनिन्युर्नियमितरश्मिभुग्नघोणाः
कृच्छ्रेण चितिमवनामिनस्तुरङ्गाः ॥१९॥

आकीर्णेति। विलासिनीनां मुखनलिनैः। उपमितसमासः। आकीर्णाव्याप्ता उद्धूतान्यूर्द्ध्वमुत्क्षिप्तानि स्फुटान्यसङ्कुचितानि विशदातपत्राणि श्वेतच्छत्राणि फेनाइव यस्यास्तथोक्ता तूर्य्यध्वनितैर्वाद्यघोषैर्गभीरं यथा तथा भूभर्त्तुरिन्द्रकीलस्य शिरसि आपतन्ती सा सेना नभोनदीव रेजे ॥ १८ ॥

सेतुत्वमिति। पयोमुचां विताने सेतुत्वन्दधति सति संरम्भाद्दाटोपाज्जवेनाभिपततोमेघवृन्दमधरीकृत्य धावतइत्यर्थः। रथा न्नियमितैराकृष्टैरश्मिभिः प्रग्रहैर्भुग्नाआकुञ्चिताः घोणाः प्रोथा येषान्ते। कुञ्चितन्नतं विद्धं कुटिलभुग्नं वेल्लितं वक्रमित्यमरः। किरणप्रग्रहौ रश्मी इत्यमरः घोणा तु प्रोथमस्त्रियामित्यमरः। अवनमन्तीत्यवनामिनोऽवनतपूर्व्वकायास्तुरङ्गाः कृच्छ्रेण महता प्रयत्नेन चितिमानिन्युः इति स्वभावोक्तिः ॥ १९ ॥

माहेन्द्रमिति। माहेन्द्रं नगमभितः इन्द्रकीलाभिमुखं। अभितः परितइत्यादिना द्वितीया। दिवोऽन्तरिक्षात्पतन्तोऽवतरन्तः

माहेन्द्रन्नगमभितः करेणुवर्य्याः
पर्य्यन्तस्थितजलदा दिवः पतन्तः ।
सादृश्यं निलयननिष्प्रकम्पपक्षै
राजग्मुर्ज्जलनिधिशायिभिर्नगेन्द्रैः ॥ २० ॥
उत्सङ्गे समविषमे समं महाद्रेः
क्रान्तानां वियदभिपातलाघवेन ।
आमूलादुपनदि सैकतेषु लेभे
सामग्र्यं खुरपदवी तुरङ्गमाणाम् ॥ २१ ॥

पर्य्यन्तस्थिताः पार्श्वस्था जलदा येषान्ते करेणुवर्य्याः करेणुषु वर्य्याः श्रेष्ठा इत्यर्थः। न निर्द्धारण इति षष्ठीसमासनिषेधात् सप्तमीति योगविभागात्सप्तमीसमासः। निलयने स्थाने निष्प्रकम्पपक्षैर्निश्चलपक्षैर्जलनिधिशायिभिर्नगेन्द्रैर्मैनाकादिभिः सादृश्यमाजग्मुरित्युपमा ॥ २० ॥

उत्सङ्ग इति। महाद्रेरुत्सङ्गे मूर्द्ध्नि विषये यत्समविषमं समञ्च विषमञ्च निम्नोन्नतन्तस्मिन् । द्वन्द्वैकवद्भावः । वियदभिपातलाघवेन गगनसञ्चारपाटवेन सममेकरूपमारोहावरोहरहितमित्यर्थः क्रान्तानाङ्गच्छतान्तुरङ्गमाणां खुरपदवी खुरपङ्क्तिः उपनदि नदीसमीपे। अव्ययीभावश्चेति नपुंसकत्वात् ह्रस्वत्वं। सैकतेषु आमूलान्मूलमारभ्य आदित आरभ्येति यावत् समग्रस्य भावः सामग्र्यं लेभे । सैकतादन्यत्र निम्नेषु गगनचारेण समप्रदेशवद्विषमे खुरस्पर्शाभावाद्विच्छिन्ना खुरसरणिः सैकतेषु तु सर्व्वत्र समत्वादविच्छिन्नेत्यर्थः ॥ २१ ॥

सध्वानन्निपतितनिर्झरासु मन्द्रैः
सम्मूर्च्छन् प्रतिनिनदैरधित्यकासु ।
उद्ग्रीवैर्घनरवशङ्कया मयूरैः
सोत्कण्ठं ध्वनिरुपशुश्रुवे रथानाम् ॥ २२ ॥

सम्भिन्नामविरलपातिभिर्मयूखै
र्नीलानामभृशमुपमेखलं मणीनाम् ।
विच्छिन्नामिव वनिता नभोऽन्तराले
वप्राम्भःस्रुतिमवलोकयांबभूवुः ॥ २३ ॥

सध्वानमिति । सध्वानं सशब्दं निपतिताः निर्झराः प्रवाहा यासु तासु । प्रवाहो निर्झरो झरइत्यमरः । अधित्यकासु नगोर्द्ध्वभूमिषु । भूमिरुर्द्ध्वमधित्यकेत्यमरः । उपाधिभ्यामित्यादिना त्यकन्प्रत्ययः । मन्द्रैर्गम्भीरैः । क्लीमन्द्रस्तु गम्भीरइत्यमरः । प्रतिनिनदैः प्रतिध्वानैः सम्मूर्च्छन् वर्द्धमानः रथानां ध्वनिर्घनरवशङ्कया मेघगर्ज्जितभ्रमेणेति भ्रान्तिमदलङ्कारः । उद्ग्रीवैर्मयूरैः सोत्कण्ठमुपशुश्रुवे उपश्रुतः । शृणोतेः कर्म्मणि लिट् ॥ २२ ॥

सम्भिन्नामिति । अविरलपातिभिर्निरन्तरप्रसारिभिरुपमेखलं मेखलातटेष्वित्यर्थः । अथ मेखला श्रोणिस्थानेऽद्रिकटके कटिबन्धेऽसिबन्धनइति यादवः । नीलानां मणीनां मयूखैर्भृशं सम्भिन्नामेकीभूतामतएव नभोऽन्तराले विच्छिन्नामिव स्थितामित्युत्प्रेक्षा । वप्राम्भःस्रुतिं वप्रोदकधारां वनिताअवलोकयाम्बभूवुः । वप्राम्भःस्रुतेः स्वधवलिमत्यागेनेन्द्रनीलानां नीलिमस्वीकाररूपतद्गुण।

आसन्नद्विपपदवीमदानिलाय
क्रुध्यन्तोधियमवमत्य धूर्गतानाम्।
सव्याजं निजकरिणीभिरात्तचित्ताः
प्रस्थानं सुरकरिणः कथञ्चिदीषुः॥ २४ ॥

नीरन्ध्रं पथिषु रजोरथाङ्गनुन्न
मर्य्यस्यन्नवसलिलारुणं वहन्ती।
आतेने वनगहनानि वाहिनी सा
घर्म्मान्तक्षुभितजलेव जह्नुकन्या॥ २५ ॥

त्यापिता विच्छेदोत्प्रेक्षेति तयोरङ्गाङ्गिभावेन सङ्करः। तेन च नैल्याविच्छेदभ्रमरूपोभ्रान्तिमान् व्यज्यते॥ २३॥

आसन्नेति। धुरङ्गतास्तेषान्धूर्गतानान्नियन्तॄणां धियमवमत्या गणयित्वा अवज्ञायेति यावत् आसन्नायां द्विपपदव्यां वनगज मार्गे योमदानिलस्तस्मै क्रुध्यन्तः तम्प्रति कुप्यन्तः। क्रुधद्रुहेत्यादिना सम्प्रदानत्वाच्चतुर्थी। सव्याजं सकपटं निजकरिणीभिरात्त चित्ताआकृष्टचित्ताः सुरकरिणोदेवनागाः प्रस्थानङ्गमनङ्कथञ्चि त्कष्टेन ईषुरभिलेषुः॥ २४॥

नीरन्ध्रमिति। नीरन्ध्रं सान्द्रम्पथिषु रथाङ्गैश्चक्रैर्नुन्नं प्रेरितं। नुत्तनुन्नास्तनिष्ठ्यूतविद्धक्षिप्तेरिताः समाइत्यमरः। पर्य्यस्यत्प्रसर न्नवसलिलमिवारुणं रजोवहन्ती सा वाहिनी सेना घर्म्मान्ते प्रावृषि क्षुभितजला कलुषोदकेत्यर्थः जह्नुकन्या गङ्गेव वनानि फलकुसुमप्रधानानि गहनानि जीर्णानि च तानि च तानि वनगह

सम्भोगक्षमगहनामथोपगङ्गं
बिभ्राणां ज्वलितमणीनि सैकतानि ।
अध्यूषुश्च्युतकुसुमाचितां सहाया
वृत्रारेरविरलशाद्वलां धरित्रीम् ॥ २६ ॥

भूभर्त्तुः समधिकमादधे तदोर्व्याः
श्रीमत्तां हरिसखवाहिनीनिवेशः ।
संसक्तौ किमसुलभं महोदयानां
मुच्छ्रायं नयति यदृच्छयापि योगः ॥२७॥

नानि आतेने व्यानशे । अत्र समासगतवाक्यगतोपमयोः सजाती यथोरङ्गाङ्गिभावेन सङ्करः ॥ २५ ॥

सम्भोगेति । अथ वृत्रारेः शक्रस्य सहायाः सचिवाः गन्धर्वा उपगङ्गं गङ्गासमीपे । अव्ययीभावस्य नपुंसकत्वाद्ध्रस्वत्वम् । सम्भोगक्षमगहनामुपभोगयोग्यवनां ज्वलिताः मणयो येषु तानि सैकतानि बिभ्राणाम् । भृञः कर्त्तरि लटः शानच् । च्युतैः स्वयम्पतितैः कुसुमैराचितां व्याप्तां अविरलाः सान्द्राः शाद्वलाः शादप्रायप्रदेशा यस्यां सा तान्धरित्रीमध्यूषुरधितस्थुः । वसतेर्यजादित्वात्सम्प्रसारणम् । अत्र धरित्रीविशेषणार्थानामधिवासहेतुत्वादनेकपदार्थहेतुकङ्काव्यलिङ्गमलङ्कारः ॥ २६ ॥

भूभर्त्तुरिति । तदा हरिसखवाहिनीनिवेशो गन्धर्वसेनाशिविरम् । निवेशः शिविरोद्वाहविन्यासेषु प्रकीर्त्तित इति शाश्वतः । भूभर्त्तुः पर्व्वतस्य उर्व्याः समधिकम्पूर्व्वस्मादभ्यधिकं यथा तथा

सामोदाः कुसुमतरुश्रियो विविक्ताः
सम्पत्तिः किशलयशालिनी लतानाम् ।
साफल्यं ययुरमराङ्गनोपभुक्ताः
सा लक्ष्मीरुपकुरुते यया परेषाम् ॥ २८ ॥

श्रीमत्तां श्रियमित्यर्थः आदधे जनयामास । तथाहि । महोदयानां महात्मनां संसक्तौ सम्यक्सम्बन्धे सन्सक्ताविति पाठे तु सम्यक्सेवायाङ्किमसुलभञ्च किञ्चिद्दुर्लभमित्यर्थः । यतो यदृच्छया दैवायोगोऽप्युच्चायमुत्कर्षन्नयति । अत्र प्रकृतयदृच्छया योगस्योत्कर्षाभिधानादप्राकृतभक्तियोगस्योत्कर्षाधायकत्वे कैमुतिकन्यायेनार्थापत्तिरिति प्राकरणिकादप्राकरणिकरूपार्थापत्तिरलङ्कारः। तदुक्तं । एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथा पतेत् । कैमत्येन यतः सा स्यादर्थापत्तिरलङ्क्रियेति ॥ २७ ॥

सामोदाइति । सामोदाः ससौरभाः कुसुमप्रधानास्तरवः । शाकपार्थिवादिषु द्रष्टव्यः । तेषां श्रियः सम्हद्धयः विविक्ताः विजनप्रदेशाः । विविक्तविजनच्छन्ननिःशलाकास्तथा रहइत्यमरः । किशलयशालिनी लतानां नवपल्लवयुतवल्लीनां सम्पत्तिः । एता अमराङ्गनोपभुक्ताः सत्यः साफल्यं ययुः । तथाहि यया लक्ष्म्या करणेन परेषामुपकुरुते लक्ष्मीवानिति शेषः सा लक्ष्मीर्नान्येति भावः । परेषामित्यत्रानुकरोति भगवतो नारायणस्येत्यादिवत् क्रियायोगे हि सम्बन्धसामान्ये षष्ठी ॥ २८ ॥

कान्तइति । कान्तोऽपि त्रिदशवधूजनः पुरस्तादग्रे लीनानां संश्रितानां अलीनां श्वसितैर्निश्वासैर्विलोलाः पल्लवाः येषां तेषां

क्लान्तोऽपि त्रिदशवधूजनः पुरस्ता
ल्लीनाहिश्वसितविलोलपल्लवानाम्।
सेव्यानां हतविनयैरिवावृतानां
सम्पर्कम्परिहरति स्म चन्दनानाम् ॥ २९ ॥
उत्सृष्टध्वजकुथकङ्कटा धरित्री
मानीताविदितनयैः श्रमं विनेतुम्।
आक्षिप्तद्रुमगहनायुगान्तवातैः
पर्य्यस्तागिरयइव द्विपाविरेजुः ॥ ३० ॥

चन्दनानां सम्पर्कं हतविनयैर्दुर्जनैः खलैः आवृतानां संवृतानां सेव्यानां प्रभूणां सम्पर्कमिव परिहरति स्म । दुष्टसंसृष्टागुणाढ्या अपि त्याज्याइति भावः ॥ २९ ॥

उत्सृष्टेति । उत्सृष्टाः आक्षिप्ताः ध्वजाः कुथा आस्तरणानि कङ्कटाः तनुत्राणानि च येभ्यस्ते । प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथोद्वयोरित्यमरः । विदितनयैः शिक्षाभिज्ञैर्यन्तृभिः श्रमं विनेतुं क्लममपनेतुन्धरित्रीमानीता निवेश्यमानाइत्यर्थः द्विपा युगान्तवातैराक्षिप्तानि उद्धृतानि द्रुमाणां गहनानि वनानि येभ्यस्ते पर्य्यस्ताविपर्य्यासितागिरयइव विरेजुः शुशुभिरे ॥ ३० ॥

प्रस्थानेति । गजपतिना प्रस्थानश्रमेण गमनक्लेशेन जनितां निद्रां विहाय आमुक्ते अतएव मदानपङ्के गजमदयुक्ते शय्यान्ते शयनीयप्रदेशे क्षणं विलीनं लग्नं अलिनां कुलं सरम्भेणोत्थान

प्रस्थानश्रमजनितां विहाय निद्रा
मामुक्ते गजपतिना सदानपङ्के ।
शय्यान्ते कुलमलिनां क्षणं विलीनं
संरम्भच्युतमिव शृङ्खलञ्चकाशे ॥ २१ ॥
आयस्तः सुरसरिदोघरुद्धवर्त्मा
सम्प्राप्तुं वनगजदानगन्धि रोधः ।
मूर्द्धानं निहितशिताङ्कुशं विधुन्वन्
यन्तारन्न विगणयाञ्चकार नागः ॥ २२ ॥

सम्भ्रमेण च्युतं भ्रष्टं शृङ्खलं निगडमिवेत्युत्प्रेक्षा । अथ शृङ्खले अन्दुकोनिगडोऽस्त्री स्यादित्यमरः । चकाशे शुशुभे ॥ २१ ॥

आयस्तइति । वनगजदानस्य गन्धोऽस्यास्तीति तथोक्तं रोधः सरकूलमित्यर्थः सम्प्राप्तुमिच्छन्तुं आयस्तः उत्सुकः प्रयत्नं कुर्वाणइत्यर्थः । यसुप्रयत्ने इति धातोः कर्त्तरि क्तः । किन्तु सुरसरिदोघेन गङ्गाप्रवाहेन रुद्धं वर्त्म यस्य सः । नागोगजोनिहितोदत्तः शितस्तीक्ष्णोऽङ्कुशोयस्मिन् । अङ्कुशोऽस्त्री सृणिः स्त्रियामित्यमरः । तं मूर्द्धानं विधुन्वन् रोषादिति भावः यन्तारन्न विगणयाञ्चकार न विगणयामास ॥ २२ ॥

आरोढुरिति । समवनतस्य जलपानार्थमानतपूर्व्वकायस्य करेणोर्गजस्य । करेणुरिभ्यां स्त्री नेभे इत्यमरः । करेण पीतस्य शेषे पयसि आरोढुर्हस्तिपकात्साशङ्कं सभयं समीरिते क्षिप्ते सति इत्यर्थः । शीकरोऽम्बुकणः अरुणे मदस्रुती मदधारे ययोस्तौ

आरोढुः समवनतस्य पीतशेषे
साशङ्कं पयसि समीरिते करेण ।
सम्मार्ज्जन्नरुणमदस्रुती कपोलौ
सस्यन्दे मदइव शीकरः करेणोः ॥ ३३ ॥
आघ्राय क्षणमतितृष्यतापि रोषा
दुत्तीरन्निहितविवृत्तलोचनेन ।
सम्पृक्तं वनकरिणां मदाम्बुसेकै
र्नाचेमे हिममपि वारि वारणेन ॥ ३४ ॥

कपोलौ संमार्जन् प्रमृजन् । मृजेरजादौ सङ्क्रमे विभाषावृद्धि र्वक्तव्येति वृद्धिः । मदइव सस्यन्दे स्रवन्मदसम्पृक्तत्व मदसादृश्या न्मदोपमा ॥ ३३ ॥

आघ्रायेति । अतितृष्यतापि अतिपिपासतापि क्षणमाघ्राय रोषादुत्तीरं परतीरे । विभक्त्यर्थेऽव्ययीभावः । निहिते विवृत्ते घूर्णिते लोचने यस्य तेन प्रतिगजदिदृक्षयेति भावः वारणेन हिमं शीतलमपि वनकरिणां मदाम्बुसेकैर्दानधाराभिः सम्पृक्तं वारि नाचेमे न पीतं । चम अदने इति धातोः कर्म्मणि लिट् ॥ ३४ ॥

प्रश्च्योतदिति । क्रीडन्तो विहरन्तो गजपतयः निम्नगायाः गङ्गा याः पयांसि प्रश्च्योतद्भिः क्षरद्भिर्मदैः सुरभीणि कृत्वा किञ्जल्कैः केसरैर्व्यवहित।स्तिरोहितास्ताम्रास्ताम्रवर्णा दानलेखा मदराजयो येषु तैरतएव सरसिजगन्धिभिः कपोलैरुपलक्षिताः सन्तः उत्तेरु र्निर्जग्मुः । अत्र मदसरसिजगन्धयोः समयोर्विनिमयात्त्वा समपरि

प्रश्च्योतन्मदसुरभीणि निम्नगायाः
क्रीडन्तोगजपतयः पयांसि कृत्वा।
किञ्जल्कव्यवहितताम्रदानलेखै
रुत्तेरुः सरसिजगन्धिभिः कपोलैः ॥ ३५ ॥
आकीर्णं बलरजसा घनारुणेन
प्रक्षोभैः सपदि तरङ्गितन्तटेषु।
मातङ्गोन्मथितसरोजरेणुपिङ्ग
म्माञ्जिष्ठं वसनमिवाम्बु निर्बभासे ॥ ३६ ॥

वृत्तिरलङ्कारः। तेन गजानां निम्नगायाश्च परिमलव्यत्ययान्तर संरम्भोव्यज्यते ॥ ३५ ॥

आकीर्णमिति। घनारुणेन सान्द्रलोहितेन। विशेषणसमासः। बलरजसा सेनापरागेणाकीर्णं सपदि प्रक्षोभैरालोडनैस्तटेषु तीरेषु तरङ्गितं सञ्जाततरङ्गं। तारकादित्वादितच्। यद्वा तरङ्ग वत्कृतं मलन्तात्तत्करोतीति णिचि कर्म्मणि क्तः णाविष्टवद्भावा न्मतुपोलुक्। तथा मातङ्गैरुन्मथितानां लुलितानां सरोजानां रेणुभिः पिशङ्गमम्बु माञ्जिष्ठेन महारञ्जनेनारक्तं माञ्जिष्ठं वसन मिव निर्बभासे। तेन रक्तमित्यण्। माञ्जिष्ठमित्यत्र कौशेय मिति वा पाठः। तत्र कोशशब्दात् ढञ्। कौशेयं कृमिकोशोत्थ मित्यमरः ॥ ३६ ॥

श्रीमद्भिरिति। श्रीमद्भिः शोभावद्भिः नियमिताः कन्धराः अपरान्ताश्चरमपादाग्राणि च येषान्तैः। अपरः पश्चिमः पाद

श्रीमद्भिर्नियमितकन्धरापरान्तैः
संसक्तैरगुरुवनेषु साङ्गहारम्।
सम्प्रापे निस्रुतमदाम्बुभिर्गजेन्द्रैः
प्रस्यन्दिप्रचलितगण्डशैलशोभा ॥ ३७ ॥
निःशेषप्रशमितरेणु वारणानां
स्रोतोभिर्मदजलमुज्झतामजस्रम्।
आमोदं व्यवहितभूरिपुष्पगन्धो
भिन्नैलासुरभिमुवाह गन्धवाहः ॥ ३८ ॥

इति वैजयन्ती। अगुरुवनेषु साङ्गहारं साङ्गविक्षेपं यथा तथा संसक्तैः निःस्रुतानि प्रस्रुतानि मदाम्बूनि येषां तैः गजेन्द्रैः प्रस्यन्दिनोजलस्राविणः प्रचलिताये गण्डशैलाश्च्युतोपलास्तेषां शोभा सम्प्रापे प्राप्ता। कर्म्मणि लिट्। गण्डशैलास्तु च्युताः स्थूलोपला गिरेरित्यमरः। अत्रान्यस्यान्यशोभाप्राप्त्यसम्भवात्तत्सदृशी शोभेति प्रतिबिम्बनाक्षेपान्निदर्शनालङ्कारः ॥ ३७ ॥

निःशेषमिति। गन्धं वहतीति गन्धवाहोवायुः। कर्म्मण्यण्। निःशेषं यथा तथा प्रशमितोरेणुर्य्येन तत् मदजलं स्रोतोभिर्मदनाडीभिः अजस्रमुज्झतां वर्षतां वारणानां सम्बन्धिनं व्यवहितस्तिरस्कृतोभूरिर्विपुलः पुष्पगन्धोयेन सः भिन्नाः फुल्लाएला लताविशेषाः। पृथ्वीका चन्द्रबालैलेत्यमरः। तत्पुष्पाणि चैलाः। पुष्पे जातीप्रभृतयः स्वलिङ्गाव्रीहयः फले इत्यमरः। भिन्नैलावत्सुरभिं सुगन्धिं घ्राणेन्द्रियतर्पणमित्युपमा। आमोदम्परिमलमुवाह वहतिस्म ॥ ३८ ॥

साहृश्यन्दधति गभीरमेघघोषै
रुन्निद्रक्षुभितमृगाधिपश्रुतानि ।
आतिनुश्चकितचकोरनीलकण्ठा
न्कच्छान्तानमरमहेभबृंहितानि ॥ २९ ॥

साहृश्यमिति । गभीरैर्मेघघोषैः मान्द्रगर्ज्जितैः साहृश्यन्दध तीत्युपमा । दधातेः शतृप्रत्ययः वा नपुंसकस्येति नुमभावः । उन्निद्राः बृंहितश्रवणादेव प्रबुद्धाः क्षुभिताः संरब्धाश्च ये मृगा धिपास्तैः श्रुतानि आकर्णितानि नतु प्रबुद्धानीति भावः। अमरमहेभ बृंहितानि महान्तश्चामी इभागजाश्चेति महेभाः अमराणां महेभाः तेषां बृंहितानि गर्ज्जितानि कच्छान्तान् अनूपप्रदेशान् । जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधे इत्यमरः । चकिता गर्ज्जितशङ्कया संभ्रान्ताश्चकोराः पक्षिविशेषानीलकण्ठामयूराश्च येषु तांस्तथाभूतान् आतेनुः । भ्रान्तिमदलङ्कारः ॥ २९ ॥

शाखेति । परिच्छाद्यतेऽनेनेति परिच्छदः परिकरोवसना भरणादिः । पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः छादेर्घे द्व्युप सर्गस्येति ह्रस्वत्वं । शाखास्ववसक्ताः कमनीयाः परिच्छदायेषान्तेषा मध्वनि श्रमः तेनातुरैः पीडितैर्वधूजनैः सेवितानान्निवेशनविभागै रावसतिकावच्छेदैः परिष्कृतानां, अलङ्कृतानां । सम्पर्य्युपेभ्य इत्यादिना सुट् । वनपादपानामरण्यवृक्षाणाम्पुरे यदुपवनं कृत्रिमवनन्तत्र जाता पुरोपवनजा लक्ष्मीः शोभा जज्ञे जाता । अत्रान्योन्यलक्ष्मीसम्बन्धासम्भवात् तस्येवेति साहृश्याक्षेपादसम्भवे

शाखावसक्तकमनीयपरिच्छदाना
मध्वश्रमातुरवधूजनसेवितानाम् ।
जज्ञे निवेशनविभागपरिष्कृतानां
लक्ष्मीः पुरोपवनजा वनपादपानाम् ॥ ४० ॥
इति श्रीमहोपाध्यायभारविकृतौ किराता
ऽर्ज्जुनीये महाकाव्ये सप्तमस्सर्गः ॥ ७ ॥

तद्वस्तुसम्बन्धेयन्निदर्शना । वसन्ततिलकावृत्तं । उक्ता वसन्त तिलका तभजाजगौ गइति लक्षणात् ॥ ४० ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां सप्तमस्सर्गः ॥ ७ ॥

अथ स्वमायाकृतमन्दिरोज्ज्वलं
ज्वलन्मणि व्योमसदां सनातनम् ।
सुराङ्गनागोपतिचापगोपुर
म्पुरं वनानां विजिहीषया जहुः ॥ १ ॥
यथायथन्ताम्सहितानभस्वरैः
प्रभाभिरुद्भासितशैलवीरुधः ।
वनं विशन्त्योवनजायतेक्षणाः
क्षणद्युतीनान्दधुरेकरूपताम् ॥ २ ॥

अथेति । अथ निवेशनानन्तरं सुराङ्गनाश्रप्सरसः स्वमायया स्वेच्छाविशेषेण कृतैर्निर्मितैर्मन्दिरैरुज्ज्वलं दीप्तं ज्वलन्तोमणयो यस्मिन् तद्व्योमसदाङ्गन्धर्व्वाणां सनातनं सदातनं । सायञ्चिरमित्यादिना भवार्थे ट्युप्रत्ययः । गोर्वज्रं तत्पतिरिन्द्रस्तच्चापवर्णानि गोपुराणि यस्य तत्तथोक्तमित्युपमा । पुरन्नगरं वनानां विजिहीर्षया वनानि विहर्तुमिच्छया । कर्म्मणि षष्ठी । जहुस्तत्यजुः । जहातेर्लिट् । अत्र ज्वलं ज्वलदिति पुरम्पुरमिति चासकृद्व्यञ्जनद्वयावृत्त्या छेकानुप्रासः । अन्यत्र तद्वैपरीत्या वृत्त्यनुप्रासइति तयोरुपमायाश्च संसृष्टिः । अस्मिन्सर्गे वंशस्थं वृत्तम् । जतौ तु वंशस्थमुदीरितं जराविति लक्षणात् ॥ १ ॥

यथायथमिति । यथायथं यथास्वं स्वकीयमनतिक्रम्येत्यर्थः । यथास्वे तु यथायथमित्यमरः । नपुंसकत्वाद्व्रस्वत्वम् । नभश्चरैर्गन्धर्व्वैर्मैथैश्च सहिताः प्रभाभिः स्वदीप्तिभिरुद्भासिताः शैल

निवृत्तवृत्तोरुपयोधरक्लमः
प्रवृत्तनिर्ह्रादिविभूषणारवः ।
नितम्बिनीनामभृशमादधे धृतिं
नभःप्रयाणादवनौ परिक्रमः ॥ ३ ॥

वीरुधोयाभिस्ताः पूर्व्वोक्तावनजायतेक्षणाः पद्मलोचनाः स्त्रियः वनं विगन्यः क्षणं द्युतिर्यासान्तासां क्षणद्युतीनां विद्युतामेकरूपतां समानरूपतान्दधुः । मुहूर्त्तमात्रकाले तासां स्फुरणस्य क्षणिकत्वादिति भावः । श्लेषानुप्राणितेयमुपमा श्लेषत्वमिति केचित् । उभयथाप्यनुप्रासेन संसर्गः ॥ २ ॥

निवृत्तेति । निवृत्तोगतः वृत्तस्य वर्त्तुलस्य ऊरुपयोधरस्य क्लमोयस्मिन्सः पादप्रक्षेपेषु विश्रान्तिसम्भवादिति भावः । किञ्च प्रवृत्तोजातोनिर्ह्रादिविभूषणानान्नूपुरादीनामारवोयस्मिन्सः । अवनौ पृथिव्यां परिक्रमः सञ्चारोनितम्बिनीनां नभःप्रयाणात् भृशमधिकं ।पञ्चमी विभक्ते इति पञ्चमी । धृतिं सन्तोषमादधे । अत्र विशिष्टपरिक्रमस्य धृत्या दानहेतुत्वात्काव्यलिङ्गमलङ्कारः ॥ ३ ॥

घनानीति । घनानि सान्द्राणि नतु विरलानि करप्रचेयानि हस्तग्राह्याणि अनुच्चानि । कर्त्तृकरणे कृता बहुलमिति तृतीयासमासः कामं कुसुमानि बिभ्रतः नवकुसुमितान् शाखिनस्तरून् अपहाय सुरसुन्दरीजनैः पुरोऽग्रे अभिसर्से अभिगतं । भावे लिट् । तथाहि कामिनोगुणेष्वतिशयेषु विषये उत्तरमुत्तरम् । वीप्सायैऽव्ययीभावः । यथोत्तरमिच्छा येषान्ते यथोत्तरेच्छाः उत्त

घनानि कामं कुसुमानि बिभ्रतः
करप्रचेयान्यपहाय शाखिनः ।
पुरोभिसस्रे सुरसुन्दरीजनै
र्यथोत्तरेच्छाहि गुणेषु कामिनः ॥ ४ ॥
तनूरलक्तारुणपाणिपल्लवाः
स्फुरन्नखांशूत्करमञ्जरीभृतः ।
विलासिनीबाहुलता वनालयो
विलेपनामोदहृताः सिषेविरे ॥ ५ ॥

रोत्तराभिलाषुका हि । अत्र परिकरोत्थापितोऽर्थान्तरन्यासो ऽलङ्कारः ॥ ४ ॥

तनूरिति । विलेपनामोदैर्हृता आकृष्टा वनालयो वनभृङ्गास्तनूः कृशाः अलक्तैररुणाः पाणय एव पल्लवा यासान्ताः स्फुरन्तो नखांशूनामुत्कराः पुञ्जा एव मञ्जर्य्यस्ता बिभ्रतीति तथोक्ताः । क्विप् । विलासिनीनां बाहव एव लतास्ताः सिषेविरे । अत्र समस्तवस्तुविषय रूपकालङ्कारः बाहवयवानां लतावयवानाम्पल्लवादीनामपि निरूपणादिति ॥ ५ ॥

निपीयमानेति । शिलीमुखैरलिभिः । अलिबाणौ शिलीमुखावित्यमरः । निपीयमानः स्तवको गुच्छो यस्याः सा चलाबालपल्लवा यस्याः सा अत एवामन्दं दृढं दष्टः ओष्ठो यस्मिंस्तत्करावधूननङ्कर कम्पनन्तत् विडम्बयन्ती स्तवकपानेनौष्ठदंशनम्पल्लवचलनेन करावधूननञ्चानुकुर्व्वतीत्यर्थः । धूञोण्यन्तात् ल्युट् णिचि धूञ्प्रीञोर्नुम्

निपीयमानस्तवका शिलीमुखै-
रशोकयष्टिश्चलबालपल्लवा ।
विडम्बयन्ती ददृशे वधूजनै-
रमन्ददष्टोष्ठकरावधूननम् ॥ ६ ॥
करौ धुनाना नवपल्लवाकृती
वृथा कृथा मानिनि मा परिश्रमम् ।
उपेयुषी कल्पलताभिशङ्कया
कथं न्वितस्त्रस्यति षट्पदावलिः ॥ ७ ॥

वकाः । अशोकयष्टिरशोकशाखेत्यर्थः । वधूजनैर्ददृशे दृष्टा । अत्र विडम्बयन्तीति प्रस्तुताशोकशाखाविभूषणभूतोपमामहिम्ना अप्रस्तुतनायिकाप्रतीतेः समासोक्तिः उत्तिष्ठमानयैवोपमया अङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ ६ ॥

अथ कश्चिन्मधुकराक्रान्ताङ्गाञ्चिदाह । कराविति । मानपरिहारेण मधुपाश्रयणे तु न कश्चिद्बाधइत्याशयेन सम्बोधयति हे मानिनीति । नवपल्लवस्य आकृतिरिवाकृतिर्ययोरित्युपमा तौ करौ धुनाना । धूञः कर्त्तरि लटः शानच् । वृथा व्यर्थम्परिश्रमं मा कृथाः मा कुरुष्व । करोतेराशीरर्थे माङि लुङ् । वृथात्वे हेतुमाह । कल्पलताभिशङ्कया कल्पवल्लीभ्रमेणेति भ्रान्तिमदलङ्कारः । उपेयुषी उपगता षट्पदावलिः कथं नु इतस्त्रस्यति बिभेति न त्रस्यत्येवेत्यर्थः । वा भ्राशेत्यादिना विकल्पेन श्यन्प्रत्ययः । अत्र कान्तापरिश्रमवैयर्थ्यरूपकार्य्यस्य षट्पदावलेः कल्पवल्ली

जहीहि कोपं दयितोऽनुगम्यतां
पुरानुशेते तव चञ्चलं मनः ।
इति प्रियङ्काञ्चिदुपैतुमिच्छतीं
पुरोऽनुनिन्ये निपुणः सखीजनः ॥ ८ ॥

समुन्नतैः काशदुकूलशालिभिः
परिक्वणत्सारसपङ्क्तिमेखलैः ।
प्रतीरदेशैः स्वकलत्रचारुभि
र्विभूषिताः कुञ्जसमुद्रयोषितः ॥ ९ ॥

भ्रमनिबन्धनवित्रासरूपकारणसमर्थनात् कारणेन कार्य्यसमर्थन रूपोऽर्थान्तरन्यासो भ्रान्तिमताङ्गाङ्गिभावेन सङ्कीर्णः सन्नुपमया संसृज्यते ॥ ७ ॥

अथ काचित्सखी काञ्चित्प्रणयकुपितामाह । जहीहीति । प्रियमुपैतुं स्वयमेवानुसर्त्तुमिच्छतीम् । आच्छीनद्योर्नुमिति विकल्पान्नुमभावः । काञ्चिन्नायिकां निपुणश्चित्तज्ञः सखीजनः कोप जहीहि त्यज । आ च हाविति विकल्पादीकारादेशः । दयितोऽनु गम्यतामनुस्रियताम् । उभयथापि प्रार्थनायां लोट् । अन्यथा चञ्चलमस्थिरन्तव मनः पुरानुशेते अग्रेऽनुशयिष्यते अनुतप्स्यतइत्यर्थः यावत्पुरानिपातयोर्लट् इति लट् । इत्यनेन प्रकारेण पुरः पूर्व्व मेवानुनिन्ये प्रसादयामास ॥ ८ ॥

अथ चतुर्भिः श्लोकैः कलापकमाह । समुन्नतैरिति । समु न्नतैः काशान्यश्ववालकुसुमानि तानि दुकूलानीव तैः शालन्त इति तथोक्तैः सारसपङ्क्तयोमेखलाइव ताः परिक्वणन्त्योयेषु ते तैः

विदूरपातेन भिदामुपेयुष
श्च्युताः प्रवाहादभितः प्रसारिणः ।
प्रियाङ्कशीताः शुचिमौक्तिकत्विषो
वनप्रहासाइव वारिबिन्दवः ॥ १० ॥
सखीजनप्रेमगुरूकृतादर
न्निरीक्षमाणाइव नम्रमूर्त्तयः ।
स्थिरद्विरेफाञ्जनशारितोदरै
र्विसारिभिः पुष्पविलोचनैर्लताः ॥ ११ ॥

रेषां कलत्राणि श्रोण्यस्तद्दत्यारवत्तैः । कलत्रं श्रोणिभार्य्ययोरित्य मरः । प्रतीरदेशैः विभूषिताः तटप्रदेशैः भूषिताः कुञ्जसमुद्रयो षितोवननद्यइत्यर्थः । अत्र तीरादीनाङ्कलत्रादौपम्योपमेयत्वात् योषिच्छब्दसामर्थ्याच नदीनां योषिदौपम्यङ्गम्यते ॥ ९ ॥

विदूरेति । विदूरपातेन भिदाम्भेदम् । षिद्भिदादिभ्योऽङ् । उपेयुष उपगतात् प्रवाहात् च्युताः अतएवाभितः प्रसारिणः प्रस र्प्पन्तइति प्रियायाः अङ्कउत्सङ्गइव शीताः शीतलाः शुचीनां मौक्ति कानां त्विषइव त्विषोयेषान्ते किञ्च वनस्य प्रहासाइव स्थिता इत्युत्प्रेक्षा वारिबिन्दवस्य । अत्रोपमयोरुभयोरुत्प्रेक्षायाश्च संसृष्टिः ॥ १० ॥

सखीति । द्वौ रेफौ वर्णविशेषौ येषान्ते द्विरेफाः भ्रमरशब्देन तदर्थोलक्ष्यते । भ्रुवरं माधमिति विदधातीति भाष्यकारः । स्थिरानिश्चलाद्विरेफाएवाञ्जनानि तैः शारितानि शबलीकृतानि

उपेयुषीणां बृहतीरधित्यका
मनांसि जह्रुः सुरराजयोषिताम् ।
कपोलकाषैः करिणां मदारुणै-
रुपाहितश्यामरुचश्च चन्दनाः ॥ १२ ॥

॥ कलापकम् ॥

उदराणि येषान्तैः । सारः शवलपीतयोरिति विश्वः । विसारिभि र्विस्तृतैः पुष्पाण्येव विलोचनानि तैः प्रेम्णा गुरुकृतआदरो यस्मिन् कर्म्मणि तत्तथा सखीजनन्निरीचमाणाः पश्यन्त्यइव स्थिताः । कुतः नम्रमूर्त्तयोऽवनताङ्ग्यो लताश्च । अत्र रूपकोत्प्रेचयोः सङ्करः ॥ ११ ॥

उपेयुषीणामिति । मदेनारुणैरव्यक्तरागैः । अव्यक्तरागस्त्वरुणइत्यमरः । करिणां कपोलानां काषैः कषणैः उपाहितश्यामरुचोजनितकृष्णवर्णा इति तद्गुणालङ्कारः । चन्दनामलयजाः । गन्धसारोमलयजोभद्रश्रीश्चन्दनोऽस्त्रियामित्यमरः । बृहती रधित्यकाऊर्द्धभूमीरुपेयुषीणां सुरराजयोषितां मनांसि जह्रुः । अत्र चतुःश्लोक्या नद्यादीनां विशिष्टानामेवाप्सरोमनोहरणहेतुत्वोक्त्या काव्यलिङ्गमुन्नेयम् ॥ १२ ॥

स्वगोचरइति । चित्तहारिणा मनोहरेण शाखिनाम्प्रसवेन पुष्पजातेन विलोभ्यमानाआकृष्यमाणायोषितः स्वगोचरे स्वविषये स्वकरप्रचये सत्यपीत्यर्थः । प्रसवइति शेषः । उपकर्त्तुम्परिचरितुं इच्छतान्नभश्चराणां गन्धर्व्वाणां प्रणयेन सहायहेतुना प्रियाणि

स्वगोचरे सत्यपि चित्तहारिणा
विलोभ्यमानाः प्रसवेन शाखिनाम्।
नभश्चराणामुपकर्त्तुमिच्छता
प्रियाणि चक्रुः प्रणयेन योषितः ॥ १३ ॥
प्रयच्छतोच्चैः कुसुमानि मानिनी
विपक्षगोत्रन्दयितेन लम्भिता।
न किञ्चिदूचे चरणेन केवलं
लिलेख वाष्पाकुललोचना भुवम् ॥ १४ ॥

चक्रुः। स्वकरग्राह्यमपि प्रसवं स्वकान्तप्रियार्थन्तद्दीयमानमेव ग्रहीषुरित्यर्थः ॥ १३ ॥

प्रयच्छतेति। कुसुमानि प्रयच्छता ददता दयितेन उच्चैरुच्चैस्तरां विपक्षगोत्रं सपत्नीनामधेयं लम्भिता प्रापिता तन्नाम्ना आहूतेत्यर्थः। नाम गोत्रं कुलं गोत्रमिति शाश्वतः। मानिनी अतएव न किञ्चिदूचे। कर्त्तरि लिट्। किन्तु केवलं वाष्पाकुललोचना सती चरणेन भुवं लिलेख। गोत्रस्खलनजनितेर्ष्यानिमित्तनिर्वेदादिति भावः। मानिनी अतएव न किञ्चिदूचइत्युक्तम्। तदुक्तं दशरूपके। तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमानना। तत्र चिन्ताश्रुनिश्वासवैवर्ण्योच्छ्वासदीनतादृति ॥ १४ ॥

प्रियइति। वाचं यच्छति ददति समालपतीत्यर्थः। दाणः शत्रप्रत्ययः पाघ्रेत्यादिना यच्छादेशः। प्रिये निबद्धदृष्टिः अतएवोन्मुखी शिथिलः स्रंसः आकुलस्खलितश्च तादृशउच्चयोनीविबन्धो

प्रियेऽपरा यच्छति वाचमुन्मुखी
निबद्धदृष्टिः शिथिलाकुलोच्चया ।
समादधे नांशुकमाहितं वृथा
विवेद पुष्पेषु न पाणिपल्लवम् ॥ १५ ॥
सलीलमासक्तलतान्तभूषणं
समासजन्त्या कुसुमावतंसकम् ।
स्तनोपपीडन्नुनुदे नितम्बिना
घनेन कश्चिज्जघनेन कान्तया ॥ १६ ॥

यस्याः सा । नारीकट्यंशुकग्रन्थौ नीविः स्यादुच्चयोऽप्यथेति मार्तण्डः । अपरा अन्या स्त्री अंशुकं न समादधे न बबन्ध रागपारवश्यादिति भावः । पुष्पेषु वृथा व्यर्थं आहितमारोपितं अग्राने प्रसारितमित्यर्थः । पाणिपल्लवञ्च न विवेद प्रियासक्तचित्तत्वादिति भावः । एषा च प्रगल्भा नायिका पाणिपल्लवमित्यत्र अन्यतरसाधकबाधकप्रमाणाभावादुपमारूपकयोः सन्देहसङ्करः ॥ १५ ॥

सलीलमिति । आसक्ता लतान्ताः पल्लवाभूषणं यस्य तत्पल्लवैः सह ग्रथितमित्यर्थः कुसुमावतंसकम्पुष्पशेखरङ्कान्तदत्तमिति भावः । सलीलं समासजन्त्या शिरसि प्रतिदधत्या । दंशसञ्जस्वञ्जां शपीति नलोपः । कान्तया कश्चित् स्तनाभ्यां उपपीड्येति स्तनोपपीडं । सप्तम्याञ्चेत्यादिना णमुल्प्रत्ययः । नितम्बिना । प्रशंसायामिनिः। घनेन निविडेन जघनेन । पश्चान्नितम्बः स्त्रीकट्याः

कलत्रभारेण विलोलनीविना
गलद्दुकूलस्तनशालिनोरसा।
बलिव्यपायस्फुटरोमराजिना
निरायतत्वादुदरेण ताम्यता ॥ १७ ॥
विलम्बमानाकुलकेशपाशया
कयाचिदाविष्कृतबाहुमूलया।
तरुप्रसूनान्यपदिश्य सादरं
मनोऽधिनाथस्य मनः समाददे ॥ १८ ॥

॥ युग्मम् ॥

क्लीबे तु जघनं पुर इत्यमरः। ननुदे नुन्नः अप्रकातिरेकादिति भावः। एषा च प्रगल्भैव ॥ १६ ॥ •

अथ युग्मेनाह। कलत्रेति। विलोलनीविना गात्रोन्नमनादिश्लिष्टवस्त्रग्रन्थिना कलत्रभारेण श्रोणिभारेण। कलत्रं श्रोणिभार्य्ययोरित्यमरः। तथा गलत् स्रंसमानन्दुकूलं याभ्यान्ताभ्यां स्तनाभ्यां शालतइति तथोक्तेनोरसा तथा बलिव्यपायेन भङ्गिनिवृत्त्या स्फुटा रोमराजिर्यस्मिन् तेन निरायतत्वादप्रसारितत्वात् ताम्यता तनूभवता उदरेण चोपलक्षितया। स्वभावोक्तिरलङ्कारः ॥ १७ ॥

विलम्बमानेति। विलम्बमानो विस्रंसमान आकुलो विलुलितश्च केशपाशो यस्यास्तया आविष्कृतबाहुमूलया दर्शितकक्षप्रदेशया कयाचित्कान्तया तरुप्रसूनान्यपदिश्य प्रसूनग्रहणं व्याजीकृत्येत्यर्थः व्याजोपदेशौ लक्ष्यञ्चेत्यमरः। सादरं साभिलाषं मनोऽ

व्यपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः
प्रियं जघानोन्नतपीवरस्तनी ॥ १९ ॥

धिनाथस्य प्रियस्य मनः समादधे आचकृषे । कर्म्मणि लिट् । सर्वाङ्ग सौष्ठवदर्शनात् सद्योलग्नप्रियमनस्केति भावः । अत्र प्रियमनोहरणहेतुभिः कान्ताविशेषणपदार्थैः काव्यलिङ्गमुत्तिष्ठमानं स्वभावोक्त्या अङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ १८ ॥

व्यपोहितुमिति । उन्नतौ च पीवरौ च स्तनौ यस्याः सा उन्नतपीवरस्तनी । स्वाङ्गाच्चेत्यादिना ङीष् । काचिल्लोचनतः स्वनेत्रात्पुष्पजं रजः परागं मुखानिलैः फूत्कारमारुतैः व्यपोहितुं अपनेतुं अपारयन्तं किल अशक्नुवन्तं किलेत्यलीके वस्तुतस्तदास्य स्पर्शलोभादपारयन्तमित्यर्थः । प्रियमुन्मना उत्सुका सती अतएव पयोधरेणोरसि जघान । तत्कपटपरिज्ञानजन्यादौत्सुक्यादिति भावः । हननस्थानत्वादुरसीति सप्तमी । इयञ्च प्रगल्भैव ॥ १९ ॥

इमानीति । यथाभिरामं वीप्सायां अव्ययीभावः । कुसुमान्यग्रपल्लवानि च कुसुमाग्रपल्लवन्तस्मिन् । जातिरप्राणिनामित्येकवद्भावान्नपुंसकत्वं । इमान्यमूनीति इत्थं निर्द्देशपूर्व्वकमित्यर्थः । इदमदसी सन्निकृष्टविप्रकृष्टार्थे । शनैरपवर्जितेऽपचिते सति वनश्रीर्निःसारतयेवेति हेतूत्प्रेक्षा । भूरुहान् तरून् विहाय वनितासु पदं बन्धे । अत्र वनितागतायाः पुष्पप्रसाधनसम्भाव्यमानायास्तस्याः

द्रुमान्यमूनीत्यपवर्ज्जिते शनै-
र्य्यथाभिरामं कुसुमाग्रपल्लवे ।
विहाय निस्सारतयेव भूरुहान्
पदं वनश्रीर्वनितासु सन्दधे ॥ २० ॥

प्रवालभङ्गारुणपाणिपल्लवः
परागपाण्डूकृतपीवरस्तनः ।
महीरुहः पुष्पसुगन्धिराददे
वपुर्गुणोच्छ्रायमिवाङ्गनाजनः ॥ २१ ॥

विषयभूतायाः निगरणेन विषयेण वनश्रियोर्वनितागतलोभेष्व-
याऽसम्बन्धे सम्बन्धरूपा भेदेऽभेदरूपा वा अतिशयोक्तिरलङ्कारः ।
विषयस्यानुपादानाद्विषय्यप्युपबाध्यते । यत्र सातिशयोक्तिः स्यात्कवि
प्रौढोक्तिजीवितेति लक्षणात् ॥ २० ॥

प्रवालेति । प्रवालभङ्गेन पल्लवलवेनारुणः पाणिपल्लवोयस्य
तद्वसरञ्जनादित्यर्थः । परागेण पुष्परजसा पाण्डूकृतौ पीवरौ
स्तनौ यस्य सः पुष्पैः सुगन्धिः सुरभिः अङ्गनाजनोमहीरुहोवृक्ष
जातात् वपुर्गुणस्य स्वदेहगुणस्य उच्छ्रायः पाणिपल्लवारुण्यादे-
र्य्यउत्कर्षस्तं आददे लब्धवानिवेत्युत्प्रेक्षा । वस्तुतस्तु स्वाभाविकएव
प्रवालभङ्गादिभिरभिव्यज्यतइति भावः । उत्कृष्टः आयउच्छ्राय
इति घञन्तेन प्रादिसमासः । नतूपसृष्टात् घञ्प्रत्ययः श्रीणीभुवो
ऽनुपसर्गइति प्रतिषेधात् ॥ २१ ॥

पञ्चभिः कुलकमाह । वरोरुभिरिति । अनुसानु सानुषु
यद्दर्श्म ततः प्रकाशात् गुरुणा खेदेन मन्थरमलसं विनिर्य्यतीनां

वरोरुभिर्वारणहस्तपीवरै
श्चिराय खिन्नान्नवपल्लवश्रियः ।
समेऽपि यातुञ्चरणाननीश्वरा
न्मदादिव प्रस्खलतः पदे पदे ॥ २२ ॥
विसारिकाञ्चीमणिरश्मिलब्धया
मनोहरोच्छ्रायनितम्बशोभया ।
स्थितानि जित्वा नवसैकतद्युतिं
श्रमातिरिक्तैर्ज्जघनानि गौरवैः ॥ २३ ॥

निर्गच्छन्तीनां सुराङ्गनानां सम्बन्धिभिर्वारणहस्तपीवरैः करिकर स्थूलैः वराश्च ते ऊरवश्चेति तैः चिराय खिन्नान् । किञ्च नवपल्लवानां श्रीरिव श्रीर्येषान्तान् तद्वन्मृदूनित्यर्थः । अतएव समे सम स्थलेऽपि किम्पुनर्विषमइति भावः यातुङ्गन्तुमनीश्वरान् अशक्तान् अतएव मदादिव पदे पदे । वीप्सायां द्विर्भावः । प्रस्खलतश्चरणान् । मदादिवेत्युपमा ॥ २२ ॥

विसारीति । विसारिभिः काञ्चीमणिरश्मिभिः लब्धया तज्जनितयेत्यर्थः मनोहरउच्छ्रायः उत्सेधोयेषान्तेषान्नितम्बानां शोभया करणेन नवसैकतानां द्युतिं शोभाञ्जित्वा स्थितानि तत्तुल्यानीत्यर्थः । अतएवोपमालङ्कारः । श्रमेणातिरिक्तैरतिशयितैः गौरवैर्गुरुत्वैरुपलक्षितानि नितराम्भारायमाणानि जघनानि च । उच्छ्रायोव्याख्यातः ॥ २३ ॥

समुच्छ्वसदिति । समुच्छ्वसत्पङ्कजकोशकोमलैरुल्लसत्कमलमकुलैरिव मुग्धैरित्युपमा । नाभिभिः प्रतारिकाख्यैः । अथ नाभि

समुच्छ्वसत्पङ्कजकोशकोमलै-
रुपाहितश्रीण्युपनीवि नाभिभिः ।
दधन्ति मध्येषु वलीविभङ्गिषु
स्तनातिभारादुदराणि नम्रताम् ॥ २४ ॥

समानकान्तीनि तुषारभूषणैः
सरोरुहैरस्फुटपत्त्रपङ्क्तिभिः ।
चितानि घर्म्माम्बुकणैः समन्ततो
मुखान्यनुत्फुल्लविलोचनानि च ॥ २५ ॥

संज्ञं वराङ्गं यस्य संज्ञा प्रतारिकेति केशवः। पुंल्लिङ्गतायान्तु कविरेव प्रमाणम् । उपनीवि नीवीसमीपे । उपाहितश्रीणि जनितशोभानि तथा वलीविभङ्गिषु ऊर्म्मिमत्सु मध्येषु जघनस्थलेषु स्तनातिभारात् नम्रतान्दधन्ति बिभ्राणानि । वा नपुंसकस्येति नुमागमः । उदराणि च ॥ २४ ॥

समानेति । किञ्च घर्म्माम्बुकणैः स्वेदोदकविन्दुभिः समन्ततश्चितानि व्याप्तानि अनुत्फुल्लविलोचनानि अविकसदक्षीणि अत एव तुषारभूषणैः शीकरपरिष्कृतैः । तुषारौ हिमशीकरावित्यमरः । अस्फुटपत्त्रपङ्क्तिभिः अविकसद्दलावलिभिः । व्याकोशविकचस्फुटाद्दत्यमरः । सरोरुहैः समानकान्तीनीत्युपमा । मुखानि च ॥ २५ ॥

विनिर्य्यतीनामिति । सविस्मयं रूपयतः पूर्व्वोक्तचरणादीनि वर्णयतो नभश्चरान् गन्धर्व्वान् तत्पूर्व्वमिव तदेव प्रथमं यथा

विनिर्य्यतीनां गुरुखेदमन्थरं
सुराङ्गनानामनुसानु वर्त्मनः ।
सविस्मयं रूपयतो नभश्चरा-
न्विवेश तत्पूर्ब्बमिवेक्षणादरः ॥ २६ ॥

॥ कुलकम् ॥

अथ स्फुरन्मीनविधूतपङ्कजा
विपङ्कतीरस्खलितोर्म्मिसंहतिः ।
पयोऽवगाढुं कलहंसनादिनी
समाजुहावेव बधूः सुरापगा ॥ २७ ॥

इत्युत्प्रेक्षा। ईक्षणादरः आलोकनकौतुकं विवेश। पूर्ब्बार्द्धं व्याख्यातम्। अत्र कुलके स्वभावोक्तिरुत्प्रेक्षाङ्गम् ॥ २६ ॥

सम्प्रति सलिलक्रीडावर्णनमारभते । अथेति । अथ पुष्पावचयानन्तरं स्फुरद्भिश्चलद्भिर्मीनैर्विधूतपङ्कजेति सदृशलाभ्मुखवीक्षोक्तिः विपङ्कम्पङ्करहितं विहारयोग्यमिति यावत् । तत्र तीरे स्खलिता विचलिता ऊर्म्मिसंहतिर्य्यस्याः सेति हृत्तसंज्ञोक्तिः । कलहंसनादिनी कादम्बशब्दवतीति वाग्व्यापारोक्तिः । अतएव सुरापगा गङ्गा बधूरप्सरसः पयोऽवगाढुमवगाहितुं । गाहेरुदित्वादिड्विकल्पः । समाजुहावेव आकारयामासेवेत्युत्प्रेक्षा । हूतिराकारणाह्वानमित्यमरः । ह्वयतेर्लिट् । अभ्यस्तस्य चेति सम्प्रसारणम् ॥ २७ ॥

प्रशान्तेति । प्रशान्तघर्माभिभवः प्रशान्तोष्णबाधः । वा दान्तशान्तेत्यादिना निपातनात्साधुः । शनैर्विवान् मन्दं वहन् । वातैः

प्रशान्तघर्म्माभिभवः शनैर्विवा
न्विलासिनीभ्यः परिमृष्टपङ्कजः ।
ददौ भुजालम्बमिवात्तशीकर
स्तरङ्गमालान्तरगोचरोऽनिलः ॥ २८ ॥

गतैस्सहावैः कलहंसविक्रमं
कलत्रभारैः पुलिनन्नितम्बिभिः ।
मुखैस्सरोजानि च दीर्घलोचनैः
सुरस्त्रियस्साम्यगुणान्निरासिरे ॥ २९ ॥

शद्प्रत्ययः । परिमृष्टपङ्कजः पद्मगन्धीत्यर्थः । आत्तशीकरः कुतः तरङ्गमालानामन्तरे मध्ये गोचरः स्थानं यस्य सोऽनिलो विलासिनीभ्यो भुजावलम्बन्ददाविवेत्युत्प्रेक्षा । विशिष्टवायुसम्पर्कात्तयोः श्रमुरित्यर्थः ॥ २८ ॥

गतैरिति । सुरस्त्रियोऽप्सरसः सहावैः सविलासैः गतैः गतिभिः । नपुंसके भावे क्तः । कलहंसानां विक्रमङ्गतिं विलासविभ्रम मिति शेषः तथा नितम्बिभिः प्रशस्तनितम्बैः कलत्रभारैर्जघन भारैः पुलिनन्नितम्बभारशून्यमित्यर्थः तथा दीर्घलोचनैर्मुखैः सरोजानि च अलोचनानीति शेषः साम्यगुणात्समानगुणत्वा न्निरासिरे निरस्तवत्यः । गुणवदगुणयोः कुतः साम्यमिति भावः । अस्यतेः कर्त्तरि लिट् । उपसर्गादस्यत्यूह्योर्वेति विकल्पादात्मने पदम् ॥ २९ ॥

विभिन्नेति । विभिन्नाविच्युतसङ्घाताः पर्य्यन्तगाः प्रान्तगताः मीनानाम्पङ्क्तयोयासां ताः कुतः मरुलतः सखिभिरिन्द्रस्य सचिवैः

विभिन्नपर्य्यन्तगमीनपङ्क्तयः
पुरोविगाढाः सखिभिर्मरुत्वतः ।
कथञ्चिदापस्सुरसुन्दरीजनै
स्सभीतिभिस्तत्प्रथमम्प्रपेदिरे ॥ ३० ॥
विगाढमात्रे रमणीभिरम्भसि
प्रयत्नसंवाहितपीवरोरुभिः ।
विभिद्यमाना विससार सारसा
नुदस्य तीरेषु तरङ्गसंहतिः ॥ ३१ ॥

गन्धर्वैः पुरः पूर्व्वं विगाढाः प्रविष्टाः तासां विश्वासार्थं गर्त्तग्राहादि परीक्षार्थञ्चेति भावः । सभीतिभिः अप्रविष्टविषयत्वात्सभयैर्विषादिभिरिति पाठेप्ययमेवार्थोलक्ष्यः सुरसुन्दरीजनैः तदेवावगाहनम्प्रथमं यथा तथा अतएव कथञ्चिद्भयात् कृच्छ्रेण आपः प्रपेदिरे जगाहिरे ॥ ३० ॥

विगाढेति । प्रयत्नेन संवाहिताः सञ्चारिताः पीवराः स्थूला ऊरवो याभिस्ताभिः रमणीभिः अम्भसि विगाढमात्रे प्रविष्टे एव सति । सुप्सुपेति समासः । मात्रङ्कार्त्स्न्येऽवधारणइत्यमरः । विभिद्यमाना स्वयं विशीर्य्यमाणा । कर्म्मकर्त्तरि शानच् । तरङ्गसंहति स्तीरेषु सारसान् पक्षिविशेषान् । सारसोमैथुनी कामी गोनर्द्दः पुष्कराह्वयइति यादवः । यद्वा । सारसान् हंसान् । चक्राङ्गः सारसो हंसइति शब्दार्णवे । उदस्योत्सार्य्य विससार वितस्तार ॥ ३१ ॥

शिलेति । शिलावद्घनैः कठिनैः आकसदाङ्गनानां उरःस्थलैर्दृढनिवेशैर्मांसलैरतिस्थूलैरित्यर्थः वधूपयोधरैश्च

शिलाघनैर्नाकसदामुरस्थलै
र्बृहन्निवेशैश्च वधूपयोधरैः ।
तटाभिनीतेन विभिन्नवीचिना
रुषेव भेजे कलुषत्वमम्भसा ॥ ३२ ॥
विधूतकेशाः परिलोलितस्रजः
सुराङ्गनानां प्रविलुप्तचन्दनाः ।
अतिप्रसङ्गाद्विहितागसो मुहुः
प्रकम्पमीयुस्सभयादिवोर्म्मयः ॥ ३३ ॥

तटमभितः नीतेन प्रापितेन अतएव विभिन्नवीचिना भग्नोर्म्मिणा अम्भसा कर्त्रा रुषेवेति हेतूत्प्रेक्षा कलुषत्वमाविलत्वमन्तः क्षोभश्च ध्वन्यते भेजे । कर्म्मणि लिट् । यथा कश्चिन्मृदुस्वभावः केनचित्कठिनादिना साङ्गभङ्गन्ताडयित्वा निष्कासितः क्षुभ्यति तद्वदिति भावः । कलुषत्वमित्यत्र वाच्यप्रतीयमानयोरभेदाध्यवसायः। अन्यथा शुद्धवाच्यस्याविलत्वस्य रोषहेतुकत्वादुत्प्रेक्षानुविघातनादिति ॥ ३२ ॥

विधूतेति । विधूताविक्षिप्ताः केशा यैस्ते परिलोलिताविलोलिताः स्रजो यैस्ते प्रविलुप्तचन्दनाः प्रमृष्टाङ्गरागाः अतिप्रसङ्गादविच्छेदसङ्गात्सुराङ्गनानां विहितागसः कृतमण्डनखण्डनरूपापराधाः अतएवोर्म्मयस्तरङ्गाः सभयादिव स्त्रीभ्योभीतादिव मुहुः प्रकम्पमीयुः । स्वाभाविकस्य कम्पस्य भयहेतुकत्वमुत्प्रेक्ष्यते । यद्वा सुराङ्गनानां विधूतकेशादित्यादियोजना । सापेक्षत्वेऽपि गमकत्वात्समासः। स्त्रीसङ्ग्रहणसदृशमपराधः भयन्तु राजादिभ्यइति ॥ ३३ ॥

विपक्षचित्तोन्मथना नखव्रणा
स्तिरोहिता विभ्रममण्डनेन ये ।
हृतस्य शेषानिव कुङ्कुमस्य ता
न्विकत्थनीयान् दधुरन्यथा स्त्रियः ॥ ३४ ॥
सरोजपत्रे नु विलीनषट्पदे
विलोलदृष्टेः स्विदमू विलोचने ।
शिरोरुहाः स्विन्नतपक्ष्मसन्तते
र्द्विरेफवृन्दं नु निशब्दनिश्चलम् ॥ ३५ ॥

विपक्षेति । विपक्षस्य सपत्नीजनस्य चित्तानामुन्मथनाः व्यथका इत्यर्थः । बहुलग्रहणात्कर्त्तरि ल्युट् । ये नखव्रणाः नखक्षतानि । व्रणोऽस्त्रियामित्यमरः । विभ्रमस्य सौन्दर्य्यस्य मण्डनं । तादर्थ्ये ऽश्वघासादिवत् षष्ठीसमासः न तु चतुर्थीसमासः यूपदार्वा दिवत्प्रकृतिविकाराभावादिति । तेन कुङ्कुमलेपादिना तिरोहिताश्छन्नाः हृतस्य चालितस्य कुङ्कुमस्य व्यञ्जकत्वेन शेषानिवाव शिष्टलेशानिव स्थितानित्युत्प्रेक्षा विकत्थनीयान् भर्त्तृवाल्लभ्यस्य व्यञ्जकत्वेन श्लाघनीयान् तान्नखव्रणान् स्त्रियोऽन्यथा दधुः प्रकाशन्दधु रित्यर्थः ॥ ३४ ॥

अथ युग्मेनाह । सरोजेत्यादिना । अमू पुरोवर्त्तिनी विलीनषट्पदे संसक्तभृङ्गे सकनीनिकत्वमक्ष्णोरर्थसिद्धमित्युपमानं विशिष्यते । सरोजपत्रे नु । यद्वा विलोलदृष्टेश्चञ्चलाक्ष्याः विलोचने स्वित् । नुस्विच्छब्दौ वितर्के । किञ्च नतपक्ष्मसन्ततेः चञ्चलाक्ष्याः

अगूढहासस्फुटदन्तकेसरं
मुखं स्विदेतद्विकसन्नु पङ्कजम् ।
इति प्रलीनां नलिनीवने सखीं
विदाम्बभूवुः सुचिरेण योषितः ॥ ३६ ॥

॥ युग्मम् ॥

प्रियेण संग्रथ्य विपक्षसन्निधा
वुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥ ३७ ॥

शिरोरुहाः स्वित् निशब्दं नीरवञ्च तत् निश्चलञ्च तत् द्विरेफवृन्दं नु ॥ ३५ ॥

अगूढेति । किञ्च अगूढहासं व्यक्तस्मितत्वेन स्फुटाः दन्ताः केसरा इव दन्तकेसरा यस्य तत् मुखं स्वित् यद्वा विकसत्पङ्कजं नु इतीत्थं संशयेनेति शेषः नलिनीवने प्रलीनां निगूढां सखीं योषितः सुचिरेणातिविलम्बेन विदाम्बभूवुः विविदुः निश्चिक्युरित्यर्थः । उषविदजागृभ्योऽन्यतरस्यामिति विकल्पादाम्प्रत्ययः । अत्र युग्मे निश्चयान्तसन्देहालङ्कारः ॥ ३६ ॥

प्रियेणेति । काचित्प्रियेण संग्रथ्य स्वयमेव रचयित्वा विपक्षसन्निधौ सपत्नीजनसमक्षम्पीवरस्तने वक्षसि उपाहितां स्रजं मालां जलाविलां म्रदितामपीत्यर्थः न विजहौ न तत्याज । ननु निर्गुणायास्तत्र का प्रीतिरिति वाच्यमित्यर्थान्तरन्यासेनाह । गुणाः

असंशयं न्यस्तमुपान्तरक्ततां
यदेव रोद्धुं रमणीभिरञ्जनम्।
हृतेऽपि तस्मिन् सलिलेन शुक्लता
निरास रागो नयनेषु न श्रियम्॥ ३८॥

प्रेमणि वसन्ति वस्तुनि न वसन्ति हि। यत्प्रेमास्पदन्तदेव गुणवत् अन्यत्तु गुणवदपि निर्गुणमेव। प्रेम तु न वस्तुपरीक्षामपेक्षत इति भावः॥ ३७॥

असंशयमिति। स्त्रीणां नेत्रशोभार्थं अञ्जनधारणमम्बुविहारोपगमाद्रक्तवर्णत्वस्य कारणान्ततः शुक्लतिरोधानञ्च निश्चितमित्युत्प्रेक्षते। रमणीभिर्यदञ्जनं न्यस्तन्तदिति शेषः यत्तदोर्नित्यसम्बन्धात्। तदञ्जनमुपान्तयोरक्ततां रोद्धुं प्रतिबद्धुमेव न्यस्तं न तु शोभार्थमित्यर्थः। अन्यथा रागाभिव्याप्त्या शुक्लतिरोधानं स्यादित्यर्थः। असंशयमित्युत्प्रेक्षाव्यञ्जकं संशयस्याप्यभावः नात्र संशयोऽस्तीत्यर्थः। अर्थाभावेऽव्ययीभावः। कुतएतदिति चेत् यत स्तस्मिन अञ्जने सलिलेन हृते क्षालिते सत्यपि रागः पूर्व्वोक्त उपान्तरक्तः प्रतिबन्धाभावादभितोव्याप्येत्याशयः। नयनेषु शुक्लतां निरास निरस्तवान्। अस्यतेर्लिट्। श्रियं शोभान्तु न निरास अतः शुक्लविरोधिरागनिरोधार्थमेवेदमञ्जनं स्यान्नतु शोभार्थन्तस्यास्तदभावेऽपि सद्भावादित्यर्थः। अञ्जनापगमेऽपि तन्नयनानां रागएवालङ्कारोऽभूदिति भावः। अत्राञ्जनन्यासमनूद्य तस्य शोभार्थत्वनिषेधेन रागरोधार्थत्वोत्प्रेक्षणं उदितं उत्तरार्द्धे

द्युतिं वहन्तो वनितावतंसका
हृताः प्रलोभादिव वेगिभिर्ज्जलैः ।
उपप्लुतास्तत्क्षणशोचनीयतां
च्युताधिकाराः सचिवा इवाययुः ॥ ३९ ॥
विपत्रलेखा निरलक्तकाधरा
निरञ्जनाक्षीरपि बिभ्रतीः श्रियम् ।
निरीक्ष्य रामा बुबुधे नभश्चरै
रलङ्कृतं तद्वपुषैव मण्डनम् ॥ ४० ॥

तस्यैव समर्थनात् । एवमुपान्तरक्ततां रोद्धुं यदञ्जनं न्यस्तमित्येकान्वये विध्यनुवादविरोधः स्यात् ॥ ३८ ॥

द्युतिमिति । द्युतिं शोभां तेजश्च वहन्तः वेगिभिर्ज्जलैर्जडैरजैश्च डलयोरभेदात् । जलं गोकलल नीरे ह्रीवेरे च जडेऽन्यवदिति विश्वः । प्रलोभान्मोहात् । हृतागृहीता उपप्लुता मृदिताः । यद्वा कर्त्तरि क्त । स्रवमानादित्यर्थः । अन्यत्र धनग्रहणबन्धनादिना पीडितावनितावतंसकाः च्युताधिकाराः भ्रष्टाधिकाराः सचिवा इव तत्क्षणं शोचनीयतामाययुः प्रापुः ॥ ३९ ॥

विपत्रेति । विगताः पत्रलेखास्तिलकविशेषा यासान्ता विपत्रलेखाः निरलक्तकाः क्षालितरागा अधरा यासान्ताः निरञ्जनानि अक्षीणि यासान्ताः निरञ्जनाक्षीरपि । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् षिद्गौरादिभ्यश्चेति ङीष् । तथापि श्रियं बिभ्रतीः शोभाकारणाभावेऽपि शोभमाना इति विभावनालङ्कारः । रामा निरीक्ष्य नभश्चरै

तथा न पूर्व्वं कृतभूषणादरः
प्रियानुरागेण विलासिनीजनः ।
यथा जलार्द्रो नखमण्डनश्रिया
ददाह दृष्टीः प्रतिपक्षयोषिताम् ॥ ४१ ॥

गन्धर्वैः तासां वपुषैव मण्डनमलङ्कृतन्नतु मण्डनेन तद्वपुरित्य सरार्थः इति बुबुधे ज्ञातं । कर्म्मणि लिट् । स्वभावरमणीयानां किमलङ्करणैरिति भावः ॥ ४० ॥

तथेति । विलासिनीजनः पूर्व्वं जलविहारात्प्राक् प्रियानुरागेण कृतोभूषणेष्वादरः आसक्तिर्येन सः अनुरक्तप्रियत्वात् सम्यक् प्रसाधितः सन्नपीत्यर्थः । विपक्षयोषितां सपत्नीनां दृष्टीश्चक्षूंषि तथा न ददाह न दुःखीचकार यथा जलार्द्रः सन् नखशब्देन नखक्षतानि लक्ष्यन्ते तान्येव मण्डनन्तस्य श्रिया तत्कृतशोभयेत्यर्थः यथा ददाह तापयामास । मण्डनान्तरादपि नखमण्डनमनुरागादपि च तदनुभावएव सपत्नीनान्दुःखहेतुरिति भावः । जलार्द्रो ददाहेति विरुद्धकार्य्योत्पत्तिरूपोविषमालङ्कारः । विरुद्धकार्य्योत्पत्तिश्चेत्यादिलक्षणात् ॥ ४१ ॥

शुभेति । शुभाननाविलोलहारानितान्तगौर्य्योऽरुणाः । गौरोऽरुणे सिते पीतइति वैजयन्ती । भीरवः ताः स्त्रियः साम्बुरुहेषु चलाः फेनपङ्क्तयोयेषु तेषु हृतानि कुङ्कुमानि यैस्तेषु कुङ्कुमसङ्क्रमारुणेष्वित्यर्थः । ऊर्मिषु विषये अलमत्यर्थम्परभागगुणोत्कर्षं न लेभिरे । परभागोगुणोत्कर्षइति यादवः । तासा

शुभाननाः साम्बुरुहेषु भीरवो
विलोलहारास्स्खलफेनपङ्क्तिषु ।
नितान्तगौर्य्यो हृतकुङ्कुमेष्वलं
न लेभिरे ताः परभागमूर्म्मिषु ॥ ४२ ॥
ह्रदाम्भसि व्यस्तबधूकराहते
रवं मृदङ्गध्वनिधीरमुज्झति ।
मुहुस्तनैस्तालसमं समाददे
मनोरमं नृत्यमिव प्रवेपितम् ॥ ४३ ॥

मूर्म्मीणाञ्चारुणत्वादिगुणसाम्यात् न कश्चिद्विशेषो लक्ष्यत इत्यर्थः । अतएव सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । शुभाननत्वसाम्बुरुहत्वाद्युभयविशेषणानां क्रमेणोभयस्मिन् समन्वयाद्यथासङ्ख्यालङ्कारश्च । यथासङ्ख्यं क्रमेणैव क्रमिकाणां समन्वयादिति काव्यप्रकाशे लक्षणात् । अनयोरङ्गाङ्गिभावेन सङ्करः ॥ ४२ ॥

ह्रदेति । व्यस्ताभ्यां विपर्य्यासिताभ्यां बधूकराभ्यां आहते एकेन करेणोत्तायान्येन ताडित इत्यर्थः । ह्रदाम्भसि मृदङ्गध्वनिवत् धीरङ्गम्भीरं रवमुज्झति सति तथा ध्वनति सतीत्यर्थः । मुहुस्तनैस्तालो गीतवाद्यनृत्यानाङ्कालपरिच्छेदः । तालः कालक्रियामानमित्यमरः । तस्य सममनुरूपं मनोरमं नृत्यमिव प्रवेपितम्प्रकम्पितम् । भावे क्तः । समाददे स्वीकृतं । उपमालङ्कारः ॥ ४३ ॥

श्रिया हसद्भिः कमलानि सस्मितै
रलङ्कृताम्बुः प्रतिमागतैर्मुखैः ।
कृतानुकूल्या सुरराजयोषिता
म्प्रसादसाफल्यमवाप जाह्नवी ॥ ४४ ॥
परिस्फुरन्मीनविघट्टितोरवः
सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः
सखीजनस्यापि विलोकनीयताम् ॥ ४५ ॥

श्रियेति । श्रिया शोभया कमलानि हसद्भिः कमलसदृशै रित्यर्थः । हसतीर्ष्यत्यसूयतीति दण्डिना सदृशपर्यायपरा उक्ताः । सस्मितैः प्रतिमागतैः प्रतिबिम्बगतैरित्यर्थः । प्रतिमानम्प्रतिबिम्बं प्रति मेत्यमरः । मुखैरलङ्कृतान्यम्बूनि यस्याः सा । किञ्च सुरराजयोषितां कृतमानुकूल्यं विहाराद्युपकारो यया सा इत्थं योषिद्भि रुपकृता स्वयञ्च तासामुपचिकीर्षुः जाह्नवी गङ्गा प्रसादस्य स्व च्छत्वस्य साफल्यम् । अर्थगौरववत् षष्ठीसमासनिर्वाहः । अवाप अप्रसन्नाम्भसि विहारबिम्बग्रहणयोरसम्भवादित्यर्थः । स्वच्छा एव हि परैरुपक्रियन्ते स्वयञ्चोपकुर्वते तेषामिति भावः । कृतानु कारेति पाठेऽनुकारोऽनुकूलकरणमुपकार इत्येवं व्याख्येयं । अत्र जाह्नवी विशेषणपदार्थस्य साफल्यम्प्रति हेतुत्वात्काव्यलिङ्गमल ङ्कारः ॥ ४४ ॥

परीति । परितः स्फुरद्भिर्वित्तर्त्तमानैर्मीनैर्विघट्टिता ऊरवो यासान्ता अतएव त्रासविलोलदृष्टयः भयविकम्पनेत्राः कम्पित

भयादिवाश्लिष्य झषाहतेऽम्भसि
प्रियं मुदानन्दयति स्म मानिनी।
अकृत्रिमप्रेमरसाहितैर्मनो
हरन्ति रामाः कृतकैरपीहितैः ॥ ४६ ॥
तिरोहितान्तानि नितान्तमाकुलै
रपां विगाहादलकैः प्रसारिभिः।
ययुर्वधूनां वदनानि तुल्यतां
द्विरेफवृन्दान्तरितैः सरोरुहैः ॥ ४७ ॥

पाणिपल्लवास्ता सुराङ्गनाः सखीजनस्यापि विलोकनीयतामुपाययुः। किमुत प्रियजनस्येति भावः। स्वभावोक्तिरलङ्कारः॥ ४५ ॥

भयादिति। मानिनी दुर्लभस्वयंग्रहणेति भावः अम्भसि जले झषेण मत्स्येन आहते सति। पृथुरोमा झषो मत्स्य इत्यमरः। भयादिव वस्तुतस्तु न तथेति भावः किन्तु मुदा औत्सुक्येनैवा श्लिष्य प्रियमानन्दयति स्म। तथाहि रामाः स्त्रियः अकृत्रिमो ऽनारोपितोयः प्रेमैव रसस्तेनाहितैर्जनितैः कृतकैः कृत्रिमैरपी त्यर्थः ईहितैश्चेष्टितैर्मनोहरन्ति। आरोपितमपि भयं प्रेममूल त्वान्मनोहरं बभूवेत्यर्थः। अत्राल्पानुभवेन भयेन सहजरागनि गूहनान्मीलनालङ्कारः। मीलनं वस्तुना यत्र वस्त्वन्तरनिगूह नमिति लक्षणान्तरसम्भवादर्थान्तरन्यासेन संसृज्यते ॥ ४६ ॥

तिरोहितेति। अपां विगाहान्नितान्तमाकुलैः विकीर्णैः प्रसा रिभिरायतैरलकैः केशैस्तिरोहितान्तानि छन्नप्रान्तानि वधूनां

करौ धुनाना नवपल्लवाकृती
पयस्यगाधे किल जातसंभ्रमा ।
सखीषु निर्वाच्यमधार्ष्ट्यदूषितं
प्रियाङ्गसंश्लेषमवाप मानिनी ॥ ४८ ॥

प्रियैः सलीलं करवारिवारितः
प्रवृद्धनिःश्वासविकम्पितस्तनः ।
सविभ्रमाधूतकराग्रपल्लवो
यथार्थतामाप विलासिनीजनः ॥ ४९ ॥

वदनानि द्विरेफवृन्दैरन्तरितानि छन्नानि सरोरुहाणि तैः सरो रुहैः तुल्यतां ययुरित्युपमालङ्कारः ॥ ४७ ॥

कराविति । मानिनी पयस्यगाधे सति किलेत्यलीके मज्जन भयादित्यर्थः । जातसंभ्रमा उत्पन्नभया अतएव नवपल्लवा कृती करौ धुनाना कम्पयन्ती । धुनोतेः क्र्यादिकात्कर्त्तरि लटः शानच् । सखीषु विषये निर्वाच्यमवाच्यमनिन्द्यमित्यर्थः । धार्ष्ट्य दूषितस्य न भवतीत्यधार्ष्ट्यदूषितस्तं वस्तुतोरागमूलमपि भय मूलत्वारोपादिति भावः प्रियाङ्गसंश्लेषमवाप । अत्रापि तुल्या ङ्गेन भयेनागन्तुकेन सहजानुरागनिगूहनान्मीलनालङ्कारः । तदुक्त ङ्काव्यप्रकाशे । समानलक्षणं वस्तु वस्तुना यन्निगूह्यते । निजेना गन्तुना वापि तन्मीलनमुदाहृतम् ॥ ४८ ॥

प्रियैरिति । प्रियैः कामिभिः सलीलं करवारिभिरञ्जलिजलै र्वारितोऽवरुद्धः सिक्तइत्यर्थः । प्रवृद्धैः सन्ततैर्निश्वासैर्विकम्पितौ

उदस्य धैर्यन्दयितेन सादरं
प्रसादितायाः करवारिवारितम् ।
मुखन्निमीलन्नयनन्नतभ्रुवः
श्रियं सपत्नीवदनादिवाददे ॥ ५० ॥

कम्पितौ स्तनौ यस्य सः सविभ्रमं सविलाससमाधूतानि कराग्रपल्लवानि पाणिपल्लवानि येन सः । विलसनशीला विलासिनी । वौ कषलसकत्थस्रम्भ इति घिनुण्प्रत्ययः । स्त्रैजनः । जातावेकवचनम् । यथार्थतामाप उक्तरीत्या अनेकविलासवत्तया यथार्थनामकत्वमवापेत्यर्थः । क्वचिद्गम्यमानार्थस्य नाम्नोन प्रयोगः । यथा माघे चिराय याथार्थ्यमलम्भि दिग्गजैरिति । क्वचित् प्रयुज्यते च यथा रघुवंशे । परन्तपोनाम यथार्थनामेति । नैषधेऽपि स जयत्यरिसार्थसार्थकी कृतनामा किल भीमभूपतिरिति । स्वभावोक्तिरलङ्कारः ॥ ४९ ॥

उदस्येति । दयितेन धैर्यङ्काठिन्यमुदस्यापनीय अनुनीयेत्यर्थः सादरं यथा तथा प्रसादितायाः सौमनस्यङ्गमितायाः नतभ्रुवः स्त्रियः सम्बन्धि करवारिभिर्वारितमवरुद्धमत एव निमीलती नयने यस्य तन्मुखं सपत्नीवदनादिव श्रियमाददे जग्राह । तदानीन्तद्वदनस्य निःश्रीकत्वात्तदीयश्रीग्रहणमुत्प्रेक्ष्यते ॥ ५० ॥

विहस्येति । धृताम्भसि प्रियसेचनार्थं गृहीतजले पाणौ अञ्जलावित्यर्थः प्रियेण विहस्य विधृते अवलम्बिते सति अतएव मदनाद्रचेतसः मदनपरवशायाइत्यर्थः वध्वाः सम्बन्धि वीतावयवं मुक्तनीविग्रन्थि स्रंसमानमित्यर्थः अंशुकमयत्नसा घनीकृता काञ्ची

विहस्य पाणौ विधृते धृताम्भसि
प्रियेण वध्वा मदनार्द्रचेतसः ।
सखीव काञ्ची पयसा घनीकृता
बभार वीतोच्चयबन्धमंशुकम् ॥ ५१ ॥

निरञ्जने साचिविलोकितं दृशा
वयावकं वेपथुरोष्ठपल्लवम् ।
नतभ्रुवो मण्डयति स्म विग्रहे
बलिक्रिया चातिलकन्तदास्पदम् ॥ ५२ ॥

सखीव बभार जग्राह । स्त्रीणां किल स्त्रीष्वेवायत्तं लज्जारचण मिति भावः ॥ ५१ ॥

निरञ्जने इति । नतभ्रुवोऽङ्गनायाः विग्रहे वपुषि निरञ्जने निर्धौतकज्जले दृशौ विलोचने कर्म्म साचिविलोकितन्तिर्यगीचणं कर्तृ मण्डयति स्म । तिर्यगर्थे साचि तिर इत्यमरः । अयावकं चालितलाचारागमोष्ठपल्लवं वेपथुः कम्पो मण्डयति स्म । ट्वितो ऽथुजित्यथुच्प्रत्ययः । अतिलकन्तिलकरहितन्तदास्पदं तिलक स्थानं ललाटं । आस्पदं प्रतिष्ठायामिति निपातः । बलिक्रिया रेखाबन्धश्च मण्डयति स्म । तदा निरलङ्कारस्याङ्गनाशरीरस्य तच्छरीरविकारैरेवालङ्कारः समजनीत्यर्थः ॥ ५२ ॥

निमीलदिति । प्रियोपकण्ठम्प्रियसमीपे । अत्यन्तसंयोग द्वितीया । निमज्जतीनां विगाहमानानां अतएव निमीलन्ति निमिषन्ति आकेकराणि आकेकरवन्ति लोलानि चक्षूंषि यासा

निमीलदाकेकरलोलचक्षुषां
प्रियोपकण्ठं कृतगात्रवेपथुः ।
निमज्जतीनां श्वसितोद्धतस्तनः
श्रमो नु तासां मदनो नु पप्रथे ॥ ५३ ॥

प्रियेण सिक्ता चरमं विपक्षतः
चुकोप काचिन्न तुतोष सान्त्वनैः ।
जनस्य रूढप्रणयस्य चेतसः
किमप्यमर्षोऽनुनये भृशायते ॥ ५४ ॥

तासां । आकेकरलक्षणन्तु नृत्यविलासे । दृष्टिराकेकरा किञ्चित् स्फुटापाङ्गे प्रसारिता । मीलितार्द्धपुटा लोके ताराव्यावर्त्तनोत्तरेति । तासां स्त्रीणां कृतो गात्राणां वेपथुः कम्पो येन सः श्वसितैर्निःश्वासैरुद्धतावुत्पतितौ स्तनौ येन सः श्रमः खेदो नु मदनो नु पप्रथे प्रादुर्बभूव । निमज्जनप्रियसन्निधानरूपोभयकारणसम्भवात्रेत्रनिमीलनगात्रकम्पनिश्वासधारणाच्च सन्देहः सएवालङ्कारः ॥ ५३ ॥

प्रियेणेति । काचित् प्रियेण विपक्षतः सपत्नीतश्चरमम्पश्चात् सिक्ता सती चुकोप । पृष्ठन्तु चरमन्तनोरित्यमरः । सान्त्वनैरनुनयैर्न तुतोष । तथाहि रूढप्रणयस्य गाढप्रेम्णो जनस्य सम्बन्धी चेतसो मनसोऽमर्षः प्रकोपः किमपि कुतोऽपि हेतोरनुनये सति भृशायते गाढो भवति । भृशादिभ्योभुव्यच्वेर्लोपश्च हलइति क्यङ् । अन्यत्र शान्तिहेतुरनुनय. अत्र प्रकोपायैव भवति तत्र कारणन्तु न ज्ञायतइत्यर्थः ॥ ५४ ॥

इत्थं विहृत्य वनिताभिरुदस्यमान-
म्पीनस्तनोरुजघनस्थलशालिनीभिः ।
उत्सर्पितोर्मिचयलङ्घिततीरदेश-
मौत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥ ५५ ॥

तीरान्तराणि मिथुनानि रथाङ्गनाम्नां
नीत्वा विलोलितसरोजवनश्रियस्ताः ।
संरेजिरे सुरसरिज्जलधौतहारा-
स्तारावितानतरला इव यामवत्यः ॥ ५६ ॥

इत्थमिति । पीनैः स्तनैरूरुभिर्ज्जघनस्थलैश्च शालन्त इति तथोक्ताभिरिति सलिलनोदनसामर्थ्योक्तिः । स्थलस्य साक्षादप्राण्यङ्गत्वान्न द्वन्द्वैकवद्भावः । वनिताभिरित्थं विहृत्योदस्यमानं नुद्यमानं उत्सर्पितैरुपरिभावमापितैरूर्म्मिचयैर्लङ्घितस्तीरदेशो येन तद्वारि औत्सुक्यं विहारासहिष्णुत्वं तेन नुन्नं प्रेरितमिवेत्युत्प्रेक्षा । नुदविदेत्यादिना निष्ठानत्वम् । पुरोऽग्रे प्रतस्थे स्वजनवदिति भावः ॥ ५५ ॥

तीरान्तराणीति । रथाङ्गनाम्नां मिथुनानि चक्रवाकद्वन्द्वानि अन्यानि तीराणि तीरान्तराणि नीत्वा नियोज्येत्यर्थः । अविहित लक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः । विलोलिता विलुलिताः सरोजवनश्रियो याभिस्ताः सुरसरिज्जलैर्द्धौतहाराः क्षालितमुक्तावलयस्ताः स्त्रियस्तारावितानैरुडुगणैस्तरला भासुराः । तरलो भासुरे हारे चञ्चलेऽपीति वैजयन्ती । यामवत्यो रात्रय इव संरेजिरे शुशुभिरे ॥ ५६ ॥

सङ्क्रान्तचन्दनरसाहितवर्णभेदं
विच्छिन्नभूषणमणिप्रकरांशुचित्रम् ।
बद्धोर्म्मि नाकवनितापरिभुक्तमुक्तं
सिन्धोर्बभार सलिलं शयनीयलक्ष्मीम् ॥५७॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये सुराङ्गनाविहारोनामाष्टमस्सर्गः ॥८॥

सङ्क्रान्तेति । सङ्क्रान्तैश्चन्दनरसैर्मलयजद्रवैराहितोवर्णभेदो रूपान्तरं यस्य तत् विच्छिन्नानि त्रुटितानि यानि विभूषणानि तेषां ये मणिप्रकराः मणिगणास्तेषामंशुभिश्चित्रन्नानावर्णं बद्धोर्म्मि तरलन्तरङ्गितन्नाकवनिताभिः परिभुक्तमुक्तं पूर्व्वं परिभुक्त मश्चान्मुक्तं । पूर्व्वकालेत्यादिना तत्पुरुषः । सिन्धोर्गङ्गायाः सलिलं शेरते अत्रेति शयनीयन्तल्पं । बहुलग्रहणात्साधुः । तस्य लक्ष्मी म्बभार । अतएव निदर्शनालङ्कारः । लक्षणन्तूक्तम् ॥ ५६ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां अष्टमस्सर्गः ॥ ८ ॥

वीक्ष्य रन्तुमनसः सुरनारी
रात्तचित्रपरिधानविभूषाः ।
तत्प्रियार्थमिव यातुमथास्त
म्भानुमानुपपयोधि ललम्बे ॥ १ ॥
मध्यमोपलनिभे लसदंशा
वेकतश्च्युतिमुपेयुषि भानौ ।
द्यौरुवाह परिवृत्तिविलोलां
हारयष्टिमिव वासरलक्ष्मीम् ॥ २ ॥

वीक्ष्येति । अथ जलक्रीडानन्तरम्भानुमानंशुमान् सूर्य्यः आत्तचित्रपरिधानविभूषाः स्वीकृतविविधवस्त्राभरणाः सुरतसन्नाहं वहन्तीरित्यर्थः अतएव रन्तुमनसः । समानकर्तृकेषु तुमुन् लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपीति मकारलोपः । सुरनारी वीक्ष्य तासाम्प्रियार्थन्तत्प्रियार्थमिव अवसरदानरूपम्प्रियङ्कर्त्तुमिवेत्यर्थः । फलोत्प्रेक्षेयम् । अस्तमदर्शनं । मकारान्तमव्ययमेतत् । यातुमस्तमुपपयोधि पयोधिसमीपे ललम्बे सस्रंसे । अस्मिन्सर्गे स्वागतावृत्तम् । स्वागतेति रनभागुरुयुग्मं इति लक्षणात् ॥ १ ॥

मध्येति । मध्यमोपलनिभे नायकमणिसदृशे । निभसङ्काशनीकाशप्रतिरूपोपमादय इत्यमरः । शर्करायां इषत्पुत्रे पुंस्यन्युपलोमणाविति वैजयन्ती । लसदंशौ प्रसरद्रश्मौ भानौ एकतः एकस्मिन्भागे च्युतिं स्रस्ततामुपेयुषि प्राप्ते सति द्यौः परि

अंशुपाणिभिरतीव पिपासुः
पद्मजं मधु भृशं रसयित्वा ।
क्षीवतामिव गतः क्षितिमेष्यन्
लोहितं वपुरुवाह पतङ्गः ॥ ३ ॥

वृत्त्या मध्याक्रातिक्रमेण विलोलाङ्गलतीं अन्यत्र गात्रस्य तिर्य्यगावृत्त्या मुक्तस्खलन्तीं वासरलक्ष्मीं हारयष्टिं मुक्तावलीमिवोवाह वहति स्म ॥ २ ॥

अंशुपाणिभिरिति । पतङ्गः सूर्यः । पतङ्गौ पक्षिसूर्य्यौ चेत्यमरः । अतीव निर्भरं । अत्यतीव च निर्भरमित्यमरः । पातुमिच्छुः पिपासुः तृषितः सन् । पिबतेः सन्नन्तादुप्रत्ययः । अंशवएव पाणयस्तैः पद्मेषु जातम्पद्मजं मधु मद्यमिव । मध्विति श्लिष्टं रूपकं । मकरन्दमद्यमित्यर्थः । मधु मद्ये पुष्परसइत्यमरः । भृशमत्यन्तं रसयित्वास्वाद्य क्षीवताम्मत्तत्वङ्गतइवेत्युत्प्रेक्षा । मत्ते शौण्डोत्कटक्षीवाइत्यमरः । क्षितिमेष्यन् गमिष्यन् लोहितं रक्तं वपुरुवाह । यथा मत्तः क्षितौ लुण्ठति रज्यते च तद्वदिति भावः । सूर्यस्य क्षितिविलयनमस्तमयइत्यागमः । अत्र रूपकोत्प्रेक्षयोः सापेक्षत्वादङ्गाङ्गिभावेन सङ्करः ॥ ३ ॥

गम्यतामिति । सहस्रमरीचौ सूर्य्ये लोहितोभवतीति लोहितायति । लोहितादिडाजभ्यः क्यषिति क्यष् वा क्यषइति परस्मैपदे शतृप्रत्ययः । अतएव नयनानाङ्गम्यतामुपगते दर्शनीयतां प्राप्ते सति अभितापः धरित्रीं विरहय्य विहाय । ल्यपि लघुपूर्व्वादित्ययादेशः । चक्रवाकवधूयान्याश्रयाद् प्राप । अत्र धरित्र्यायाश्शस्तोआर्ककर

गम्यतामुपगते नयनानां
लोहितायति सहस्रमरीचौ ।
आससाद विरहय्य धरित्रीं
चक्रवाकहृदयान्यभितापः ॥ ४ ॥

मुक्तमूललघुरुज्झितपूर्व्वः
पश्चिमे नभसि सम्भृतसान्द्रः ।
सामि मज्जति रवौ न विरेजे
खिन्नजिह्म इव रश्मिसमूहः ॥ ५ ॥

इति सन्तापस्तादृक् चक्रवाकहृदयेषु [विरहसन्तापः], सञ्जात इति परमार्थः । परन्तु तदुपक्रमानन्तरमेतस्याविर्भावात्स एवायं स क्रान्त इत्यभेदाध्यवसायेनोपदेशः । अतएव भेदे अभेदरूपातिशयोक्तिरलङ्कारः ॥ ४ ॥

मुक्तेति । रवौ सामि मज्जति अर्द्धास्तमिते सति । सामि त्वर्द्धे जुगुप्सायामित्यमरः । मुक्तम्त्यक्तप्रायं मूलमाश्रयभूतो रविरन्यत्र स्वामी येन सः अतएव लघुरल्पकश्च मुक्तमूललघुः उज्झितपूर्व्वः त्यक्तपूर्व्वदिकः अन्यत्र [त्यक्तपूर्व्वजनः पश्चिमे नभसि पश्चिमनभोभागेऽन्यत्र क्वचिन्नीचस्थले सम्भृतः संहतः सन् अतएव सान्द्रश्च रश्मिसमूहः आश्रितजनश्च [ध्वन्यते । दुःखेन खिन्नः सन् जिह्मोदीन इव न विरेजे । अत्र मुक्तत्वादिप्रस्तुतविशेषणसाम्यादप्रस्तुताश्रितजनप्रतीतेः समासोक्तिः तत्र वाच्यस्य रश्मिसमूहस्याचेतनस्यापि [प्रतीयमानेन चेतनेनाभेदाभिधानात् दुःखितत्वाद्युत्प्रेक्षेति तयोरङ्गाङ्गिभावेन सङ्करः ॥ ५ ॥

कान्तदूत्य इव कुङ्कुमताम्राः
सायमण्डनमभि त्वरयन्त्यः।
सादरन्ददृशिरे वनिताभिः
सौधजालपतितारविभासः ॥ ६ ॥
अग्रसानुषु नितान्तपिशङ्गै
र्भूरुहान्मृदुकरैरवलम्ब्य।
अस्तशैलगहनन्नु विवस्वा
नाविवेश जलधिन्नु महीन्नु ॥ ७ ॥

कान्तेति। कुङ्कुमवत्कुङ्कुमेन वा ताम्राः सायस्य सायङ्कालस्य। "सायं साये प्रगे प्रातरित्यमरः।" यन्मण्डनन्तदभि तदुद्दिश्य त्वरयन्त्यस्त्वरां कारयन्त्यः सौधानाञ्जालैर्गवाक्षैः पतिताः प्रविष्टाः। जालङ्गवाक्षमानायइति वैजयन्ती। रविभासः सूर्य्यरश्मयः कान्तानाम्प्रेयसान्दूत्यइव वनिताभिः सादरं यथा तथा ददृशिरे दृष्टाः। सायन्तनार्कभासाम्प्रियसमागमसूचकत्वादेव दूत्याइव तासु स्त्रीणामादरोऽभवदित्यर्थः ॥ ६ ॥

अग्रेति। विवस्वान् सूर्य्यः अग्रेऽस्तशैलशिखरे ये सानवस्तेषु ये भूरुहास्तान् नितान्तपिशङ्गैरत्यन्तारुणैर्मृदुभिः करैरिव करै रंशुहस्तैरिति श्लिष्टरूपकम्। बलिहस्तांशवः करा इत्यमरः। यदा। करैर्मृदु श्लथमवलम्ब्य अस्तइति शैलोऽस्तशैलः। अस्तस्तु चरमः क्ष्माभृदित्यमरः। तस्य गहनं काननं नु जलधिं नु महीं नु आविवेश। तपनस्य पतनसन्देहएव दृष्टः। पतनं तु

आकुलश्चलपतत्त्रिकुलाना-
मारवैरनुदितौषसरागः।
आययावहरिदश्वविपाण्डु-
स्तुल्यतां दिनमुखेन दिनान्तः॥ ८॥

क चाऽस्य तत्र त्रायते शीघ्रगमनादित्यर्थः। अत्र तपने पतनस्यारो प्यमाणस्य गहनाद्यनेकविषयत्वेन सन्देहात्सन्देहालङ्कारः। उत्प्रे चेति केचित्॥ ७॥

आकुलइति। चलानां कुलायेभ्यः कुलायान्प्रति चलतां पतत्त्रि कुलानामारवैः शब्दैराकुलो व्याप्तः। अनुदितशब्देनाभावमात्रमुषः शब्देन सन्ध्यामात्रञ्च विवक्ष्यते। उषसि भवः औषसः। सन्धि वेलेत्यादिना योगविभागादण्प्रत्ययः अन्यथा कालात् ठञ् स्यात्। तथा चानुदितौषसरागइत्यविद्यमानसन्ध्यारागइत्यर्थः। एकत्रापगमादन्यत्रानुदयाच्चेति भावः अहरिदश्वोऽविद्यमानसूर्य्यः एकत्रानुदयादन्यत्रास्तमयाच्चेति भावः अतएव विपाण्डुः तिमि रानुदयादिति शेषः दिनान्तः सायङ्कालो दिनमुखेन प्रातः कालेन तुल्यतामाययौ तद्वद्बभूवेत्यर्थः। अतएवोपमालङ्कारः॥ ८॥

आस्थितइति। स्थगितवारिदपङ्क्त्या पिहितमेघवृन्दया सन्ध्यया आस्थितः आक्रान्तो व्याप्तः गगनपश्चिमभागः सोर्म्मिरूर्म्मि सङ्क्रान्तेत्यर्थः तया विद्रुमवितानविभासा प्रवालप्रकरकान्त्या रञ्जि तस्य स्वभावर्णमापादितस्य जलधेः श्रियमूहे सन्ध्यायाररुणवर्णत्वा

आस्थितः स्थगितवारिदपङ्क्त्या
सन्ध्यया गगनपश्चिमभागः ।
सोर्म्मिविद्रुमवितानविभासा
रञ्जितस्य जलधेः श्रियमूहे ॥ ९ ॥

प्राञ्जलावपि जने नतमूर्द्ध्नि
प्रेम तत्प्रवणचेतसि हित्वा ।
सन्ध्ययानुविदधे विरमन्त्या
चापलेन सुजनेतरमैत्री ॥ १० ॥

दिति भावः । वहतेः कर्त्तरि लिट् । तत्सदृशीं श्रियमुवाहे त्यर्थः । अतएव निदर्शनालङ्कारः ॥ ९ ॥

प्राञ्जलाविति । प्रबद्धः अञ्जलिर्येन तस्मिन् प्राञ्जलौ बद्धाञ्जलौ । तौ युतावञ्जलिः पुमानित्यमरः । प्रादिभ्योधातुजस्य वक्तव्यो वा चोत्तरपदलोपश्च । नतमूर्द्ध्नि नमस्कुर्वाणे तत्प्रवणं तत्र सन्ध्यायामेवाहितञ्चेतो यस्य तस्मिन् एवंविधेऽपि जने विषये प्रेम हित्वा विहाय विरमन्त्या निवर्त्तमानया । व्याङ्परिभ्योरम इति परस्मैपदम् । सन्ध्यया चापलेनास्थैर्य्येण । युवादित्वादण् प्रत्ययः। सुजनादितरो दुर्ज्जनस्तस्य मैत्री सख्यमनुविदधे अनुचक्रे । कर्म्मणि लिट् । यथा दुर्ज्जनमैत्री स्निग्धन्तमपि जहाति तद्वत्सन्ध्यापि सेवकजनमहासीदित्यर्थः । मित्रस्य कर्म मैत्री । अणन्तात् ङीप् । अत्र सन्ध्यादुर्जनमैत्र्योश्चापलं समानधर्म्मः अनुविधानमतएव । अर्थरूपेणेयमुपमा ॥ १० ॥

औषसातपभयादपलीनं
वासरच्छविविरामपटीयः ।
सन्निपत्य शनकैरिव निम्ना
दन्धकारमुदवाप समानि ॥ ११ ॥
एकतामिव गतस्य विवेकः
कस्यचिन्न महतोऽप्युपलेभे ।
भास्वता निदधिरे भुवनाना
मात्मनीव पतितेन विशेषाः ॥ १२ ॥

औषसेति । औषसात्प्राभातिकादातपाद्भयत्तस्मादिवेत्युत्प्रेक्षा । अपलीनं क्वचिद्गूढं वासरच्छवेरातपस्य विरामात् हेतोः पटीयः प्रभविष्णुतरमन्धं करोतीत्यन्धकारं ध्वान्तं । अन्धकारोऽस्त्रियां ध्वान्तमित्यमरः । अथ सन्ध्यापगमनानन्तरं शनकैर्मन्दमन्दं निम्नात्सन्निपत्यागत्य समानि समस्थलानि उदवाप व्यानशे । अत्र प्रस्तुतान्धकारविशेषणसाम्यादप्रस्तुतार्थप्रतीतेः समासोक्ति रलङ्कारः । उत्प्रेक्षालङ्कृतः स्यात् ॥ ११ ॥

एकतामिति । एकतामभेदङ्गतस्येव तमोव्याप्त्या तथा प्रतीते रियमुत्प्रेक्षा । महतः शैलादेरपि कस्यचित्कस्यापि पदार्थस्य विवेको भेदेनोपलेभे न गृहीतः । अतएवोत्प्रेक्ष्यते पतितेनास्तमितेन भास्वता सूर्य्येण भुवनानाम्भुवनस्थपदार्थानामित्यर्थः । विशेषा भूधरादिभेदाः आत्मनि स्वस्मिन्नेव निदधिरे इव निहिताइव । कथमन्यथा नोपलभ्येरन्नित्यर्थः । अत्रोत्प्रेक्षयोः सजातीययोः सापेक्षत्वादङ्गाङ्गिभावेन सङ्करः ॥ १२ ॥

इच्छतां सह वधूभिरभेदं
यामिनीविरहिणां विहगानाम्।
आपुरेव मिथुनानि वियोगं
लङ्घते न खलु कालनियोगः ॥ १३ ॥

यच्छति प्रतिमुखन्दयितायै
वाचमन्तिकगतेऽपि शकुन्तौ ।
नीयतेस्म नतमुज्झितहर्ष
म्पङ्कजं मुखमिवाम्बुरुहिण्या ॥ १४ ॥

इच्छतामिति । वधूभिः स्वकामिनीभिः सहाभेदमवियोगमिच्छताम् तथासङ्कल्पवतामपीत्यर्थः यामिनीषु विरहिणां नियतवियोगानामित्यर्थः । रहतेरावश्यकेऽर्थे णिनिः यद्वा निन्दायामिनिः । तेषां विहगानाञ्चक्रवाकाणामित्यर्थः मिथुनानि वियोगमापुरेव नतु नापुरित्ययोगव्यवच्छेदः । तथाहि कालनियोगोदैवाज्ञा न लङ्घते खलु दुर्वारइत्यर्थः ॥ १३ ॥

यच्छतीति । शकुन्तौ चक्रवाकपक्षिणि सामान्यस्य प्राकरणिकविशेषपर्य्यवसानात् । शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजा इत्यमरः । अन्तिकगते समीपस्थेऽपि दयितायै चक्रवाक्यै प्रतिमुखमभिमुखं यथा तथा वाचं यच्छति वाचमेव ददाने सति नतु सङ्गच्छमाने सतीत्यर्थः । पाघ्राध्मेत्यादिना दाणोयच्छादेशः । अम्बुरुहिण्या नलिन्या उज्झितहर्षञ्चक्रवाकदुर्दशादर्शनादिव त्यक्तविकासम्पङ्कजं मुखमिव नतिन्नमत्वं नीयते स्म नीतम्। प्रधानकर्म

रञ्जिता नु विविधास्तरुशैला
नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री
संहृता नु ककुभस्तिमिरेण ॥ १५ ॥

ख्याख्येये स्वादीनाङ्कर्द्दिकर्म्मणामिति नयतेर्द्दिकर्मकत्वात्प्रधाने कर्म्मणि लिट् । प्रायेण दुःखदर्शनात् स्त्रियः खिद्यन्ते विशेषेण विरहदर्शनादिति भावः । अत्र पङ्कजावनतिसूक्तचाकविक्रोशा नन्तर्यात्तद्धेतुकत्वमुत्प्रेच्यते । तच्च मुखोपमेयं अम्बुरुहिण्या कामिनीसाम्यङ्गमयन्त्या निरुह्यते इत्युपमोत्प्रेक्षयोरङ्गाङ्गिभावेन सङ्करः । व्यञ्जकाद्यप्रयोगात्प्रतीयमानोत्प्रेक्षा ॥ १४ ॥

रञ्जिताइति । तिमिरेणान्धकारेण विविधास्तरवः शैलाश्च रञ्जिताः स्वसावर्ण्यमापादिताः नु । अन्यथा कथमेषां नीलात्व्व मिति भावः । तथा गगनं नामितं नु आभूतलादिति शेषः । मितां ह्रस्वइत्यत्र वाशब्दानुवृत्त्या व्यवस्थितविभाषाश्रयणान्न ह्रस्वः । यद्वा गगनं स्थगितं आच्छादितं नु । उभयत्रापि तमसावृत त्वान्न दृश्यतइति भावः । तथा धरित्री विषमेषु निम्नोन्नतेषु पूरिता समीकृता नु । अन्यथा तद्विवेकः कथं न स्यादिति भावः । ककुभो दिशश्च संहृताः नु लुप्ताः किं । दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताइत्यमरः । कथमन्यथा न दृश्यन्तइति भावः । अत्र तिमिरे तरुशैलाद्यनेकविषयरञ्जकत्वादिकमारोप्य सन्दिग्ध इति सन्देहालङ्कारः । अन्ये तु नुशब्दस्य सम्भावनाद्योतकत्वमत्रो त्प्रेक्षाप्रकारमित्यलङ्कारसर्वस्वकारः ॥ १५ ॥

रात्रिरागमलिनानि विकाशं
पङ्कजानि रहयन्ति विहाय ।
स्पष्टतारकमियाय नभः श्री
र्वस्तुमिच्छति निरापदि सर्व्वः ॥ १६ ॥
व्यानशे शशधरेण विमुक्तः
केतकीकुसुमकेसरपाण्डुः ।
चूर्णमुष्टिरिव लम्भितकान्ति
र्वासवस्य दिशमंशुसमूहः ॥ १७ ॥

रात्रीति । श्रीः शोभा कर्त्री रात्रेः सन्ध्यायारागेण रक्तच्छायो परञ्जनेन मलिनानि अतएव विकाशं रहयन्ति त्यजन्ति । रहयतेस्त्यागार्थाच्चुरादित्वाण्णिच् । पङ्कजानि विहाय त्यक्त्वा स्पष्ट तारकं नभः खमियाय प्राप तथाहि । सर्वोजनो निरापदि निर्वा धस्थले वस्तुं स्थातुम् । एकाचउपदेशेऽनुदात्तादितीट्प्रतिषेधः । घसिश्च सान्तेषु वसिः प्रसारिणीति वचनात् । इच्छति ॥ १६ ॥

अस्तादिसन्ध्यान्तं वर्णयित्वा चन्द्रोदयवर्णनमारभते । व्यानश इति । शशधरेण चन्द्रेण विमुक्तः चिप्तः केतकीकुसुमकेसरइव पाण्डुः लम्भिता प्रापिता कान्तिर्यस्य स रश्मिसमूहश्चूर्णस्य कर्पूर चोदस्य मुष्टिरिव । मुष्टिशब्दस्य द्विलिङ्गत्वेऽप्यत्र पुल्लिङ्गतैव याह्या । उपमेयानुसारात् । वासवस्येन्द्रस्य दिशमैन्द्रीं व्यानशे व्याप । अनेन दिशानिशाकरयोर्नायिकानायकोपमध्वन्यते ॥ १७ ॥

उज्झतीति । इन्द्रस्येयमैन्द्री दिक् प्राची तारकराजे नक्षत्र नाथे । कनीनिकायां नक्षत्रे तारकन्तारकापि चेति विश्वः । अन्तिकं

उज्झती शुचमिवाशु तमिस्रा
मन्तिकं व्रजति तारकराजे ।
दिक् प्रसादगुणमण्डनमूहे
रश्मिहासविशदं मुखमैन्द्री ॥ १८ ॥
नीलनीरजनिभे हिमगौरं
शैलरुद्धवपुषः सितरश्मेः ।
खे रराज निपतत्करजालं
वारिधेः पयसि गाङ्गमिवाम्भः ॥ १९ ॥

समीपं व्रजति सति आशु तमिस्रामन्धतमसं । तमिस्रा स्त्री ध्वान्त निशि निश्यन्धतमसे न नेति वैजयन्ती । शुचमिव विरहदुःख मिवेत्यर्थः । उज्झती विजहती प्रसादो नैर्मल्यमेव गुणः स एव मण्डनं यस्य तत् रश्मयो हास इव तेन विशदं मुखमिव मुखमग्र भागं । श्लिष्टोपमेयम् । ऊहे वहति स्म । अत्र दिक्चन्द्रयोर्नायिका नायकौपम्यङ्गम्यते ॥ १८ ॥

नीलेति । शैलरुद्धवपुषः उदयगिरितिरोहितमण्डलस्य सितरश्मेरिन्दोः सम्बन्धि नीलनीरजनिभे श्यामकमलतुल्ये खे आकाशे निपतत् प्रसरत् । हिमवद्गौरं शुभ्रकरजालं वारिधेः पयसि निपतत् गाङ्गमम्भइव रराज । उपमानेऽपि विशेषणं योज्यम् ॥ १९ ॥

द्यामिति । द्यान्निरन्धदाकाशमावृण्वत् अतिनीलघनाभं मेचकं उद्यताः कराग्रंशवो हस्ताश्च यस्य तेन । असिताभ्यहतराः शुभ्रा

यान्निरुन्धदतिनीलघनाभं
ध्वान्तमुद्यतकरेण पुरस्तात् ।
क्षिप्यमाणमसितेतरभासा
शम्भुनेव करिचर्म्म चकासे ॥ २० ॥
अन्तिकान्तिकगतेन्दुविसृष्टे
जिह्मतां जहति दीधितिजाले ।
निःसृतस्तिमिरभारनिरोधा
दुच्छ्वसन्निव रराज दिगन्तः ॥ २१ ॥

भासेोयस्य तेन चन्द्रेण पुरस्तात्प्राच्याम् अग्रे च क्षिप्यमाणं मुच्यमानं ध्वान्तं शम्भुना क्षिप्यमाणं करिचर्मेव चकासे । उपमानेऽपि विशेषणानि योज्यानि ॥ २० ॥

अन्तिकेति । अन्तिकान्तिकेऽतिसमीपे । प्रकारे गुणवचनस्येति द्विर्भावः कर्म्मधारयवद्भावात्सुपोलुक् । अन्तिकान्तिकगतेनेन्दुना विसृष्टे मुक्ते दीधितिजाले किरणसमूहे जिह्मतां सङ्कोचञ्जहति त्यजति सति तिमिरभारैस्तमःस्तोमैर्निरोधादुपरोधान्निःसृतो निर्गतः दिगन्तः उच्छ्वसन् प्राणन्निव रराजेत्युत्प्रेक्षालङ्कारः ॥ २१ ॥

लेखयेति । इन्दुर्विमलविद्रुमभासा स्वच्छप्रवालसवर्णया लेखया कलया सन्ततं सान्द्रतिमिरम् आदिवराह: कनकस्य टङ्कः शिलाभेदकं शस्त्रम् । टङ्कः पाषाणदारणइत्यमरः । तद्वत्पिशङ्गा लोहितवर्णया । पिशङ्गादुपसङ्ख्यानमिति ङीप् । इद्धया भूर्मण्डलं

लेखया विमलविद्रुमभासा
सन्ततन्तिमिरमिन्दुरुदासे ।
दंष्ट्रया कनकटङ्कपिशङ्ग्या
मण्डलम्भुव इवादिवराहः ॥ २२ ॥
दीपयन्नथ नभः किरणौघैः
कुङ्कुमारुणपयोधरगौरः ।
हेमकुम्भ इव पूर्व्वपयोधे
रुन्ममज्ज शनकैस्तुहिनांशुः ॥ २३ ॥
उद्गतेन्दुमविभिन्नतमिस्रा
मपश्यति स्म रजनीमवितृप्तः ।
व्यंशुकस्फुटमुखीमतिजिह्मां
व्रीडया नववधूमिव लोकः ॥ २४ ॥

मिव उदासे उच्चिक्षिपे । अस्यतः कर्त्तरि लिट् । सोपसर्गादस्यते रात्मनेपदं विकल्पात् ॥ २२ ॥

दीपयन्निति । अथोदयानन्तरङ्किरणौघैर्नभोदीपयन् प्रकाशयन् कुङ्कुमेनारुणोयः पयोधरः कुचः तद्वत् गौरोऽरुणः उदयरागादिति भावः तुहिनांशुरिन्दुः शनकैः पूर्व्वपयोधेः पूर्व्वसागरात् हेमः कुम्भ इवोन्ममज्जोज्जगामेत्युत्प्रेक्षा ॥ २३ ॥

उद्गतेन्दुमिति । लोकोजनः । लोकस्तु भुवने जनइत्यमरः । उद्गतेन्दुमुदितचन्द्रां अविभिन्नतमिस्रामनिःशेषितध्वान्तां रजनीं व्यंशुकमपनीतावगुण्ठनमतएव स्फुटं दृश्यमानं मुखं यस्याः सा

न प्रसादमुचितङ्गमिता द्यौ
र्नोद्धृतन्तिमिरमद्रिवनेभ्यः ।
दिङ्मुखेषु न च धाम विकीर्ण
म्भूषितैव रजनी हिमभासा ॥ २५ ॥
मानिनीजनविलोचनपाता
नुष्णबाष्पकलुषान्प्रतिगृह्णन् ।
मन्दमन्दमुदितः प्रययौ खं
भीतभीतइव शीतमयूखः ॥ २६ ॥

तान्तथाऽपि व्रीडयातिजिह्मां वक्रां नववधूं नवोढां । वधूर्न्नवोढयो र्भार्यां स्नुषाभार्य्याङ्गनासु चेति धरणिः । स्त्रियमिवाविक्षन् सन् पश्यति स्म ॥ २४ ॥

नेति । हिमभासा चन्द्रेण द्यौराकाशमुचितं योग्यम्प्रसादन्न गमिता अद्रयोवनानि च तेभ्यस्तिमिरं नोद्धृतं नोत्सारितन्दिशां मुखेषु धाम तेजश्च न विकीर्णं न पर्य्यस्तन्तथापि रजनी भूषितैव किमुतोक्तगुणसम्पत्ताविति भावः । अत्र प्रसाधनकारणाभावेऽपि तत्कार्य्यभूषणोक्त्या विभावनालङ्कारः ॥ २५ ॥

मानिनीति । उदितः शीतमयूखः उष्णेन विरहतप्तेन बाष्पेण कलुषानाविलान्मानिनीजनस्य कलहान्तरितनायिकाजनस्य विलोचनपातान्मानभङ्गजनितरोषेण भीषणानिति भावः । कोपा त्कान्तम्पराणुद्य पश्चात्तापसमन्विता । कलहान्तरिता प्रोक्ता नायिका नयशालिभिरिति दशरूपके । प्रतिगृह्णन् स्वीकुर्वन्

श्लिष्यतः प्रियवधूरुपकण्ठं
तारकास्ततकरस्य हिमांशोः ।
उद्गमन्नभिरराज समन्ता
दङ्गराग इव लोहितरागः ॥ २७ ॥
प्रेरितः शशधरेण करौघः
संहतान्यपि नुनोद तमांसि ।
क्षीरसिन्धुरिव मन्दरभिन्नः
काननान्यविरलोच्चतरूणि ॥ २८ ॥

अपराधस्यापरिहार्य्यत्वादिति भावः । अतएव भीतभीताभीत प्रकारइवेत्युत्प्रेक्षा । मन्दमन्दं मन्दप्रकारम् । उभयत्रापि प्रकारे गणवचनस्येति द्विर्भावे कर्मधारयवद्भावात्सुलोपः । स्वमाकाश मयथौ ॥ २६ ॥

श्लिष्यतइति । ततः प्रसारिताः कराएव, कराः अंशुहस्तायेन तस्य ततकरस्य तारकाएव प्रियवधूः उपकण्ठं अन्तिके कण्ठे वा । अत्यन्तसंयोगे द्वितीया विभक्त्यर्थेऽव्ययीभावः । श्लिष्यतः प्रत्यासीदतः आलिङ्गतश्च हिमांशोः सम्बन्धी समन्तात् उद्गमन्नुत्सर्पन् । अर्थान्तरत्वादकर्मकत्वं । धातोरर्थान्तरे वृत्तेरिति वचनात । लोहितरागोऽरुणप्रभा अङ्गरागइवाभिरराज आलिङ्गनाद्रागोगलतीति प्रसिद्धिः । अत्र रूपकोपमयोरङ्गाङ्गिभावेन सङ्करः ॥ २७ ॥

प्रेरितइति । शशधरेण चन्द्रेण प्रेरितोविसृष्टः करौघः संहतानि सान्द्राण्यपि तमांसि मन्दरेण मन्दराचलेन भिन्नानुन्नः

आरताङ्गमितया शशिपादै-
श्छायया विटपिनाम्प्रतिपेदे ।
न्यस्तशुक्लबलिचित्रतलाभि-
स्तुल्यता वसतिवेश्ममहीभिः ॥ २९ ॥

आतपे धृतिमता सह वध्वा
यामिनीविरहिणा विहगेन ।
सेहिरे न किरणा हिमरश्मे-
र्दुःखिते मनसि सर्व्वमसह्यम् ॥ ३० ॥

क्षीरसिन्धुः अविरलाः सान्द्राः उच्चाउन्नताश्च तरवो येषु तानि काननानीव नुनोद चिक्षेप दूरीचकार ॥ २८ ॥

आरतामिति । शशिपादैश्चन्द्ररश्मिभिः । पादारश्म्यङ्घ्रितुर्य्यांशा इत्यमरः । आरतां शवलताङ्गमितया । आरः शवलपीतयोरिति विश्वः । विटपिनान्तरूणां छायया न्यस्तैर्निःक्षिप्तैः शुक्लबलिभिः श्वेतपुष्पाद्युपहारैश्चित्राणि तलानि उपरिभागा यासां ताभिः । करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियामित्यमरः वसतिवेश्ममहीभिर्निवासगृहभूमिभिस्तुल्यता साम्यं प्रतिपेदे । कर्म्मणि लिट् । आर्थीयमुपमा ॥ २९ ॥

आतपइति । आतपे दुःखकरेऽपीति भावः वध्वा चक्रवाक्या सह अतएव धृतिमता सन्तोषवता यामिनीषु विरहिणा नियत विरहेण अतएव विहंगेन चक्रवाकेण हिमरश्मेश्चन्द्रस्य किरणाः सेहिरे । तथाहि । दुःखिते सञ्जातदुःखे मनसि सर्व्वं मनोहरमपीति

गन्धमुद्धतरजःकणवाही
विक्षिपन्विकसतां कुमुदानाम्।
आदुधाव परिलीनविहङ्गा
यामिनीमरुदपां वनराजीः ॥ ३१ ॥
संविधातुमभिषेकमुदासे
मन्मथस्य लसदंशुजलौघः।
यामिनीवनितया ततचिह्नः
सोत्पलो रजतकुम्भइवेन्दुः ॥ ३२ ॥

भावः असह्यं सोढुमशक्यं। शकिसहोश्चेति यत्प्रत्ययः। पूर्व्वं त्वातपादिति पेठुस्तत्र वध्वा सहातपा अपि सेहिरे तद्विरहिणा तु शशिकिरणा अपि न सेहिरइति योज्यम्। फलन्तु समानम् ॥ ३० ॥

गन्धमिति। अपाङ्कणवाही। योग्यान्वये व्यवधानमपि सोढव्यम्। विकसतां कुमुदानाङ्गन्धं सौरभं उद्धतं रजः परागो यस्मिन् कर्म्मणि तद्यथा तथा। शेषाद्विभाषेति विकल्पान्न कप्। विक्षिपन् विकिरन् इत्थं शिशिरः सुरभिर्यामिनीमरुद्रात्रिवायुः परितो लीनाः श्रयिताः विहङ्गा यासु ता वनराजीरादुधाव ईषत्कम्पयामास विहङ्गशयनाविरोधेनेत्यर्थः। आङीषदर्थेऽभिव्याप्ताविव्यमरः। यथा कश्चित्कामिनीं गन्धोदकादिना सिञ्चन्नाकर्षति तद्वदिति भावः ॥ ३१ ॥

संविधातुमिति। यामिनी वनितेव तया रात्रिरूपया कान्तया मन्मथस्याभिषेकन्त्रिभवनजैत्रयात्राभिषेकं संविधातुं सम्य

ओजसापि खलु नूनमनूनं
नासहायमुपयाति जयश्रीः ।
यद्विभुः शशिमयूखसखः स-
न्नाददे विजयि चापमनङ्गः ॥ ३३ ॥
सद्मनां विरचनाऽऽहितशोभै-
रागतप्रियकथैरपि दूत्यम् ।
सन्निकृष्टरतिभिः सुरदारै-
र्भूषितैरपि विभूषणमीषे ॥ ३४ ॥

कर्त्तुं अंशवो जलानीव तेषामोघः पूरः लसन् यस्मिन्सः तत-चित्रः स्फुटलाञ्छनइन्दुः सोत्पलो रजतकुम्भइव उदासे उत्क्षिप्तः। अस्यतेः कर्म्मणि लिट् । अत्र संविधातुमिति तुमुना प्रतीय-मानोत्प्रेक्षयानुप्राणितोऽयं उपमोत्प्रेक्षयोः सङ्करः ॥ ३२ ॥

ओजसेति । ओजसा अनूनं सम्पूर्णमपि असहायं सहाय-रहितं पुरुषमिति शेषः जयश्रीर्नोपयाति खलु नूनं कुतोयद्य-स्माद्विभुः समर्थोऽप्यनङ्गः शशिमयूखानां सखा सहचरस्तथोक्तः ससहायः सन्नित्यर्थः । विजयि विजयशीलं । जिदृक्षीत्यादिना इनप्रत्ययः । चापमाददे । विशेषेणसामान्यसमर्थनरूपोऽर्थान्तर-न्यासः ॥ ३३ ॥

इत्यमुद्दीपनसामग्रीमुपवर्ण्य सम्प्रति तत्कार्यभूतं रतिवर्णन-मारभते । सद्मनामित्यादि । सन्निकृष्टरतिभिरासन्नसुरतोत्सवैरत-एव सुरदारैः सुरवधूभिराहितशोभैः प्रागेव विहितकेलिगृह-

न स्रजो रुरुचिरे रमणीभ्य
श्चन्दनानि विरहे मदिरा वा ।
साधनेषु हि रतेरुपधत्ते
रम्यतां प्रियसमागम एव ॥ ३५ ॥

मण्डनैरपि पुनः सद्मनां केलिगृहाणां विरचना मण्डनमीषे ऽभिलेषे । इषेः कर्म्मणि लिट् । आगतप्रियकथैः प्राप्तप्रियजनवृत्तान्तैरपि दूतस्य कर्म्म दूत्यं दूतिव्यापार ईषे । वा दूतवणिग्भ्यां चेति यप्रत्ययः । तथा भूषितैरपि विभूषणं प्रसाधनमीषे । औत्सुक्यातिरेकादिति भावः ॥ ३४ ॥

नेति । विरहे वियोगावस्थायां स्रजो माल्यानि चन्दनानि गन्धाः मदिरा मद्यानि वा रमणीभ्यः । रुच्यर्थानाम्प्रीयमाण इति सम्प्रदानत्वाच्चतुर्थी । न रुरुचिरे न रोचन्ते स्म । हि यस्मात्प्रियसमागम एव रतेः साधनेषु स्रगादिषु रम्यतां मनोहरत्वं रुचिकरत्वमिति यावत् उपधत्ते आधत्ते । तदभावादरुचिर्युक्तैवेत्यर्थः । अतएव वैधर्म्यात्कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः । रम्यन्ते एष्विति रम्याणि । पोरदुपधादिति यत्प्रत्ययः कृत्यल्युटोबहुलमिति बहुलग्रहणादधिकरणार्थः ॥ ३५ ॥

प्रस्थिताभिरिति । अधिनायनिवासम्प्रियगृहं प्रति प्रस्थिताभिः प्रचलिताभिर्ध्वंसितानि खण्डितानि प्रियसखीवचनानि स्वयं प्रस्थानं लाघवायेत्येवंरूपाणि याभिस्ताभिर्मानिनीभिः कोपनाभिः । स्त्रीणामीर्ष्याकृतः कोपे मानोऽन्यासङ्गिनि प्रिये इति लक्षणात् । अपहस्तितन्निरस्तं धैर्य्यं येन सः । तथा सादयन् मानं शरीरस्य

प्रस्थिताभिरधिनाथनिवासं
ध्वंसितप्रियसखीवचनाभिः ।
मानिनीभिरपहस्तितधैर्य्यः
सादयन्नपि मदोऽवललम्बे ॥ ३६ ॥

कान्तवेश्म बहु सन्दिशतीभि
र्यातमेव रतये रमणीभिः ।
मन्मथेन परिलुप्तमतीना
म्प्रायशः स्खलितमप्युपकारि ॥ ३७ ॥

आश्रु कान्तमभिसारितवत्या
योषितः पुलकरुद्धकपोलम् ।
निर्जिगाय मुखमिन्दुमखण्डं
खण्डपत्रतिलकाकृति कान्त्या ॥ ३८ ॥

कर्षयन्नपि सदोषोपीत्यर्थः मदोऽवललम्बे स्वीकृतः अज्ञानव्याजेन लाघवापह्नवसौकर्यादिति भावः ॥ ३६ ॥

कान्तेति। रतये सुरताय बहु सन्दिशतीभिरनेकं वाचिकं कथयन्तीभिः सन्देशश्रवणाद्गन्तव्यमप्यजानतीभिरित्यर्थः। रमणीभिः कान्तवेश्म यातम्प्राप्तमेव नतु मार्गान्मध्ये निवृत्तमित्यर्थः। तथाहि मन्मथेन परिलुप्तमतीनां भ्रष्टमतीनां स्खलितं विरुद्धाचरणमपि प्रायश उपकारि भवति ॥ ३७ ॥

आश्विति। आश्रु कान्तमभिसारितवत्याः अभिगतवत्याः। स्वार्थे णिच्। योषितः सम्बन्धि पुलकैरुद्धावावृतौ कपोलौ यस्य

उच्यतां स वचनीयमशेषं
नेश्वरे परुषता सखि साध्वी ।
आनयैनमनुनीय कथं वा
विप्रियाणि जनयन्ननुनेयः ॥ २९ ॥

तत् खण्ड। सम्टृष्टा पत्राणां पत्रलेखानां तिलकस्य चाकृतिः सन्निवेशो यस्य तत्तथोक्तं मुखकान्त्या अखण्डं पूर्णमिन्दुन्निर्जिगाय जयति स इत्यार्थीयमुपमा । जयति देष्टीति दण्डिना साटृश्यार्थेषु गणनात् ॥ २८ ॥

अथ युग्मेन सखीनायिकासंवादमाह। उच्यतामिति। तत्र नायिकाह । स धूर्त्तः अशेषमखिलं वचनीयं वक्तव्यमुच्यतां निःशङ्कमुपालभ्यतामित्यर्थः । ब्रूञो दुहादित्वादप्रधाने कर्म्मणि लोट् । अथ सख्याह । हे सखि ईश्वरे भर्त्तरि नायके विषये परुषता पारुष्यं न साध्वी न हिता। अथ नायिकाह। हे सखि तर्हि एनमननीय सान्त्वयित्वा आनय । पुनः सखी आह। विप्रियाणि जनयन् अप्रियाणि कुर्व्वन्स कथं वाऽनुनेयः अनुनयार्हः ॥ २९ ॥

किमिति । पुनर्नायिकाह। तर्हि गतेन तत्प्रति गमनेन किं कोऽर्थइत्यर्थः । कुतः उपैतुङ्गन्तुन्न युक्तं हि। पुनः सख्याह। हे सुभगमानिनि सौन्दर्य्यमानिनि। सुभगमात्मानं मन्यते इति आत्ममाने खश्चेति चकाराण्णिनिप्रत्ययः । तस्मिन्प्रिये विषये कोमानः मानेन कर्त्तव्यइत्यर्थः। यदा नहीत्यादि सखीवाक्यम् । तत्र नहीत्येकं वाक्यन्तदुक्तं नहीत्यर्थः । हे सखि किन्तु उपैतुं

किङ्कृतेन न हि युक्तमुपैतु
ङ्कः प्रिये सुभगमानिनि मानः।
योषितामिति कथासु समेतैः
कामिभिर्बहुरसा धृतिरूहे ॥ ४० ॥

॥ युग्मम् ॥

योषितः पुलकरोधि दधत्या
घर्म्मवारि नवसङ्गमजन्म।
कान्तवक्षसि बभूव पतन्त्या
मण्डनं लुलितमण्डनतैव ॥ ४१ ॥

युक्तम् कुतः सुभगमानिनि प्रिये कोमानस्त्वादृशजनस्य दुर्लभत्वादिति भावः। इत्येवंरूपासु योषिताङ्कथासु विषये समेतैः समीपमागत्याकर्णयद्भिरित्यर्थः। कामिभिर्बहुरसाऽनेकस्वादा धृतिः सन्तोषः ऊहे ऊढा। अत्र रौद्र्यौत्सुक्यनिर्वेदाद्यनेकभावभावरूपपरिपूर्णकान्ताकथाकर्णनादुत्तरोत्तरमपूर्वहृदयानन्दनिष्यन्दमानन्दसन्दोहमविन्दन्नित्यर्थः। प्रायेणात्र प्रौढाः कलहान्तरिताश्च नायिकाः ॥ ४० ॥

योषित इति। पुलकरोधि रोमाञ्चव्यापि नवसङ्गमेन जन्म यस्य तत् घर्म्मवारि स्वेदोदकन्दधत्या इति सात्त्विकोक्तिः। कान्तवक्षसि पतन्त्या इत्यौत्सुक्योक्तिः। योषितो या लुलितमण्डनता उत्सृष्टप्रसाधनत्वम्। भावे तल्। सैव मण्डनम्बभूव। तादृश फलत्वात्तस्येति भावः ॥ ४१ ॥

शीधुपानविधुरासु निगृह्ण-
न्मानमाशु शिथिलीकृतलज्जः ।
संगतासु दयितैरुपलेभे
कामिनीषु मदनो नु मदो नु ॥ ४२ ॥
द्वारि चक्षुरधिपाणि कपोलौ
जीवितं त्वयि कुतः कलहोऽस्याः ।
कामिनामिति वचः पुनरुक्तं
प्रीतये नवनवत्वमियाय ॥ ४३ ॥

शीध्विति । शेतेऽनेनेति शीधु पक्वेक्षुरसविकारो मद्यविशेष-स्तस्य पानेन विधुरासु विमूढासु तथा दयितैः सङ्गतासु स्वय-मागतासु च कामिनीषु अतिमानवतीसु आशु मानं कोपं निगृह्ण-न्निवर्त्तयन् शिथिलीकृता लज्जा येन सः मदनो नु मदो न उपलेभे लक्ष्यते स्मेत्यर्थः । प्रियसमागमशीधुपानरूपोभयकारणा-भङ्गादुभयथा माननिग्रहाद्यनुभावसाधारण्याच्च सन्देहः सएवा-लङ्कारः ॥ ४२ ॥

द्वारीति । द्वारि त्वदागमनमार्गे एव चक्षुरित्यौत्सुक्योक्तिः । अधिपाणि पाणौ करे कपोलाविति चिन्तोक्तिः । किम्बहुना जीवितं त्वयि त्वदधीनम् त्वां विना न जीवतीत्यर्थः । इति गाढानु-रागोक्तिः । अतोऽस्याः कलहो विग्रहः कुत इत्येवं कामिनां प्रीतये पुनरुक्तं पुनःपुनरुच्यमानं वचो दूतीवाक्यं नवनवत्वं नवप्रकारत्वमपूर्व्व-त्वमियाय । प्रकारार्थे द्विभावः कर्मधारयवद्भावात्सुपो लुक् ।

साचि लोचनयुगन्नमयन्ती
रुन्धती दयितवक्त्रनिपातम् ।
सुभ्रुवो जनयति स्म विभूषां
सङ्गतावुपरराम च लज्जा ॥ ४४ ॥

सव्यलीकमवधीरितखिन्न
मस्थितं सपदि कोपपदेन ।
योषितः सुहृदिव स्म रुणद्धि
प्राणनाथमभिवाष्पनिपातः ॥ ४५ ॥

कान्तानुरागप्रकटनात्कामिनः प्रहृष्यन्तीति भावः । कलहान्त रितेयम् ॥ ४३ ॥

साचीति । लोचनयुगं साचि तिर्य्यक् नमयन्ती प्रिये तिर्य्यक् पात यन्ती नतु ह्रियेत्यर्थः दयितवचसि पातं रुन्धती दृष्टमपि प्रति षध्नती लज्जा सुभ्रुवो नायिकाया विभूषां शोभाञ्जनयति स्म । सङ्गतौ सुरतप्रसङ्गे सत्युपरराम च । एवं यतस्तदा न दूषणमेवेति भावः । विभाषाकर्म्मकादिति परस्मैपदम् ॥ ४४ ॥

सव्यलीकमिति । सव्यलीकं सापराधमत एवावधीरितः अव ज्ञातः सन् खिन्नस्तम् । पूर्व्वकालेत्यादिना तत्पुरुषः । सपदि कोपस्य पदेन व्याजेन अस्थितन्निर्गच्छन्तं प्राणनाथं प्रियं योषितः सम्बन्धि अभिवाष्पनिपातः आभिमुख्येनाश्रुमोचः सुहृदिव रुणद्धि स्म रुरोध । वाष्पपातस्य मन्युमोचलिङ्गतया प्रस्थानप्रतिबन्ध कत्वात् सुहृदौपम्यं । इयमधीरा खण्डिता । ज्ञातेऽन्यासङ्गिनि पत्यौ

शङ्कितायं कृतवाष्पनिपाता
मीर्ष्यया विमुखितान्दयिताय ।
मानिनीमभिमुखाहितचित्तां
शंसति स्म घनरोमविभेदः ॥ ४६ ॥
लोलदृष्टि वदनन्दयिताया
श्चुम्बति प्रियतमे रभसेन ।
व्रीडया सह विनीवि नितम्बा
दंशुकं शिथिलतामुपपेदे ॥ ४७ ॥

खण्डितेर्ष्याकषायिता । अधीरास्तु विमुञ्चन्ती विज्ञेया चात्र नायिकेति दशरूपके ॥ ४५ ॥

शङ्कितायेति । शङ्किताय नायकाय अविश्वस्ताय दयिताय ईर्ष्यया विमुखितां विमुखीकृताम् अतएव कृतवाष्पनिपातां मानिनीं घनरोमविभेदः सान्द्रपुलकोदयः अभिमुखमाहितञ्चित्तं यया तां निष्कोपामित्यर्थः शंसति स्म व्यनक्ति स्मेत्यर्थः । अन्यथा सात्त्विकानुदयादिति भावः । अत्रापि पूर्व्वोक्तैव नायिका ॥ ४६ ॥

अथ सम्भोगशृङ्गारमाह । स आन्तरो बाह्यश्च तत्र बाह्यरतमाह । लोलेति । प्रियतमे लोलदृष्टि चञ्चलेक्षणन्दयिताया वदनं रभसेन बलात्कारेण चुम्बति सति विनीवि निर्गतबन्धनमंशुकं नितम्बात् व्रीडया सह शिथिलतामुपपेदे उभयमपि शिथिलमासीदित्यर्थः अत्र व्रीडांशुकरूपसम्बन्धिभेदभिन्नहृत्तिश्लथनरूपशैथिल्ययोरभेदाध्यवसायनिबन्धनातिशयोक्तिमूलसहोक्ति

ह्रीतया गलितनीवि निरस्य
न्नन्तरीयमवलम्बितकाञ्चि ।
मण्डलीकृतपृथुस्तनभारं
सस्वजे दयितया हृदयेशः ॥ ४८ ॥

आहतानखपदैः परिरम्भा
श्चुम्बितानि घनदन्तनिपातैः ।
सौकुमार्य्यगुणसम्भृतकीर्त्ति
र्वाम एव सुरतेष्वपि कामः ॥ ४९ ॥

विशेषोऽलङ्कारः । अतएव व्रीडांशकौपम्यञ्च कल्प्यम् । अत्र वात्स्यायनः वाह्यमाभ्यन्तरञ्चेति द्विविधं रतमुच्यते । तत्राद्यञ्चुम्ब नाश्लेषनखदन्तक्षतादिकम् । द्वितीयं सुरतं वाचान्नानाकारेण कल्पितमिति ॥ ४७ ॥

ह्रीतयेति । गलितनीवि गलितबन्धनम् तथाप्यवलम्बिता काञ्ची येन तत् काञ्चीलग्नमित्यर्थः तदन्तरीयमधोंशुकम् । अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुके इत्यमरः । निरस्यन्नाक्षि पन् हृदयेशः प्रियः ह्रीतया वस्त्रापगमाल्लज्जितया । ह्रीधातोः कर्त्तरि क्तः । दयितया मण्डलीकृतः वर्त्तुलीकृतः पृथुस्तनभारो यस्मिन् कर्मणि तद्यथा तथा गाढमित्यर्थः । सस्वजे आश्लिष्टः प्रियहृष्टेः प्रतिबन्धार्थमित्यर्थः ॥ ४८ ॥

आहता इति । परिरम्भा आलिङ्गनानि नखपदैर्हेतुभिरा हताः अभिमताः । हेताविति तृतीया । तथा चुम्बनानि घन दन्तनिपातैर्गाढदन्तक्षतैर्हेतुभिराहतानीति लिङ्गविपरिणामः ।

पाणिपल्लवविधूननमन्तः
सीत्कृतानि नयनार्द्धनिमेषाः ।
योषितां रहसि गद्गदवाचा
मस्त्रतामुपययुर्म्मदनस्य ॥ ५० ॥

सुरतसुखोद्दीपकत्वान्नखदन्तचतपूर्व्वकेषु आलिङ्गनचुम्बनेष्वादरः सञ्जात इत्यर्थः। ननु सुकुमारे कामतन्त्रे कथम्पीडाकरेष्वादर इति न वाच्यमित्याह। सौकुमार्य्येति। सौकुमार्य्यमेव गुणस्तेन सम्भृतकीर्त्तिः लब्धयशाः कामः सुरतेषु संभोगेष्वपि न केवलं विप्रलम्भेष्विति भावः। वामः क्रूरएव सुकुमारः कामइति वादमात्रम्। वस्तुतस्तु पीडयन्नेव सुखमावहतीति भावः। सामान्येन विशेषणसमर्थनरूपोऽर्थान्तरन्यासः॥ ४९ ॥

अथाभ्यन्तरं रतमाह। पाणीति। रहस्येकान्ते इति विश्रम्भातिशयोक्तिः गद्गदवाचां स्खलद्गिरां योषितां सम्बन्धीनि पाणिपल्लवयोर्विधूननङ्कम्पनमन्तः सीत्कृतानि सीत्काराः। एतेन कुट्टमिताख्योभावउक्तः। अधरपीडनादौ सुखेऽपि दुःखवदुपचारः कुट्टमितमिति लक्षणात्। नयनानामर्द्धनिमेषा अर्द्धनिमीलितानि। रहस्येकान्ते गद्गदवाचां योषितामिति विशेषणसामर्थ्यात् गद्गदवाक्चेत्येतानि मदनस्यास्त्रतामुपययुरस्त्रवत्पुंसामुद्दीपनान्यासन्नित्यर्थः। अत्र सीत्कारार्द्धनिमेषादिना सुखपारवश्यं व्यज्यते। तदुक्तं रतिरहस्ये। स्रस्तता वपुषि मीलनं दृशोर्मूर्च्छना च रतिलाभलक्षणं। श्लेषयत्यजघनं मुहुर्मुहुः सीत्करोति गतलज्जिताकुलेति ॥ ५० ॥

पातुमाहितरतीन्यभिलेषु
स्तर्षयन्त्यपुनरुक्तरसानि ।
सस्मितानि वदनानि वधूनां
सोत्पलानि च मधूनि युवानः ॥ ५१ ॥

कान्तसङ्गमपराजितमन्यौ
वारुणीरसनशान्तविवादे ।
मानिनीजन उपाहितसन्धौ
सन्दधे धनुषि नेषुमनङ्गः ॥ ५२ ॥

अथ मधुपानवर्णनमारभते । पातुमित्यादिना । युवान आहितरतीनि वर्द्धितरागाणि अतएवापुनरुक्तरसानि पुनःपुनः पानेनाप्यपूर्व्वस्वादानि अतएव तर्षयन्ति तृष्णोत्पादकानि अतृप्तिकराणीत्यर्थः सस्मितानि वधूनां वदनानि सोत्पलानि मधूनि च पातुमभिलेषुरिच्छन्ति स्म । अत्र प्रस्तुतानामेव वदनानां मधूनाञ्च पानक्रियौपम्यस्य गम्यत्वात्केवलं प्राकरणिकविषयतया तुल्ययोगितालङ्कारः । प्रस्तुतानान्तथान्येषां केवलन्तुल्यधर्म्मतः । औपम्यं गम्यते यत्र सा मता तुल्ययोगितेति लक्षणात् ॥ ५१ ॥

कान्तेति । कान्तसङ्गमेन पराजितमन्यौ त्यक्तरोषे तदवधिकलात्तस्येति भावः । किञ्च वारुणीरसनेन मध्वास्वादेन शान्तो विवादो वाक्कलहादिर्यस्य तस्मिन् अतः उपाहितसन्धौ प्रियैः सह कृतसन्धाने मानिनीजने विषये अनङ्गो धनुषि इषुन्न सन्दधे सिद्धे साध्ये साधनवैयर्थ्यादिति भावः ॥ ५२ ॥

कुप्यताशु भवतानतचित्ताः
कोपितांश्च वरिवस्यत यूनः ।
इत्यनेकउपदेश इव स्म
स्वाद्यते युवतिभिर्म्मधुवारः ॥ ५३ ॥
भर्तृभिः प्रणयसंभ्रमदत्तां
वारुणीमतिरसां रसयित्वा ।
ह्रीविमोहविरहादुपलेभे
पाटवं नु हृदयन्तु बधूभिः ॥ ५४ ॥

कुप्यतेति । यूनः प्रियान् कुप्यत यूनां कोपञ्जनयत । नात्र क्रुध द्रुहेत्यादिना यूनां सम्प्रदानत्वे चतुर्थी तस्य यम्प्रति कोप इति नियमादत्र कोपस्तावत्कृत्रिम इति । आशु आनतचित्ता अनुकूल चित्ता भवत । किञ्च कोपितान् वरिवस्यत परिचरत । नमो वरिवश्चित्रङः क्यजिति क्यच् । वरिवसः परिचर्य्यायामित्यर्थे तस्य नियमश्च । इत्येवमनेकोऽनेकप्रकारोयउपदेशः प्रवर्त्तकवाक्यं स इव मधुवारोमधुपानावृत्तिः । मधुवारामधुक्रमाइत्यमरः । युवतिभिः स्वाद्यते स्म । मधुवारस्य कोपादिकार्य्यप्रवर्त्तकत्वसाम्यादुपदेश इवेत्युत्प्रेचा । अनियताः खलु मत्तचेष्टा इति भावः ॥ ५३ ॥

भर्तृभिरिति । भर्तृभिः प्रणयसंभ्रमाभ्यां प्रेमादराभ्यां दत्तां । संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपीति विश्वः । अतएवाति रसामधिकस्वादां वारुणीं वरुणात्मजां । सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजेत्यमरः । रसयित्वा आस्वाद्य बधूभिः ह्री

स्वादितः स्वयमथैधितमानं
लम्भितः प्रियतमैः सह पीतः ।
आसवः प्रतिपदम्प्रमदानां
नैकरूपरसतामिव भेजे ॥ ५५ ॥

विमोहविरहात् मदेन लज्जा जाड्यापगमाद्धेतोः पाटवं नु हृदयं नु ज्ञानविशेषन्न उपलेभे । अतएव हृदयस्य तत्कार्य्यज्ञानसामर्थ्यात् हृदयमेव प्रागसत्पश्चाल्लब्धमिति सन्देहः । अन्यथा कथं प्रियं प्रति वक्रोक्त्याद्यर्थेषु प्रवृत्तिरिति भावः । सन्देहालङ्कारः॥ ५४ ॥

स्वादितइति । स्वयं स्वादितश्चादौ स्वयमेव पीतोऽथानन्तर प्रियतमैरेधितमानं वर्द्धितवञ्चमानं यथा तथा लम्भितो पायितः स्वहस्तेन प्रापितइत्यर्थः । ततः प्रियतमैः सह पीतः युगपदेकपात्रेण पीतइत्यर्थः । आसवः प्रमदानाम्प्रतिपदम्प्रति क्षणं नैकरूपरसतामनेकविधस्वादुत्वम् । नञर्थस्य नशब्दस्य सुप्सुपेति समासः नञ्समासे नलोपः स्यात् । भेजे इव प्रापेव । प्रायेणोपचारविशेषाद्भोज्येषु रसविशेषः स्यादिति भावः । आस्वादनादिपदार्थानामनेकरसताप्राप्तिहेतुत्वात्काव्यलिङ्गन्तावदेकं स्वादनादीनामनेकधर्म्माणामेकस्मिन्नेव सर्व्वक्रमेण सम्बन्धात्पर्य्याय भेदस्य तयोश्च संसृष्टयोरनेकरसत्वोत्प्रेक्षावीजत्वात्तया सहाङ्गाङ्गि भावेन सङ्करः ॥ ५५ ॥

भ्रूविलासेति । भ्रूविलासैः सुभगान् सुन्दरान् वधूनयनानां विभ्रमाननुकर्त्तुं तैरात्मानं समीकर्त्तुमिवेति फलोत्प्रेक्षा । मृदु विलोलपलाशैरीषच्चञ्चलदलैरुत्पलैश्चषकेषु पात्रेष्वात्मधर्म्मस्य

भ्रूविलाससुभगाननुकर्त्तुं
विभ्रमानिव वधूनयनानाम् ।
आददे मृदुविलोलपलाशै
रुत्पलैश्चषकवीचिषु कम्पः ॥ ५६ ॥

ओष्ठपल्लवविदंशरुचीनां
हृद्यतामुपययौ रमणानाम् ।
फुल्ललोचनविनीलसरोजै
रङ्गनास्यचषकैर्म्मधुवारः ॥ ५७ ॥

स्वास्य यः कम्पः स आददे स्वीकृतः न तु स्वकम्पस्तस्य त्रिलो
चविशेषणेनैवोक्तत्वात्तत्स्वीकारस्य तद्योग एव । पूर्व्वं नेत्रमात्रसाम्य
भाजामुत्पलानां कम्पमानवीचियोगात्सभ्रूविलासनेत्रसाम्यं जात
मित्यर्थः ॥ ५६ ॥

ओष्ठेति । ओष्ठ एव पल्लवस्तस्य विदंशे दंशने रुचिरभिलाषो
येषान्तेषां मुखसुरापानमिषेणाधरम्पिपासतामित्यर्थः । रमणा
नां फुल्लानि लोचनान्येव विनीलसरोजानि येषु तैः अङ्गनास्या
न्येव चषकाणि पानपात्राणि । चषकोऽस्त्री पानपात्रमित्यमरः । तैर्म्म
धुवारो मधुपानावृत्तिर्हृद्यतां हृदयप्रियतामुपययौ । हृदयस्य
प्रेमइति यत्प्रयः । हृदयस्य हृल्लेखयदण्लासेष्विति हृद्भावः । रम
णविशेषणार्थहेतुककाव्यलिङ्गसङ्कीर्ण्णरूपकालङ्कारः ॥ ५७ ॥

प्राप्यतइति । गुणवताप्याश्रयवशेन गुणानां विशेषः प्रकर्षः
प्राप्यते व्यक्तं तत्तथा यदुक्तन्तथैवेत्यर्थः । हि यस्माद्दयितायाश्चान

प्राप्यते गुणवतापि गुणानां
व्यक्तमाश्रयवशेन विशेषः।
तत्तथा हि दयिताननदत्तं
व्यानशे मधु रसातिशयेन ॥ ५८ ॥
वीक्ष्य रत्नचषकेष्वतिरिक्तां
कान्तदन्तपदमण्डनलक्ष्मीम्।
जज्ञिरे बहुमताः प्रमदाना
मोष्ठयावकनुदो मधुवाराः ॥ ५९ ॥

शेन करणेन दत्तं मधु रसातिशयेन स्वादुप्रकर्षेण कर्त्रा व्यानशे व्याप्तम्। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५८ ॥

वीक्ष्येति। रत्नचषकेषु स्फटिकादिमणिपात्रेषु अतिरिक्तां यावकापगमात्पूर्व्वाभ्यधिकां कान्तस्य यद्दन्तपदमण्डनन्तस्य लक्ष्मीं शोभामतिविम्बितामिति शेषः वीक्ष्य ओष्ठयावकनुदोऽधरलाक्षारागहारिणोमधुवारामधुपानाभ्यासाः प्रमदानां बहुमताअभिमताः। वर्त्तमाने क्तः तद्योगात् षष्ठी। जज्ञिरे जाताः तेषां प्रियानुरागचिह्नप्रकाशकत्वादिति भावः ॥ ५९ ॥

मधुपानादिलोचनेषु रागोत्पत्तिरधरेभ्यस्तु लाक्षारागनिवृत्तिर्म्मुखाननयोरन्योन्यगन्धसंक्रान्तिरिति स्थिते सत्युत्प्रेक्ष्यते। लोचनेति। लोचने चाधरस्य लोचनाधरं। समुद्राभ्रादिति व्यभिचारज्ञापकात् नाचाधरशब्दस्य पूर्व्वनिपातः। हृतस्ताचावाहृतस्येति विशेषणसमासः। लोचनाधरस्य कृताहृतोरागोयया सा तयो

लोचनाधरकृताहृतरागा
वासिताननविशेषितगन्धा ।
वारुणी परगुणात्मगुणानां
व्यत्ययं विनिमयं नु वितेने ॥ ६० ॥

का लोचनयोः कृतरागा अधरादासमन्तात् हृतरागा चेत्यर्थः । पञ्चम्यास्सार्थसम्बन्धात् सामान्यस्य योग्यविशेषणपर्य्यवसाननियमेनाधिकरणापादानार्थयोराक्षेपात् । तथा चाधरलोचनपरगुणयोः रागतद्विरहयोः स्थानविपरीतवृत्तिं कृतवतीत्यर्थः । तथा वासितेन स्वगन्धसंक्रान्तिसुरभितेनाननेन विशेषितोऽतिशयितोगन्धो यस्याः सा । यद्वा वासितानना चासौ अर्थादाननेनैव विशेषितगन्धा चेति कृतबहुव्रीहिविशेषणसमासः । उभयथापि आननसंक्रान्तस्वगन्धा स्वसंक्रान्ताननगन्धा चेत्यर्थः । एवं भूता वारुणी मदिरा परगुणात्मगुणानामपरयोर्लोचनाधरयोः गुणौ च परस्याननस्य गुणश्चात्मनोवारुण्याः गुणश्च परगुणात्मगुणास्तेषामपरगुणानामात्मगुणानां व्यत्ययं नु विनिमयं नु वितेने विस्तारयामास । चित्तेन प्रामादिकी वस्तुपरिवृत्तिर्व्यत्ययः । बुद्धिपूर्व्वा तु वस्तुपरिवृत्तिर्विनिमयः । अत्र तन्त्रोच्चरितस्य परगुणशब्दस्यावृत्त्या परगुणौ च परगुणात्मगुणौ चेति विग्रहः कथञ्चिद् गत्या बोढव्यः उपमानपूर्व्वपदबहुव्रीहिवत् । तथा चायमर्थः परगुणयोरधरलोचनगुणयोरागतद्विरहयोर्व्यत्ययन्नु विनिमयन्नु वितेने तथा परगुणात्मगुणयोः आननगन्धात्मगन्धयोश्च व्यत्ययं नु विनिमयं नु वितेने । अन्यथा कथमन्यस्मिन्नन्यधर्मोपलम्भः

तुल्यरूपमसितोत्पलमक्ष्णोः
कर्णगन्निरुपकारि विदित्वा ।
योषितः सुहृदिव प्रविभेजे
लम्भितेक्षणरुचिर्म्मदरागः ॥ ६१ ॥

सम्भवतीति भावः । अत्र लोचनाधररागयोस्तद्भावयोर्वा भेदेऽप्य भेदाध्यवसायादेकत्ववाचोयुक्तिः तस्मात्तन्मूलातिशयोक्त्यनुप्राणिता सेयं व्यत्ययविनिमययोरन्यतरकरणोत्प्रेक्षेति संक्षेपः सा च प्रतीय माना व्यञ्जकाप्रयोगात् । नु शब्दस्तु संशये ॥ ६० ॥

तुल्येति । अक्ष्णोस्तुल्यरूपमक्षितुल्याकृति योषितः कर्णगङ्कर्णा वतंसीकृतमसितोत्पलन्निरुपकारि अनुपकारकं विदित्वा ज्ञात्वा तत्कार्य्यशोभायाः कर्णान्तविश्रान्तेनाक्ष्णैव कृतत्वादिति भावः । मद रागः सुहृदिव उत्पलस्य बन्धुरिवानिष्टवारकत्वादिति भावः । लम्भितेक्षणरुचिराहृतनयनकान्तिः सन्प्रविभेजे वर्णान्तरापाद नेन प्रविभक्तवान् । अवैलक्षण्यकरादक्ष्णः व्यावर्त्तयामास ततो विच्छित्तिकरत्वादिति भावः ॥ ६१ ॥

क्षीणेति । अतिपानैः क्षीणयावकरसः क्षीणलाक्षारागोऽपि कान्तस्य दयितस्य दन्तपदेन दन्तक्षतेन सम्भृता शोभा यस्य सः सध्वा अधरपल्लवरागोऽतितरामतिमात्रं । अतिशब्दात्तरप्प्रत्यये किमेत्तिङव्ययेत्यादिनाआम्प्रत्ययः तद्धितश्चासर्वविभक्तिरित्यव्य यसंज्ञा । सान्द्रतां घनत्वमाययाविव प्रियोपभोगचिह्नमण्डि तानां कामिन्यवयवानां किमन्यैर्म्मण्डनैरिति भावः । तत्र क्षीण

क्षीणयावकरसोऽप्यतिपानैः
कान्तदन्तपदलब्धितशोभः ।
आययावतितरामिव बध्वाः
सान्द्रतामधरपल्लवरागः ॥ ६२ ॥
रागकान्तनयनेषु नितान्तं
विद्रुमारुणकपोलतलेषु ।
सर्व्वगापि ददृशे वनितानां
न्दर्प्पणेष्विव मुखेषु मदश्रीः ॥ ६३ ॥

स्यापि सान्द्रतेति विरोधात् कान्तदन्तेत्यादिविशेषणगत्या सां न्द्रत्वे हेतुतया काव्यलिङ्गन्तत्सङ्कीर्णा चोत्प्रेचा ॥ ६२ ॥

रागेति । वनितानां सर्व्वगापि सर्वाङ्गगतापि । अन्तात्यन्ते त्यादिना डः । मदश्रीरागेण कान्तानि नयनानि येषु तेषु विद्रुम वदरुणानि कपोलतलानि येषु तेषु मुखेषु दर्पणेष्विव नितान्त न्ददृशे तेषां नयनादिनैर्मल्येन रागाभिव्यक्तिसम्भवादिति भावः। अत्र मदश्रीः सर्व्वगतापि मुखेष्वेव ददृशे इति विरोधः तस्य मुखविशेषणैः समाधानात्काव्यलिङ्गानुप्राणितो विरोधवदाभासो ऽलङ्कारः । सचोपमया संसृज्यते ॥ ६३ ॥

बद्धेति । बद्धा कोपेन विकृतिर्याभिस्ता स्तथाभूताश्पि रामाः कर्म्म चारुता तासां सौन्दर्य्यङ्कर्त्री अभिमततामियवाल्लभ्यमुप निन्ये । सौन्दर्ये हि विकृतिमपि रोचयतइति भावः। मधुमदोदयि तानां वश्यतां विधेयत्वमुपनिन्ये । तथाहि । सर्व्वआत्मवर्गहित

बद्धकोपविकृतीरपि रामा
आरुताभिमततामुपनिन्ये ।
वश्यतां मधुमदो दयिताना
मात्मवर्गहितमिच्छति सर्व्वः ॥ ६४ ॥

वाससां शिथिलतामुपनाभि
ह्रीनिरासमपदे कुपितानि ।
योषितां विदधती गुणपक्षे
निर्म्ममार्ज्ज मदिरा वचनीयम् ॥ ६५ ॥

मिच्छति अतश्चारुता स्त्रीत्वात् स्त्रीणामुपचकार मधुमदस्य पुंस्त्वात्पुंसां इति युक्तमित्यर्थः । अत्र विकृता अप्यभिमताः कुपिता अपि वश्या इति विरोधस्य चारुतामदाभ्यां समाधाना दुभयत्रापि विरोधाभासोऽभवन्नर्थान्तरन्यासेन संसृज्यते ॥ ६४ ॥

वाससामिति । उपनाभि नाभिसमीपे वाससां शिथिलतां ह्रीनिरासं लज्जात्यागमपदे कुपितानि अस्थानकोपांश्च गुणपक्षे गुणकोटौ विदधती निवेशयन्ती दोषानप्येतान् गुणान् कुर्व्वतीत्यर्थः । मदिरापि योषितां वचनीयम् । न नाभिन्दर्शयेदिति शास्त्रनिषिद्धाचरणनिन्दां निर्म्ममार्ज्ज । तथा दोषाणामपि वस्त्रशैथिल्यादीनान्तदानीं गुणत्वान्न कश्चिद्वचनीयावकाश इत्यर्थः ॥ ६५ ॥

भर्तृष्विति । उपसखि सखीसमीपे । समीपार्थेऽव्ययीभावः । आत्मनः स्वदेशान् । आत्मा जीवे धृतौ देहे स्वभावे परमात्मनी

भर्तृषूपसखि निक्षिपतीना-
मात्मनामधुमदोद्यमितानाम् ।
व्रीडया विफलया वनितानां
न स्थितं न विगतं हृदयेषु ॥ ६६ ॥
रुन्धती नयनवाक्यविकाशं
सादितोभयकरा परिरम्भे ।
व्रीडितस्य ललितं युवतीनां
क्षीवता बहुगुणैरनुजह्रे ॥ ६७ ॥

ति वैजयन्ती । भर्तृषु निक्षिपतीनां निपातयन्तीनाम्भर्तॄणामुपरि पतन्तीनामित्यर्थः । आच्छीनद्योर्नुमिति विकल्पान्नुमभावः । कुतः मधुमदेनोद्यमितानां प्रेरितानां नतु स्वेच्छयेति भावः । वनितानामनुरक्तस्त्रीणां । वनिता जनितात्यर्थानुरागयाषितोति विश्वः । हृदयेषु विफलया अनुचिताचरणादिति भावः । व्रीडया न स्थितं न विगतं वैफल्यात्तस्यामदोपाधिकत्वाच्चेति भावः । अत एव नोभयनिषेधविरोधः ॥ ६६ ॥

रुन्धतीति । नयनानां वाक्यानाञ्च विकाशम्प्रागल्भ्यं रुन्धती प्रतिबध्नती । तथा परिरम्भे आलिङ्गने सादितौ स्तम्भितावुभौ करौ यया सा युवतीनां सम्बन्धिनी क्षीवता मत्तता । अनुपसर्गात्फुल्लक्षीवकृशोल्लाघादिति निपातनात्साधुः । क्षीवा मत्ता तस्याभावः क्षीवता । त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः । बहुगुणैर्दृष्टिमन्दोषादिभिर्व्रीडितस्य व्रीडायाः । भावे क्तः । ललितं विलासं अनु

योषिदुद्धतमनोभवरागा
मानवत्यपि ययौ दयिताङ्कम्।
कारयत्यनिभृता गुणदोषे
वारुणी खलु रहस्यविभेदम्॥ ६८॥

आहिते नु मधुना मधुरत्वे
चेष्टितस्य गमिते नु विकाशम्।
आबभौ नव इवोद्धतरागः
कामिनीष्ववसरः कुसुमेषोः॥ ६९॥

मन्ने अनुचक्रे। कर्त्तरि लिट्। व्रीडाकार्य्यकरत्वाद्व्रीडानुकरण मित्युपमालङ्कारः॥ ६७॥

योषिदिति। उद्धत उत्कटो मनोभवेन यो रागः स यस्याः सा योषिन्मानवत्यपि दयितस्याङ्कं ययौ यतो मानाद्रागो बलीयानिति भावः। लाघवदोषम्परिहरति। कारयतीति। अनिभृता चपला न कार्य्यकारिणीत्यर्थः। वारुणी मदिरा गुणेषु दोषेषु च विषये। सर्वोऽपि द्वन्दो विभाषयैकवद्भवति। रहस्यविभेदं रहस्यभङ्ग का रयति खलु। बलान्निगूहितावपि गुणदोषौ प्रकाशयतीत्यर्थः। यतो निगूढरागप्रकटनम्मकटमानत्यागस्य प्रमत्तायाम लाघवमा वहति अबुद्धिपूर्व्वकत्वादिति भावः॥ ६८॥

आहितइति। मधुना मद्येन चेष्टितस्य व्यापारस्य मधुरत्वे माधर्य्ये आहिते नु प्रागसत्येव मनोहरत्वे सम्प्रत्युत्पादिते वा। विकाशङ्गमिते नु प्राक्सत्येव माधुर्य्ये प्रकर्षम्प्रापिते वा उद्धतरागः

मा गमन्मदविमूढधियो नः
प्रोज्झ्य रन्तुमिति शङ्कितनाथाः ।
योषितो न मदिरां भृशमीषुः
प्रेम पश्यति भयान्यपदेऽपि ॥ ७० ॥

छद्दिमरागः । अतएव कुसुमेषोः कामिनीष्ववसरः प्रवेशो नव इवाबभौ नित्यसन्निहितोऽपि मदनः कामिनीषु मदकृततात्कालिकचेष्टामाधुर्य्याद्रागोद्रेके सत्यऽपूर्व्ववदुद्दीप्तोऽभूदित्यर्थः । संशयानुप्राणितेयमुत्प्रेक्षा ॥ ६९ ॥

मा गमन्निति । शङ्कितनाथाश्विस्वस्तपुरुषाः योषितोमदेन विमूढधियः स्तब्धबुद्धयोनोऽस्मान्प्रोज्झ्य विसृज्य । प्रपूर्व्वादुज्झतेः समासेऽनञ्पूर्व्वे क्त्वोल्यप् । रन्तुं मा गमन्नगच्छन्त्विति मनीषयेति शेषः । गमेर्माङि लुङ् न माङ्योग इत्यडागमप्रतिषेधः । मदिरां भृशमतिमात्रं नेषुर्नैच्छन्ति स्म किन्तु भर्त्तृवियोगभयादीषदेव पपुरित्यर्थः । तथाहि । प्रेम स्नेहः अपदेऽस्थानेऽपि भयान्यनिष्टानि पश्यत्युत्प्रेक्षते शङ्कत इति यावत् । शङ्काहेतौ प्रेम्णि कर्त्तृत्वोपचारः ॥ ७० ॥

चित्तेति । चित्तस्य निर्वृतिविधायि सुखकरं विविक्तं रहः । विविक्तं रहसि स्मृतमिति विश्वः । मन्मथः मधुमदो मद्यमदः शशिभासश्चन्द्रिकाः दयितैः सह सङ्गमश्च । वृद्धोयूनेति निर्द्देशात्सहशब्दाप्रयोगेऽपि सहार्थे तृतीया । एतानि प्रमदानां प्रेम वियोगासहत्वावस्थाम्भोगं काममपि भुवं काञ्चिद्दशां नयन्ति स्म रत्यवस्थामप्यतिक्रम्य शृङ्गारावस्थां क्रीडामयीं निन्युरित्यर्थः । प्रेमा

चित्तनिर्वृतिविधायि विविक्तं
मन्मथो मधुमदः शशिभासः ।
सङ्गमश्च दयितैः स्म नयन्ति
प्रेम कामपि भुवम्प्रमदानाम् ॥ ७१ ॥
धार्ष्ट्यलङ्घितयथोचितभूमौ
निर्द्दयं विलुलितालकमाल्ये ।
मानिनीरतिविधौ कुसुमेषु
र्म्मत्तमत्त इव विभ्रममाप ॥ ७२ ॥

भिलाषो रागश्च स्नेहः प्रेम रतिस्तथा । शृङ्गारश्चेति सम्भोगः सप्तावस्थः प्रकीर्त्तित इत्युक्तं रसरत्नाकरे । प्रेमा दृष्टा रम्येषु तच्चिन्ताप्यभिलाषकः । रागस्तत्सङ्गबुद्धिः स्यात् स्नेहस्तत्प्रवण क्रिया । तद्वियोगासहं प्रेम रतिस्तत्सहवर्त्तनं । शृङ्गारस्तत्समं क्रीडा सम्भोगः सप्तधाक्रम इति ॥ ७१ ॥

क्रीडावस्थामाह । धार्ष्ट्येति । धार्ष्ट्येन प्रागल्भ्येन लङ्घिता यथोचिता योग्या भूमिमर्य्यादा यस्मिन् तथोक्ते । चुम्बनताडनमणित सीत्कारपुरुषायितादौ स्वयमुच्छृङ्खलवृत्तिरिति भावः । निर्द्दयं यथा तथा विलुलितानि आकर्षणाकुलितान्यलकमाल्यानि यस्मिं स्तस्मिन्मानिनीरतिविधौ स्त्रीसुरते कुसुमेषुः कामः मत्तमत्तो मत्त प्रकार इव विभ्रमं विजृम्भणमाप प्राप । मत्तः किन्न करोतीति भावः । कारयितरि कर्त्तृत्वोपचारादुत्प्रेक्षा ॥ ७२ ॥

सीध्विति । सीधुपानेन मद्यपानेन विधुरेषु विक्लवेषु । मैरेयमासवः सीधुरित्यमरः । अत एव वपुःषु अङ्गेषु निम्नतामिव

शीधुपानविधुरेषु वधूनां
निघ्नतामुपगतेषु वपुःषु ।
ईहितं रतिरसाहितभावं
वीतलक्ष्यमपि कामिषु रेजे ॥ ७३ ॥

अन्योन्यरक्तमनसामथ बिभ्रतीनां
श्चेतोभुवो हरिसखाप्सरसां निदेशम् ।
वैबोधिकध्वनिविभावितपश्चिमार्द्धा
सा संहृतेव परिवृत्तिमियाय रात्रिः ॥ ७४ ॥

पराधीनतामुपगतेषु सत्सु । अधीनो निघ्न आयत्त इत्यमरः । वधूनां सम्बन्धि रतिरसे सुरतरसास्वादे आहितभावन्दत्तचित्तं कामिषु विषये ईहितञ्चुम्बनताडनादिचेष्टितं वीतलक्ष्यन्निर्विषयमस्थानकृतमपीत्यर्थः । रेजे रागिणां स्खलितमपि शोभत इति भावः । विरोधालङ्कारः ॥ ७३ ॥

अन्योन्येति । अथ हरिसखादिन्द्रसचिवात् गन्धर्वात्तेषामप्सरसां च अन्योन्यरक्तमनसाम्परस्परानुरक्तचित्तानाञ्चेतोभुवः कामस्य निदेशमाज्ञां बिभ्रतीनां स्मरविधेयानान्तासु रममाणास्वेवेत्यर्थः । षष्ठी चानादरे इति षष्ठी । विबोधनं शीलमेषान्ते वैबोधिका वैतालिकाः । शीलमिति ठक् । तेषां ध्वनिभिर्मङ्गलरवैर्विभावितोऽभ्यूहितो ज्ञातः पश्चिमार्द्धश्चरमभागो यस्याः सा तथोक्ता सा रात्रिः संहृता सङ्क्षिप्तेवेत्युत्प्रेक्षा । सुखिनाम्भूयानपि कालो लघीयानिव भवतीति भावः । परिवृत्तिं विवृत्तिमियाय प्रभातकल्पाभूदित्यर्थः ॥ ७४ ॥

निद्राविनोदितनितान्तरतिक्लमाना
मायामिमङ्गलनिनादविबोधितानाम्।
रामासु भाविविरहाकुलितासु यूना
न्तत्पूर्व्वतामिव समादधिरे रतानि ॥ ७५ ॥
कान्ताजनं सुरतखेदनिमीलिताक्षं
संवाहितुं समुपयानिव मन्दमन्दम्।
हर्म्म्येषु माल्यमदिरापरिभोगगन्धा
नाविश्चकार रजनीपरिवृत्तिवायुः ॥ ७६ ॥

निद्रेति। निद्रया विनोदितोऽपनीतो नितान्तं अत्यर्थं योरत्याः क्लमः स येषान्तेषां आयामिभिरायामवद्भिर्दीर्घैर्मङ्गलनिनादैः वैबोधिकध्वनिभिर्विबोधितानाम्। यूनां रामासु। सुन्दरी रमणी रामेत्यमरः। भाविविरहेणाकुलितासु सतीषु रतानि तान्येव पूर्व्वाणि प्रथमानि तत्पूर्व्वाणि तेषां भावस्तत्पूर्व्वतां। भावे तल् प्रत्ययः। समादधिरे प्रापुरित्युत्प्रेक्षा आद्यसुरतवदादरास्पदं ममत्वदित्यर्थः। यदुत्तरकालं दुर्लभन्तदतितृष्णयानुभूयतइत्यर्थः ॥ ७५ ॥

कान्तेति। सुरतखेदेन निमीलितान्यक्षीणि येन तं कान्ताजनं संवाहितुं सेवितुमिव खेदापनोदार्थमङ्गमर्द्दनङ्कर्त्तुमिवेत्यर्थः। संवाहनं वाहनेऽपि नरादेरङ्गमर्द्दनइति विश्वः। वाहप्रयत्नइति धातोरण्यन्तात्तुमुन्। अन्यथा णिजुग्रहणे संवाहयितुमिति स्यात्। मन्दमन्दमन्दप्रकारं। प्रकारे गुणवचनस्येति द्विर्भावे कर्म्म

आमोदवासितचलाधरपल्लवेषु
निद्राकषायितविपाटललोचनेषु ।
व्यामृष्टपत्रतिलकेषु विलासिनीनां
शोभाम्बबन्ध वदनेषु मदावशेषः ॥ ७७ ॥

धारयवङ्गावालुपोलुक् । इमुपयान्संवान् रजनीपरिवृत्तिवायु निशावसानमरुत् । हर्म्येषु माल्यानि च मदिरा च परिभोगो विमर्दश्च तेषाङ्गन्धानाविश्चकार वहिःप्रसर्पयामासेत्यर्थः । अत्र संवाहितुमिवेत्युत्प्रेक्षा । मान्द्यगुणमूलत्वाद्गुणनिमित्तक्रियाफलो त्प्रेक्षा ॥ ७६ ॥

आमोदेति । आमोदेन मद्यगन्धेन वासिताः सुरभिताश्चला रष्टमुक्तत्वात् स्फुरन्तश्चाधरपल्लवायेषु तेषु निद्रया कषायितान्य परक्तानि विपाटलानि लोचनानि येषु तेषु । कषायस्तुवरे न स्त्री निर्य्यासे रञ्जकादिके । सुरभावपटौ रक्ते सुन्दरे लवणे ऽपि चेति केशवः । व्यामृष्टानि प्रमृष्टानि पत्राणि तिलकाश्च येषा न्तेषु विलासिनीनां वदनेषु मदावशेषः शोभाम्बबन्ध । मण्डना न्तरापाये मदशेषएव मण्डनं बभूवेत्यर्थः । स्त्रीणां मदएव विभूषणमिति भावः ॥ ७७ ॥

गतवतीति । अङ्गरागेऽङ्गविलेपने नखरेखासु नखपदेषु लक्ष्यतां दृश्यताङ्गतवति सति विमर्दात्तन्मात्रावशेषे इतीत्यर्थः । किञ्च विम्बतुल्या अधराः विम्बाधराः । शाकपार्थिवादित्वात् मध्यम पदलोपी समानाधिकरणसमासइति वामनः । समदैर्दयितैः पीताः पीडिताः अतएवातिपीडनादा ताम्राश्रमत्वाद्रक्ता विम्बा

गतवति नखलेखालक्ष्यतामङ्गरागे
समददयितपीताताम्रबिम्बाधराणाम् ।
विरहविधुरमिष्टा सत्सखीवाङ्गनानां
हृदयमवललम्बे रात्रिसम्भोगलक्ष्मीः ॥७८॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये सुरसुन्दरीसम्भोगवर्णनं नाम नवमः सर्गः ॥ ९ ॥

धरायासान्तासामङ्गनानां सम्बन्धि विरहेणाक्लिकेन वियोगेन विधुरं विकलं हृदयं रात्रिसम्भोगलक्ष्मीः नखपदादिशोभेत्यर्थः । इष्टा आप्ता सत्सखीव निपुणसहचरीवावललम्बे धारयामास । प्रियसम्भोगचिह्नशोभा स्पष्टा बभूवेत्यर्थः । प्रियोपभोगचिह्नशोभावलोकनलालसाः कथं विरहं सहन्तइत्यर्थः । श्रुतिपूर्व्वोपमालङ्कारः । मालिनीवृत्तम् । लक्षणमुक्तम् ॥ ७८ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां नवमस्सर्गः ॥ ९ ॥

॥ समाप्तमिदमूर्ध्वार्द्धम् ॥

## ॥ किरातार्ज्जुनीयम् ॥

### ॥ उत्तरार्द्धम् ॥

### ॥ दशमस्सर्गः ॥

अथ परिमलजामवाप्य लक्ष्मी
मवयवदीपितमण्डनश्रियस्ताः ।
वसतिमभिविहाय रम्यहावाः
सुरपतिसूनुविलोभनाय जग्मुः ॥ १ ॥

अथागन्तुकसहजशोभासम्पन्नतया समग्रसाधनाः स्त्रियो मुनिमनःप्रलोभनार्थं प्रास्थन्नित्याह । अथेति । अथ प्रभाते परिमलजां सम्भोगसम्भूतां लक्ष्मीं शोभामवाप्य । सम्भोगः स्यात्परिमल इति वैजयन्ती । सम्भोगात् स्त्रियः शोभन्त इति भावः । एतेनागन्तुकशोभासम्पत्तिरुक्ता । अतएव सुरतादिवर्णनस्य प्रस्तुतोपयोगित्वञ्चोक्तं । अथ सहजशोभासम्पत्तिमाह । अवयवेति । अवयवैस्तनादिभिर्दीपिता मण्डिता मण्डनश्रीः प्रसाधनशोभा याभिस्ताः । रम्यहावा मनोहरविलासास्ताः स्त्रियः । हावो विलास इष्टायामिति विश्वः । वसतिं शिविरं अभिविहाय सर्व्वतस्त्यक्त्वा सुरपतिसूनोरर्ज्जुनस्य विलोभनाय जग्मुः । अत्रावयवदीपकतया प्रसिद्धस्य तद्दीप्यत्वासम्बन्धेऽपि तत्सम्बन्धाभिधानादवयवसौन्दर्यातिशयद्योतनार्थत्वादतिशयोक्तिरलङ्कारः । अस्मिन् सर्गे पुष्पिताग्रावृत्तम् । अयुजि

द्रुतपदमभियातुमिच्छतीना
ङ्गगनपरिक्रमलाघवेन तासाम् ।
अवनिषु चरणैः पृथुस्तनीना
मलघुनितम्बतया चिरं निषेदे ॥ २ ॥
निहितसरसयावकैर्बभासे
चरणतलैः कृतपद्धतिर्वधूनाम् ।
अविरलविततेव शक्रगोपै
ररुणितनीलतृणोलपा धरित्री ॥ ३ ॥

नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति लक्षणात् ॥ १ ॥

द्रुतेति । गगनपरिक्रमलाघवेन गगनगमनवेगेन द्रुतपदं यथा तथाऽभियातुङ्गन्तुमिच्छतीनां पृथुस्तनीनान्तासामप्सरसाम् अलघुनितम्बतया न लघवो नितम्बा यासान्तासाम्भावस्तत्ता तया चरणैरवनिषु चिरन्निषेदे स्थितम् । अभ्यासपाटवेन मनसा त्वरमाणानामपि तासां स्तनजघनभाराच्चरणा नोच्चलुरित्यर्थः ॥ २ ॥

निहितेति । निहिताः आरोपिताः सरसयावकाः सान्द्रलाक्षारागाः येषु तैर्वधूनाञ्चरणतलैः चरणन्यासैः कृतपद्धतिः कृतमार्गरेखा । अतएवारुणिताऽरुणीकृताः नीलास्तृणोलपास्तृणानि दूर्वादीनि उलपा बल्वजाख्यास्तृणविशेषाश्च यस्याः सा । उलपा बल्वजाः प्रोक्ता इति हलायुधः । उलपाश्चीरहणानीति क्षीर

ध्वनिरगविवरेषु नूपुराणां
पृथुरशनागुणशिञ्जितानुयातः ।
प्रतिरवविततो वनानि चक्रे
मुखरसमुत्सुकहंससारसानि ॥ ४ ॥

स्वामी । ब्राह्मणपरिव्राजकवदुत्पानां पृथग्निर्देशः । धरित्री शक्रगोपैरिन्द्रगोपाख्यैः कीटकैः । इन्द्रगोपस्त्वग्निरज इति हेमः । अविरलं निरन्तरं यथा तथा वितता व्याप्तेवेत्युत्प्रेक्षा । आबभासे ॥ ३ ॥

ध्वनिरिति । अगविवरेषु नगरन्ध्रेषु गुहास्वित्यर्थः । प्रतिरवैः प्रतिध्वनिभिः । विततः सम्मूर्च्छितः पृथुभिः रशनागुणानां शिञ्जितैः स्वनितैरनुयातोऽनुगतो मिलितइति यावत् । अश्नोतेर्युच् रशादेशश्च रशना काञ्ची तालव्यशकारवानयं जिह्वावाचीत दन्त्यसकारवानिति सिद्धान्तः । काञ्ची सप्तकी रशना तथेत्यमरः । स्वनिते वस्त्रपर्णानां भूषणानान्तु शिञ्जितमित्यमरः । नूपुराणां ध्वनिर्ध्वानः वनानि मुखराः शब्दायमानाः समुत्सुकाः उत्कण्ठिता हंसास्सारसाश्च येषान्तानि चक्रे । अत्र हंसादिमुखरसमुत्सुकीकरणरूपेण वस्तुना तेषां नूपुरादिध्वनौ सादृश्याद्धंससारसान्तरकूजितभ्रान्तिप्रतीतेर्भ्रान्तिमदलङ्कारो व्यज्यते ॥ ४ ॥

अवचयेति । अवचयः पुष्पफलादिच्छेदनम्परिभोगउपभोगः । तद्वन्ति हिंस्राः घातुकाः व्याघ्रादयः । शरारुर्घातुको हिंस्र इत्यमरः । तैः सहचरिताः सहचरन्तः । कर्त्तरि क्तः । मतिबुद्धीत्यादिसूत्रे चकारात् शीलितादिवद्वर्त्तमानार्थता । अन्ये हिंस्रेतरे

अवचयपरिभोगवन्ति हिंस्रैः
सहचरितान्यमृगाणि काननानि ।
अभिदधुरभितोमुनिं वधूभ्यः
समुदितसाध्वसविक्लवञ्च चेतः ॥ ५ ॥
नृपतिमुनिपरिग्रहेण सा भूः
सुरसचिवाप्सरसाञ्जहार तेजः ।
उपहितपरमप्रभावधाम्नां
नहि जयिनान्तपसामलङ्घ्यमस्ति ॥ ६ ॥

मृगाहरिणादयोयेषु तानि सहचरितान्यमृगाणि काननानि । तथा समुदितेन साध्वसेन विक्लवं विवशञ्चेतश्च वधूभ्यः । क्रियाग्रहणमपि कर्त्तव्यमिति सम्प्रदानत्वाच्चतुर्थी । अभितोमुनिमभिदधुः सूचयामासुरित्यर्थः । अवचयादिलिङ्गचतुष्टयेनासन्नोमुनिरित्यन्वमीयतेत्यर्थः ॥ ५ ॥

नृपतिमुनिपरिग्रहेणेति । सा भूः नृपतिरेव मुनिः तस्य परिग्रहेणाधिष्ठानेन हेतुना सुरसचिवानाङ्गन्धर्व्वाणामप्सरसाञ्च तेजोजहार । तदाश्रमप्रवेशादेव निस्तेजस्काअभूवन्नित्यर्थः । ननु कथं मानुषेणामानुषतेजोनिरस्तमित्याशङ्क्याह । हि यस्मादुपहिते आहिते परमे प्रभावधाम्नी सामर्थ्यतेजसी येषान्तेषाञ्जयिनाञ्जयनशीलानां । महतामिति पाठे महतामुत्कटानान्तपसामलङ्घ्यं नास्ति किमप्यसाध्यं नास्तीति भावः ॥ ६ ॥

सचकितमिति । विस्मयाकुलाभिस्ताभिः स्त्रीभिः कर्त्रीभिः शुचयः सिकतायासु तासु पादरेखाभिव्यक्तियोग्यास्वित्यर्थः ।

सचकितमिव विस्मयाकुलाभिः
शुचिसिकतास्वतिमानुषाणि ताभिः।
क्षितिषु ददृशिरे पदानि जिष्णो-
रुपहितकेतुरथाङ्गलाञ्छनानि ॥ ७ ॥
अतिशयितवनान्तरद्युतीना-
मफलकुसुमावचयेऽपि तद्विधानाम्।
ऋतुरिव तरुवीरुधां समृद्ध्या
युवतिजनैर्जगृहे मुनिप्रभावः ॥ ८ ॥

क्षितिषु उपहितानि विन्यस्तानि केतुरथाङ्गलाञ्छनानि रेखाख्यरूपध्वजचक्राण्येव चिह्नानि येषु तानि अतएवातिमानुषाणि जिष्णोरर्ज्जुनस्य पदानि सचकितमिव सभयमिव यथा तथा ददृशिरे दृष्टानि। अद्भुतवस्तुदर्शनाद्भयविस्मयौ भवतइति भावः ॥ ७ ॥

अतिशयितेति। अतिशयिता अतिक्रान्ता वनान्तराणां द्युतिर्याभिः तासां कुतः फलानां कुसुमानाञ्चावचयेऽपि लवनेऽपि सैव विधा प्रकारोयासान्तद्विधानां तथैव समग्राणामित्यर्थः। तरूणां वीरुधाञ्च समृद्ध्या लिङ्गेन युवतिजनैर्मुनिप्रभावः ऋतुरिव जगृहे निश्चितः कारणतयेति शेषः। उपमालङ्कारः ॥ ८ ॥

मृदितेति। ससलिलमार्द्रं यद्वल्कलन्तदेव भारस्तेन भुग्नशाखोनम्रशाखः वल्कं वल्कलमस्त्रियामित्यमरः अतएव। मृदितकिसलयोविलुलितपल्लवः। कपिनेति प्रतिषेधात् न मृदेर्गुणः।

मुदितकिसलयः सुराङ्गनानां
ससलिलवल्कलभारभुग्नशाखः ।
बहुमतिमधिकां ययावशोकः
परिजनतापि गुणाय सद्गुणानाम् ॥ ९ ॥

यमनियमकृशीकृतस्थिराङ्गः
परिददृशे विधृतायुधः स ताभिः ।
अनुपमशमदीप्ततागरीयान्
कृतपदपङ्क्तिरथर्व्वणेव वेदः ॥ १० ॥

अशोकोवृक्षविशेषः सुराङ्गनानामप्सरसां सम्बन्धिनीमधिकाम्बहुमतिं तत्कृतकसम्मानं सञ्जलत्वेवी धन्योयमिति ययौ प्राप । ननु सेवकेषु का श्लाघेत्यत्राह । परीति । सद्गुणानां महतां परिजनतापि अनुचरत्वमपि । भावे तल् । गुणायोत्कर्षाय भवतीति शेषः । एतेन तासां मुनेः प्रभावदर्शनादेव पारवश्यं गम्यते ॥ ९ ॥

यमेति । यमो देशकालाद्यनपेक्षया शुद्धिहेतुरहिंसादिः नियमस्तदपेक्षया शुद्धिहेतुः तपःस्वाध्यायादिः ताभ्यां कृशीकृतान्यपि स्थिराणि दृढानि अङ्गानि यस्य सः । विधृतायुधः धृतशस्त्रः अतएव तपःचात्रयुक्तः सोऽर्ज्जुनः शमः शान्तिरभ्युदयकाण्डे दीप्तता उग्रता अभिचारकाण्डे ताभ्यामनुपमाभ्यां गरीयान् दृश्यः । अथर्वणा वशिष्ठेन कृता रचिता पदानाम्पङ्क्तिरानुपूर्व्वी यस्य स वेदस्तुर्थवेद इत्यर्थः । अथर्वणस्तु मन्त्रोद्धारो वशिष्ठकृत इत्यागमः । स इव ताभिः स्त्रीभिः परिददृशे दृष्टः ॥ १० ॥

शशधर इव लोचनाभिरामै
र्गगनविसारिभिरंशुभिः परीतः ।
शिखरनिचयमेकसानुसद्मा
सकलमिवापि दधन्महीधरस्य ॥ ११ ॥
सुरसरिति परन्तपोऽधिगच्छ
न्विधृतपिशङ्गबृहज्जटाकलापः ।
हविरिव विततः शिखासमूहैः
समभिलषन्नुपवेदि जातवेदाः ॥ १२ ॥

अथ चतुर्भिस्तमेव विशिनष्टि । शशधरेत्यादिभिः । शश धरश्चन्द्र इव लोचनाभिरामैराह्लादकैर्गगनविसारिभिरंशुभि स्तेजोभिः । परीतोव्याप्तोऽम्बरवत् एकं सानु सद्म यस्य स एक देशस्थोऽपीत्यर्थः । महीधरस्येन्द्रकीलस्य सकलं शिखरनिचय मपिदधदावृण्वन्निवेत्युत्प्रेक्षा ॥ ११ ॥

सुरेति । पुनः सुरसरिति गङ्गाकूले परन्तपोऽधिगच्छन्नर्ज्ज यन् फलाभिलाषेणेति शेषः । हविस्समभिलषन् इत्युपमानविशेषण सामर्थ्यात् । तथा विधृतः पिशङ्गबृहज्जटाकलापो येन सः । अत एवोपवेदि वेद्यां । विभक्त्यर्थेऽव्ययीभावः । शिखासमूहैर्ज्वाला जालैर्विततोविस्तृतो हविराज्यादिकं समभिलषन् । जातं वेदो हिरण्यं भोज्यं कर्म्मफलमिति यावत् यस्मादिति जातवेदावह्नि रिव स्थितः ॥ १२ ॥

सदृशमिति । पुनराकृतेर्वपुषः । आकृतिः कथिता रूपे सामा न्यवपुषोरपीति विश्वः । सदृशन्तुल्यमतनु महान्तमप्रयत्नमुद्योगन्द

सदृशमतनुमाकृतेः प्रयत्न
न्तदनुगुणामपरैः क्रियामलङ्घ्याम् ।
दधदलघु तपःक्रियानुरूपं
विजयवतीञ्च तपःसमां समृद्धिम् ॥ १३ ॥
चिरनियमकृशोऽपि शैलसारः
शमनिरतोऽपि दुरासदः प्रकृत्या ।
ससचिवइव निर्ज्जनेऽपि तिष्ठन्
मुनिरपि तुल्यरुचिस्त्रिलोकभर्त्तुः ॥ १४ ॥

धत् । तथा तदनुगुणाम्प्रयत्नानुगुणामपरैरन्यैरलङ्घ्यां कर्त्तुमशक्या मित्यर्थः । क्रियां व्यापारं दधत् । तथा क्रियानुरूपमलघु गुरु तपोदधत् । तथा विजयवतीं सर्व्वोत्कर्षवतीं विजयफलां वा तपःक्रियानुरूपां तपःसमां समृद्धिमैश्वर्य्यन्दधत् । अत्र पूर्व्वस्योत्तरस्य विशेषणतया स्थापनात्प्रथमैकावल्यलङ्कारः । यथापूर्व्वम्परस्य विशेषणतया स्थापने एकावलीति स्वसूत्रात् ॥ १३ ॥

चिरनियमेति । पुनश्च चिरनियमेन दीर्घकालतपसा कृशः क्षीणाङ्गोऽपि शैलसारः । उपमानपूर्व्वपदोबहुव्रीहिः । शमे निरतोऽपि प्रकृत्या दुरासदोदुर्द्धर्षः निर्ज्जने विजने देशे तिष्ठन्नपि ससचिवस्सपरिवारइव । किञ्च मुनिरप्यैश्वर्य्यरहितोऽपीत्यर्थः । त्रयाणां लोकानाम्भर्त्तुरिन्द्रस्य । तद्धितार्थेत्यादिना उत्तरपद समासः । तुल्यरुचिः समानतेजाः अपिशब्दः सर्व्वत्र विरोधद्योतनार्थः सच मुनेरतर्क्यमहिमत्वेन निरस्तइति विरोधालङ्कारः । विरोधाभासत्वं विरोधइति सूत्रात् ॥ १४ ॥

तनुमवजितलोकसारधाम्नीं
त्रिभुवनगुप्तिसहां विलोकयन्त्यः।
अवययुरमरस्त्रियोऽस्य यत्नं
विजयफले विफलन्तपोऽधिकारे॥ १५॥
मुनिदनुतनयान्विलोभ्य सद्यः
प्रतनुबलान्यधितिष्ठतस्तपांसि।
अलघुनि बहु मेनिरे च ताः स्वं
कुलिशभृता विहितम्पदे नियोगम्॥ १६॥

ननुमिति। अवजिते तिरस्कृते लोकानां सारधाम्नी सत्त्वतेजसी यस्या तां। अनउपधेत्यादिना ङीप्। त्रयाणाम्भुवनानां समाहारस्त्रिभुवनं। तद्धितार्थेत्यादिना समाहारार्थे तत्पुरुषः। पात्रादित्वात् स्त्रीत्वप्रतिषेधः। तस्य गुप्तौ रक्षणे सहां समर्थां। पचाद्यच्। तनुं मूर्त्तिं विलोकयन्त्योऽमरस्त्रियोऽप्सरसो विजयफले विजयार्थं तपोऽधिकारे तपोनुष्ठानेऽस्यार्जुनस्य यत्नं विफलमवययुर्मेनिरे। त्रैलोक्याधिपत्यादिमहाफलसाधनसमर्थस्य तुच्छफलाभिलाषो मत्तमातङ्गमांसभोगोचितस्य कण्ठीरवस्य शीर्णतृणचर्वणोत्कण्ठेव न शोभामावहतीति भावः। अत्र विशिष्टतनुविलोकनस्य स्त्रीविशेषणवैफल्यज्ञानहेतुत्वोक्त्या पदार्थहेतुकः काव्यलिङ्गमलङ्कारः॥ १५॥

मुनीति। प्रतनुबलानि अनुत्कृष्टसाराणि तपांस्यधितिष्ठतोऽनुतिष्ठतो मुनीन् दनुतनयान् दानवांश्च सद्यस्तत्क्षणमेव विलोभ्याकृष्य चिरात्कुलिशभृता शक्रेण अलघुनि पदे स्थाने विहित

अथ कृतकविलोभनं विधित्सौ
युवतिजने हरिसूनुदर्शनेन ।
प्रसभमवततार चित्तजन्मा
हरति मनोमधुरा हि यौवनश्रीः ॥ १७ ॥
सपदि हरिसखैर्व्वधूनिदेशा
द्ध्वनितमनोरमवल्लकीमृदङ्गैः ।
युगपदृतुगणस्य सन्निधानं
वियति वने च यथायथं वितेने ॥ १८ ॥

न्यस्तं स्वं स्वकीयं नियोगमधिकारन्ताः स्त्रियो बहु यशा तथा मेनिरे । निकृष्टपदवृत्तीनामुत्कृष्टपदलाभो महा बहुमानमूलमिति भावः । विलोभ्य मेनिर इत्यन्वयः । यद्वा विलोभ्य लोभं कारयित्वा विहितं शक्रेणेत्यन्वयात्समानकर्त्तृत्वनिर्वाहः ॥ १६ ॥

अथेति । अथानन्तरं कृतकविलोभनं कृत्रिमं विलोभनं विधित्सौ विधातुमिच्छौ । विपूर्व्वाद्धातेः सन्नन्तादुप्रत्ययः । युवतिजने हरिसूनोरर्ज्जुनस्य दर्शनेन चित्तजन्मा कामः प्रसभं बलादवततार । दैवतत्परं वञ्चयितुमागतस्य मोहोभवति यतः स्वयं मुनिवञ्चनप्रवृत्ताः स्त्रियस्तेन वञ्चिता इत्यर्थः । युक्तं चैतत् । हि यस्मान्मधुरा मनोहरा यौवनश्रीः मनो हरति बलादिति शेषः ॥ १७ ॥

सपदीति । सपदि वधूनान्निदेशान्नियोगात् ध्वनितानादिता मनोरमा वल्लक्यो वीणाः मृदङ्गाश्च यैस्तैर्हरिसखैर्गन्धर्व्वैर्वियत्या काशे वने च युगपत् ऋतुगणस्य ऋतुषट्कस्य सन्निधानमावि

सजलजलधरन्नभो विरेजे
विवृतिमियाय रुचिस्तडिल्लतानाम् ।
व्यवहितरतिविग्रहैर्वितेने
जलगुरुभिस्तनितैर्दिगन्तरेषु ॥ १९ ॥

परिसुरपतिसूनुधाम सद्यः
समुपदधन्मुकुलानि मालतीनाम् ।
विरलमपजहार बद्धविन्दुः
सरजसतामवनेरपान्निपातः ॥ २० ॥

भावोयथायथं यथास्वमसङ्करेणेत्यर्थः । यथास्वं तु यथायथमिति निपातः । वितेने वितस्तरे उद्दीपनसामग्री सम्यादित्यर्थः ॥ १८ ॥

अथ वर्षाक्रमेण ऋतून्वर्णयति । सजलेत्यादि । सजलाजलधरा यस्मिंस्तन्नभोविरेजे । तडितोलताइव तासां रुचिः प्रभा विवृतिं विजृम्भणमियाय । तथा व्यवहितरतिविग्रहैर्दूरीकृतरतिप्रकल्पितप्रणयकलहैर्जलगुरुभिर्ज्जलभाराद्गम्भीरैरित्यर्थः । स्तनितैः गर्ज्जितैर्दिगन्तरेषु वितेने विततैरभावि । भावे लिट् । अकर्मकत्वं वैवक्षिकमतएव दिगन्तरेष्वित्यधिकरणत्वेन प्रयोगः अन्यथा कर्म्मत्वमेव स्यात् ॥ १९ ॥

परीति । परिसुरपतिसूनुधाम अर्ज्जुनाश्रमम्प्रति । परीति लक्षणार्थे कर्मप्रवचनीयस्य योगात् द्वितीया यद्वा वर्जनार्थस्य तस्यात्र विरोधात् । विभक्त्यर्थेऽव्ययीभावः । तथा च सुरपतिसूनुधामीत्यर्थः । सद्योमालतीनां जातीलतानां । सुमना मालती

प्रतिदिशमभिगच्छताभिमृष्टः
ककुभविकाससुगन्धिनानिलेन ।
नव इव विबभौ सचित्तजन्मा
गतधृतिराकुलितश्च जीवलोकः ॥ २१ ॥
व्यथितमपि भृशं मनोहरन्तो
परिणतजम्बुफलोपभोगहृष्टा ।
परभृतयुवतिः स्वनं वितेने
नवनवयोजितकण्ठरागरम्यम् ॥ २२ ॥

जातिरित्यमरः । मुकुलानि समुपदधत् जनयन् । विरलं यथा तथा कद्रुविन्दुरपानिपातोद्धष्टिरवनेः सन्धिनीं सरजसतां सरज स्कलं । अचतुरेत्यादिसूत्रेण साकल्यार्थेऽव्ययीभावः । समासान्त निपातश्च बहुव्रीह्यर्थस्तु लक्ष्यते । अव्ययीभावदर्शनन्तु प्रायिक मिति केचित् । अपजहार धूलिं शमयामासेत्यर्थः ॥ २० ॥

प्रतिदिशमिति । दिशि दिशि प्रतिदिशं । यथार्थेऽव्ययी भावः । शरत्प्रभृतित्वात्समासान्तनिपातः । अभिगच्छता संवाता ककुभान्यर्जुनकुसुमानि । इन्द्रद्रुः ककुभोऽर्जुन इत्यमरः । तेषां विकासेन सुगन्धिना मनोज्ञगन्धेन । गन्धस्येत्वे तदेकान्तग्रहण प्रायिकं । अनिलेनाभिमृष्टः अतएव सचित्तजन्मा कामा क्रान्त इत्यर्थः । अतएव गतधृतिर्गतधैर्य्यः आकुलितः क्षोभितश्च रतिमतीति भावः । एवम्भूतो जीवलोको नव इवावस्थान्तरप्राप्त्या अपूर्व्व इव विबभौ भाति स्मेत्युत्प्रेक्षा ॥ २१ ॥

अभिभवति मनः कदम्बवायौ
मदमधुरे च शिखण्डिनां निनादे ।
जन इव न धृतेश्चचाल जिष्णु
र्न हि महतां सुकरः समाधिभङ्गः ॥ २३ ॥

व्यथितमिति । व्यथितं दुःखितमपि मनोऽत्यर्थं हरन्ती किमुत सुखितमिति भावः । जम्ब्वः फलञ्जम्बु । वार्हतञ्च फले जम्ब्वा जम्बू स्त्री जम्बु जाम्बवमित्यमरः । जम्ब्वावेत्यणभावपक्षेऽत्र फले लुगिति लुक् लुक्तद्धितलुकीति स्त्रीप्रत्ययनिवृत्तिः । जम्बु च तत्फलञ्चेति सामान्यविशेषयोः सह निर्देशः । यद्वा । जम्ब्वाः फलमिति विग्रहः । इकोह्रस्वोऽङ्योगालवस्येति ह्रस्वः । तस्य परिणतस्योपभोगेन हृष्टा । अतएव परभृतयुवतिः कोकिलाङ्गना नवनवं नवप्रकारं यथा तथा योजितेन सम्पादितेन कण्ठरागेण कण्ठमाधुर्य्येण रम्यं सौम्यमित्यर्थः । स्वनं स्वरं वितेने वर्षास्वपि मधुराः स्वराः कोकिलायादिति प्रसिद्धिः ॥ २२ ॥

अभिभवतीति । कदम्बवायौ कदम्बसम्बन्धिनि मारुते मदमधुरे शिखण्डिनां निनादे च मनोऽभिभवति अभिहरति सति जिष्णुर्जयनशीलोऽर्ज्जुनः जनः पृथग्जन इव धृतेर्धैर्य्यान्न चचाल । वर्षास्वपि तदुद्दीपनाय न शेकुरित्यर्थः । हि यस्मात् महतां समाधिभङ्गः सुकरो न केनापि कर्त्तुं शक्यत इत्यर्थः ॥ २३ ॥

धृतेति । विसानि वलयानीव तेषां आवलिर्धृता यया सा । कुमुदवनमेकमुखं दुकूलमिव तद्दधन्ती । आत्तानि गृहीतानि

धृतबिसवलयावलिर्वहन्ती
कुमुदवनैकदुकूलमात्तबाणा ।
शरदमलतले सरोजपाणौ
घनसमयेन वधूरिवाललम्बे ॥ २४ ॥

समदशिखिरुतानि हंसनादैः
कुमुदवनानि कदम्बपुष्पवृष्ट्या ।
श्रियमतिशयिनीं समेत्य जग्मु
र्गुणमहतां महते गुणाय योगः ॥२५॥

बाणानि नीलझिण्टीनि यया सा आत्तबाणा धृतशरा च । गृह्णीयात् चत्रिया शरमिति स्मरणात् । बाणोक्ता नीलझिण्टी चेति वैजयन्ती । शरद्वधूर्जायेव घनसमयेन वर्षर्तुना वरेणेति शेषः । अमलतले निर्मलतले सरोजं पाणिरिव तस्मिन्नाललम्बे जगृहे । कर्मणि लिट् । वधूवरसमागमवदृतुसन्धिरशोभतेत्यर्थः । अत्रात्तबाणेति झिण्टीशरयोर्बाणयोरभेदाध्यवसायात् श्लेषमूलातिशयोक्तिरुपमाङ्गमित्यनयोः सङ्करः ॥ २४ ॥

अथ ऋतुसन्धिं वर्णयति । समदेति । समदशिखिरुतानि मत्तमयूरकूजितानि हंसनादैः समेत्य तथा कुमुदवनानि कदम्बपुष्पवृष्ट्या समेत्यातिशयिनीमतिशयवतीं श्रियञ्जग्मुः । तथाहि । गुणमहतां गुणाधिकानां योगः परस्परसमागमो महते गुणायोत्कर्षाय भवतीति शेषः । अत्र द्विपार्थो समालङ्कारः । सा समासङ्कृतिर्योग्यवस्तुनोरुभयोरपीति लक्षणात् । सोऽपि चतुर्थेनार्थान्तरन्यासेन स्वसमर्थकेनाङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ २५ ॥

सरजसमपहाय केतकीना
म्प्रसवमुपान्तिकनीपरेणुकीर्णम् ।
प्रियमधुरसनानि षट्पदाली
मलिनयति स्म विनीलबन्धनानि ॥ २६ ॥

सरजसमिति । प्रियमधुरिष्टमकरन्दः । नात्र कप् समासान्तः पुल्लिङ्गोत्तरपदेऽबहुव्रीहिः नपुंसकलिङ्गस्यैव मधुशब्दस्य उरः प्रभृतिषु पाठात् । मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः । अर्द्धर्चादिगणे पाठात् पुन्नपुंसकयोर्मधुरित्यभिधानात् । षट्पदाली षट्पदावलिः । उपान्तिके यानि नीपानि कदम्बकुसुमानि तेषां रेणुभिः परागैः कीर्णं व्याप्तं किञ्च स्वतोऽपि सह रजसा सरजसं नलरजस्कमिति भावः । साकल्येऽव्ययीभावः अचतुरेत्यादिना निपातः केतकीनाम्प्रसवं पुष्पमपहाय विनीलबन्धनानि मलिनवृन्तानि असनानि प्रियकपुष्पाणि मकरन्दभरितानीति शेषः । सर्ज्जकासनबन्धूकपुष्पप्रियकजीवकाइत्यमरः । मलिनयति स्म यथा वृन्तादन्यत्रापि मालिन्यं स्यात् तथा मधुलोभात् छादयामासेत्यर्थः । न हि मध्वासक्तो मधुलाभेऽसति विभूतिष्वासज्जतीति भावः ॥ २६ ॥

मुकुलितमिति । धृताजलबिन्दवो यासु तासु शाद्वलस्थलीषु शादहरितप्रदेशेषु अविरलवपुषः स्थूलमूर्त्तयः सुरेन्द्रगोपाः कीटविशेषाः मुकुलितमम्बुजीवमम्बुजीवकमुकुलमित्यर्थः । बन्धूकोबन्धुजीवकइत्यमरः । अतिशय्यातिक्रम्य विकचपलाशचयः विकसितकिंशुकराशिः । पलाशे किंशुकः पर्णइत्यमरः । तस्य

मुकुलितमतिशय्य बन्धुजीव
न्धृतजलबिन्दुषु शाद्वलस्थलीषु ।
अविरलवपुषः सुरेन्द्रगोपा
विकचपलाशचयश्रियं समीयुः ॥ २७॥
अविरलफलिनीवनप्रसूनः
कुसुमितकुन्दसुगन्धिगन्धवाहः ।
गुणमसमयजञ्चिराय लेभे
विरलतुषारकणस्तुषारकालः ॥ २८ ॥

श्रियन्तत्सदृशीं श्रियमित्यर्थः । अतएव निदर्शनालङ्कारः । समीयुः प्रापुः ॥ २७ ॥

अथ हेमन्तवर्णनमाह । अविरलेति । अविरलानि घनानि फलिनीवनानां प्रियङ्गुवनानाम्प्रसूनानि यस्मिन्सः । प्रियङ्गुः फलिनी फलीत्यमरः । कुसुमितैः कुन्दैर्माघ्यकुसुमैः सुगन्धिर्गन्धवाहो यस्मिन्सः । माघ्यं कुन्दमित्यमरः । शैशिराणामपि कुन्दानां हेमन्ते प्रादुर्भावादविरोधः । विरलतुषारकणइति प्रारम्भोक्तिः । तुषारकालो हेमन्तश्चिरायासमयजमकालसम्भवं गुणमुत्कर्षं लेभे ॥ २८ ॥

निचयिनीति । निचयिनि उपचयवति लवलीलतानां विकाशे पुष्पविजृम्भणे तथा लोध्रसमीरणे च हर्षं प्रसादमुत्कण्ठामिति यावत् जनयति सति पाण्डुसूनुर्विकृतिन्नोपययौ । कुतः हि अस्मात्किं जिगीषता जेतुमिच्छता धैर्येणाश्रीतेन चलति न हि

निचयिनि लवलीलताविकासे
जनयति लोध्रसमीरणे च हर्षम् ।
विकृतिमुपययौ न पाण्डुसूनु
श्चलति नयान्न जिगीषतां हि चेतः ॥२९॥
कतिपयसहकारपुष्परम्य
स्तनुतुहिनोऽल्पविनिद्रसिन्दुवारः ।
सुरभिमुखहिमागमान्तशंसी
समुपययौ शिशिरः स्मरैकबन्धुः ॥ ३० ॥

क्रोधाक्रान्ते चेतसि शृङ्गाररसस्य विकाशस्तदिरङ्कुलाद्दोषस्येति भावः ॥ २९ ॥

कतिपयेति । कतिपयैरेव सहकारपुष्पैश्चूतकुसुमैरम्योन तु वसन्तवत्समग्रैर्नापि हेमन्तवत्तद्रहितैरिति भावः । तनुतुहिनः अल्पहिमः नतु हेमन्तवद्बहुतुहिनोनापि वसन्तवद्विरलतुहिन इति भावः । अल्पानि कतिपयानि विनिद्राणि सिन्दुवाराणि विकसितनिर्गुण्डीकुसुमानि यस्मिन् सः अत्रापि सहकारवदभिप्रायोद्रष्टव्यः । सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपीत्यमरः । इत्थं सुरभिमुखं वसन्तप्रारम्भं हिमागमान्तं हेमन्तावसानं शंसति सूचयतीति स तथोक्तः । स्मरस्यैकबन्धुः सहकारी उभयर्तुधर्मसम्पत्तेरिति भावः । शिशिरः समुपययौ ॥ ३० ॥

अथ वसन्तप्रारम्भमाह । कुसुमेति । कुसुमप्रधानानान्नगानां वृक्षाणां कुसुमानान्नगाइत्यावा तेषां वनान्युपैतुमारोढुङ्कामो यस्याः सा । शैलवृक्षौ नगावगावित्यमरः । लुम्पेदवश्यमः कृत्ये

कुसुमनगवनान्युपैतुकामा
किसलयिनीमवलम्ब्य चूतयष्टिम् ।
क्वणदलिकुलनूपुरा निरासे
नलिनवनेषु पदं वसन्तलक्ष्मीः ॥ ३१ ॥

विकसितकुसुमाधरं हसन्तीं
कुरवकराजिवधूं विलोकयन्तम् ।
ददृशुरिव सुराङ्गनानिषण्णं
सशरमनङ्गमशोकपल्लवेषु ॥ ३२ ॥

तुङ्काममनसोरपीति मकारलोपः । वसन्तलक्ष्मीः किसलयिनीं पल्लविनीं चूतयष्टिं चूतशाखामिवेति भावः । अवलम्ब्यावष्टभ्यान्यथारोढुमशक्यत्वादिति भावः । क्वणत् शिञ्जमानं शब्दायमानमलिकुलं नूपुरमिव यस्याः सा तथोक्ता सती । क्वणदलिकुलनूपुरमित्यपि पाठः अन्यत्रालिकुलवन्नूपुरन्नलिनवनेषु पदं निरासे निदधे । तेषु प्रथममप्रादुरासीदित्यर्थः । उपसर्गादस्यत्यूह्योर्वेति वचनादात्मनेपदम् । अत्र प्रक्रान्तवसन्तलक्ष्मीविशेषणसामर्थ्यादप्रस्तुतनायिकाव्यवहारसमारोपात्समासोक्तिरलङ्कारः ॥ ३१ ॥

विकसितेति । विकसितो विश्लिष्टः कुसुममेवाधरो यस्मिन् कर्मणि तद्यथा तथा हसन्तीं स्मयमानां कुरवकराजिरेव वधूस्तां विलोकयन्तं कामुकतयेति भावः । अतएवाशोकपल्लवेषु पल्लवसंस्तरेषु निषण्णं स्थितमित्यर्थः । रिरंसयेति शेषः । सशरन्नित्यविजयित्वादिति भावः । इत्थं शृङ्गारवीरयोरेकाधिकरणभूत

मुहुरनुपतता विधूयमानं
विरचितसंहति दक्षिणानिलेन ।
अलिकुलमलकाकृतिम्प्रपेदे
नलिनमुखान्तविसर्प्पि पङ्कजिन्याः ॥ ३३ ॥
श्वसनचलितपल्लवाधरोष्ठे
नवनिहितेर्ष्यमिवावधूनयन्ती ।
मधुसुरभिणि षट्पदेन पुष्पे
मुख इव शाललतावधूश्चुचुम्बे ॥ ३४ ॥

मनङ्गं सुराङ्गनादृष्टुरिवेत्युत्प्रेक्षा । अशोकाद्यवलोकनान्मदन शत्वात्कारादिव महान्मनःक्षोभस्तासामासीदित्यर्थः । अत्र रूपको त्प्रेक्षयोः संसृष्टिः ॥ ३२ ॥

मुहुरिति । अनुपतताऽनुधावता दक्षिणानिलेन मलयमारु तेन मुहुर्विधूयमानं कम्पितमतएव विरचिता संहतिर्येन तत्सम्भूत मित्यर्थः । पङ्कजिन्यायन्नलिनं मुखमिव तस्यान्तर्विसर्प्पि प्रान्त चारि अलिकुलङ्कर्तृ अलकाकृतिमलकसादृश्यम्प्रपेदे ॥ ३३ ॥

श्वसनेति । षट्पदेन शाललता सर्जतरुशाखा वधूरिव शाल लतावधूः । प्राकारवृक्षयोः शालः शालस्सर्ज्जतरुः स्मृतइति शाश्वतः । श्वसनेन वायुना निःश्वासेन च चलितः पल्लवोऽधरोष्ठइव यत्र तस्मिन् । ओत्वोष्ठयोः समासे वेति पररूपम् । मधुना मरकन्देन मद्येन च सुरभिणि पुष्पे मुखइव नवं यथा तथा निहितेर्ष्यं कृतकोपमिवेति क्रियाविशेषणं तथाऽवधूनयन्ती कम्पयन्ती । धूञ्प्रीञोर्नुग् वक्तव्यइति णिचि नुगागमः । चुचुम्बे

प्रभवति न तदा परो विजेतुं
भवति जितेन्द्रियता यदात्मरक्षा ।
अवजितभुवनस्तथा हि लेभे
सिततुरगे विजयं न पुष्पमासः ॥ २५ ॥
कथमिव तव सम्मतिर्भवित्री
सममृतुभिर्मुनिनावधीरितस्य ।
इति विरचितमल्लिकाविकासः
स्मयत इव स्म मधुं निदाघकालः ॥ २६ ॥

चुम्बिता । अत्र श्वसनशब्दार्थमधुशब्दार्थयोश्च सम्भेदाध्यवसायात् श्लेषमूलातिशयोक्तिः । सा चोपमाङ्गमित्यनयोः सङ्करः ॥ २४ ॥

प्रभवतीति । परः शत्रुस्तदा तस्मिन् काले विजेतुं न प्रभवति न शक्नोति । यदा जितेन्द्रियता इन्द्रियजयित्वं आत्मरक्षा भवति जायते । तथाहि अवजितभुवनः त्रैलोक्यविजयी पुष्पमासो वसन्तः सिततुरगेऽर्ज्जुने विषये विजयं न लेभे । अतो जितेन्द्रिया दुर्ज्जया इत्यर्थः । विशेषेण सामान्यार्थसमर्थनरूपोऽर्थान्तरन्यासो ऽलङ्कारः ॥ २५ ॥

अथ ग्रीष्मं वर्णयति । कथमिति । विरचितमल्लिकाविकासो निदाघकालो ग्रीष्मः ऋतुभिर्वर्षादिभिः समं मुनिनावधीरितस्य तिरस्कृतस्य तव सम्मतिर्लोके योग्यत्वेनानुमतिः मान्यत्वं कथमिव भवित्री न सम्भाव्यते कथञ्चिन्न भविष्यतीत्यर्थः । इतीत्थं मधुं वसन्तं । चैत्रे दैत्ये वसन्ते च जीवे क्षौद्रे मधुः स्मृत इति विश्वः । स्मयते स्मेव जहास किमित्यपेक्षा । लट् स्मे इति भूतार्थे लट् ।

बलवदपि बलं मिथोविरोधि
प्रभवति नैव विपक्षनिर्ज्जयाय।
भुवनपरिभवी न यत्तदानीं
तमृतुगणः क्षणमुन्मनीचकार ॥ ३७ ॥

प्रहासस्य शुभ्रत्वेन प्रसिद्धैर्मल्लिकाविकासै हासत्वाध्यवसायः। अत्र ऋतुभिः सममवधीरितस्येत्यत्राभेदाध्यवसायमूला सहोक्तिरलङ्कारः। सम्बन्धभेदभिन्नस्यावधीरणस्याभिन्नतयाध्यवसायात्तदेवावधीरणमसम्मतिद्वारा स्मयोत्थेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ३६ ॥

बलवदिति। बलवत्प्रबलमपि प्रकृष्टाङ्गमिति यावत्। मिथोविरोधि परस्परस्पर्द्धि बलं सैन्यम्। वरूथिनी बलं सैन्यमित्यमरः। विपक्षनिर्जयाय शत्रुविजयाय। तुमर्थाच्चेत्यादिना चतुर्थी शत्रून् जेतुमित्यर्थः न प्रभवति न शक्नोत्येव। कुतः यस्मात्कारणाद्भुवनानां परिभवी जेतापि। जिदृक्षीत्यादिना इन् प्रत्ययः। ऋतुगणस्तदानीं तमर्ज्जुनं क्षणमपि नोन्मनीचकार अनुन्मनसमुन्मनसन्न चकार। अरुर्मनश्चक्षुरित्यादिना अभूततद्भावे च्विप्रत्ययः सलोपश्च। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३७ ॥

एवन्तटस्थस्योद्दीपनसामग्री विफलेत्युक्तं सम्प्रति विपरीता जातेत्याह। श्रुतीति। सहायैस्तासां सहचरैर्गन्धर्व्वैः कृतमिति शेषः। न लोकेत्यादिना षष्ठीप्रतिषेधः कर्त्तरि तृतीया। श्रुतिसुखं श्रोत्रमधुरमुपवीणितं वीणया उपगानम्। सत्यापपाशेत्यादिना वीणा

अतिसुखमुपवीणितं सहायै
रविरललाञ्छनहारिणश्च कालाः ।
अविहितहरिसूनुविक्रियाणि
त्रिदशवधूषु मनोभवं वितेनुः ॥ ३८ ॥
न दलति निचये तथोत्पलाना
न्न च विषमच्छदगुच्छयूथिकासु ।
अभिरतिमुपलेभिरे यथासां
हरितनयावयवेषु लोचनानि । ३९ ॥

शब्दात् णिजन्तात् भावे क्तः । अविरलैर्भूयोभिर्लाञ्छनैः पूर्व्वोक्तैः फलकुसुमादिभिश्चिह्नैर्हारिणो मनोहराः कालाः वसन्तादिऋतवोऽविहिताऽकृता हरिसूनोरर्ज्जुनस्य विक्रिया मनोविकृतिर्यैस्तानि तथाभूतानि सन्ति । नपुंसकमनपुंसकेत्यादिना नपुंसकैकशेषः । त्रिदशवधूषु मनोभवं वितेनुः विस्तारयामासुः । सोयम्परप्रहारार्थमुद्यतमायुधं स्वात्मानमेव प्रहरतीति न्यायवज्जातइति भावः । अत्र मुनिविक्रियार्थं स्त्रीणां विक्रियारूपानर्थोत्पत्तिकथनाद्द्वितीयोविषमालङ्कारः । तथाच सूत्रम् । विरूपकार्य्यानर्थयोरुत्पत्तिरूपसंघट्टनाद्विषमालङ्कारइति ॥ ३८ ॥

तटस्थवदालम्बनगणोऽपि विपरीतोऽभूदिति श्लोकद्वयेनाह । नेत्यादि । आसां लोचनानि हरितनयावयवेषु यथा तथा दलति विकसति उत्पलानान्निचयेऽभिरतिन्नोपलेभिरे न प्रापुः । विषमच्छदगुच्छाः सप्तपर्णस्तवकाः यूथिकामल्लिकाश्च तासु अभिरतिं नोपलेभिरे । सप्तपर्णोविशालत्वक् शारदोविषमच्छदइत्य

मुनिमभिमुखतां निनीषवो याः
समुपययुः कमनीयतागुणेन ।
मदनमुपदधे स एव तासां
दुरधिगमा हि गतिः प्रयोजनानाम् ॥ ४० ॥
प्रकृतमनुससार नाभिनेय
मविकशदङ्गुलि पाणिपल्लवं वा ।
प्रथममुपहितं विलासि चक्षुः
सिततुरगे न चचाल नर्त्तकीनाम् ॥ ४१ ॥

मरः । तथा रमणीयत्वात्तदवयवानामित्यर्थः । इति चक्षुःप्रीतिरुक्ता ॥ ३९ ॥

अथ मनःसङ्गं सूचयति । मुनिमिति । याः स्त्रियः कमनीयता सौन्दर्य्यं सैव गुणस्तेन मुनिमर्ज्जुनमभिमुखतां निनीषवो नेतुमिच्छवः समुपययुः। तासां स्त्रीणां स मुनिरेव मदनमुपदधे जनयामास। तथाहि । प्रयोजनानामुद्देश्यानाङ्गतिः परिणतिः दुरधिगमा हि दुर्ज्ञेया खलु अतः क्वचिद्भवति क्वचिन्न भववीति भावः ॥ ४० ॥

अथासामनुरागमेव कार्य्यतः प्रपञ्चयति । प्रकृतमिति । विलासि सविलासं नर्त्तकीनां सम्बन्धि । शिलिणि स्युन्निति स्युप्रत्ययः न्त्तिखनिरञ्जिभ्यएवेति नियमः । चक्षुः कर्तृ प्रकृतप्रस्तावमभिनेयमभिनेतव्यं रसभावादिव्यञ्जकं नानुससार । तद्दृष्टा तदानुगुण्येनैव दृष्टिप्रयोगनियमादिति भावः । तथा प्रविकश

अभिनयमनसः सुराङ्गनाया
निहितमलक्तकवर्त्तनाभिताम्रम्।
चरणमभिपपात षट्पदाली
धृतनवलोहितपङ्कजाभिशङ्का ॥ ४२ ॥

दङ्गुलि पाणिपल्लवं वा नानुससार। स च दोषः यतोहस्ततो दृष्टिरिति नियमादिति भावः। पल्लवोऽस्त्री किशलयमित्यमरः। वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चयइति विश्वः। किन्तु। प्रथमप्रवेशएव सिततुरगेऽर्ज्जुनउपहितं सन्न चचाल तत्रैव लग्नन्तस्थौ। रागार्त्तेन किञ्चित्करणीयमनुसन्धेयमिति भावः ॥ ४१ ॥

अभिनयेति। अभिनयोरसभावादिव्यञ्जकचेष्टाविशेषः। व्यञ्जकाभिनयौ समावित्यमरः। तत्र मनोयस्यास्तस्याः व्यासङ्गात् भृङ्गापातमजानत्याइत्यर्थः सुराङ्गनायाः सम्बन्धि अलक्तकवर्त्तनेन लाक्षारसरञ्जनेनाभिताम्रन्निहितं न्यस्तञ्चरणं षट्पदाली कर्त्री धृता नवलोहितपङ्कजानां अभिशङ्का प्रत्यग्रकोकनदभ्रमो यया साऽभिपपात अभिधावति स्म। अत्र षट्पदाल्याः स्त्रीचरणे पङ्कजभ्रमाभिधानाद्भ्रान्तिमदलङ्कारः। तेन चोपमा व्यज्यते इत्यलङ्कारेणालङ्कारध्वनिः ॥ ४२ ॥

अविरलमिति। नमितशिखानि नर्त्तकीपादपीडनान्नमिताग्राणि कदम्बकेसराणि रङ्गपूजादत्तानीति शेषः अविरलं सान्द्रं यथा तथा द्रुतः रागोष्मणा विगलितोऽतएव परिषिक्तः नर्त्तकीनामलसेषु पदेषु पादन्यासेषु अलक्तकं लाक्षारागं

अविरलमलसेषु नर्त्तकीना
न्द्रुतपरिषिक्तमलक्तकम्पदेषु ।
सवपुषमिव चित्तरागमूरु
र्नमितशिखानि कदम्बकेसराणि ॥ ४३ ॥

न्टपसुतमभितः समन्मथायाः
परिजनगात्रतिरोहिताङ्गयष्टेः ।
स्फुटमभिलषितम्बभूव बध्वाः
कथयति संवृतिरेव कामितानि ॥ ४४ ॥

सवपुषम्मूर्त्तिमन्तञ्चित्तरागमुत्कण्ठतया वहिर्निःसृतं मुनिविषयकं रागमिवेत्युत्प्रेक्षा ऊरुर्वहन्ति स्म ॥ ४३ ॥

अथासां शृङ्गारचेष्टां कथयति । न्टपेति । न्टपसुतमर्जुनमभितः सम्मुखम्परिजनस्य सखीजनस्य गात्रेण तिरोहिता लज्जया स्वाकारगोपनायान्तर्हिताङ्गयष्टिर्यस्यास्तस्याः समन्मथायाः बध्वाः अभिलषितम्मुनिम्प्रत्यनुरागः स्फुटं बभूव । नच संवृतस्याभिव्यक्तिर्विरुद्धेति वाच्यमित्याह । यतः संवृतिः सम्यक् गोपनमेव कामितान्यनुरागान् । कामयतेर्भावे क्तः । वदति प्रकटयतीत्यर्थः । अयमनुरागस्य स्वभाव उक्तः यथा चेष्टया रागः संव्रियते सैवास्य प्रकाशिकेति भावः ॥ ४४ ॥

अभिमुनीति । अभिमुनि मुनिसमक्षं घनेन महता जघनांशुकस्यैकदेशे सहसा हृते सति सत्रपायाः सलज्जायाः परस्याः सम्बन्धि अवसनौ निरावरणौ ऊरू यस्मिन्नाचकितमभयसंभ्रमः

अभिमुनि सहसा हृते परस्या
घनमरुता जघनांशुकैकदेशे ।
चकितमवसनोरु सत्रपायाः
प्रतियुवतीरपि विस्मयन्निनाय ॥ ४५ ॥

धृतविसवलये विधाय पाणौ
मुखमधिरूषितपाण्डुगण्डलेखम् ।
नृपसुतमपरा स्मराभितापा
दमधुमदालसलोचनन्निदध्यौ ॥ ४६ ॥

प्रतियुवतीरपि सपत्नीरपि विस्मयं निनाय । किमुतान्यजनमित्यपि शब्दार्थः । न तु मुनिमित्याशयः ॥ ४५ ॥

धृतेति । अपरा स्त्री स्मराभितापाद्धेतोः धृतानि विसान्येव वलयानि येन तस्मिन् पाणौ अधिरूषिते चन्दनादिचर्च्चिते पाण्डु गण्डलेखे गण्डस्थले यस्य तन्मुखन्निधायारोप्यामधुमदे मधुमदरहिते तथाप्यलसे लोचने यस्मिन् कर्म्मणि तद्यथा तथा तं नृपसुतं निदध्यौ पश्यति स्म । निर्वर्णनन्तु निध्यानन्दर्शनालोकनेचणमित्यमरः ॥ ४६ ॥

अथ पञ्चभिर्मुनिम्प्रति दूतीवाक्यमाह । सखीति । कुसुमेषुणा कामेनाभितप्ता पीडिता सा नायिका हे सखि दयितं मुनिमिहानयेति माम्प्रहितवती भवदन्तिकम्प्रेषितवती । किन्तु अविमृश्यकारिणीयमित्याह । हृदयमिति । अहृदया अमनस्का तस्याः लङ्घतलादिति भावः । अतएव सा पूर्व्वं प्रागेव भवदुप

सखि दयितमिहानयेति सा मा
अभिहितवती कुसुमेषुणाभितप्ता ।
हृदयमहृदया न नाम पूर्व्वं
भवदुपकण्ठमुपागतं विवेद ॥ ४७ ॥
चिरमपि कलितान्यपारयन्त्या
परिगदितुम्परिशुष्यता मुखेन ।
गतघृण गमितानि सत्सखीनां
नयनयुगैः सममार्द्रतां मनांसि ॥ ४८ ॥

कण्ठन्त्वत्समीपमुपागतं हृदयमनेन विवेद नाम सम्भावनायां अतो मत्प्रेषणं व्यर्थन्तस्यान्तरङ्गत्वाद्बहिरङ्गस्य दुर्ब्बलत्वादितिभावः । एतेन मनःसङ्ग उक्तः । चक्षुःप्रीतिस्तु प्रागेव सर्व्वासामुक्तेति न पृथगुच्यते ॥ ४७ ॥

दृङ्मनःसङ्गसङ्कल्पा जागरः कृशता रतिः । ह्रीत्यागोन्माद मूर्च्छान्ता इत्यनङ्गदशा दशेति । तत्राद्यमवस्थाद्वयमभ्यधायि सम्प्रति काचित् क्रमनैरपेक्षेण सूच्यते । चिरमित्यादि । चिरं कलितान्यपि सन्देशार्थबुद्ध्या योजितान्यपि वचनानीति शेषः परिशुष्यता मुखेनेति जागरोक्तिः । परिगदितुमपारयन्त्या अशक्नुवत्या तया हे गतघृण अद्यापि तां नानुकम्पसे इति भावः । सत्सखीनां मनांसि नयनयुगैः सममार्द्रताङ्गमितानि उपचयङ्गमितानीत्यर्थः शोकवाष्पाभ्यामिति भावः । अत्र सखीशोकोक्त्या मूर्च्छावस्था सूच्यते । अत्र शोकवाष्परूपकारणभेदात्प्रतियोगिभेदाच्चार्द्रत्व

अचकमत सपल्लवान्धरित्रीं
मृदुसुरभिं विरहय्य पुष्पशय्याम्।
भृशमरतिमवाप्य तत्र चास्या
स्तव सुखशीतमुपैतुमङ्कमिच्छा ॥ ४९ ॥

भेदेऽप्यभेदाध्यवसायस्तन्मूला चेयं नयनयुगैः समभिति सहोक्ति रलङ्कारः ॥ ४८ ॥

अचकमतेति । किं वाच्यं चेत्याह सा स्त्री मृद्वी सुरभिश्च या तां मृदुसुरभीं पुष्पशय्यां विरहय्य विहाय सपल्लवान्धरित्रीं अचकमत ऐच्छत् । तस्यास्ततोऽपि शीतलत्वादिति भावः । कमेर्णिङन्ताल्लुङ् णिश्रिद्रुस्रुभ्यः कर्त्तरि च ङिति द्विर्भाव इति केचित् तन्न अचीकमतेति प्रसङ्गादतोणिङभावपक्षे कमेश्च्लेस्लङ् वक्तव्य इति वक्तव्याच्चङि रूपमेतत् । अस्यानायिकायास्तत्र धरित्र्यामपि भृशमरतिं दुःखमवाप्य सुखयतीति सुखः शीतः शीतलश्च तं सुखशीतलन्तवाङ्कमुत्सङ्गमुपैतुमिच्छा वर्त्तत इति शेषः । अत्रास्यौत्सुक्यं कथितं अत्रारतिजागरौ सुव्यक्ताविति अस्याः नायिकायाः क्रमेण पुष्पशय्याद्यनेकाधारसम्बन्धकथनात्प्रथमः पर्य्यायालङ्कारः । तदुक्तम् । क्रमेणैकमनेकस्मिन्नाधारे वर्त्तते यदि । एकस्मिन्नथवानेकं पर्य्यायालङ्कृतिर्द्विधेति लक्षणात् ॥ ४९ ॥

तद्दिति । तत्तस्मात्कारणात् तस्याः दुःखस्थत्वाद्धेतोः हे अनघ निष्पाप तनुः कृशेति कार्श्यावस्थाकथनम् सा नायिका सकामा सफलमनोरथा अस्तु । हि यस्मात्त्वमेनार्थः प्रयोजनं वस्तु वा

तदनघ तनुरस्तु सा सकामा
व्रजति पुरा हि परासुतां त्वदर्थे ।
पुनरपि सुलभन्तपोनुरागी
युवतिजनः खलु नाप्यतेऽनुरूपः ॥ ५० ॥

तस्मिन् त्वदर्थे निमित्ते सतीति शेषः त्वामुद्दिश्येत्यर्थः । परासुतां निष्प्राणत्वम्पुरा व्रजति व्रजिष्यति मरिष्यतीत्यर्थः । तथा च ते निमित्तहत्ययाऽनघत्वव्याघातः स्यादिति भावः । यावत्पुरा निपातयोर्लडिति भविष्यदर्थे लट् । इदञ्च दशमावस्थाप्रदर्शनम् । न च तपोनिष्ठत्वाङ्कितव्यमित्याह । पुनरिति । पुनरपि पश्चादपि । पुनरप्रथमे भेदइति विश्वः । तपः सुलभं अनुरागी अनुरूपो योग्यश्च युवतिजनस्तु नाप्यते न लभ्यते खलु ॥ ५० ॥

एवं प्रलोभितस्यापि मुनेर्मौनन्न भग्नमित्याह । जहितीति । कठिनतां निःस्पृहताञ्जहिहि त्यजेत्यर्थः । जहातेरा च हाविति इकारः । वाचमयच्छ सन्धत्स्वेत्यर्थः । मुनीनां मानसं मनः करुणामृदु ननु दयार्द्रं खलु । स्वान्तं हृन्मानसं मनइत्यमरः । किञ्च । अभव्यानिर्भाग्याउपगतं प्राप्तं विषयमिति शेषः । अव धीरयन्ति अवमन्यन्ते । एवमुक्तप्रकारेण सोऽर्जुनः कयाचिदेत्य समीपमागत्य निपुणञ्चतुरं यथा स्यात्तथा ऊचे उक्तः नायिकया दूतीम्प्रति वचनमुक्तं तया दूत्या च मुनिम्प्रत्युक्तं कथितमित्यर्थः । अत्र पञ्चश्लोक्यां विप्रलम्भशृङ्गारस्यौत्सुक्यमात्रोव्यभिचारिभावस्य चापुनरुक्तिः । अनौचित्येन नायिकायाः प्रवृत्ते

जहिहि कठिनतां प्रयच्छ वाच-
न्ननु करुणामृदु मानसं मुनीनाम् ।
उपनतमवधीरयन्त्यभव्याः
स निपुणमेत्य कयाचिदेवमूचे ॥ ५१ ॥

सललितचलितत्रिकाभिरामाः
शिरसिजसंयमनाकुलैकपाणिः ।
सुरपतितनये परा निरासे
मनसिजजैत्रशरं विलोचनार्द्धम् ॥ ५२ ॥

राभासत्वमनुसन्धेयम् । तदुक्तं एकत्र चेन्नानुरागस्तिर्य्यङ्म्लेच्छगतोऽपि वा । योषितामङ्गसक्तिश्चेद्रसाभासस्त्रिधा मतइति । तन्निबन्धनादूर्जस्वलमलङ्कारः । तथा च सूत्रम् । रसभेदतदाभासतत्प्रकाशानां निबन्धनेन रसवत्प्रायमूर्ज्जस्वलमिति ॥ ५१ ॥

सललितेति । सललितं सविलासं यथा तथा चलितेन विवर्त्तितेन त्रिकेन कटिभागेन । पृष्ठवंशाधरे त्रिकमित्यमरः । अभिरामाः शिरसि जाताः शिरसिजाः । सप्तम्याजनेर्डः । अमूर्द्धमस्तकात् स्वाङ्गादकामइत्यलुक् । उपपदमतिङिति समासः । एतेन मनसिजोव्याख्यातः । तेषां संयमने बन्धने आकुलोव्यग्रः एकः पाणिर्यस्याः सा परा स्त्री सुरपतितनयेऽर्ज्जुने जेतैव जैत्रः । जेतृशब्दात्तृन्नन्तात्प्रज्ञादिभ्यश्चेत्यण्प्रत्ययः । मनसिजस्य जैत्रः शरस्तन्तथाभूतं विलोचनार्द्धमेकदेशं कटाक्षमित्यर्थः । निरासे विससर्ज ॥ ५२ ॥

कुसुमितमवलम्ब्य चूतमुच्चै
स्तनुरिभकुम्भपृथुस्तनानताङ्गी ।
तदभिमुखमनङ्गचापयष्टि
र्विसृतगुणेव समुन्ननाम काचित् ॥५३॥
सरभसमवलम्ब्य नीलमन्या
विगलितनीवि विलोलमन्तरीयम् ।
अभिपतितुमनाः ससाध्वसेव
च्युतरशनागुणसन्दितावतस्थे ॥ ५४ ॥

कुसुमितमिति । इभकुम्भवत्पृथुभ्यां स्तनाभ्यां आनतमङ्गं यस्याः सा । अङ्गगात्रकण्ठेभ्यश्चेति ङीष् । काचित् तनुः तन्वी । वोतोगुणवचनादिति विकल्पान्न ङीष् । कुसुमितमुच्चैरुन्नतञ्चूतमवलम्ब्य । अतएव चूतलतायोगात् विसृतो विस्तृतो गुणो यस्याः सा । विसृतं विस्तृतन्ततम् । मौर्वी ज्या शिञ्जिनी गुणइति चामरः । अनङ्गचापयष्टिरिवात्कृष्टमुक्तेति भावः । तदभिमुखं समुन्ननाम समुज्जजृम्भे अङ्गभङ्गञ्चकारेत्यर्थः ॥ ५३ ॥

सरभसमिति । अन्या अपरा विगलितनीवि स्रथबन्धनमतएव विलोलं स्थानचलितं नील्या रक्तं नीलं । नील्याअन्वक्तव्यइत्यन् प्रत्ययः । अन्तरीयम्परिधानमवलम्ब्य हस्तेन गृहीत्वा सरभसं सत्वरमभिपतितुं मनोयस्याः सा अपगन्तुमुद्युक्तेत्यर्थः । तथापि ससाध्वसेव न तु वस्तुतः ससाध्वसा किन्तु च्युतेन गलितेन रशनागुणेन सन्दिता बद्धा सती अवतस्थे स्थिता । बद्धे सन्दानितं मूत

यदि मनसि शमः किमङ्ग चापं
शठ विषयास्तव वल्लभा न मुक्तिः ।
भवतु दिशति नान्यकामिनीभ्य-
स्तव हृदये हृदयेश्वरावकाशम् ॥ ५५ ॥
इति विषमितचक्षुषाभिधाय
स्फुरदधरोष्ठमसूयया कयाचित् ।
अगणितगुरुमानलज्जयासौ
स्वयमुरसि श्रवणोत्पलेन जघ्ने ॥ ५६ ॥

मुदितं छन्दितं वितमित्यमरः । कर्मणि क्तः द्यतिस्यतिमास्था मितीकारः ॥ ५४ ॥

कयाचिदुर्मेनाह । यदीत्यादि । तव मनसि शमः शान्तिर्यदि अस्तीति शेषः । अङ्ग भो चापं किं किमर्थमित्यर्थः । किन्तु हे शठ हे वञ्चक तव विषयाः शब्दादयोवल्लभाः प्रिया न तु मुक्तिः । तदेव द्रढयितुमाह । भवतु कोदोषइति शेषः । यद्यहं रागी तर्हि किमिति भवतीर्न गणयामीति शङ्कान्निवारयति । तव हृदये मनसि हृदयेश्वरा काचित्तव प्रेयसी अन्यकामिनीभ्यः स्त्र्यन्तरेभ्यो ऽवकाशन्न दिशति न प्रयच्छति । स्त्र्यन्तरासक्त्या नास्मान् गणयसि न तु वैराग्यात् । तदर्थमेवायन्ते सकलः प्रयासोऽपीत्यर्थः ॥ ५५ ॥

इतीति । इतीत्थमसूयया मत्सरेण स्फुरन्नधरोष्ठोयस्मिन् कर्मणि तथाभिधाय उक्त्वा विषमितचक्षुषा कुटिलीकृतदृष्ट्या

सविनयमपराभिसृत्य साचि
स्मितसुभगैकलसत्कपोललक्ष्मीः ।
श्रवणनियमितेन तं निदध्यौ
सकलमिवासकलेन लोचनेन ॥ ५७ ॥

करुणमभिहितन्त्रपा निरस्ता
तदभिमुखञ्च विमुक्तमश्रु ताभिः ।
प्रकुपितमभिसारणेऽनुनेतु
म्प्रियमियती ह्यबलाजनस्य भूमिः ॥ ५८ ॥

अगणिता गुरव आचार्य्यादयो मानोऽभिमानो लज्जा च यया तया कया चिदसौ मुनिरुरसि स्वयं स्वहस्तेनैव श्रवणोत्पलेन जघ्ने हतः ॥ ५६ ॥

सविनयमिति । अपरा सविनयमनौद्धत्येन साचि तिर्यगभिसृत्य समीपङ्गत्वा स्मितेन मन्दहासेन सुभगाः एकस्य लसतः कपोलस्य लक्ष्म्यायस्याः सेति । बहुवचनपदोत्तरो बहुव्रीहिः अन्यथा कप्रत्ययः स्यादित्युक्तं प्राक् । श्रवणनियमितेन कर्णान्तप्रापितेन दृष्टुप्रसरणं तावदायतेनेत्यर्थः । असकलेनासम्पूर्णेन कटाक्षेणेति यावत् लोचनेन तं मुनिं धनञ्जयम् । सकलमिव समग्रप्रायं यथा तथा निदध्यौ पश्यति स्म । कटाक्षेणैव गाढमद्राक्षीदित्यर्थः । एषु श्लोकेषु भावाभासनिबन्धनत्वादूर्ज्जस्वलालङ्कारः । औत्सुक्यमत्र भावः । आभासत्वञ्चास्य विरक्ते मुनावनौचित्यादित्युक्तम्प्रागेवेति ॥ ५७ ॥

अथ तासां मुनिविलोभनमुपसंहरति । करुणमिति । ताभिः स्त्रीभिस्तदभिमुखं मुनिसमक्षं करुणं दीनमभिहितमुक्तं त्रपा

SO...

असकलनयनेक्षितानि लज्जा
गतमलसम्परिपाण्डुता विषादः ।
इति विविधमियाय तासु भूषा
प्रभवति मण्डयितुम्बधूरनङ्गः ॥ ५९ ॥
अलसपदमनोरमम्प्रकृत्या
जितकलहंसवधूगति प्रयातम् ।
स्थितमुरुजघनस्थलातिभारा
दुदितपरिश्रमजिह्मितेक्षणं वा ॥ ६० ॥

निरस्ता लज्जा त्यक्ता किम्बहुना असु च विमुक्तास्ततः परं न किञ्चिद्विधेयमासीदिति भावः । कुतः हि यस्मादबलाजनस्याभिसारणे समागमविषये प्रकुपितमननुकूलम्प्रियमनुनेतुमनुकूलयितुमियती भूमिरित्येतावती सीमा साधनानाम्परमावधिरिति भावः । अर्थान्तरन्यासोऽलङ्कारः ॥ ५८ ॥

अथासामनुरागदार्ढ्यन्निगमयति । असकलेति । असकलनयनेक्षितानि नयनार्द्धविलोकितानि, लज्जा अलसङ्गतम्मन्दगमनम्परिपाण्डुता पाण्डरवर्णत्वं, विषादः इष्टानवाप्तिनिमित्तश्चेतोभङ्ग इत्येवम्प्रकारं विविधन्नानाविचेष्टितम् । नपुंसकमनपुंसकेत्यादिना नपुंसकैकशेषत्वम् । तासु भूषामियायेति भावप्राधान्येन योज्यम् । तथाहि अनङ्गो मदनो वधूर्मण्डयितुम्प्रभवति सर्व्वावस्थास्विति शेषः । अतस्तासामनङ्गभूषितानामखिलम्भूषणमेवेति भावः ॥ ५९ ॥

इदानीन्तासाङ्क्रियाभिर्मुनिविलोभने प्रयासवैफल्यमाह । अलसेति । वधूनां सम्बन्धि प्रकृत्याऽलसैः पदैर्मनोरमं मनोज्ञम् अत

भृशकुसुमशरेषुपातमोहा-
दनवसितार्थपदाकुलोऽभिलापः ।
अधिकविततलोचनम्बधूना-
मयुगपदुन्नमितभ्रु वीक्षितं वा ॥ ६१ ॥
रुचिकरमपि नार्थवद्बभूव
स्तिमितसमाधिशुचौ पृथातनूजे ।
ज्वलयति महतां मनांस्यमर्षे
नहि लभतेऽवसरं सुखाभिलाषः ॥ ६२ ॥

॥ विशेषकम् ॥

एव जिता कलहंसवधूनाङ्गतिर्यैन तत्प्रयातङ्गमनम् । भावे क्तः । तथा ऊरुणोऽतिविपुलस्य जघनस्थलस्य अतिभारादति गौरवादुदितपरिश्रमेण उद्गतश्रमेण जिह्मिते घूर्णिते ईक्षणे यस्मिन् तत् स्थितं वा स्थितिश्च सर्व्वत्र वाशब्दः समुच्चये । वा समुच्चयएवार्थे उपमानविकल्पयोरिति हेमचन्द्रः ॥ ६० ॥

भृशेति । तथा भृशेन गाढेन कुसुमशरस्य इषोर्निपातेन योमोहोमूर्च्छा तस्माद्धेतोः अनवसितार्थैः अस्फुटोच्चारणादनवधारिताभिधेयैः पदैः सुप्तिङन्तादिभिः क्षुभितशब्दैराकुलः सङ्कीर्णः अभिलापोवाक्यप्रयोगस्तथाधिकं वितते विस्तृते लोचने यस्मिन् तत् अयुगपत्पर्य्यायेणोन्नमिते भुवौ यस्मिन् तत्तथोक्तम् । ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः । वीक्षितं वीक्षणञ्च ॥ ६१ ॥

रुचिकरमिति । पूर्व्वोक्तं रुचिकरं स्पृहाजनकमपि । रुचिः कान्तिरुचोभाभिष्वियां शोभास्पृहार्थयोरिति वैजयन्ती ।

स्वयं संराध्यैवं शतमखमखण्डेन तपसा
परोच्छित्त्या लभ्यामभिलषति लक्ष्मीं हरिसुते।
मनोभिः सोद्वेगैः प्रणयविहतिध्वस्तरुचयः
सगन्धर्व्वा धाम त्रिदशवनिताः स्वम्प्रतिययुः ॥६२॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये अर्ज्जुनविलोभनप्रख्यानोनाम दशमः सर्गः ॥१०॥

स्तिमितेन स्थिरेण समाधिना तपोयोगेन शुचौ शुद्धे निर्विकारे चेतसीत्यर्थः। इयातनूजेऽर्ज्जुने विषये अर्थवत्सप्रयोजनन्न बभूव तथाहि। महतां धीराणां मनसि अमर्षे क्रोधे ज्वलयति सति सुखाभिलाषोऽवसरमवकाशं न लभते रौद्रस्य शृङ्गारविरोधित्वादिति भावः। अत्र विशेषकेऽर्थान्तरन्यासोऽलङ्कारः ॥ ६२ ॥

स्वयमिति। एवं हरिसुतेऽर्ज्जुने स्वयमखण्डेनाविलुप्तेन तपसा शतमखमिन्द्रं संराध्य प्रीणयित्वा परोच्छित्त्या शत्रुवधेन लभ्यां साध्यां लक्ष्मीं राज्यलक्ष्मीं अभिलषति सति सोद्वेगैः कार्य्यसिद्ध्यभावात्सनिर्वेदैर्मनोभिरुपलक्षिताः। किञ्च। प्रणयविहत्या प्रार्थनाभङ्गेन ध्वस्तरुचयो नष्टकान्तयः सगन्धर्व्वाः गन्धर्व्वसहितास्त्रिदशवनिताः स्वन्धाम स्वस्थानं प्रतिययुः। शिखरिणी वृत्तमेतत्। रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति लक्षणात् ॥६२॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां दशमस्सर्गः ॥१०॥

अथामर्षान्निसर्गाच्च जितेन्द्रियतया तया।
आजगामाश्रमञ्जिष्णोः प्रतीतः पाकशासनः ॥ १ ॥
मुनिरूपोऽनुरूपेण सूनुना ददृशे पुरः।
द्राघीयसा वयोऽतीतः परिक्लान्तः किलाध्वना ॥ २ ॥

अथेति। अथाप्सरसां प्रतिप्रयाणानन्तरम्। पाकोनाम कश्चि द्दैत्यस्तस्य शासन इन्द्रः। नन्द्यादित्वात् ल्युप्रत्ययः। तया अप्सरो मुखात् श्रुतया अमर्षात् द्विषद्द्वेषान्निसर्गाच्च या जितेन्द्रियता तया आगन्तुकानागन्तुकोभयविधहेतुकया प्रतीतो हृष्टः सन्। ख्याते हृष्टः प्रतीतइत्यमरः। जिष्णोरर्ज्जुनस्य। जिष्णुः शक्रे धनञ्जय इत्यमरः। आश्रममाजगाम। अत्रामर्षनिसर्गयोर्जितेन्द्रियता हेतुकं रुचिकरमपीति काव्यलिङ्गं स्फुटमवगम्यते ॥ १ ॥

किमिन्द्रोमुनिरूपेणैवाजगामेत्याह। मुनिरूपइति। मुनेः रूप मिव रूपं यस्य स मुनिरूपो मुनिवेषधारीत्यर्थः। स इन्द्रोऽनुरूपेण दर्शनप्रदानयोग्येनेत्यर्थः। सूनुना पुत्रेणार्ज्जुनेन पुरोऽग्रे ददृशे दृष्टः कथम्भूतः वयोयौवनादिकमतीतोवृद्धः। द्वितीयाश्रितेत्यादिना द्वितीयासमासः। द्राघीयसा अतिदीर्घेण। प्रियस्थिरेत्यादिना दीर्घशब्दस्य द्राघादेशः। अध्वना अध्वगमनेनेत्यर्थः। परिक्लान्तः परिश्रान्तः। किलेत्यलीके। किल सम्भाव्यवार्त्तयोः। हेत्वरुच्यो रलीके चेति हेमचन्द्रः। वृद्धइव दूराध्वश्रान्तइव स्थितइत्यर्थः। इवेति पाठे स्पष्टार्थः ॥ २ ॥

अथ चतुर्भिरिन्द्रं विशिनष्टि। जटानामिति। परितः सितैः केशैः कीर्णया व्याप्तया जटानां संहत्या उपलक्षितः। अतएव

जटानाङ्कीर्णया केशैः संहत्या परितः सितैः ।
पृक्तयेन्दुकरैरह्नः पर्य्यन्तइव सन्ध्यया ॥ ३ ॥
विशदभ्रूयुगच्छन्नवलितापाङ्गलोचनः ।
प्रालेयावततिम्लानपलाशाब्जइव ह्रदः ॥ ४ ॥
आसक्तभरनीकाशैरङ्गैः परिकृशैरपि ।
आद्यूनः सद्गृहिण्येव प्रायोयष्ट्यावलम्बितः ॥ ५ ॥

इन्दुकरैरिन्दुकिरणैः पृक्तया युक्तया सन्ध्यया उपलक्षितोऽह्नः पर्य्यन्तो दिनान्तइव स्थितः तस्यापि परिणतरूपत्वात् वृद्धोपमानत्वञ्जटानां संहत्येत्युक्तत्वात्सन्ध्यासाम्यम् ॥ ३ ॥

विशदेति । पुनश्च विशदेन पलितपाण्डुरेण भ्रूयुगेन छन्ने वलितापाङ्गे वलिमत्प्रान्ते लोचने यस्य स तथोक्तः । अपाङ्गौ नेत्रयोरन्तावित्यमरः । पामादित्वाल्लोमादिसूत्रेण वलच्प्रत्ययः । प्रालेयाततत्या हिमसंहत्या म्लानपलाशानि क्लान्तदलानि अब्जानि यस्मिन् सः ह्रदइव स्थितः ॥ ४ ॥

आसक्तेति । पुनश्च परिकृशैः परिक्षीणैरप्यासक्तभरनीकाशैर्भाराक्रान्तसदृशैः सभारवद्दुरूभवद्भिरित्यर्थः । इकः काश इति दीर्घः । अङ्गैरुपलक्षितः कार्श्याल्लघून्यपि स्वाङ्गानि स्वयं वोढुमसमर्थइत्यर्थः । अतएवाद्यूनश्चौदरिकः । आद्यूनः स्यादौदरिके विजिगीषाविवर्जितइत्यमरः । आङ्पूर्वाद्दीव्यतेः क्तः छ्वोः शूडनुनासिकेचेति ऊठादेशः । दिवोऽविजिगीषायामिति निष्ठानत्वं । सद्गृहिण्याऽनुकूलकलत्रेणेव प्रायः प्राचुर्य्येण यष्ट्या अवलम्बनदण्डेनावलम्बितोधारितोन तु स्वशक्त्येति भावः ॥ ५ ॥

गूढोऽपि वपुषा राजन् धाम्ना लोकाभिभाविना ।
अंशुमानिव तन्वभ्रपटलच्छन्नविग्रहः ॥ ६ ॥
जरतीमपि बिभ्राणस्तनुमप्राकृताकृतिः ।
चकाराक्रान्तलक्ष्मीकः ससाध्वसमिवाश्रमम् ॥ ७ ॥
अभितस्तम्पृथासूनुः स्नेहेन परितस्तरे ।
अविज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मनः ॥ ८ ॥

गूढइति । वपुषा गूढोऽपि प्रच्छन्नरूपोऽपीत्यर्थः । प्रकृत्यादिभ्य उपसङ्ख्यानात्तृतीया । तन्वभ्रपटलच्छन्नविग्रहस्तोकाभ्रछन्नान्तरितमूर्त्तिरंशुमानिव लोकाभिभाविना लोकव्यापिना धाम्ना तेजसा धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोरिति हेमचन्द्रः । राजन् दीप्यमानोदृष्टइति पूर्व्वेण सम्बन्धः ॥ ६ ॥

जरतीमिति । जरतीञ्जीर्णां । जीनोजीर्णोजरन्नपीत्यमरः । जीर्य्यतेरतीतार्थे शतृप्रत्ययः उगितश्चेति ङीप् । तनुं शरीरं बिभ्राणो दधदपि अप्राकृताऽलोकसामान्या आकृतिर्मूर्तिर्यस्य स इन्द्रः आक्रान्ताभिभूता लक्ष्मीराश्रमशोभा येन स आक्रान्तलक्ष्मीकः । एकवचनान्तलक्ष्मीशब्दोत्तरपदबहुव्रीहावुरःप्रभृतिभ्यः कबिति नित्यं कप् । आश्रमं ससाध्वसमिव चकार । तेजस्विदर्शनाद्भय भवति तत्तु न दुःखजनकन्तस्यामानुषत्वादिति सूचयितुमिवशब्दः ॥ ७ ॥

अभितइति । पृथासूनुरर्ज्जुनस्तमिन्द्रमभितसम्प्रति स्नेहेन परितस्तरे । तद्गोचरेण प्रेम्णा पर्य्यावृतः । स्तृणोतेः कर्म्मणि लिट् ।

आतिथेयोमथासाद्य सुतादपचितिं हरिः
विश्रम्य विष्टरे नाम व्याजहारेति भारतीम् ॥ ९ ॥
त्वया साधु समारम्भि नवे वयसि यत्तपः ।
ह्रियते विषयैः प्रायोवर्षीयानपि मादृशः ॥ १० ॥

हतश्च संयोगादेर्गुणइति गुणः । नन्वज्ञातसम्बन्धविशेषस्य कथं स्नेहोदयइत्यतआह । अविज्ञातइति । बन्धौ सुहृदि अविज्ञातेऽपि बन्धुरयमित्यज्ञातेऽपि बलाद्बान्धवसत्तावशादेव मनः प्रह्लादते विह्वतीत्यर्थः ॥ ८ ॥

आतिथेयीमिति । अथ हरिरिन्द्रः सुतादर्ज्जुनादातिथेयी मतिथिषु साध्वीं । पथ्यतिथिवसतिस्वपतेर्ढञ् । अपचितिम्पूजा मासाद्य प्राप्य । पूजा नमस्यापचितिरित्यमरः । विष्टरे आसने । स्तृ वृ इति स्तृणातेरप्प्रत्ययः वृक्षासनयोर्विष्टरइति षत्वम् । विश्रम्य नाम विश्रम्य किल श्रममपनोयेत्यर्थः । इति वक्ष्यमाणप्रकारा भारतीं व्याजहार उक्तवान् । व्याहारउक्तिर्लपितमित्यमरः ॥ ९ ॥

अथ प्रथमं तावन्मुनिवदेनं मुमुक्षुत्वाह । त्वयेति । त्वया साधु समारम्भि सम्यगुपक्रान्तं रभेः कर्म्मणि लुङ् । कुतः यद्यस्मा न्नवे वयसि यौवने तपश्चर्य्यतइति शेषः । तथाहि । अहमिव दृश्यते ऽसौ मादृशोवर्षीयानतिवृद्धोऽपि । प्रियस्थिरेत्यादिना वृद्धशब्दस्य वर्षादेशः । प्रायोविषयैः ह्रियते आकृष्यते किमु भवादृशोयवीया निति भावः ॥ १० ॥

अथैवमनारम्भे तव स्वाकारलाभोऽपि विफलः स्यादित्याशये नाह । श्रेयसीमिति । तवाकृतिर्मूर्त्तिः रम्येति शेषः श्रेयसीं श्रेष्ठां गुण

श्रेयसीं तव सम्प्राप्ता गुणसम्पदमाकृतिः ।
सुलभा रम्यता लोके दुर्ल्लभं हि गुणार्ज्जनं ॥ ११ ॥
शरदम्बुधरच्छायागत्वर्य्यो यौवनश्रियः ।
आपातरम्या विषयाः पर्य्यन्तपरितापिनः ॥ १२ ॥

सम्पदं तपःसमारम्भरूपां प्राप्ता अतोन निष्फलेति भावः । न च साकारा गुणाढ्याश्च कियन्तोन सन्तीति वाच्यमित्याह । लोक इति । लोके रम्यता रम्याकारता सुलभा गुणार्ज्जनं गुणसम्पादनन्दुर्लभन्त्वयि तूभयं सम्पद्यतइति द्वेनः परमामोदइति भावः ॥ ११ ॥

यदुक्तन्त्वया साधु समारम्भोति तदेव साधुत्वं संसारनिःसारताख्यापनया सुश्लोकेनोपपादयति । शरदिति । यौवनश्रियस्तावच्छरदम्बुधरच्छायाइव गत्वर्य्यः चञ्चलाः । गत्वरश्चेति क्वरबन्तो निपातः टिड्ढाणञित्यादिना ङीप् । विषयाः शब्दादयस्तु आपातरम्यास्तत्कालरमणीयाः । तदात्वे पातआपातइति वैजयन्ती । पर्यन्तेऽवसाने परितापयन्ति दुःखं कुर्व्वन्तीति तथोक्ताः ॥ १२ ॥

अन्तकइति । किञ्च सन्तताअनवच्छिन्नाः आपदः क्लेशा यस्य तस्य जन्मिनः प्राणिनः । प्राणी तु चेतनोजन्मीत्यमरः । व्रीह्यादित्वादिनिः । अन्तकोमृत्युः पर्य्यवस्थाता प्रतिरोद्धा प्रथमन्तावत् जन्मिनोजन्मदुःखमेव दुस्तरन्ततोजातस्य जीवनमपि सततन्दुःखसंभिन्नतया विषयुक्तान्नप्रायन्तदपि मृत्युग्रस्तमिति सोऽयं काकमांसं शुनोच्छिष्टं स्वल्पन्तदपि दुर्लभमिति न्यायादिति भावः । इत्युक्तहेतोस्त्याज्ये भवे संसारे भवतीति भव्योयोग्योजनोभवा

अन्तकः पर्य्यवस्थाता जन्मिनः सन्ततापदः ।
इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥ १३ ॥
चित्तवानसि कल्याणी यत्त्वां मतिरुपस्थिता ।
विरुद्धः केवलं वेषः सन्देहयति मे मनः ॥ १४ ॥
युयुत्सुनेव कवचं किमामुक्तमिदन्त्वया ।
तपस्विनो हि वसते केवलाजिनवल्कले ॥ १५ ॥

त्वमिति शेषः । भव्यं सुखे शुभे चापि भेयवद्योग्यभाविनो रिति विश्वः । भव्यगेयेत्यादिना कर्त्तरि निपातः । मुक्तौ मोक्षे उत्तिष्ठते उद्युक्तो भवति । उदोनूर्द्ध्वकर्म्मणि इत्यात्मनेपदम् ॥ १३ ॥

सम्प्रति प्रशंसापूर्व्वकं स्वाभिसन्धिन्दर्शयति । चित्तवानिति । चित्तवान् प्रशस्तचित्तोऽसि । प्रशंसायां मतुप् । कुतो यतस्त्वां कल्याणी साध्वी । बह्वादिभ्यश्चेति ङीष् । मतिरुपस्थिता सङ्गता । किन्तु केवलमेकं यथा तथा विरुद्धो वेषो मे मनः सन्देहयति संशययुक्तङ्करोति । यद्वा वेषः केवलं वेष एवेत्यर्थः । केवलः कृत्स्न एके च केवलश्चावधारिते इत्युभयत्रापि शाश्वतः ॥ १४ ॥

वेषविरोधमेवाह । युयुत्सुनेति । युयुत्सुनेव योद्धुमिच्छुनेव । युधेः सन्नन्तादुप्रत्ययः । किमिदङ्कवचञ्चर्म्म आमुक्तं अर्प्पितम् । तत्र कोविरोध इत्यत्राह । हि यस्मात्तपस्विनः केवले एके कवचाद्यसहचरिते इति यावत् ते च ते अजिनवल्कले च । निर्णीते केवलमिति त्रिलिङ्गन्त्वेककृत्स्नयोरित्यमरः । वसते आच्छादयन्ति । अतस्तपस्विनस्ते कवचधारणं विरुद्धमित्यर्थः ॥ १५ ॥

प्रपित्सोः किञ्च ते मुक्तिं निःस्पृहस्य कलेवरे ।
महेषुधी धनुर्भीमं भूतानामनभिद्रुहः ॥ १६ ॥
भयङ्करः प्राणभृतां मृत्योर्भुज इवापरः ।
असिस्तव तपस्थस्य न समर्थयते शमम् ॥ १७ ॥
॥ युग्मम् ॥

प्रपित्सोरिति । किञ्च मुक्तिं प्रपित्सोः प्राप्तुमिच्छोः । सनि मीमेत्यादिना इसादेशः अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः । अतो मुमुक्षुत्वादेव कलेवरे शरीरे निःस्पृहस्य गतस्पृहस्य अतो नात्मरक्षार्थं धनुर्धारणं युक्तमित्यर्थः । नापि परहिंसार्थमित्याह । भूतानां जन्तूनाम् । क्ष्मादौ जन्तौ च भूतानीति वैजयन्ती । क्रुधद्रुहोरुपसृष्टयोः कर्मेति कर्मसंज्ञायां कर्तृकर्मणोः कृतीति षष्ठी । अनभिद्रुहोऽहिंसकस्य । सत्सूद्विषेत्यादिना क्विप् । ते तव महेषुधी महानिषङ्गौ भीमं त्रासजनकं धनुश्च न समर्थयते शममित्युत्तरेणान्वयः । समर्थयतइति वचनविपरिणामः कार्य्यः ॥ १६ ॥

भयङ्करइति । तथा मृत्योरपरो भुजइव प्राणभृतां प्राणिनां भयङ्करः । मेघर्त्तिभयेषु कृञइति खच्प्रत्ययः अरुर्द्विषेत्यादिना मुमागमः । असिः खड्गः तपसि तिष्ठतीति तपस्थस्तपस्विनइत्यर्थः । सुपि स्थइति कप्रत्ययः । तस्य तव शमं शान्तिं न समर्थयते न सम्भावयति किंशान्तस्य शस्त्रेणेति भावः ॥ १७ ॥

नन्वशान्तस्य किन्तपसेत्याशङ्क्य जयार्थमित्याह । जयमिति । अत्र भवान् पूज्यइत्यर्थः । इतराभ्योऽपि दृश्यन्तइति प्रथमार्थे

जयमत्र भवान्नूनमरातिष्वभिलाषुकः ।
क्रोधलक्ष्म क्षमावन्तः क्वायुधं क्व तपोधनाः ॥१८॥
यः करोति बधोदर्क्का निःश्रेयसकरीः क्रियाः ।
ग्लानिदोषच्छिदः स्वच्छाः स मूढः पङ्कयत्यपः ॥१९॥

प्राग्दिशीयस्तल्प्रत्ययः सुप्सुपेति समासः । त्रिषु तत्रभवान् पूज्य स्तथैवात्रभवानपीति यादवः । अरातिषु विषये जयमभिलाषुको जयमिच्छुः । लषपतेत्यादिनाउकञ्प्रत्ययः न लोकेत्यादिना षष्ठीप्रतिषेधः । नूनमिति निश्चयः । नूनन्तर्केऽपि निश्चयइत्यमरः । क्रोधस्य लक्ष्म कोपस्य लिङ्गमायुधं क्व । क्षमावन्तः शान्तास्तपोधनाः क्व क्रोधशान्त्योर्विरोधात् तत्कार्य्ययोः शस्त्रतपसोरप्येकत्रासङ्गतेश्च शस्त्रिणस्ते तपोजयार्थं नतु मोक्षार्थमिति निश्चयइत्यर्थः ॥ १८ ॥

तपसोजयार्थत्वे दोषमाह । यइति । यः पुमान्निश्चितं श्रेयो निःश्रेयसं मुक्तिः । अचतुरेत्यादिना समासान्तोनिपातः । मुक्तिः कैवल्यनिर्व्वाणश्रेयोनिःश्रेयसामृतमित्यमरः । निःश्रेयसं कुर्व्वन्तीति निःश्रेयसकरीः निःश्रेयसहेतूनित्यर्थः । कृञोहेतुताच्छील्यानु लोम्येष्विति हेत्वर्थे टप्रत्ययः टित्वात् ङीप् । क्रियास्तपोदानादिकर्म्माणि बधोदर्काहिंसाफलकाः करोति । उदर्कः फल मुत्तरमित्यमरः । अतएव मूढः स पुमान् ग्लानिरेव दोषस्तच्छिन्दन्तीति ग्लानिदोषच्छिदः पिपासाहारिणीः । क्विप् । स्वच्छाः निर्म्मला अपः पङ्कयति पङ्कवतीः करोति । णाविष्टवद्भावे विन्मतोर्लुगिति मतुपोलुक् । महाफलसाधनस्य तपसस्तुच्छफले विनियोगः स्वच्छाम्बुनः पङ्कसङ्करवत्मेक्षावद्भिर्गर्हितइत्यर्थः ॥

मूलन्दोषस्य हिंसादेरर्थकामौ स्म मा पुषः ।
तौ हि तत्त्वावबोधस्य दूरुच्छेदावुपप्लवौ ॥ २० ॥
अभिद्रोहेण भूतानामर्ज्जयन् गत्वरीः श्रियः ।
उदन्वानिव सिन्धूनामापदामेति पात्रताम् ॥ २१ ॥

अत्र यत्तपसोबधोदर्कीकरणन्तन्निर्म्मलस्य पयसः पङ्कसङ्करीकरणमिति वाक्यार्थोन्तरमारोप्य प्रतिबिम्बकरणाक्षेपादसम्भववस्तुसम्बन्धाद्वाक्यार्थवृत्तिनिदर्शनालङ्कारः ॥ १९ ॥

नन्वर्थकामयोरपि मोक्षवत्पुरुषार्थत्वात्तपसस्तदर्थत्वे कोदोषस्तत्राह । मूलमिति । हिंसादेरिति तद्गुणसंविज्ञानोबहुव्रीहिः । आदिशब्दादन्टतस्तेयादीनां सङ्ग्रहः दोषस्यावगुणस्य मूलं कारणभूतौ । स्त्रीकामाधनकामाश्च किन्न कुर्व्वन्ति पातकमिति भावः । अर्थकामौ मास्म पुषः । स्मोत्तरे लङ् चेति लुङ् । पुषादीत्यादिना च्लेरङादेशः । हि यस्मात्तावर्थकामौ तत्त्वावबोधस्य तत्त्वज्ञानस्य मोक्षसाधनस्येति शेषः । दुरुच्छेदौ दुर्व्वारावुपप्लवौ हिंसादिप्रवर्तकत्वादन्तकावतः पुरुषार्थपरिपन्थिनावेतौ न पुरुषार्थावित्यर्थः ॥ २० ॥

मुक्तिप्रतिबन्धकत्वादपुरुषार्थावर्थकामावित्युक्तं तत्रार्थस्य दुःखैकनिदानत्वादप्यपुरुषार्थत्वमिति पञ्चभिः प्रपञ्चयति । अभिद्रोहेणेत्यादि । भूतानामभिद्रोहेण हिंसया गत्वरीरस्थिराः श्रियः सम्पदोऽर्ज्जयन् जनः उदकमस्तीत्युदन्वानुदधिः । उदन्वानुदधौ चेति निपातनात् साधु । सिन्धूनान्नदीनामिवापदाम्पात्रतां मूलत्वमेति ॥ २१ ॥

या गम्याः सत्सहायानां यासु खेदो भयं यतः ।
तासां किं यन्न दुःखाय विपदामिव सम्पदाम् ॥२२॥
दुरासदानरीनुग्रान् धृतेर्विश्वासजन्मनः ।
भोगान् भोगानिवाहेयानध्यास्यापन्न दुर्लभा ॥२३॥

आपत्साम्यतामेव व्यनक्ति । येति । याः सम्पदः सत्सहायानां विद्यमानसाधनानामेव पुंसाङ्गम्याः प्राप्याः विपदोऽपि सत्सहायानामेव गम्या निस्तीर्या इत्यर्थः । कृत्यानां कर्त्तरि वेति षष्ठी । यासु सतीषु खेदो रक्षणादिक्लेशः विपत्सु स्वत एवेति विशेषः यतो याभ्यः सम्पद्भ्यो भयमनेकार्थमूलत्वादिति भावः । विपद्भ्यस्तु स्वरूपत एवेति भावः । किं बहुना । विपदामिव तासां सम्पदां सम्बन्धि न किमस्तीति शेषः । यद्दुःखाय न भवति सर्व्वं दुःखावहमेवेति भावः । यदाहुः । अर्थानामर्जने दुःखमर्जितानाञ्च रक्षणे । नाशे दुःखं व्यये दुःखं धिगर्थं दुःखभाजनमिति अतो हेय इति भावः । अत्र यन्न दुःखायेत्युत्तरवाक्यस्य यच्छब्दसामर्थ्यात्तासां किमिति पूर्व्ववाक्ये तच्छब्दोपादानन्नापेक्षते तदेतत् काव्यप्रकाशे स्पष्टम् ॥ २२ ॥

दुरासदानिति । किञ्च दुरासदान् दुःप्रापान् विश्वासाज्जन्म यस्यास्तस्याः । जन्मोत्तरपदत्वाद्व्यधिकरणो बहुव्रीहिः । धृतेः सन्तोषस्योग्रानरीन् धनिकस्य सर्व्वत्रानाश्वाससम्भवाद्विस्रम्भसुखभञ्जकानित्यर्थः । भुज्यन्त इति भोगान् धनानि आहेयानहिषु भवान् । दृति कुक्षिकलशिवस्त्यस्त्यहेर्ढञ् । भोगान् फणान् । भोगः सुखे धने चाहेः शरीरफणयोरपीत्युभयत्रापि विश्वः । अध्यास्य अधिष्ठाय

नान्तरज्ञाः श्रियो जातु प्रियैरासां न भूयते ।
आसक्तास्तास्वमी मूढा वामशीला हि जन्तवः ॥२४॥
कोऽपवादः स्तुतिपदे यदशीलेषु चञ्चलाः ।
साधुवृत्तानपि क्षुद्रा विक्षिपन्त्येव सम्पदः ॥ २५ ॥

आपत् विपत् न दुर्लभा आशीविषमुखमिव तमेव भोगिनं पुमांसं बलादापदोऽनुसन्दधतीत्यर्थः ॥ २३ ॥

इतोऽपि श्रियो हेया इत्याह । नेति । श्रियः सम्पदो जातु कदाचित् अन्तरज्ञा नीचानीचविशेषाभिज्ञा न भवन्ति । अतएवासां श्रियां प्रियैर्न भूयते न ताः कुत्राप्यनुरज्यन्तीत्यर्थः । ननु किं श्रीदोषः पुरुषदोषो वेति चेत्तत्राह मूढा अमी जनास्तास्वननुरक्तास्वपि श्रीष्वासक्ताः स्त्रीष्विव श्रीष्वननुरक्तास्वनुरागः पुंसामेवायन्दोष इत्यर्थः । किमर्थं तर्हि तास्वेव सर्वेषामासक्तिरित्यर्थान्तरं न्यस्यति । वामेति जन्तवो वामशीला वक्रस्वभावा हि स्वभावस्य दुर्वारत्वादिति भावः ॥ २४ ॥

यदुक्तं नान्तरज्ञाः श्रिय इति तदेव भङ्ग्यन्तरेणाह । क इति । यत् सम्पदोऽशीलेषु दुःशीलेषु विषये चञ्चला अस्थिराः । न तद्विरुद्धमुच्यते यतः चञ्चला इति । अतः स्तुतिपदे स्तुतिविषये तत्र कोऽपवादः का निन्दा किन्तु क्षुद्राः सम्पदः साधुवृत्तानपि विक्षिपन्त्येव जहत्येव तदेव तासान्निन्दास्पदमित्यर्थः । तस्मादर्थो न पुरुषार्थ इति सन्दर्भार्थः ॥ २५ ॥

ननु मार्थमहमर्थये किन्तु वीरधर्ममनुपालयन् वैरनिर्यातनमिच्छामीत्याशङ्क्य तदपि परपीडात्मकत्वादयुक्तमिति श्लोक

कृतवानन्यदेहेषु कर्त्ता च विधुरं मनः ।
अप्रियैरिव संयोगो विप्रयोगः प्रियैः सह ॥ २६ ॥
शून्यमाकीर्णतामेति तुल्यं व्यसनमुत्सवैः ।
विप्रलम्भोऽपि लाभाय सति प्रियसमागमे ॥ २७ ॥
तदा रम्याण्यरम्याणि प्रियाः शल्यन्तदासवः ।
तदैकाकी सबन्धुः सन्निष्टेन रहितो यदा ॥ २८ ॥

चतुष्टयेनाचष्टे । कृतवानिति । तत्रात्मदृष्टान्तेनैव परपीडातो निवर्त्तितव्यमित्याशयेनाह । अप्रियैरनिष्टवस्तुभिः संयोग इव प्रियैरिष्टवस्तुभिः सह विप्रयोगो विरहोऽन्यदेहेषु स्वस्यैव देहान्तरेषु अतीतानागतेषु इति शेषः मनो विधुरन्दुःखितं कृतवान् कर्त्ता करिष्यति च । भविष्ये लुट् । तद्वर्त्तमाने चानुभूयत इति शेषः । इष्टनाशो दुःखहेतुरिति सर्व्वत्रापि त्रैकालिकसिद्धमिति श्लोकार्थः ॥ २६ ॥

सम्प्रतीष्टसमागमस्य सुखहेतुत्वमाह । शून्यमिति । प्रियसमागमे इष्टजनसंयोगे सति शून्यं रिक्तमप्याकीर्णतां सम्पूर्णतामेति सम्बद्धमिव प्रतीयत इत्यर्थः । व्यसनं विपदपि उत्सवैस्तुल्यम् । व्यसनं विपदि भ्रंश इत्यमरः । विप्रलम्भो वञ्चना प्रतारणमिति यावत् सोऽपि लाभाय । किम्बहुना प्रियसङ्गस्य सर्व्वावस्थास्वपि सुखमेवेत्यर्थः ॥ २७ ॥

पुनः प्रकारान्तरेण प्रियवियोगस्य दुःखहेतुत्वमाह । तदेति । तदा रम्याण्यप्यरम्याणि अमनोहराणि भवन्ति । किम्बहुना प्रिया असवः प्राणा अपि शल्यं शल्यवदसह्या भवन्तीत्यर्थः । किञ्च तदा

युक्तः प्रमाद्यसि हितादपेतः परितप्यसे ।
यदि नेष्टात्मनः पीडा मासञ्जि भवता जन ॥ २९ ॥
जन्मिनोऽस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलाम् ।
भवान्मा स्म वधीन्न्याय्यं न्यायाधाराहि साधवः ॥ ३० ॥

सबन्धुः सन्नपि एकाकी असहाय एव । एकादाकिनिचासहाय इत्याकिनिच्प्रत्ययः । क इत्याकाङ्क्षायामाह । यदा दुष्टेन रहिता भवति तदा सर्व्वमसह्यमिति ॥ २८ ॥

युक्त इति । किञ्च युक्तोहितेनेति शेषः हितेनेष्टेन युक्तः सन् प्रमाद्यसि प्रकर्षेण माद्यसि हृष्यसि । हितादपेतः परितप्यसे परितप्तोभवसि । तपेर्दैवादिकात्कर्त्तरि लट् । सत्यमेवन्तत. किमत आह । यदीति । पीडा आत्मनःस्वस्य च नेष्टा यदि तर्हि भवता जने परस्मिन्नपि मासञ्जि न सज्यताम् । सञ्जतेर्ण्यन्तात्कर्म्मणि लुङ् । आत्मदृष्टान्तेन परपीडातो निवर्त्तितव्यमित्यर्थः पीडायाः परात्मनोः समत्वात् ॥ २९ ॥

अथ देहास्थैर्य्यशङ्कया च परपीडा न कार्य्येत्याह । जन्मिन इति । अस्य जन्मिन उत्पत्तिधर्म्मिकस्य शरीरिणः । व्रीह्यादित्वादिनिः । स्थितिं लक्ष्मीमिव चलाचलाञ्चञ्चलां जन्मिधर्म्मत्वादेव चञ्चलामनित्यामित्यर्थः । चलतेः पचाद्यच् चरिचलिपति वदीनां वा द्वित्वमच्याक् चाभ्यासस्येति वक्तव्यमिति द्विर्भावः अभ्यासस्य आगागमश्च । विद्वान् जानन्नित्यर्थः । विदेः शतुर्वसुरिति वैकल्पिकोवस्वादेशः । भवान् न्यायादनपेतं न्याय्यं । धर्म्मपथ्यर्थन्यायादनपेतइति यप्रत्ययः । मा स्म वधीत् मा नाशयेत्यर्थः । स्मोत्तरे लङ् चेति

विजहीहि रणोत्साहं मा तपः साधु नीनशः ।
उच्छेदं जन्मनः कर्त्तुमेधि शान्तस्तपोधन ॥३१॥
जीयन्तां दुर्ज्जया देहे रिपवश्चक्षुरादयः ।
जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥३२॥

लुङ् लुङि चेति हनो वधादेशः शेषे प्रथम इति प्रथमपुरुषः । हि यस्मात्साधवो न्यायाधारा न्यायावलम्बाः । बहुव्रीहिस्तत्पुरुषो वा । न्यायत्यागे साधुत्वमेव न स्यादिति भावः । न्यायाचारा इति पाठे न्यायमाचरन्तीति तथोक्ताः । कर्म्मण्यण् ॥ ३० ॥

तर्हि किं मे कर्त्तव्यन्तत्राह । विजहीहीति । हे तपोधन रणोत्साहं रणोद्योगं । लोकोत्तरेषु कार्य्येषु स्थेयान् प्रयत्न उत्साहः । विजहीहि त्यज । आ च हाविती कारः । साधु समीचीनं निःश्रेयसकरत्वादिति भावः तपो मा नीनशः न नाशय । नश्यतेर्ण्यन्तान्माङ्योगादाशिषि लुङ् अडागमनिषेधश्च । किन्तु जन्मन उच्छेदं कर्त्तुं मोक्षं साधयितुमित्यर्थः शान्त एधि विजिगीषानिवृत्तो भवेत्यर्थः । कुञ्च्लभ्यो हेर्द्धिरिति धिः घ्वसोरेद्धावभ्यासलोपश्चेत्येकार इति ॥३१॥

अथ सर्व्वथा मे विजयकण्डूरस्ति न निवर्त्तत इत्याशङ्क्य तर्ह्यन्तःशत्रुविजयेन विधीयतान्तदपनोद इत्याह । जीयन्तामिति । दुर्ज्जया अजय्याश्चक्षुरादयो देहे वर्त्तमानाः रिपवो जीयन्तां यस्मात्तेषु शत्रुषु जितेषु सत्सु त्वया अयं कृत्स्नो लोको जितो ननु किमन्यैः शत्रवस्तदन्तर्गता इत्यर्थः । जितेन्द्रियस्य इन्द्रियार्थनिस्पृहस्य निर्भरवैराग्यदया द्विजयव्यपदेशः ॥ ३२ ॥

परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः ।
अविधेयेन्द्रियः पुंसां गौरिवैति विधेयताम् ॥ ३३ ॥

श्वस्त्वया सुखसंवित्तिः स्मरणीयाधुनातनी ।
इति स्वप्नोपमान्मत्वा कामान्मा गास्तदङ्गताम् ॥ ३४ ॥

अजितेन्द्रियस्यानिष्टमाचष्टे । परवानिति । अर्थसंसिद्धौ अभ्यवहारादिस्वार्थसाधने परवान् पराधीनः । परतन्त्रः पराधीनः परवानित्यमरः । नीचवृत्तिः कर्षणवहनादिनिकृष्टकर्मा अपत्रपो निर्लज्जः अविधेयेन्द्रियोऽजितेन्द्रियः पुमान् गौर्बलीवर्द इव पुंसां विधेयतां यथोक्तकारितां प्रेष्यतामिति यावत् । विधेयो विनयग्राही वचने स्थित आश्रव इत्यमरः । एति प्राप्नोति । उपमालङ्कारो ऽयम् । प्रकृताप्रकृतयोरर्थसाधर्म्यात् श्लेषे तु शब्दमात्रसाधर्म्यमिति ॥ ३३ ॥

न केवलं हिंसादिदोषमूलत्वाद्विषयाणां हेयत्वं किन्तु अपारमार्थिकत्वादपीत्याह । श्व इति । अधुना भवा अधुनातनी इदानीन्तनी । सायञ्चिरमित्यादिना ट्युप्रत्ययः । सुखसंवित्तिः सुखानुभवः श्वः परेऽहनि त्वया स्मरणीयान त्वनुभवनीया इति हेतोः काम्यन्त इति कामाः विषयास्तान् स्वप्नोपमान् स्वप्नतुल्यान्मत्वा निश्चित्य तदङ्गतान्तच्छेषत्वं कामपरतन्त्रतां मागाः न गच्छ । इणो गा लुङीति गादेशः ॥ ३४ ॥

अतो हेयाः कामा इत्याह । अश्रद्धेया इति । अश्रद्धातुमशक्याः अश्रद्धेयाः विश्वसनीयाः तथा विप्रलब्धारः प्रतारका विश्वासघातका इत्यर्थः । तथा प्रीणन्तीति प्रियाः प्रीतिजनकाः । इगुपधेत्या

अश्रद्धेयाविप्रलब्धारः प्रियाविप्रियकारिणः ।
सुदुस्त्यजास्त्यजन्तोऽपि कामाः कष्टाहि शत्रवः ॥३५॥
विविक्तेऽस्मिन्नगे भूयः प्लाविते जह्नुकन्यया ।
प्रत्यासीदति मुक्तिस्त्वाम्पुरा मा भूरुदायुधः ॥३६॥

दिना कप्रत्ययः । तथापि विप्रियकारिणो दुःखजननशीलाः । किञ्च त्यजन्तोऽपि पुरुषं विहाय गच्छन्तोऽपि सुदुस्त्यजाः स्वयत्नेन त्यक्तुमशक्याः कामाविषयाः कष्टाः कुत्सिताः शत्रवोहि प्रसिद्धाः शत्रवः वैधर्म्यादिति भावः । अत्र अश्रद्धेयत्वादीनां विप्रलम्भकत्वादीनां चैकत्रविरोधेविषयस्याभावेन समाधीयतइति विरोधाभासोऽलङ्कारः । तेन च कामानाम्प्रसिद्धशत्रुवैधर्म्यं व्यतिरेकोव्यज्यतइत्यलङ्कारेणालङ्कारध्वनिः ॥ ३५ ॥

तर्हि किङ्कर्त्तव्यमित्याशङ्क्योपसंहरन्नाह । विविक्तइति । विविक्ते विजने । विविक्तविजनच्छन्ननिःशलाकास्तथारहइत्यमरः । जह्नुकन्यया गङ्गया भूयोभूयिष्ठम्पुनःपुनर्वा । भूयः पुनः पुनः स्यातप्रभृतार्थे पुनरव्ययमिति विश्वः । प्लाविते सिक्ते पावितइति पाठे पवित्रीकृते इत्यर्थः अस्मिन्नगे इन्द्रकीले त्वां मुक्तिः पुरा निकटे प्रत्यासीदति सन्निकृष्टा भविष्यतीत्यर्थः ॥ पुरा पुराणे निकटे प्रबन्धातीतभाविष्विति विश्वः । उदायुधोगृहीतशस्त्रोमा भूः शस्त्रं विमुञ्चेत्यर्थः ॥ ३६ ॥

व्याहृत्येति । महतास्पत्यौ देवेन्द्रे इति वाचं व्याहृत्योक्त्वा अवस्थिते सति तूष्णीं स्थिते सति अथ कपिध्वजोऽर्ज्जुनः प्रश्रय

व्याहृत्य मरुतामत्याविति वाचमवस्थिते ।
वचः प्रश्रयगम्भीरमथोवाच कपिध्वजः ॥ ३७ ॥
प्रसादरम्यमोजस्वि गरीयो लाघवान्वितम् ।
साकाङ्क्षमनुपस्कारं विष्वग्गति निराकुलम् ॥ ३८ ॥
न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे ।
अप्रकम्प्यतयान्येषामाम्नायवचनोपमम् ॥ ३९ ॥

गम्भीरं विनयमधुरम् । विनयप्रश्रयौ समाविति यादवः । वचउवाच ॥ ३७ ॥

किमुवाचेत्यपेक्षायाञ्चतुर्भिरिन्द्रवाक्यमुपश्लोकयन्नाह । प्रसादेति । प्रसादोऽत्र प्रसिद्धार्थपदत्वन्तेन रम्यं । प्रसिद्धार्थपदत्वं यत्स प्रसादो निगद्यत इति लक्षणात् । ओजस्वि समासभूयिष्ठं । ओजः समासभूयस्त्वमिति वामनात् । गरीयोऽर्थभूयस्त्वपरिगतं न तु शब्दाडम्बरमात्रमित्यर्थः । लाघवान्वितं विस्तरदोषरहितम् । साकाङ्क्षमाकाङ्क्षावत्पदकदम्बात्मकं न तु दश दाडिमादिवाक्यवदनाकाङ्क्षितमित्यर्थः । अनुपस्कारमध्याहार दोषरहितम् । विष्वग्गति कृत्स्नार्थप्रतिपादकं नतु सावशेषार्थं अतएव निराकुलमसङ्कीर्णार्थम् ॥ ३८ ॥

न्यायेति । पुनर्न्यायेन युक्त्या निर्णीतसारत्वान्निश्चितार्थत्वा द्धेतोरागमे शास्त्रे विषये निरपेक्षं स्वतन्त्रमिव युक्तिदार्ढ्यादेव प्रतीयते । वस्तुतस्तु शास्त्रसिद्धार्थमिवेति इवशब्दार्थः । किञ्च । अन्येषाम्प्रतिवादिनामप्रकम्प्यतया अनुमानादिभिरबाध्यत्वात् अप्रत्याख्याततया आम्नायवचनोपमं वेदवाक्यतुल्यमित्यर्थः ॥ ३९ ॥

अलङ्घ्यत्वाज्जनैरन्यैः चुभितोदन्वदूर्जितम्।
औदार्य्यादर्थसम्पत्तेः शान्तं चित्तमृषेरिव ॥५०॥
इदमीदृग्गुणोपेतं लब्धावसरसाधनम् ।
व्याकुर्य्यात्कः प्रियं वाक्यं योवक्ता नेदृगाशयः॥४१॥
न ज्ञातन्तात यत्नस्य पौर्व्वापर्य्यममुष्य ते ।
शासितुं येन मान्धर्म्मं मुनिभिस्तुल्यमिच्छसि ॥ ४२ ॥

अलङ्घ्यत्वादिति । अन्यैर्जनैरलङ्घ्यत्वादनुल्लङ्घनीयत्वात् चभितोदन्वदूर्जितमुद्वेलाम्भोधिगम्भीरं औदार्य्यादुक्तिविशेषत्वात् श्लाघ्यविशेषणाद्वा। तदुक्तन्दण्डिना। उत्कर्षवान् गुणः कश्चिदुक्ते यस्मिन्प्रतीयते। तदुदाराह्वयन्तेन सनाथा काव्यपद्धतिः। श्लाघ्यैर्विशेषणैर्युक्तमुदारङ्कैश्चिदिष्यतइति । अग्राम्यार्थत्वादिति केचिदन्यत्र त्यागित्वादित्यर्थः। अर्थसम्पत्तेः प्रयोजनसम्पत्तेः अन्यत्राणिमादिसम्पत्तेः मुनेश्चित्तमिव शान्तं सौम्यम् ॥ ४० ॥

इदमिति । इदमीदृग्गुणोपेतं यथोक्तगुणयुक्तम्। इदमुपपदात् दृशेः क्विप् इदं किमोरीश्कीति ईशादेशः। लब्धे प्राप्ते अवसरसाधने कालोपायौ येन तत्प्रियमप्रीतिकरं वाक्यङ्कोवक्ता व्याकुर्य्यात् व्याहरेत् योवक्तासोऽनीदृगाशयः ईदृग्विवक्षावान्न भवति अबुद्धिरित्यर्थस्तस्यार्थस्य वक्तुमशक्यत्वादिति भावः ॥ ४१ ॥

एवमिन्द्रवाक्यमुपश्लोक्य नाहमस्योपदेशस्याधिकारीति परिहरति। नेति। हे तात अमुष्य यत्नस्य तपोरूपस्यास्य मदीययोगस्य पूर्व्वं चापरञ्च पूर्व्वापरे एव पौर्व्वापर्य्यं कारणं फलञ्च। चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्ययः। ते तव न ज्ञातं त्वया न ज्ञायतइत्यर्थः।

अविज्ञातप्रबन्धस्य वचोवाचस्पतेरपि ।
व्रजत्यफलतामेव नयद्रुह इवेहितम् ॥ ४३ ॥
श्रेयसोऽप्यस्य ते तात वचसोनास्मि भाजनम् ।
नभसः स्फुटतारस्य रात्रेरिव विपर्य्ययः ॥ ४४ ॥

मतिबुद्धीत्यादिना वर्त्तमाने क्तः । तद्योगादेव षष्ठी । कुतः येन कारणेन मां मुनिभिस्तुल्यं सदृशन्धर्म्मं मोक्षधर्म्मं शासितुमुपदेष्टु मिच्छसि । शासिरयं दुहादित्वात् द्विकर्मकोज्ञेयः ॥ ४२ ॥

अथ पौर्व्वापर्य्यमज्ञात्वाप्युपदेशे दोषमाह । अविज्ञातेति । अविज्ञातः प्रबन्धः पूर्व्वापरसङ्गतिर्येन तस्य वाचस्पतेर्बृहस्पते रपि । कस्कादित्वात्सः अथवा षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेष्विति सकारः एतस्मादेव ज्ञापकात् अलुगिति केचित् । वचउपदेशो नयद्रुहोनीतिविरुद्धकारिणः पुरुषस्य ईहितमुद्योगइवाफलतां निष्फलत्वं व्रजत्येव गच्छत्येव ॥ ४३ ॥

ननु सदुपदेशस्य कुतोवैफल्यमित्याशङ्क्य सोऽप्यस्थाने प्रयुक्तस्त्वे दूषरक्षेत्रे शालिवीजवद्विफलएवेत्याशयेनाह । श्रेयसइति । हे तात । पुत्रे पितरि पूज्येच तातशब्दं प्रचक्षतइति । श्रेयसोऽपि हितार्थयोगात्प्रशस्ततरस्यापि अस्य ते तव वचसो हितोपदेशरूपस्य रात्रेर्विपर्य्ययोदिवसः स्फुटतारस्य व्यक्ततारकस्य नभसइव भाजनम्पात्रन्नास्मि अनधिकारित्वादिति भावः । अत्राक्ते नभोमात्रसम्बन्धसम्भवेऽपि तारासम्बन्धासम्भवात्तद्विशिष्टनभः सम्बन्धविरोधायुक्तं तारकितस्य नभसोन पात्रमहरिति ॥ ४४ ॥

क्षत्त्रियस्तनयः पाण्डोरहम्पार्थो धनञ्जयः ।
स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने ॥४५॥

कुतस्ते मोक्षोपदेशानधिकारित्वं किञ्च ते तपसः पौर्व्वापर्य्यं कथञ्च ज्ञानमित्याशङ्क्य तत्सर्व्वं स्वजात्यादिकथनपूर्व्वकन्निरूपयति। क्षत्त्रियइति । अहं क्षत्त्रियः क्षत्त्रियकुले जातः। तत्रापि महाकुले प्रसूतः वीरसन्तानस्येत्याह । पाण्डोस्तनयइति । तत्रापि कौन्तेयोऽस्मि न माद्रेयइत्याह । पार्थइति पृथा कुन्ती तत्सुतः पार्थः । तस्यापत्यमित्यण् । अर्ज्जुनोऽहं महावीरइत्याह । धनञ्जयइति । उत्तरकुरून्विजित्य धनाहरणाद्धनञ्जयोऽस्मीत्यर्थः धनञ्जयइत्युक्ते शरीरस्थोवायुः सर्प्पविशेषोवा स्यात्तदर्थं पार्थः गन्धर्व्वोऽपि कश्चित्पृथासुतोऽस्ति तदर्थं पाण्डोः सुतः नैमिषारण्ये पाण्डुर्विप्रस्तत्पत्नी पृथा नाम काचिद्ब्राह्मणी तत्पुत्रोऽपि स्यात् तदर्थं क्षत्त्रियइति । अथैवञ्चेत् किमर्थं तर्हि तपस्यसि मोक्षार्थं वा किन्न तपस्यसि तत्राह । स्थितइति । दायमेकत्कस्थनमाददतइति दायादाः ज्ञातयः । दायादौज्ञातिपुत्रयोरिति। विभक्तव्यम्पितृद्रव्यं दायमाहुर्मनीषिणइति च विश्वः । स्वामीश्वरादिसूत्रेण सोपसर्गादपि दायादेति कप्रत्ययान्तोनिपातनात्साधः । तैः प्रास्तस्य राज्यान्निरस्तस्य वैरिनिर्यातनार्थिनइत्यर्थः । ज्येष्ठस्य भ्रातुर्युधिष्ठिरस्य । वृद्धशब्दादिष्ठन्प्रत्ययः वृद्धस्य च ज्यादेशः। शासने निदेशे स्थितस्तदाज्ञया तपस्यामीत्यर्थः। अन्यथा मानहानिः सौभ्रात्रभङ्गः पूज्यपूजाव्यतिक्रमदोषश्च स्यादिति भावः । अतएव द्विवैकरसस्य रागद्वेषकषायितचेतसः कुतोमे

कृष्णद्वैपायनादेशाद्बिभर्मि व्रतमीदृशम् ।
भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥ ४६ ॥
दुरक्षान् दीव्यता राज्ञा राज्यमात्मा वयं वधूः ।
नीतानि पणतां नूनमीदृशी भवितव्यता ॥ ४७ ॥

मोक्षाधिकार इति तात्पर्य्यार्थः। सार्थविशेषणत्वात्परिकरालङ्कारः ॥ ४५ ॥

यदुक्तं विरुद्धः केवलं वेष इति तत्रोत्तरमाह। कृष्णेति । द्वीपे ऽयनञ्जन्मभूमिर्य्यस्य स द्वीपायनः सएव, द्वैपायनो व्यासः । प्रज्ञादित्वात्स्वार्थे ऽण्प्रत्ययः । सएव कृष्णवर्णत्वात्कृष्णद्वैपायनस्तस्यादेशा दुपदेशादीदृशं विरुद्धवेषमित्यर्थः व्रतन्तपोनियमं बिभर्मि धारयामि न तु स्वेच्छयेति भावः । अथोपास्यां देवतामाह । भृशमिति। स्वाराध्यस्य सुखं आराध्यस्य। प्रादिसमासः। स्वाराधस्येति पाठे उपसृष्टात् खल्प्रत्ययः । मरुत्वत इन्द्रस्य । भृशं सम्यगाराधने यत्तः प्रयत्नवानित्यर्थः। तस्य चत्रियदैवतत्वात् इति भावः ॥ ४६ ॥

ननु भ्रातृसभ्रातृसहायस्य महावीरस्य युधिष्ठिरस्य कथमरिपरिभवप्राप्तिरित्यतआह । दुरक्षानिति। दुरक्षान् कपटपाशकैरित्यर्थः। दिवः कर्म्म चेति करणे कर्म्मसंज्ञा । दीव्यता क्रीडता। आहूतोन निवर्त्तेत द्यूतादपि रणादपीति शास्त्रात्। न तु व्यसनितयेति भावः । राज्ञा युधिष्ठिरेण राज्यं राष्ट्रमात्मा स्वयं वयञ्चत्वारोऽनुजाः वधूर्जाया द्रौपदी च पणतां ग्लहत्वं । पणोद्यूतेषु ग्लहोऽक्षास्तु देवना पाशकाश्च ते इत्यमरः। नीतानि सर्व्वं द्यूते राज्ञा

तेनानुजसहायेन द्रौपद्या च मया विना ।
भृशमायामियामासु यामिनीष्वभितप्यते ॥ ४८ ॥
हृतोत्तरीयान्प्रसभं सभायामागतह्रियः ।
मर्म्मच्छिदा नोवचसा निरतक्षन्नरातयः ॥ ४९ ॥

हारितमित्यर्थः । नीतानीति नपुंसकैकशेषः । नयतेर्द्विकर्म्मकत्वा त्प्रधाने कर्म्मणि क्तः । ननु सर्व्वज्ञस्य राज्ञः कथमियमविमृश्यकारिता तत्राह । भवितव्यता अनर्थानामवश्यभाविता ईदृशी नूनं निश्चितं नात्र संशय इत्यर्थः । बुद्धिरपि भवितव्यतानुसारिण्येव न स्वतन्त्रेत्यर्थः ॥ ४७ ॥

ननु तथापि तत्रैव तेष्वासक्त्या न तेषां त्वयि तत्राह । तेनेति । अनुजास्सहजाताः सहायाः यस्य तेनानुजयुक्तेनेत्यर्थः । तुल्ययोगः सहायार्थः तेन युधिष्ठिरेण द्रौपद्या च मया विना मद्विरहा दित्यर्थः । आयामिनो दीर्घाः यामाः प्रहराः यासान्तासु । दुःखितस्य तथा भावादिति भावः । यामिनीष्वभितप्यते । भावे लट् । तेषु मदन्तेषामप्यासक्त्या वैराग्यावकाश इत्यर्थः ॥ ४८ ॥

अथ वैरिनिर्यातनस्यावश्यम्भावद्योतनाय चतुर्भिः परापकृति न्दर्शयन् परनिकारान्वर्णयति । हृतेत्यादि । अरातयः शत्रवः सभायाम्प्रसभम्बलात्कारेण हृतोत्तरीयान् अतएवागतह्रियः सम्प्राप्त लज्जान् । नोऽस्मान्मर्म्मच्छिदा मर्म्मच्छेदिना वचसा निरतक्षन् अशा तयन् । वस्त्राद्यपहारवाक्पारुष्याभ्यान्तथा व्यथयामासुरित्यर्थः । तक्षणशब्दसामर्थ्याद्वचसां वास्योपम्यं गम्यत इति वस्तुनालङ्कार ध्वनिः ॥ ४९ ॥

उपाधत्त सपत्नेषु कृष्णाया गुरुसन्निधौ।
भावमानयने सत्याः सत्यङ्कारमिवान्तकः ॥ ५० ॥
तामैक्षन्त क्षणं सभ्या दुःशासनपुरःसराम्।
अभिसायार्कमावृत्तां छायामिव महातरोः ॥ ५१ ॥

अथातिदुःसहनिकारान्तरमाह । उपाधत्तेति । अन्तको मृत्युर्गुरुसन्निधौ भीष्मद्रोणादिसमक्षमेव सत्याः पतिव्रतायाः कृष्णायाः द्रौपद्याः आनयने केशाम्बरादिकर्षणे भावश्चित्ताभिप्रायं इतः परमनेन पाण्डवाभिभवेनैतान् स्वनगरं नेष्यामीति एवंभूतं सत्यङ्कारमिव । क्रियतेऽनेनेति कारः । करणे घञ् । सत्यस्य कारः सत्यङ्कारः सत्यापनं चिकीर्षितस्य कार्य्यस्यावश्यं क्रिया स्थापनार्थं परहस्ते यद्दीयते स सत्यङ्कारः क्रियादौ सत्यदार्ढ्याय प्राग्दीयमानो मूल्यैकदेशश्च । क्वोवि. सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियामित्यमरः । कारे सत्यागदस्येति मुमागमः । तमिव सपत्नेषु उपाधत्त निहितवान् । तेषां विनाशकाले विपरीतबुद्धिमुत्पादितवानित्यर्थः ॥ ५० ॥

केनेयमाकृष्टा सभ्यैर्वा किं कृतमित्याह । तामिति । दुःशासनः पुरःसरो यस्यास्तां तथोक्तां दुःशासनेन सभामत्याकृष्यमाणामित्यर्थः । अनुपसर्जनादिति न ङीप् । तां कृष्णाम् । सभायां साधवः सभ्याः । सभायायदिति यप्रत्ययः । अभिसायार्कं दिनान्ते सूर्य्याभिमुखं स्थितस्येति शेषः । सायो नाशदिनान्तयोरिति विश्वः । लक्षणेनाभिप्रती आभिमुख्यइत्यव्ययीभावः । महातरोः सम्बन्धिनीमावृत्तां छायामिव तां कृष्णां क्षणमैक्षन्त न चिरं जुगुप्सितत्वात्।

अयथार्थक्रियारम्भैः पतिभिः किन्तवेच्चितैः ।
अरुध्येतामितोवास्यानयने वाष्पवारिणा ॥ ५२ ॥
सोढवान्नोदशामन्त्यां ज्यायानेव गुणप्रियः ।
सुलभोहि द्विषाम्भङ्गोदुर्लभा सत्स्ववाच्यता ॥५३॥

नापि किञ्चिद्विप्रियन्त माध्यस्थभङ्गभयात् ते तर्कवदेव साचित्व मात्रमास्थितादृत्यर्थः । अत्राकृष्यमाणायाः कृष्णायाः आक्रष्टारम्प्रति पराङ्मुखत्वादावृत्तच्छायौपम्यम् । तथापि तान्न मुञ्चतीति दुःशासनस्य तरुसाम्यम् ॥ ५१ ॥

अथास्यास्तादात्विकतां वर्णयति । अयथार्थेति । अयथार्था मिथ्याभूताः क्रियारम्भाः पतिशब्दप्रवृत्तिनिमित्तभूतकर्म्मोद्योगा येषां तैस्तामरक्षद्भिरित्यर्थः । तव सम्बन्धिभिः पान्ति रक्षन्तीति पतयोभर्त्तारः । पातेर्डतिरित्यौणादिकोडतिप्रत्ययः । तैरीक्षितै रवेक्षितैः किं न किञ्चित् फलमस्तीत्यर्थः । इतोवेत्थं विचार्य्येत्युत्प्रेक्षा । वाष्पवारिणा अस्याः कृष्णायानयनेऽरुध्येतामावृत्ते । रुधेः कर्म्मणि लङ् । अश्रुणा रुरोदेत्यर्थः ॥ ५२ ॥

ननु भवद्भिः किमर्थमसमर्थैरिवोपेक्षितं तत्राह । सोढवानिति । गुणाः प्रियायस्य स गुणप्रियः । वा प्रियस्येति परनिपातः । ज्यायानग्रजोयुधिष्ठिरएव । वृद्धशब्दादीयसुनि ज्यादादीयसइत्याकारादेश । नोऽस्माकमन्त्ये भवामन्त्यान्निकृष्टां दशामवस्थां सोढवान्न तु वयम् । किन्तु तदवरुद्धाइति भावः । ननु शत्रूपेक्षा महानर्थकारिणीत्याशङ्क्याह । सुलभइति । द्विषां विद्विषाम्भङ्गः सुलभः कालान्तरेऽपीति शेषः । सत्सु सज्जनेषु अवाच्यता निन्द्यता दुर्लभा

स्थित्यतिक्रान्तिभीरूणि स्वच्छान्याकुलितान्यपि ।
तोयानि तोयराशीनां मनांसि च मनस्विनाम् ॥ ५४ ॥
धार्त्तराष्ट्रैः सह प्रीतिर्वैरमस्मास्वसूयत ।
असन्मैत्री हि दोषाय कूलच्छायेव सेविता ॥ ५५ ॥

न तु ममूपेचा । हि प्रसिद्धौ । अनूपेचातो लोकापवाद एवं बलवान नष्टोत्पन्नस्य पुनरप्रतिविधेयत्वात्त्व च समयोल्लङ्घने स्यादेवेति भावः ॥ ५३ ॥

ननु शत्रुवधे राज्ञां कोनामापवादः प्रत्युत कीर्त्तिरेवेत्याशङ्क्य स्वयं सएव समयोल्लङ्घनकलङ्कितकीर्त्या महानिन्दानिदाम मित्याशयेनाह । स्थितीति । तोयराशीनां समुद्राणान्तोयानि मनस्विनां मनांसि च स्थित्यतिक्रान्तेर्मर्यादोल्लङ्घनाद्भीतोर्भीरूणि अतएवाकुलितानि संक्षोभितान्यपि स्वच्छान्यकलुषाणि न त्यजन्ति इत्यर्थः । मनस्वी अयं युधिष्ठिर इति भावः । अत्र तोयानां सामान्यतोमनस्विनाञ्चाप्रकृतानामेव गुणतोल्यादौपम्यस्य गम्य तया तुल्ययोगितालङ्कारः । गुणश्चात्र भीरुत्वं स्वच्छता च ॥ ५४ ॥

नन्वजातशत्रोः स्वजने वैरे किङ्कारणमित्याशङ्क्यास्मत्सौहार्द मेवेत्याह । धार्त्तराष्ट्रैरिति । धार्त्तराष्ट्रैर्धृतराष्ट्रपुत्रैः सह प्रीतिः सौहार्दमेवास्मासु विषये वैरमसूयत सूतवती । सूयतेर्दैवादि कात्कर्त्तरि लङ् । ननु सौहार्दं वैरजनकञ्चेत् विप्रतिषिद्धमित्याह । असदिति । हि यस्मादसन्मैत्री दुर्जनेन सङ्गतिः कूलस्यासन्नपातस्य नदीतटस्य छायेव सेविता श्रिता सती दोषायानर्थाय भवति ।

अपवादादभीतस्य समस्य गुणदोषयोः।
असद्वृत्तेरहोवृत्तं दुर्विभावं विधेरिव ॥ ५६ ॥
ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः।
यद्यमर्षः प्रतीकारम्भुजालम्बन्न लम्भयेत् ॥ ५७ ॥

न खलु दुर्ज्जनः सुजनत्वमिन्द्रोहपातकम्पश्यतीति भावः। उपमा प्राणितोऽयमर्थान्तरन्यासालङ्कारः ॥ ५५ ॥

नन्वादावेव तेषां वृत्तमविज्ञाय कथं मैत्री इतीत्याशङ्क्य किं कुर्मो दुर्ज्जनवृत्तं दुर्विज्ञेयमित्याह। अपवादादिति। अपवादा ज्जनाक्रोशादभीतस्याजगुप्समानस्येत्यर्थः। गुणदोषयोः समस्य तुल्यबुद्धेः निग्रहानुग्रहौ गुणदोषयोरननुरुन्धत इत्यर्थः विधावप्येत द्विशेषणं योज्यम्। असद्वृत्तेर्दुराचारस्य धूर्त्तस्य वृत्तं चेष्टितं विधे र्दैवस्य वृत्तमिव दुर्विभावं विभावयितुमशक्यम्। किन्तु कार्य्यैक समधिगम्यमित्यर्थः। भवतेर्ण्यन्तात्कृच्छ्रार्थे खल् प्रत्ययः ॥ ५६ ॥

नन्वेवं मानी कथं परिभूतोजीवसि तत्राह। ध्वंसेतेति। परैः शत्रुभिः परिभूतस्य मे हृदयं सद्योध्वंसेत भ्रश्येदित्यर्थः। अमर्षः कर्त्ता प्रतीकारम्प्रतिक्रियारूपं भुजालम्बं हस्तावलम्बनन्न लम्भयेत् न ग्राहयेद्यदि हृदयेनेति शेषः। सत्यं जीवामि प्रति विधित्सया न तु निर्लज्जतयेति भावः ॥ ५७ ॥

ननु तवैव कोयमभिमानस्तत्राह। अवधूयेति। अरिभिः अवधूय परिभूय हरिणैर्मृगैस्तुल्यवृत्तितां तुल्यवृत्तिजीवनत्वं वन्याहारतामित्यर्थः। नीताः प्रापिताः वयम्पश्चापीति शेषः

अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तिताम् ।
अन्योन्यस्यापि जिह्रीमः किम्पुनः सहवासिनाम् ॥ ५८ ॥
शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः ।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥ ५९ ॥
अलङ्घ्यन्तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृताम् ।
प्रियतां ज्यायसीं मा गान्महतां केन तुङ्गता ॥ ६० ॥

अन्योन्यस्यापि जिह्रीमो लज्जामहे । सहवासिनां सहचारिणां किम्पुनः प्रागेव जिह्रीमइति किमु वक्तव्यमित्यर्थः । क्रियायोगे सम्बन्धसामान्ये षष्ठी । अत्र वयमन्यापि तुल्याभिमाना एव इदं तु मदेकसाध्यकर्मेति मुनिशासनान्मयानुष्ठीयतइति भावः ॥ ५८ ॥

ननु तर्हि दुःखैकनिदानमन्तःशत्रुर्मानएव त्यज्यतामित्याशङ्क्य तत्त्यागे दोषमाह । शक्तीति । शक्तिवैकल्येनोत्साहादिशक्तिवैधुर्य्येण अवष्टम्भसामर्थ्यविरहेण च नम्रस्य प्रह्वीभूतस्य विधेयभूतस्य च निःसारत्वाद्दुर्बलत्वात् स्थिरांशरहितत्वाच्च । सारो बले स्थिरांशे चेत्यमरः । लघीयसो गौरवहीनस्य नीरसस्येत्यर्थः । मानहीनस्य जन्मिनः जन्तोः । ग्रीह्यादित्वादिनिः । तृणस्य च गतिरवस्था समेति । मानहीनस्य तृणादपि निकृष्टत्वान्न त्याज्यो मानइति भावः । श्लेषालङ्कारोयन्तदनुप्राणितेयमुपमेत्यनेकार्थदीपिकेति व्यज्यते ॥ ५९ ॥

मानत्यागे दोषमुक्त्वा तत्सद्भावे षड्भिर्गुणमाह । अलङ्घ्यमिति । महीभृतां पर्व्वतानां सम्बन्धि यद्यच्छृङ्गादिकमुच्चैरुन्नतन्तत्तदलङ्घ्यमुदग्रत्वोत्प्रेक्ष्य तर्कयित्वेति यावत् । महतां महात्मनां तुङ्गता मानोन्नत्यं ज्यायसीम्प्रियतां प्रियत्वं केन हेतुना मागात्

तावदाश्रीयते लक्ष्म्या तावदस्य स्थिरं यशः ।
पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥ ६१ ॥
स पुमानर्थवज्जन्मा यस्य नाम्नि पुरःस्थिते ।
नान्यामङ्गुलिमभ्येति सङ्ख्यायामुद्यताङ्गुलिः ॥ ६२ ॥

न केनापि प्रियत्वं गच्छत्येवेत्यर्थः । किन्तु तुङ्गत्वेनेत्यर्थः आशिषि माङि लुङ् एवमनिच्छन्नपि इच्छामुत्पादयत्यौषधवदस्मिन्नर्थे इत्या-शंसनार्थमाशीःप्रयोगः । उद्वीच्येत्यसमानकर्तृकत्वनिर्देशः क्वचित्प्रयोगदर्शनात्सोढव्यः । केचिदुद्वीच्यमिति पठन्ति । तत्र यद्दुःखस्तदलङ्घमुद्वीच्यमवलोकनीयं न चोल्लङ्घनीयमिति । अतो महतामित्यादि योजयन्ति ॥ ६० ॥

तावदिति । किञ्च तावदेवासौ लक्ष्म्या आश्रीयते तावदस्य पुंसो यशः स्थिरन्तावदेवासौ पुरुषः पुरुषत्वेन गण्यत इत्यर्थः । यावन्मानादभिमानान्न हीयते न भ्रंश्यति । मानहीनस्य न किञ्चिच्छुभमस्तीत्यर्थः ॥ ६१ ॥

सइति । स पुमानर्थवज्जन्मा सार्थकजन्मा यस्य पुंसो नाम्नि पुरोऽग्रे स्थिते सति सङ्ख्यायाम्पुरुषगणनाप्रस्तावे उद्यता गुणमधिकृत्योन्नमिताङ्गुलिरन्यां द्वितीयामङ्गुलिमुद्यतामिति शेषः । नाभ्येति न प्राप्नोति । अद्वितीयत्वादस्येत्यर्थः । एतन्मानरहितस्य न सम्भवतीति भावः ॥ ६२ ॥

दुरासदइति । दुरासदैर्वनैर्ज्यायान्महत्त्वः तथापि तुङ्गोऽपि भूधरोगम्योगन्तुं शक्यएव प्रसिद्धश्चैतदिति भावः । महौजस्कस्तापसम्पन्नं मानप्रांशुम्मानोन्नतम्पुरुषमिति शेषः । अलङ्घ्यता

दुरासदवनज्यायान् गम्यस्तुङ्गोऽपि भूधरः।
न जहाति महौजस्कं मानप्रांशुमलङ्घता ॥६३॥
गुरून् कुर्व्वन्ति ते वंश्यानन्वर्था तैर्वसुन्धरा।
येषां यशांसि शुभ्राणि ह्रेपयन्तीन्दुमण्डलम् ॥६४॥
उदाहरणमाशीःषु प्रथमे ते मनस्विनाम्।
शुष्केऽशनिरिवामर्षो यैररातिषु पात्यते ॥ ६५ ॥

न जहाति न कदाचिन्मानी लङ्घयितुं शक्यत इत्यर्थः। गिरेरपि गरीयान्मानाधिक इति भावः। अत्रोपमानाद्भूधरादुपमेयस्य मानिनो धर्मान्तरसाम्येऽप्यलङ्घ्यत्वेनाधिक्यकथनाद्व्यतिरेकालङ्कारः ॥ ६३ ॥

गुरूनिति। ते नरा वंश्यानन्वय भवान् गुरून् कुर्व्वन्ति प्रथयन्ति स्वनाम्ना व्यपदेशयन्ति रघुदिलीपादिवदित्यर्थः। तैर्नरैर्वसूनि धनानि धरतीति वसुन्धरा। संज्ञायां भृतॄवृजीत्यादिना खच् प्रत्यये खचि ह्रस्व इति ह्रस्वात्नुमागमश्च। अन्वर्था अनुगतार्था। तेषां वसुभूतानान्धारणादिति भावः। येषां शुभ्राणि यशांसि इन्दुमण्डलं ह्रेपयन्ति लज्जयन्ति यशसो निष्कलङ्कत्वादिति भावः। ईदृशं हि यशो मानमहत एव सम्भवतीति तात्पर्यार्थः। ह्रीधातोर्ण्यन्ताल्लट्। अर्तिह्रीत्यादिना पुगागमः। अत्र ह्रेपणस्य सादृश्यपर्य्यवसानादुपमालङ्कारः ॥ ६४ ॥

उदाहरणमिति। यैरमर्षः क्रोधः शुष्के नीरसे अशनिरिवा रातिषु विषये पात्यते प्रक्षिप्यते। मनस्विनां मानिनां प्रथमे अग्रेसरास्ते आशीःषु पुरुषैरेवम्भवितव्यमेवंरूपासु उदाहरणं

न सुखं प्रार्थये नार्थमुदन्वद्वीचिचञ्चलम् ।
नानित्यताशनेस्त्रस्यन् विविक्तं ब्रह्मणः पदम् ॥६६॥
प्रमार्ष्टुमयशःपङ्कमिच्छेयञ्छद्मना कृतम् ।
वैधव्यतापितारातिवनितालोचनाम्बुभिः ॥ ६७ ॥
अपहस्येऽथवा सद्भिः प्रमादोवास्तु मे धियः ।
अस्थानविहितायासः कामञ्जिह्रेतु वा भवान् ॥६८॥

निदर्शनं भवतीति शेषः । रामादिवदुपमानं भवतीत्यर्थः ।
अतोनत्याज्योमानइति सन्दर्भार्थः ॥ ६५ ॥

यदुक्तं अभिद्रोहेण भूतानामित्यादि तत्र युग्मेनोत्तरमाह ।
नेत्यादि । उदन्वद्वीचिरिव चञ्चलं समुद्रतरङ्गवदस्थिरं सुखं
कामं न प्रार्थये नेच्छामि तथा चञ्चलमर्थञ्च न प्रार्थये किञ्चा
नित्यता विनाशिता सैवाशनिस्तस्मात्त्रस्यन् बिभ्यत् । वा भ्राशेत्या
दिना श्यन्प्रत्ययः । विविक्तं निर्बाधं ब्रह्मणोवेधसआत्मनः पद्यत
इति पदं स्थानमैक्यलक्षणं मुक्तिञ्च न प्रार्थये । एतेन यदुक्त
मुच्छेदञ्जन्मनः कर्त्तुमित्यादिना तत् समाहितम् ॥ ६६ ॥

प्रमार्ष्टुमिति । किन्तु छद्मना कपटेन कृतं शत्रुभिरिति शेषः ।
अयशएव पङ्कमिति रूपकालङ्कारः । वैधव्येन तापितानां दुःखी
कृतानामरातिवनितानां लोचनाम्बुभिः प्रमार्ष्टुं क्षालयितुमिच्छेय
मभिलषेयम् । इषिधातोर्लिङि रूपं । वैरिनिर्यातनातिरिक्तं न
किञ्चिदिच्छामीत्यर्थः ॥ ६७ ॥

एवन्तर्हि यः करोति वधोदर्कादित्युक्तदोषः स्यादित्याशङ्का
मङ्गीकृत्य ग्लानिर्न दोषायेति न्यायमाश्रित्य युग्मेनोत्तरमाह ।

वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम्।
निर्वाणमपि मन्येऽहमन्तरायञ्जयश्रियः ॥ ६९ ॥
अजन्मा पुरुषस्तावद्गतासुस्तृणमेव वा।
यावन्नेषुभिरादत्ते विलुप्तमरिभिर्य्यशः ॥ ७० ॥

अपहस्वइत्यादि। अथवा सद्भिः पण्डितैरपहस्येऽपहसिष्ये इत्यर्थः। वर्त्तमानसामीप्ये वर्त्तमानवद्वेति लट्। अन्यस्तु भ्रान्त पाठः। मे धियः प्रमादोऽनवधानलं वा अस्तु। भवानपि अस्थाने अयोग्यविषये विहितआयासो हितोपदेशप्रयासो येन स तथोक्तो विफलप्रयत्नः सन्नित्यर्थः कामञ्जिह्रेतु लज्जताम् ॥ ६८ ॥

वंशेति। अहन्तु विद्विषां शत्रूणां समुच्छेदेन विनाशेन करणेन वंशलक्ष्मीं अनुद्धृत्य निर्व्वाणं मोक्षमपि जयश्रियोऽन्तरायं विघ्नं मन्ये न तु पुरुषार्थमित्यर्थः। किमुतान्योत्सवादिकमिति भावः ॥ ६९ ॥

नन्वयन्ते दुराग्रह इत्यतआह। अजन्मेति। पुरुषो यावदरिभि र्विलुप्तं संहृतं यशः इषुभिर्नादत्ते अरिवधेन न प्रत्याहरती त्यर्थः। तावदजन्मा अजातप्राय इत्यर्थः। नन्वजातोऽपि जनना नन्तरमुपयुज्यतएवेत्यरुच्या पक्षान्तरमाह। गतासुः मृतो मृत तुल्य इत्यर्थः। मृतोऽपि प्रागुपयुक्तवानित्यरुच्याह। तृणमेवेति। तृणतुल्य इत्यर्थः। अकिञ्चित्करस्तु त्रैकाल्यानुपयोगात् जीवन्मृत इत्यर्थः। अतो नाहमाग्रहाद्ब्रवीमि किन्तु वीरधर्म्ममनुपालयामी ति भावः ॥ ७० ॥

अनिर्ज्जयेन द्विषतां यस्यामर्षः प्रशाम्यति ।
पुरुषोक्तिः कथन्तस्मिन् ब्रूहि त्वं हि तपोधन ॥७१॥
कृतम्पुरुषशब्देन जातिमात्रावलम्बिना ।
योऽङ्गीकृतगुणैः श्लाघ्यः सविस्मयमुदाहृतः ॥ ७२ ॥

सर्व्वथा वैरिनिर्यातनं कर्त्तव्यमित्युक्तन्तदकरणे पुरुषगुणानां हानिदोषमाह । अनिर्ज्जयेनेति । यस्य अमर्षः क्रोधो द्विषतां शत्रूणा मनिर्ज्जयेन निर्ज्जयं विनैव प्रशाम्यति । उपलक्षणे तृतीया । तस्मिन् पुरुषइत्युक्तिः पुरुषशब्दः कथं न कथञ्चिदित्यर्थः प्रवर्त्तत इति शेषः । प्रवृत्तिनिमित्तस्य पुरुषकारस्याभावादिति भावः । हे तपोधन त्वं हि त्वमेव ब्रूहि कथय न च ते किञ्चिदविदित मस्तीति भावः । हि स्तेनावधारणइत्यमरः ॥ ७१ ॥

ननु पुरुषत्वजात्यैव पुरुषोक्तिप्रवृत्तेः किम्पुरुषकारेण तत्राह । कृतमित्यादिद्वयेन । जातिमात्रावलम्बिना जातिमात्राभिधायिना पुरुषशब्देन कृतमलन्न तेन किञ्चित्साध्यतइत्यर्थः । अत्र गम्यमान साधनक्रियापेक्षया करणत्वात् तृतीयेत्युक्तम्प्राक् । कृतमिति निषे धार्थमव्ययं चादिषु पद्यते । सत्यं जातिमात्रेऽपि पुरुषशब्दः प्रवर्त्तते परन्तु नासौ पुंसामाशास्यः पश्वादिसाधारण्यादिति तात्पर्य्यार्थः । तर्हि कीदृक् साध्यइत्याशङ्क्याह । यइत्यादिनार्थेन । अङ्गीकृतगुणैर्गुणपक्षपातिभिर्यः पुमान् श्लाघ्यः स्तुत्यः सन् सविस्मयं ससम्भ्रममुदाहृतः कथितः । पुंसा ईदृशेन भवितव्य मिति निदर्शितः ॥ ७२ ॥

असमानमिवौजांसि सदसा गौरवेरितम्।
नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान्पुमान्॥७३॥
॥ युग्मम् ॥

यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्षया।
ममैवाध्येति नृपतिस्तृष्यन्निव जलाञ्जलेः॥ ७४॥

असमानमिति। किञ्च सदसा सभया गौरवेरितं कथाप्रसङ्गेषु गौरवपूर्व्वकमुच्चारितं सत ओजांसि प्रत्यन्तान्तेजांसि असमानञ्ज्वलदिव स्थितं यस्य पुंसो नाम द्विषोऽप्यभिनन्दन्ति अनुमोदन्ते किमुत सुहृद इति भावः। स पुमान् पुमान् पुरुषत्वेन सम्मत इत्यर्थः। प्रथमः पुरुषशब्दो जातिवचनः द्वितीयो गुणवचनः स एव श्लाघ्यः। अत्र पुमान्पुमानिति तात्पर्य्यमात्रभेदभिन्नशब्दार्थपौनरुक्त्यलक्षणो लाटानुप्रासोऽलङ्कारः। तथा च सूत्रम्। तात्पर्य्यभेदयुक्तो लाटानुप्रास इति॥ ७३॥

ननु खलु भीमादिषु तवैवायङ्कोऽभिनिवेश इत्यत आह। यथेति। नृपतिर्युधिष्ठिरो यथाप्रतिज्ञं युधि द्विषताम्प्रतिचिकीर्षया द्विषतः प्रतिकर्त्तुमिच्छया प्रतिज्ञानुसारेणैव जिघांसयेत्यर्थः। तृष्यन् पिपासुर्जलाञ्जलेरिव ममैवाध्येति इच्छति कार्य्यसिद्धेर्मदायत्तत्वान्मामेव स्मरति अतोऽयं ममाभिनिवेश इत्यर्थः। अधीगर्थेत्यादिना कर्म्मणि षष्ठी॥ ७४॥

ननु युधिष्ठिरः स्वार्थं साधयति त्वया च स्वार्थमात्रमनुसन्धीयतामित्यत आह। स इति। स नरोऽवदातस्य स्वच्छस्य वंशस्य शशाङ्कस्येव लाञ्छनं कलङ्कः। यत्र यस्मिन् पुरुषे सत्कृषु

स वंशस्यावदातस्य शशाङ्कस्येव लाञ्छनम्।
कृच्छ्रेषु व्यर्थया यत्र भूयते भर्त्तुराज्ञया ॥ ७५ ॥
कथं वादीयतामर्व्वाङ्मुनिता धर्म्मरोधिनी।
आश्रमानुक्रमः पूर्व्वैः स्मर्य्यते न व्यतिक्रमः ॥ ७६ ॥

व्यसनेषु भर्त्तुः स्वामिनः आज्ञया व्यर्थया भूयते । भावे लट् । आपदि स्वार्थसाधकः कुलघातकस्तत्कथं स्वार्थनिष्ठकार्य्यता युक्तेत्यर्थः ॥ ७५ ॥

यदुक्तं विजहीहि रणोत्साहमित्यादि तत्रोत्तरमाह । कथमिति। धर्म्मरोधिनी धर्मविरोधिनी अर्वाग्गार्हस्थ्यात्प्रागेव मुनिता वानप्रस्थत्वञ्चतुर्थाश्रमता वा वर्णप्रक्रमेण तस्य विधानात् त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति सूत्रकारवचनात् क्षत्रियस्यापि कैश्चिदिष्टत्वात् तदेतत्सम्यग्विवेचितमस्माभी रघुवंशसञ्जीवन्यां स किलाश्रममन्त्यमाश्रित इत्यत्र। कथं वा आदीयतां मया कथं वाङ्गीक्रियताम् । सम्प्रश्ने लोट् । तथा हि पूर्व्वैर्म्मन्वादिभिराश्रमानुक्रमः स्मर्य्यते । न तु व्यतिक्रमः । ब्रह्मचारी भूत्वा गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेदिति श्रुत्यनुसारादित्यर्थः । एतदपि चत्वार आश्रमा इत्येतत्पक्षमाश्रित्योक्तम् । यदि चेद्वैराग्यं तदा ब्रह्मचर्य्यादेव प्रव्रजेत्। गृहाद्वनाद्वेति व्युत्क्रमपक्षस्यापि श्रवणात् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७६ ॥

ननु भवान् गृहस्थ एव तत्कथमर्वाङ्मुनित्वविरोध इत्याशङ्क्य सत्यं गृहस्थोऽस्मि तथापि कृतनिखिलगृहस्थकर्त्तव्यस्यैव वान

आसक्ता धूरियं रूढा जननी दूरगा च मे ।
तिरस्करोति स्वातन्त्र्यं ज्यायांश्चाचारवान्नृपः ॥७७॥
स्वधर्म्ममनुरुन्धन्ते नातिक्रममरातिभिः ।
पलायन्ते कृतध्वंसा नाहवान्मानशालिनः ॥ ७८ ॥

मस्याधिकारेण गृहस्थमात्रस्य न चाहमद्यापि कृतकृत्य इत्युत्तरमाह । आसक्तेति । आसक्ता लग्ना अवश्यं कर्त्तव्येत्यर्थः रूढा प्रसिद्धा महतीत्यर्थः । इयमूर्ब्बोक्ता धूर्वैरिनिर्य्यातनरूपा । दूरगा दूरवर्त्तिनी जननी च मातापि । तथा आचारवान् तपोधिक इत्यर्थः । तत्रापि ज्यायान् ज्येष्ठोऽन्टपो युधिष्ठिरस्य मे मम स्वातन्त्र्यं स्वाच्छन्द्यन्तिरस्करोति दूरीकरोति । आश्रमम्प्रतिबध्नातीत्यर्थः । तिरस्करोतीति प्रत्येकमभिसम्बध्यते अन्यथा बहुवचनप्रसङ्गात् ॥ ७७ ॥

उक्तमर्थमुपसंहरति । स्वधर्म्ममिति । मानशालिनः स्वधर्म्मं चात्रधर्म्ममनुरुन्धन्ते अनुवर्त्तन्ते अतिक्रमं स्वधर्म्मातिक्रमं नानुरुन्धन्ते ततः किमत आह । अरातिभिरिति । अरातिभिः कृतध्वंसाः कृतापकाराः सन्तः आहवान्न पलायन्ते अयमेव स्वधर्म्मानुरोध इत्यर्थः । उपसर्गस्यायताविति रेफस्य लत्वं । अत्र मनुः । न निवर्त्तेत सङ्ग्रामात् चात्रधर्म्ममनुस्मरन्निति । अत्रोत्तरवाक्यार्थं प्रति पूर्ब्बवाक्यार्थस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ७८ ॥

किम्बहुना ममायन्निश्चयः श्रूयतामित्याह । विच्छिन्नेति । विच्छिन्नं वाताहतं यदभ्रन्तदिव विलीयेति विच्छिन्नाभ्रविलायं

विच्छिन्नाभ्रविलायं वा विलीये नगमूर्द्धनि।
आराध्य वा सहस्राक्षमयशः शल्यमुद्धरे ॥ ७९ ॥

इत्युक्तवन्तम्परिरभ्य दोर्भ्या
स्तनूजमाविष्कृतदिव्यमूर्त्तिः।
अघोपघातं मघवा विभूत्यै
भवोद्भवाराधनमादिदेश ॥ ८० ॥

यथा तथा उपमाने कर्म्मणि चेति कर्त्तर्य्युपपदे णमुल्। नगमूर्द्ध न्यस्मिन् गिरिशृङ्गे विलीये विशीर्य्ये। कषादिषु यथाविध्यनु प्रयोगः। यद्वा सहस्राक्षमिन्द्रमाराध्यायश एव शल्यन्तदुद्धरे उद्धरिष्यामि न तु गत्यन्तरशङ्केत्यर्थः। वाशब्दो विकल्पे ॥ ७९ ॥

इतीति। मघवा इन्द्रइत्युक्तवन्तन्तनूजम्पुत्रमर्ज्जुनं आविष्कृता प्रकटिता दिव्यमूर्त्तिर्निजरूपं येन स तथोक्तः सन् दोर्भ्या बाहुभ्या परिरभ्य विभूत्यै श्रेयसे उपहन्यतेऽनेनेति उपघातम्। करणे घञ्प्रत्ययः। अघानान्दुःखानां उपघातमघोपघातं भवः संसारः तस्योद्भवः कारणमिति भवोद्भवः शिवस्तस्याराधनं उपासनमादि देश शिवमुद्दिश्य तपश्चरेत्याज्ञापयामासेत्यर्थः ॥ ८० ॥

प्रीतइति। पिनाकिनि शिवे प्रीते सति लोकपालैः सह मया लोकत्रयेऽपि विहितं दत्तं अप्रतिवार्य्यमनिवार्य्यं वीर्य्यं यस्य स तथोक्तः सन्परेषां शत्रूणां लक्ष्मीं श्रियं समुत्सुकयितासि समुत्सुका त्वय्यनुरक्तां कर्त्तासि पुनराहरिष्यसीत्यर्थः। वीरभोग्याः सम्पद इतिभावः। उत्सुकशब्दात्तत्करोतीति ण्यन्तात्कर्त्तरि लुट्।

प्रीते पिनाकिनि मया सह लोकपालै
र्लोकत्रयेऽपि विहिताप्रतिवार्य्यवीर्य्यः ।
लक्ष्मीं समुत्सुकयितासि भृशम्परेषा
मुच्चार्य्य वाचमिति तेन तिरोबभूवे ॥ ८१ ॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये इन्द्रसमागमोनामैकादशस्सर्गः ॥ ११ ॥

इति वाचमुच्चार्य्य तेन इन्द्रेण तिरोबभूवे अन्तर्दधे । भावे लिट् ॥ ८१ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किराता र्ज्जुनीयव्याख्यायाङ्घण्टापथसमाख्यायामेकादशस्सर्गः ॥ ११ ॥

अथ वासवस्य वचनेन
रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं
विधिवत्तपांसि विदधे धनञ्जयः ॥ १ ॥

अभिरश्मिमालि विमलस्य
धृतजयधृतेरनाशुषः ।
तस्य भुवि बहुतिथास्तिथयः
प्रतिजग्मुरेकचरणन्निषीदतः ॥ २ ॥

अथेति । अथेन्द्रतिरोधानानन्तरं रुचिरवदनइन्द्रसाचात्कार सन्तोषात् प्रसन्नमुखो धनञ्जयोऽर्ज्जुनः वासवस्य वचनेनोपदेशेन त्रिलोचनं शिवं क्लान्तिरहितं यथा तथा अभिराधयितुम्प्रसादयितुन्तपांसि विधिवद्विध्यर्हं यथाशास्त्रमित्यर्थः । तदर्हमिति वति प्रत्ययः । विदधे चक्रे । अस्मिन्सर्गे उद्गतावृत्तम् । सजसादिमे सलघुके च नसजगुरुकेष्वथोद्गता । अग्रिमे भनजलागस्ततासजसा जगौ चरणमेकतः पठेदिति लक्षणात् ॥ १ ॥

अभिरश्मीति । अभिरश्मिमालि अभिसूर्य्यं सूर्य्याभिमुखं भुवि एकचरणं निषीदतः एकचरणेन तिष्ठतः विमलस्य बाह्यान्तर शुद्धिमतः । धृता जयधृतिर्जयेच्छा येन तस्य अनाशुषोऽनश्नतः । उपेयिवाननाश्वाननूचानश्चेति निपातः । तस्यार्ज्जुनस्य बहूनाम्पूरणा बहुतिथाः बहुसङ्ख्यकाइत्यर्थः । तस्य पूरणे डट् बहुपूगगण सङ्घस्य तिथगिति तिथुगागमः । तिथयादिनानि प्रतिजग्मुः अत्र

वपुरिन्द्रियोपतपनेषु
सततमसुखेषु पाण्डवः ।
व्याप नगपतिरिव स्थिरता
म्महतां हि धैर्य्यमविभाव्यवैभवम् ॥ ३ ॥
न पपात सन्निहितपक्ति
सुरभिषु फलेषु मानसम् ।
तस्य शुचिनि शिशिरे च पय
स्यमृतायते हि सुतपः सुकर्म्मणाम् ॥ ४ ॥

तिथिशब्दः पुंलिङ्गः । तदाद्यास्तिथयोर्द्वयोरित्यभिधानात् । अन्यथा बहुतिथाद्रत्यत्र टित्वात् ङीप् स्यात् ॥ २ ॥

वपुरिति । पाण्डवोऽर्ज्जुनः सततं वपुषः इन्द्रियाणाञ्चोपतपनेषु सन्तापकरेषु । करणे ल्युट् । असुखेष्वनशनादिदुःखेष्वपि नगपतिर्गिरीन्द्रइव स्थिरतान्दार्ढ्यं व्याप प्राप । तथाहि महताम्धैर्य्यं अविभाव्यन्दुर्बोधं वैभवं सामर्थ्यं यस्य तत्तथोक्तम् । धीराणामकिञ्चित्करन्दुःखमिति भावः ॥ ३ ॥

नेति । तस्यार्ज्जुनस्य मानसं मनः सन्निहितानि समीपस्थानि यानि पक्तिसुरभीणि पाकसुगन्धीनि तेषु फलेषु । तथा शुचिनि स्वच्छे शिशिरे शीतले पयसि च न पपात । न किञ्चिदाचकाङ्क्षेति भावः । प्राणधारणन्तु तस्य तपएवेत्याह । तथाहि सुकर्म्मणां सुकृतिनां शोभनन्तपः सुतपएवामृतायते अमृतवदाचरति । किन्तपस्विनां तर्पणान्तरैरिति भावः । लोहितादिडाभ्यः क्यष् वा क्यष इत्यात्मनेपदं लोहितादिराकृतिगणः ॥ ४ ॥

न विसिस्मिये न विषसाद
मुहुरलसतान्न चाददे ।
सत्त्वमुरुधृति रजस्तमसी
न हतः स्म तस्य हतशक्तिपेलवे ॥ ५ ॥

तपसा कृशं वपुरुवाह
स विजितजगत्त्रयोदयम् ।
त्रासजननमपि तत्त्वविदां
किमिवास्ति यन्न सुकरं मनस्विभिः ॥ ६ ॥

नेति । सोऽर्ज्जुनो न विसिस्मिये अहो महत्तपस्तप्तमिति न विस्मयञ्जगाम । तपः क्षरति विस्मयादिति स्मृतेरिति भावः । न विषसाद फलविलम्बात् नोत्साहहीनो बभूव । विषादश्चेतसो भङ्ग इति लक्षणात् । षदिरप्रतेरिति षत्वम् । मुहुरलसतामपि मन्दोद्यमत्वञ्च नागमत् । किञ्च हतशक्तिनी हतसारे अतएव पेलवे भङ्गुरे ते हतशक्तिपेलवे रजस्तमसी गुणौ उरुधृति महासारत्वात्तस्यार्ज्जुनस्य सत्त्वं सत्त्वगुणं न हतः स्म न हतवती । हन्तेर्लट् स्मे इति भूतार्थे लट् ॥ ५ ॥

तपसेति । सोऽर्जुनस्तपसा कृशमथापि विजितो जगत्त्रयस्य भुवनत्रयस्योदय उत्कर्षो येन तत्तथोक्तं । किञ्च तत्त्वविदामपि लोकहितार्थं तत्त्वं जानतामपि त्रासजननम्भयङ्करं वपुरुवाह वहति स्म । नचैतच्चित्रमित्याह । किमिति । यन्मनस्विभिर्न सुकरं तत्किमिवास्ति न किमपीत्यर्थः । इवशब्दो वाक्यालङ्कारे । मनस्विनां

ज्वलतोऽनलादनुनिशीथ
मधिकरुचिरम्भसान्निधेः ।
धैर्य्यगुणमवजयन्विजयी
ददृशे समुन्नततरः स शैलतः ॥ ७ ॥
जपतः सदा जपमुपांशु
वदनमभितो विसारिभिः ।
तस्य दशनकिरणैः शुशुभे
परिवेषभीषणमिवार्कमण्डलम् ॥ ८ ॥

मिति पाठेऽपि षष्ठी स्यादेव क्रियायोगलक्षणायाश्च लोकेत्यादिना निषेधात् ॥ ६ ॥

ज्वलत इति । विजयी सोऽर्जुनोऽनुनिशीथमर्द्धरात्रे विभक्त्यर्थेऽव्ययीभावः । अर्द्धरात्रनिशीथौ द्वावित्यमरः । ज्वलतोदीप्यमानादनलादधिकरुचिस्तथाम्भसां निधेर्द्धैर्य्यं गाम्भीर्य्यमेव गुणस्तमवजयन् । किञ्च शैलतः शैलादपि समुन्नततरो ददृशे । अत्र रुच्यादिभिरनलाद्याधिक्यासम्बन्धे सम्बन्धाभिधानादतिशयोक्तिरलङ्कारः ॥ ७ ॥

जपत इति । सदा उपांशु रहो गूढमित्यर्थः । रहश्चोपांशु चालिङ्गे इत्यमरः । करणवद्‌शब्दमनुप्रयोगः उपांश्विति कौमारे लक्षणम् । जप्यत इति जपस्तं जपं मन्त्रमित्यर्थः । जपतः पठतस्तस्यार्ज्जुनस्य वदनमुखं अभितो विसारिभिर्द्दशनकिरणैर्हेतुभिः परिवेषभीषणमर्कमण्डलमिव शुशुभे । परिवेषस्तु परिधिरुपसूर्य्यकमण्डले इत्यमरः ॥ ८ ॥

कवचं स बिभ्रदुपवीत
पदनिहितसज्यकार्म्मुकः ।
शैलपतिरिव महेन्द्रधनुः
परिवीतभीमगहनोविदिद्युते ॥ ९ ॥
प्रविवेश गामिव कृशस्य
नियमसवनाय गच्छतः ।
तस्य पदविनमितोहिमवान्
गुरुतान्नयन्ति हि गुणान संहतिः ॥ १० ॥

कवचमिति । कवचं वर्म्म बिभ्रत् उपवीतपदे यज्ञोपवीतस्थाने निहितं सज्यङ्कार्म्मुकं येन स तथोक्तः सोऽर्ज्जुनोमहेन्द्रधनुषा परिवीतम्परिवेष्टितम्भीमङ्गहनं वनं यस्य स शैलपतिरिव विदिद्युते शुशुभे ॥ ९ ॥

प्रविवेशेति । नियमसवनार्थं नियमस्नानाय । सवनन्त्वध्वरे स्नाने सोमनिर्द्दलनेऽपि चेति विश्वः । गच्छतः कृशस्य तस्यार्ज्जुनस्य पदैः पादन्यासैर्विनमितोहिमवान् गाम्भुवम्प्रविवेशेत्युत्प्रेक्षा । ननु कृशस्य कथमियद्गौरवन्तत्राह । गुणाः सारादयो गुरुतां नयन्ति प्रापयन्ति । संहतिः सङ्घातोमूर्त्तिरिति यावत् न नयति । अन्तःसाराद्धि गौरवम्भवति न तु वाह्यात् स्थौल्यात् । तत्र च हेमपिण्डतूलपिण्डावेव निदर्शनमिति भावः ॥ १० ॥

परिकीर्णमिति । उद्यतभुजस्योर्द्ध्वबाहोस्तस्य शिरस उपरि । षष्ठ्यतसर्थप्रत्ययेनेति षष्ठी । विततं विस्तृतम्भुवनयोर्विवरं द्यावा

परिकीर्णमुद्यतभुजस्य
भुवनविवरे दुरासदम् ।
ज्योतिरुपरि शिरसो वितत
ञ्जगृहे निजान् मुनिदिवौकसां पथः ॥ ११ ॥

रजनीषु राजतनयस्य
बहुलसमयेऽपि धामभिः ।
भिन्नतिमिरनिकरन्न जहे
शशिरश्मिसङ्गमयुजा नभः श्रिया ॥ १२ ॥

महता मयूखनिचयेन
शमितरुचि जिष्णुजन्मना ।
ह्रीतमिव नभसि वीतमले
न विराजते स्म वपुरंशुमालिनः ॥ १३ ॥

पृथिव्योरन्तराले परिकीर्णं व्याप्तम् । दुरासदन्दुर्द्धर्षं ज्योति स्तेजो मुनीनान्दिवौकसाञ्च निजान् नियतान् पथो मार्गान् जगृहे प्रतिबबन्धेत्यर्थः ॥ ११ ॥

रजनीष्विति । बहुलसमये कृष्णपक्षेऽपि रजनीषु राज तनयस्यार्ज्जुनस्य धामभिस्तेजोभिर्भिन्नस्तिमिरनिकरो यस्य तन्नभः शशिरश्मीनां सङ्गमेन हेतुना युजा सङ्गतया श्रिया लक्ष्मी तुल्यया श्रियेत्यर्थः । अतएव निदर्शनालङ्कारः । न जहे न त्यक्तम् । जहातेः कर्म्मणि लिट् ॥ १२ ॥

महतेति । जिष्णोरर्ज्जुनाज्जन्म यस्य तेन । जन्मोत्तरपदव्यधि करणो बहुव्रीहिः । महता मयूखनिचयेन शमितरुचि हृतप्रभस्

तमुदीरिताहणजटांशु
मधिगुणशरासनञ्जनाः ।
रुद्रमनुदितललाटदृश
न्दृदृशुर्म्मिमन्थिषुमिवासुरीः पुरीः ॥ १४ ॥

अंशुमालिनेवपुरर्कविम्बं छीतञ्जितलाञ्जितमिवेत्युत्प्रेचा । वीतमले मेघनीहाराद्यावरणरहितेऽपीत्यर्थः । नभसि न विराजते स्म ॥ १३ ॥

तमिति । उदीरिताउद्गताअरुणाजटानामंशवोयस्य तमधिगुणमधिज्यं शरासनं यस्य तमर्ज्जुनञ्जनाः सिद्धगणाः । आसुरीः असुरसम्बन्धिनीः पुरीर्म्मिमन्थिषुम्मथितुमिच्छुं । मथेस्सन्नन्तादु प्रत्ययः । तथा अनुदिता ललाटे दृक् यस्य तं साचात्त्रिपुरविजयोद्यतमभालाचं रुद्रमिव ददृशुः । अत्राभालाचस्य रुद्रस्या सम्भवात्स्वतः सिद्धोपमानासिद्धेर्नेयमुपमा किन्तूत्प्रेचा ।' सा चाभालाचमित्युपमानादुपमेयस्य न्यूनत्वकथनार्थेऽन्वयव्यतिरेकेणोज्जीवितेत्यनयोरङ्गाङ्गिभावेन सङ्करः । उपमा तु व्यज्यतइत्यलङ्कारेणालङ्कारध्वनिः ॥ १४ ॥

मरुतामिति । मरुतां पतिः स्वित् देवेन्द्रोवा । अहिमांशुरुत सूर्य्योवा । पृथुशिखः महाज्वालः शिखी पावकोवा । असुकरन्दुष्करन्तपस्तप्तुमुपक्रमते । अयं पुरुषः जनः कश्चित्प्राकृतोनेति सोऽर्ज्जुनस्तापसैस्तपस्विभिः । अण् चेति मत्वर्थीयोऽण् प्रत्ययः । अवयसेऽवगतः । यातेरवपूर्ब्बात्कर्म्मणि लिट् । अचेन्द्रत्वादिकं धर्म्म

मरुतां पतिः स्विदहिमांशु
रुत पृथुशिखः शिखी तपः ।
तप्तुमसुकरमुपक्रमते
न जनोयमित्यवयये स तापसैः ॥ १५ ॥
न ददाह भूरुहवनानि
हरितनयधाम दूरगम् ।
न स्म नयति परिशोषमपः
सुसहम्बभूव न च सिद्धतापसैः ॥ १६ ॥

मारोप्य जनत्वापवादात्साम्यमारोप्यापह्नवालङ्कारः । सामान्य लक्षणन्तु निषिद्धविषये साम्यारोपोह्यपह्नवइति लक्षणात् ॥ १५ ॥

नददाहेति । दूरगं व्यापकमित्यर्थः । हरितनयस्य इन्द्रसुतस्यार्ज्जुनस्य धाम तेजोभूरुहवनानि न ददाह अग्निवदिति भावः । तथापः परिशोषं न नयति स्म अर्कवदिति भावः । तथापीति शेषः । सिद्धाश्च तापसाश्च तैः सुसहं न बभूव । अतोऽस्य अलौकिकत्वेऽइति भावः । अतएव दुःसहत्वदाहाद्यजनकत्वयोर्विरोधाद्विरोधाभासोऽलङ्कारः । आभासत्वे विरोधस्य विरोधालङ्कृतिर्म्मतेति लक्षणात् ॥ १६ ॥

[विनयमिति । अथोऽनन्तरं अभरणामुनयः विनयं शिक्षां गुणाश्चौदार्य्यादयइव अशिक्षितस्य तदभावादिति भावः । अपनयभिदन्दुर्नीतिवारकं विवेकं सदसज्ज्ञानं नयाः नीतयइव । अविवेकिनोनीत्यभावादिति भावः । नीतिः षाड्गुण्यप्रयोगः ।

विनयगुणाइव विवेक
मपनयभिदन्नयाइव ।
न्यायमवधयइवाशरणाः
शरणं ययुः शिवमथो महर्षयः ॥ १७ ॥
परिवीतमंशुभिरुदस्त
दिनकरमयूखमण्डलैः ।
शम्भुमपहतदृशः सहसा
न च ते निचायितुमभिप्रसेहिरे ॥ १८ ॥

नीयतेऽनेनेति न्यायो नियामकप्रमाणं तं अवधयः समयाइव । अप्रामाणिकस्य समयोच्छिन्नत्वादिति भावः । शिवं विनयनं शरणं रक्षितारं । शरणं गृहरक्षित्रोरित्यमरः । ययुः शरणत्वेन प्रापुरित्यर्थः । अशरणाः शरणमिति चोपमास्वपि यथायोग्यं योज्यम् । उपमालङ्कारः ॥ १७ ॥

परिवीतमिति । उदस्तन्निरस्तं छादितं दिनकरमयूखमण्डलं यस्तैः सूर्य्यतेजोविजयिभिरित्यर्थः । अंशुभिस्तेजोभिः परिवीतं व्याप्तं शम्भुं शिवं उपहतदृशः प्रतिहतदृष्टयस्ते महर्षयः सहसा झटिति निचायितुन्निशामयितुन्द्रष्टुमित्यर्थः । चायृपूजानिशामनयोरिति धातोः शकधृषेत्यादिना तुमुन् । नाभिप्रसेहिरे न शेकुः ॥ १८ ॥

अथेति । अथ दृगुपघातानन्तरम्भूतभव्यभवताम्भूतभविष्य द्वर्त्तमानानामीशन्देवमभिमुखयितुं अभिमुखीकर्त्तुं कृतस्तवाः कृतस्तोत्राः सन्तः न लम्भयेति भावः । स्तवः स्तोत्रं नुतिस्तुति

अथ भूतभव्यभवदीश
मभिमुखयितुं कृतस्तवाः ।
तत्र महसि ददृशुः पुरुष
ङ्कमनीयविग्रहमयुग्मलोचनम् ॥ १९ ॥
ककुदे वृषस्य कृतबाहु
मकृशपरिणाहशालिनि ।
स्पर्शसुखमनुभवन्तमुमा
कुचयुग्ममण्डल इवार्द्रचन्दने ॥ २० ॥

रित्यमरः । तत्र पूर्व्वोक्ते महसि तेजसि कमनीयविग्रहं रम्यमूर्त्तिं अयुग्मानि त्रीणि लोचनानि यस्य तम्पुरुषन्ददृशुः ॥ १९ ॥

अथ पञ्चभिः पुरुषं विशिनष्टि । ककुद इत्यादिना । कीदृशं पुरुषम् । अकृशेन महता परिणाहेन विशालतया शालत इति तथोक्ते । परिणाहो विशालतेत्यमरः । वृषस्य वृषभस्य ककुदे अंसकूटे आश्रयीकृत इति शेषः । आर्द्रचन्दने उमायाः कुच युग्ममण्डले इव कृतबाहुं न्यस्तहस्तं अतएव स्पर्शसुखमनु भवन्तं ककुदस्य तथाविधस्पर्शसुखकरत्वादिति भावः । उपमा लङ्कारः ॥ २० ॥

स्थितमिति । उन्नते तुहिनशैलशिरसि हिमवतः शिखरे स्थितं कचित्कोणे स्थितमित्यर्थः । तथापि भुवनातिवर्त्तिना सर्व्वलोकातिशयिना ओजसा तेजसा अद्रिभिः पर्व्वतैर्जलधिभि स्समुद्रैर्भुवाहपथेनाकाशेन च सह वर्त्तत इति तथोक्तम् ।

स्थितमुन्नते तुहिनशैल
शिरसि भुवनातिवर्त्तिना ।
साद्रिजलधिजलवाहपथं
सदिगश्नुवानमिव विश्वमोजसा ॥ २१ ॥
अनुजानुमध्यमवसक्त
विततवपुषा महाहिना ।
लोकमखिलमिव भूमिभृता
रवितेजसामवधिनाधिवेष्टितम् ॥ २२ ॥

दिग्भिस्सह वर्त्तत इति सदिक् । उभयत्रापि तेन सहेति तुल्य योग इति बहुव्रीहिः । विश्वमश्नुवानं व्याप्नुवन्तमिव स्थितमित्यु त्प्रेचा । अशूङ् व्याप्ताविति धातोः शानच् ॥ २१ ॥

अनुजान्विति । जान्वोर्मध्ये अनुजानुमध्यं । विभक्त्यर्थेऽव्ययी भावः अवसक्तं लग्नं विततमायतञ्च वपुर्यस्य तेन महाहिना अव सक्तिकावन्धभूतेनेत्यर्थः । अधिवेष्टितं अतएव रवितेजसामवधिना पर्य्यन्तभूतेन भूमिभृता लोकालोकाचलेनाधिवेष्टितमखिलं लोक मिव स्थितमित्युपमा । असूर्य्यम्पश्यापरभागो लोकालोकाचल इत्या गमः ॥ २२ ॥

परिणाहिनेति । पुनश्च तुहिनराशिवद्विशदं शुभ्रमुपवीत सूत्रतां यज्ञोपवीतत्वं नीतं प्रापितमुरगं शेषाहिमनुरञ्जयता स्वगुणो परक्तं कुर्व्वता श्यामीकुर्व्वतेत्यर्थः । परिणाहिना विशालेन विल सन्मरीचिना प्रसृतकिरणेन शितिना नीलेन गलेन कण्ठेनोप

परिणाहिना तुहिनराशि
विशदमुपवीतसूत्रताम् ।
नीतमुरगमनुरञ्जयता
शितिना गलेन विलसन्मरीचिना ॥ २३ ॥
स्रुतमालतीसितकपाल
कुमुदमुपरुद्धमूर्द्धजम् ।
शेषमिव सुरसरित्पयसां
शिरसा विकाशि शशिधाम बिभ्रतम् ॥२४॥
॥ कुलकम् ॥

श्चितम् । कण्ठोगलोऽथ ग्रीवायामित्यमरः। अत्रारगस्य स्वधवलिमत्यागेनान्यनीलिमग्रहणात्तद्गुणालङ्कारः । तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणग्रहादिति लक्षणात् ॥ २३ ॥

स्रुतेति । पुनश्च मालती जातीकुसुमम् । सुमना मालती जातिरिति । पुष्पे जातीप्रभृतयः स्वलिंगाव्रीह्यः फलदति चामरः । तद्वत्सितं यत्कपालमेव कुमुदन्तत् स्रुतं आस्रुतं येन तत्तथोक्तम् । अवरुद्धमूर्द्धजं व्याप्तशिरोरुहं । अतएव सुरसरित्पयसां शेषमिव निर्य्यातावशिष्टं गाङ्गमम्भइव स्थितमित्यर्थः । उत्प्रेक्षालङ्कारः । विकाशि विस्वरं शशिधाम शिरसा बिभ्रतमरुषन्ददृशुरिति पूर्व्वेणान्वयः ॥ २४ ॥

मुनयइति । ततोदर्शनानन्तरं मुनयोऽभिमुखमेत्य शिवस्येति शेषः । नयनविनिमेषेण नेत्रसंज्ञया नोदिताः प्रेरिताः सन्तः पाण्डु

मुनयस्ततोऽभिमुखमेत्य
नयनविनिमेषनोदिताः ।
पाण्डुतनयतपसा जनित
ञ्जगतामशर्म्म भृशमाचचक्षिरे ॥ २५ ॥
तरसैव कोऽपि भुवनैक
पुरुष पुरुषस्तपस्यति ।
ज्योतिरमलवपुषोऽपि रवे
रभिभूय वृत्रइव भीमविग्रहः ॥ २६ ॥
स धनुर्म्महेषुधि बिभर्त्ति
कवचमसिमुत्तमञ्जटाः ।
वल्कमजिनमिति चित्रमिदं
म्मुनिताविरोधि न च नास्य राजते ॥२७॥

तनयस्यार्ज्जुनस्य तपसा जनितं जगतामशर्म्म असुखं दुःखमित्यर्थः । शर्म्मशातसुखानि चेत्यमरः । भृशं सम्यक् आचचक्षिरे ॥ २५ ॥

तरसेति । हे भुवनैकपुरुष पुरुषोत्तम वृत्रोवृत्रासुरइव भीम विग्रहः कोऽप्यविज्ञातः पुरुषस्तरसा बलात्कारेणैव । तरसा बलरंहसीति विश्वः । अमलवपुषः उज्ज्वलमूर्त्तेः रवेरपि ज्योतिरभिभूय तपस्यति तपश्चरति । कर्म्मणो रोमन्थतपोभ्यां वर्त्ति चरेरिति क्यङ् ॥ २६ ॥

सइति । किञ्च स पुरुषो महान्ताविषुधी यस्य तन्महेषुधि धनुः कवचं वर्म्म उत्तममसिं खड्गं जटाः वल्कञ्चीरमजिनञ्चर्म्म

चलनेऽवनिश्चलति तस्य
करणनियमे सदिङ्मुखम्।
स्तम्भमनुभवति शान्तमरु
द्ग्रहतारकागणयुतन्नभस्तलम् ॥ २८ ॥
स तदोजसा विजितसार
ममरदितिजोपसंहितम्।
विश्वमिदमपिदधाति पुरा
किमिवास्ति यन्न सुकरं खलु तेन ॥ २९ ॥

बिभर्त्ति । इत्येवंरूपमिदं विरुद्धवेषधारणं मुनिताविरोधि मुनित्वप्रतिबन्धकं तथापि अस्य न राजतइति न किन्तु राजत एवेत्यर्थः । चित्रमाश्चर्य्यम् । सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधाविति वामनः ॥ २७ ॥

चलनइति । किञ्च तस्य पुंसश्चलने अवनिः पृथिवी चलति तथा करणनियमे समाधिना इन्द्रियनिरोधे सति । करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः । शान्तैस्तिमितैर्मरुतां वायूनां ग्रहाणां सूर्य्यादीनान्तारकाणान्नक्षत्राणाञ्च गणैर्यतं नभस्तलं सदिङ्मुखं दिक्सहितं स्तम्भन्निश्चलतामनुभवतीत्यर्थः । अतेविश्वातिशयनी मस्य शक्तिरुपलभ्यतइति भावः ॥ २८ ॥

नचैतदुपेक्ष्यमित्याशयेनाह । सइति । स पुमानोजसा विजित सारं निरस्तसत्त्वम् । अमरदितिजोपसंहितं सुरासुरसहितन्तदिदं विश्वम्पुरा अपिदधाति अपिधास्यतीत्यर्थः । शीघ्रमेव हरिष्यतीति

विजिगीषते यदि जगन्ति
युगपदथ सञ्जिहीर्षति ।
प्राप्तुमभवमभिवाञ्छति वा
वयमस्य नो विषहितुं क्षमा रुचः ॥ ३० ॥

किमुपेक्षसे कथय नाथ
न तव विदितन्न किञ्चन ।
त्रातुमलमभयदार्हसि न
स्त्वयि मा स्म शासति भवत्पराभवः ॥ ३१ ॥

भावः । निकटागामिके पुरेत्यमरः । यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट् । तथा यत् खलु तेन पुंसा न सुकरं तत्किमि वास्ति न किञ्चित् तेन दुष्करमस्तीत्यर्थः । सामान्येन विशेषसमर्थन रूपोऽर्थान्तरन्यासः ॥ २९ ॥

न चैतदन्यफलकन्तपदृत्याह । विजिगीषतइति । स पुरुषो जगन्ति भुवनानि युगपज्जिगीषते यदि विजेतुमिच्छति वा । पूर्व्ववत्स नइत्यात्मनेपदम् । अथ युगपत्सञ्जिहीर्षति संहर्तुमिच्छति वा । अभवं अपवर्ग्गम्प्राप्तुमभिवाञ्छति वा । न विघ्नइति शेषः । किन्तु । वयमप्यस्य रुचस्तेजांसि विषहितुं सोढुम् । तीषसहलुभरुषरिष इति विकल्पादिडागमः । नो क्षमाः न सक्ताः । केचिद्रुचः कामि तानि विषहितुमवधारयितुमिति व्याचक्षत तत्र सहेरवधारणार्थ त्वं विचार्य्यम् ॥ ३० ॥

किमिति । हे नाथ किं किमर्थमुपेक्षसे कथय त्वमिति शेषः । तव न विदितन्त्वया अज्ञायमानमित्यर्थः । कस्य च वर्त्तमानइति

इति गां विधाय विरतेषु
मुनिषु वचनं समाददे ।
भिन्नजलधिजलनादगुरु
ध्वनयन् दिशां विवरमन्धकान्तकः ॥३२॥
वदरीतपोवननिवास
निरतमवगात मान्यथा ।
धातुरुदयनिधने जगतां
नरमंशमादिपुरुषस्य गाङ्गतम् ॥ ३३ ॥

षष्ठी । न किञ्चन किमपि न । हे अभयद नोऽस्मानलन्त्वातुमर्हसि । त्वयि शासति सति पराभवोमा स्म भवन्माभूत् । स्मोत्तरे लङ् चेति लङ् ॥ ३१ ॥

इतीति । इतीत्थं गां वाचं विधाय अभिधायेत्यर्थः । सामान्यस्य विशेषपर्य्यवसानात् । मुनिषु विरतेषु तूष्णीं भूतेषु सत्सु अन्धकान्तकः शिवोभिन्नस्योद्वेलस्य जलधर्जलस्य नादमिव गुरु गम्भीरं यथा तथा दिशां विवरमन्तरालं ध्वनयन्वचनं समाददे स्वीचकार उवाचेत्यर्थः ॥ ३२ ॥

वदरीति । वदरीतपोवने वदरिकाश्रमे निवासनिरतं नित्यनिवासिनङ्गाङ्गतभुवमवतीर्णञ्जगतामुदयनिधने सृष्टिसंहारौ धातुस्तयोःकर्त्तुरित्यर्थः । तृन्निति दधातेस्तृन्प्रत्ययः अतएव न लोके त्यादिना कर्म्मणि षष्ठीप्रतिषेधः । आदिपुरुषस्य विष्णोरंशं अंशभूतं नरं नरसंज्ञकमित्यर्थः । योनारायणसंज्ञकइति भावः ।

द्विषतः परासिसिषुरेष
सकलभुवनाभितापिनः ।
क्रान्तकुलिशकरवीर्य्यबला
न्मदुपासनं विहितवान्महत्तपः ॥ ३४ ॥
अयमच्युतश्च वचनेन
सरसिरुहजन्मनः प्रजाः ।
पातुमसुरनिधनेन विभू
भुवमभ्युपेत्य मनुजेषु तिष्ठतः ॥ ३५ ॥

अन्यथा उक्तवैपरीत्येन मा अवगत मनुष्यमात्रं मा जानीतेत्यर्थः । इणोगालुङीति गादेशः ॥ ३३ ॥

अथ तपसोनिमित्तमाह । द्विषतइति । एष नरः सकलभुवनान्यभितापयन्ति अभीक्ष्णमिति तथोक्तान् । बहुलमाभीक्ष्ण्ये इति णिनिः । क्रान्ते आक्रान्ते कुलिशकरस्य इन्द्रस्य वीर्य्यबले शक्तिसैन्ये यैस्तान् द्विषतः शत्रून् परासिसिषुः परासितुमिच्छुः असतेः सन्नन्तादुप्रत्ययः । मदुपासनं मदाराधनं । करणे ल्युट् । महत्तपोविहितवान् । अत्र निमित्तं शत्रुवधएवेति ॥ ३४ ॥

अथास्य मानुषावतारे कारणमाह । अयमिति । विभू प्रभू अयन्नरोऽच्युतः कृष्णश्च सरसिरुहजन्मनोब्रह्मणोवचनेन प्रार्थनया असुराणां निधनेन मारणेन कारणेन प्रजाः पातुं रक्षितुम्भुवमभ्युपेत्य मनुजेषु तिष्ठतः । वस्तुतस्तु साक्षान्नरनारायणावेतौ कृष्णार्ज्जुनावित्यर्थः ॥ ३५ ॥

सुरकृत्यमेतदवगम्य
निपुणमिति मूकदानवः ।
हन्तुमभिपतति पाण्डुसुत
न्त्वरया तदत्र सह गम्यतां मया ॥ ३६ ॥
विवरेऽपि नैनमनिगूढ
मभिभवितुमेष पारयन् ।
पापनिरतिरविशङ्कितया
विजयं व्यवस्यति वराहमायया ॥ ३७ ॥

अथास्य सत्त्वसम्पदम्प्रकाशयितुमाह । सुरेति । मूकदानवः मूकाख्यः कश्चिदसुरः एतत्पाण्डवहननं सुरकृत्यमिति निपुणमवगम्य साधु निश्चित्य पाण्डुसुतमर्ज्जुनं हन्तुमभिपतति । तत्तस्मात्कारणात् अत्रार्ज्जुनाश्रमे विषये आश्रमम्प्रतीत्यर्थः । मया सह त्वरया गम्यतान्द्रष्टुमिति शेषः ॥ ३६ ॥

विवरइति । पापे निरतिर्य्यस्य स एष दानवो विवरे रन्ध्रेऽपि एकान्तेऽपीत्यर्थः । एनं पाण्डवं अनिगूढम्प्रकाशं स्पष्टं यथा तथा अभिभवितुन्न पारयन् न शक्नुवन् । नञिति नञ् समासः । अविशङ्कितया स्वरूपगूहनान्निःशङ्कितया वराहमायया वराहभूमिकया विजयं व्यवस्यति । विजयम्प्रत्युद्युक्तइत्यर्थः ॥ ३७ ॥

ततः किम्भविष्यतीत्यत आह । निहतइति । विडम्बितमनुकृतं किरातनृपतिवपुर्य्येन तेन तद्रूपधारिणेत्यर्थः । मया निहते रिपौ वराहे मुक्तनिशितविशिखस्सन् अयम्पाण्डवः प्रसभम्प्रसह्य मृगया

निहते विडम्बितकिरात
नृपतिवपुषा रिपौ मया ।
मुक्तनिशितविशिखः प्रसभ
म्मृगयाविवादमयमाचरिष्यति ॥ ३८ ॥
तपसा निपीडितकृशस्य
विरहितसहायसम्पदः ।
सत्त्वविहितमतुलम्भुजयो
र्बलमस्य पश्यत मृधेऽधिकुप्यतः ॥ ३९ ॥

विवादम्मृगप्रहारकलहमाचरिष्यति करिष्यति । मत्प्रहृतमेव मृगम्प्रहृत्य स्वयमहमेव प्रहर्त्तेति कलहिष्यतइत्यर्थः ॥ ३८ ॥

ततोऽपि किम्भावीत्यत्राह । तपसेति । तपसा नितराम्पीडितो अतएव कृशस्तस्य तपसा निपीडितकृशस्य । पूर्व्वकालेत्यादिना समासः । तथा विरहिता सहायसम्पद्यस्य तस्यैकाकिनो मृधे रणे । मृधमास्कन्दनं सङ्ख्यमित्यमरः । अधिकुप्यतोऽधिकं कुप्यतोऽस्य पाण्डवस्य सत्त्वविहितं स्वभावकृतं स्वाभाविकमित्यर्थः । सत्त्वोऽस्त्री जन्तुषु क्लीवे व्यवसाये पराक्रमे आत्मभावे पिशाचादौ द्रव्ये सत्तास्वभावयोः प्राणे बलेऽन्तष्करणे इति वैजयन्ती । अतुल न्निरुपमम्भुजयोर्बाह्वोर्बलं शक्तिम्पश्यत । बलं शक्तिर्बलं सैन्यमिति शाश्वतः ॥ ३९ ॥

अथ त्रिभिरस्य किरातभावं वर्णयति । इतीत्यादि । शिवः इतीत्य न्तान्मुनीनुदारं युक्तियुक्तं यथा तथा अनुनीय शिचयित्वा उक्त्वेति

इति तानुदारमनुनीय
विषमहरिचन्दनालिना ।
घर्म्मजनितपुलकेन लस
द्गजमौक्तिकावलियुतेन वक्षसा ॥ ४० ॥
वदनेन पुष्पितलतान्त
नियमितविलम्बिमौलिना ।
बिभ्रदरुणनयनेन रुचं
शिखिपिच्छलाञ्छितकपोलभित्तिना ॥४१॥

यावत् ।° रुचिरः किरातपृतनापतिः संवव्रतइत्युत्तरेणान्वयः । किरातसेनापतिवेषधारी बभूवेत्यर्थः । कथम्भूतः विषमाविक्रत विन्यासाहरिचन्दनस्यालयोरेखायस्मिंस्तेन घर्म्मेण खेदेन जनिताः पुलकारोमाञ्चायस्मिन् तेन । पुलकः पुनः । रोमाञ्चः कण्टको रोमविकारोरोमहर्षणमिति हेमचन्द्रः । घर्म्मः स्यादातपे ग्रीष्मे उष्णखेदाम्भसोरपीति विश्वः । लसन्तः शोभमानागजमौक्तिकानां करिकुम्भोद्भवमौक्तिकानां आवलयएव गुणाः सूत्राणि यस्मिन् तेन वक्षसा वक्षःस्थलेन उपलक्षितः । करिणामुक्तायोनिले प्रमाण माहागस्त्यः । जीमूतकरिमत्स्याहिवंशशङ्खवराहजाः । शुक्त्युद्भवा स्व विज्ञेयाश्चाष्टौ मौक्तिकयोनयइति ॥ ४० ॥

वदनेनेति । पुष्पितैर्लतान्तैर्विकसितलताग्रैर्नियमिताः संयताः विलम्बिनश्च ते मौलयः केशाः यस्य तेन । चूडा किरीटं केशाश्च संयतामौलयस्त्रयइत्यमरः । शिखिपिच्छलाञ्छिते वर्हिवर्हाङ्किते

बृहदुद्वहन् जलदनादि
धनुरुपहितैकमार्गणम् ।
मेघनिचयइव संववृते
रुचिरः किरातपृतनापतिः शिवः ॥ ४२ ॥

॥ विशेषकम् ॥

अनुकूलमस्य च विचिन्त्य
गणपतिभिरात्तविग्रहैः ।
शूलपरशुशरचापभृतै
र्म्महती वनेचरचमूर्विनिर्म्ममे ॥ ४३ ॥

कपोलभित्ती यस्य तेन अरुणनयनेनारक्तनेत्रेण वदनेन रुचं शोभां बिभ्रत् ॥ ४१ ॥

बृहदिति । पुनश्च जलदइव नदतीति जलदनादि । कर्त्तर्य्युपमानइति णिनिः । उपहितैकमार्गणं संहितैकबाणन्धनुरुद्वहन् । अतएव मेघनिचयइव स्थितइत्युपमा । अत्र विशेषके स्वभावोक्तिरलङ्कारः । स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनमिति लक्षणात् ॥ ४२ ॥

अनुकूलमिति । अस्य शिवस्यानुकूलं विचिन्त्य प्रियमिति निश्चित्य आत्तविग्रहैर्गृहीतकिरातदेहैः । तथा शूलानि परशवः कुठाराः शराश्चापानि च तानि भृतानि यैस्तैः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्याविति निष्ठायाः परनिपातः । गणपतिभिः प्रमथमुख्यैर्म्महती वनेचरचमूः सेना विनिर्म्ममे निर्म्मिता । माङ्माने कर्म्मणि लिट् ह्रस्वइत्यभ्यासस्य ह्रस्वत्वम् ॥ ४३ ॥

विरचय्य काननविभाग-
मनुगिरमथेश्वराज्ञया ।
भीमनिनदपिहितोरुभुवः
परितोऽपदिश्य मृगयाम्प्रतस्थिरे ॥ ४४ ॥

क्षुभिताभिनिःसृतविभिन्न-
शकुनिमृगयूथनिःस्वनैः ।
पूर्णपृथुवनगुहाविवरः
सहसा भयादिव ररास भूधरः ॥ ४५ ॥

विरचय्येति । अथेश्वराज्ञया अनुगिरं गिरौ । विभक्त्यर्थेऽव्ययीभावः । गिरेश्च सेनकस्येति समासान्तः । काननविभागं विरचय्य अध्यायमिति देशविभागं कृत्वेत्यर्थः । भीमैर्निनदैः कलकलैः पिहिताउरवो भुवो यैस्ते तथोक्ताः सन्तः मृगयामपदिश्य व्याजीकृत्य परितः प्रतस्थिरे प्रस्थिताः ॥ ४४ ॥

क्षुभितेति । क्षुभितास्त्रस्ताश्चाभिनिःसृताः स्वस्थानान्निर्गताः विभिन्नामुक्तसङ्गाश्च ये शकुनयः पक्षिणोमृगाश्च तेषां यूथानि तानि तेषां निःस्वनैः पूर्णानि पृथूनि वनानि गुहाविवराणि च यस्य स भूधरः सहसा भयादिवेत्युत्प्रेक्षा । ररास चुक्रोश । रसआक्रोशे लिट् ॥ ४५ ॥

मेति । पथि पलायनमार्गे विरोधिनी जातिवैरिणी मृगाणां सिंहव्याघ्रादीनां विहङ्गानां काकोलूकानाञ्च संहतिस्सङ्घोऽन्यं परस्परक्रोधं न ह्रुयाय न प्राप किन्तु सहैव चचारेत्यर्थः । तथाहि

न विरोधिनी रुषमियाय
पथि मृगविहङ्गसंहतिः।
घ्नन्ति सहजमपि भूरिभियः
सममागताः सपदि वैरमापदः॥ ४६॥
चमरीगणैः शिवबलस्य
बलवति भयेऽप्युपस्थिते।
वंशविततिषु विषक्तपृथु
प्रियबालबालधिभिराददे धृतिः॥ ४७॥

भूरि प्रभूता भीर्यासु ताः समं साधारण्येनागताश्चापदो विपत्तयः सहजमपि वैरं सपदि घ्नन्ति। न हि सङ्घातव्यसनेषु प्रजायते वैरानुबन्ध इति भावः॥ ४६॥

चमरीति। वंशविततिषु वेणुगुल्मेषु विषक्तालग्नाः पृथवो महान्तः प्रियबाला प्रियरोमाणो बालधयः पुच्छानि येषां तैः। पुच्छोऽस्त्री लूमलाङ्गूले बालहस्तश्च बालधिरित्यमरः। चमरीगणैः मृगविशेषैः शिवबलस्य सम्बन्धिनि तद्धेतुके इत्यर्थः। सम्बन्धमात्रविवक्षायां षष्ठी। अन्यथा भीत्रार्थानाम्भयहेतुरिति पञ्चमी स्यात्। बलवति प्रबले भये उपस्थिते प्राप्तेऽपि धृतिराददे स्वीकृता। बालच्छेदभयात्प्राणहानिमप्यवगणय्य स्थितमित्यर्थः॥ ४७॥

हरेति। प्रतिभये भयहेतौ। भयङ्करम्प्रतिभयमित्यमरः। प्राप्तेऽपीति शेषः। गजमर्दैः सुगन्धयः सुरभयः केसरास्सटा येषान्तैः हतानेकगजैरित्यर्थः। सहसा सेनाकलकलश्रवणानन्तर

हरसैनिकाः प्रतिभयेऽपि
गजमदसुगन्धिकेसरैः ।
स्वस्थमभिददृशिरे सहसा
प्रतिबोधजृम्भितमुखैर्मृगाधिपैः ॥ ४८ ॥

विभराम्बभूवुरपवृत्त
जठरशफरीकुलाकुलाः ।
पङ्कविषमिततटाः सरितः
करिरुग्णचन्दनरसारुणाम्भसः ॥ ४९ ॥

मेव प्रतिबोधेन निद्रापगमेन जृम्भितानि व्यात्तानि मुखानि येषान्तैर्मृगाधिपैः सिंहैः स्वस्थं निःशङ्कमेव हरसैनिकाः अभिददृशिरे ईक्षिताः । न तु किञ्चित् क्षुभितमित्यर्थः । युक्तं चैतद्गज मामधारिणां केसरिणामिति भावः ॥ ४८ ॥

विभरामिति । अपवृत्तजठरैस्तत्कालक्षुभितालुठितोदरैः शफरीकुलैराकुलाव्याप्ताः पङ्कैर्विषमितानि दुर्गमीकृतानि तटानि कूलानि यासान्ताः सरितः करिभिः पलायमानैरिति शेषः । रुग्णानां मार्गरोधितया भग्नानाम् । ओदितश्चेति निष्ठानत्वम् । चन्दनानां रसैररुणमयोविभराम्बभूवुः । भृधातोर्भीह्रीभृहुवां श्लुवच्चेत्याम्प्रत्ययः श्लुवद्भावश्च कृञ्चानुप्रयुज्यते लिटीति भुवोऽनुप्रयोगः ॥ ४९ ॥

मथितेति । मथितैः क्षतानि विदलितानि तैरगुरुभिस्तमालै र्नलदैरुशीरैश्च सुरभिः व्यस्तानि विचिप्तानि शुकनिभानि शुकसवर्णानि शिलाकुसुमानि शैलेयाख्यौषधिविशेषायेन सः ।

मथितपृथ्वतागुरुतमाल
नलदसुरभिः सदागतिः ।
व्यस्तघुणकनिभशिलाकुसुमः
प्रणुदन् ववौ वनसदाम्परिश्रमम् ॥ ५० ॥

मथिताम्भसोरयविकीर्ण
म्रदितकदलीगवेधुकाः ।
क्लान्तजलरुहलताः सरसी
र्विदधे निदाघइव सत्त्वसंप्लवः ॥ ५१ ॥

अतः शीतलइति भावः । कालानुसार्य्यवृद्धाश्मपुष्पशीतशिवानि तु । शैलेयमित्यमरः । घुणकनिभेति स्वरूपकथनम् । सदागतिर्वायुर्वनसदां वनेचराणां परिश्रमम्प्रणुदन् अतोमन्दइति भावः । मातरिश्वा सदागतिरित्यमरः । ववौ वाति स्म ॥ ५० ॥

मथिताम्भसइति । सत्त्वसंप्लवः प्राणिसंक्षोभः निदाघोग्रीष्म इव सरसीस्सरांसि । कासारः सरसी सरइत्यमरः । मथिताम्भसः संक्षोभितोदकाः रयेण पलायनवेगेन विकीर्णं व्याकीर्णं यथा तथा म्रदितानिष्पीडिताः कदलीगवेधुकास्तृणधान्यविशेषास्त्र यासां तास्तथोक्ताः । तृणधान्यानि नीवारास्त्रीगवेधुर्गवेधुकेत्यमरः । म्रदितइति । क्लिति चेति गुणप्रतिषेधः । क्लान्ताजलरुहलताः पद्मिन्योयासु ताः एवम्भूताविदधे चकार ॥ ५१ ॥

इतीति । इतीत्थमुमापतिरचलसानुषु वनेषु उपभोग्यवृक्षेषु गहनेषु दावेषु च जातांस्तथोक्तान् सत्त्वानिति शेषः । चालयन् ।

इति चालयन्नचलसानु
वनगहनजानुमापतिः ।
प्राप मुदितहरिणीदशन
क्षतवीरुधं वसतिमैन्द्रसूनवीम् ॥ ५२ ॥

स तमाससाद घननील
मभिमुखमुपस्थितम्मुनेः ।
पोत्रनिकषणविभिन्नभुव
न्दनुजन्दधानमथ सौकरं वपुः ॥ ५३ ॥

मुदितानां हरिणीनान्दशनैः क्षतावीरुधोलतायस्यान्तां इन्द्रसूनोरि मामैन्द्रसूनवीं वसत्यत्रेति वसतिमाश्रमम् । वहिवस्यर्त्तिभ्यश्चिदि त्यौणादिकोवसतेरतिप्रत्ययः । प्राप ॥ ५२ ॥

सइति । अथानन्तरं स शिवोघननीलं मेघमेचकं मुनेरर्ज्जुन स्याभिमुखमुपस्थितमागतं । पोत्रस्य मुखाग्रस्य । मुखाग्रे क्रोड हलयोः पोत्रमित्यमरः । हलसूकरयोः पुवइति इत्रप्रत्ययः । निकषणे नोल्लेखनेन विभिन्नाविदारिताभूर्येन तम् । सूकरस्येदं सौकरं वाराहं वपुर्दधानन्दनुजं आससाद प्राप ददर्शेति यावत् ॥ ५३ ॥

कच्छान्तइति । लक्ष्मीवान् । मादुपधायाश्च मतोर्वोयवादिभ्य इति मतुपोमकारस्य वकारादेशः । स शिवः । सुरसरितः कच्छान्ते अनूपप्रान्ते । जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधइत्यमरः । सेनां निधाय स्थापयित्वेत्यर्थः । कतिपयैः किरातवर्य्यैरन्वीतोऽनु गतः सन् । ईङ्गतावितिधातोरनुपूर्व्वात्कर्म्मणि क्तः । सगुल्मजाले

कच्छान्ते सुरसरितो निधाय सेना
मन्वीतः स कतिपयैः किरातवर्य्यैः ।
प्रच्छन्नस्तरुगहनैः सगुल्मजालै
र्लक्ष्मीवाननुपदमस्य सम्प्रतस्थे ॥ ५४ ॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये इन्द्राभिगमनो नाम द्वादशस्सर्गः ॥ १२ ॥

लताप्रतानसहितैस्तरुगहनैः प्रच्छन्नश्छादितः । वा दान्तशान्तेत्यादिना निपातः । अस्य वराहस्य पदमनु अनुपदं पदानुसारेणेत्यर्थः। सम्प्रतस्थे प्रस्थितः । समवप्रविभ्यः स्थ इत्यात्मनेपदम् । प्रहर्षणी वृत्तम् ॥ ५४ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां द्वादशस्सर्गः ॥ १२ ॥

वपुषा परमेण भूधराणा
मथ सम्भाव्यपराक्रमं विभेदे ।
मृगमाशु विलोकयाञ्चकार
स्थिरदंष्ट्राग्रमुखं महेन्द्रसूनुः ॥ १ ॥
स्फुटवद्धसटोन्नतिः स दूरा
दभिधावन्नवधीरितान्यकृत्यः ।
जयमिच्छति तस्य जातशङ्के
मनसीमं मुहुराददे वितर्कम् ॥ २ ॥

वपुषेति । अथेश्वरप्रस्थानानन्तरं महेन्द्रसूनुरर्ज्जुनः परमेण महता वपुषा हेतुना भूधराणां विभेदे विदारणे सम्भाव्यपराक्रमं चमीयमितिप्रतर्क्यपौरुषम् । स्थिराभ्यां दृढाभ्यां दंष्ट्राभ्यामुग्रं मुखं यस्य तं मृगं वराहं । आशु तदागमनानन्तरं अविलम्बेनेत्यर्थः । विलोकयाञ्चकार ददर्श । अस्मिन् सर्गे प्राक् पञ्चत्रिंशच्छ्लोकादौपच्छन्दसिकं वृत्तम् ॥ १ ॥

स्फुटेति । स्फुटा स्पष्टा वद्धा विरचिता सटानां केसराणामुन्नतिरुद्धतिर्य्यस्य स क्रोधादूर्षितलोमेत्यर्थः । सटा जटाकेसरयोरिति मरः । दूरादभिधावन् । तथा अवधीरितान्यकृत्यः अनन्यकर्म्मा स वराहोजयमिच्छति जयार्थिनि अतएव जातशङ्के स्वयञ्जिघांसोर्द्विषामेकलक्ष्यत्वादिति भावः । तस्य मुनेर्म्मनसि मुहुरिमं वितर्कं वक्ष्यमाणमूहम् । अध्याहारस्तर्कऊहइत्यमरः । आददे उत्पादयामास ॥ २ ॥

घनपोत्रविदीर्णशालमूलो
निबिडस्कन्धनिकाषरुग्णवप्रः।
अयमेकचरोऽभिवर्त्तते मां
समरायेव समाजुहूषमाणः ॥ ३ ॥

इह वीतभया तपोऽनुभावा
ज्जहति व्यालमृगाः परेषु वृत्तिम्।
मयि तां सुतरामसौ विधत्ते
विकृतिः किन्नु भवेदियन्नु माया ॥ ४ ॥

अथैकादशभिर्वितर्कमेव निरूपयति। घनपोत्रेति। घनेन कठिनेन पोत्रेण मुखाग्रेण विदीर्णानि विदलितानि शालमूलानि वृत्तप्रायेण सः। मूलं बुध्नोऽङ्घ्रिनामक इत्यमरः। निबिडस्य स्कन्धस्य निकाषेण निकषणेन रुग्णवप्रो भग्नसानुः अतो महासत्त्वसम्पन्न इति भावः। एकश्चासौ चरश्चेत्येकचरः एकाकी यूथादपेत इत्यर्थः। अतोऽयं वराहः समराय समरङ्कर्त्तुं। क्रियार्थोपपदस्य च कर्म्मणि स्थानिन इति चतुर्थी। समाजुहूषमाण इव समाह्वातु मिच्छन्निव इव शब्दः सम्भावनायां। समाह्वयतेः सन्नन्ताच्छानच्प्रत्ययः स्पर्द्धायामाङः पूर्व्ववत्सन इत्यात्मनेपदम् अभ्यस्तस्य चेति सम्प्रसारणं। मामभिवर्त्तते अभिधावति। उपसर्गवशात्स कर्म्मकत्वम्। अतः सर्व्वथा नायमुपेक्ष्य इति भावः ॥ ३ ॥

इहेति। इहाश्रमे तपोऽनुभावात् वीतभयाः लक्षणया विगतवैरा इत्यर्थः अत एव व्यालमृगाः क्रूरव्याघ्रादयः। व्यालो

अथवैष कृतज्ञयेव पूर्व्वं
मृशमासेवितया रुषा न मुक्तः ।
अवधूय विरोधिनीः किमारा
मृगजातीरभियाति मां जवेन ॥ ५ ॥

भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः । परेषु प्राण्यन्तरेषु वृत्तिर्जीविकाञ्चरति हिंसया न जीवन्तीत्यर्थः । अयं वराहोमयि मद्विषये तां वृत्तिं सुतरां विधत्ते जिघांसतीत्यर्थः । तदियं विकृतिः तपःसामर्थ्यभङ्गरूपा भवेत् किं नु । यद्वा माया कस्यचि दैत्यस्य वराहभूमिका भवेत् नु । किन्नुशब्दौ वितर्के ॥ ४ ॥

अथेति । अथवेति पक्षान्तरे एषमृगः पूर्व्वजन्मान्तरे भृश मत्यर्थमासेवितया अतिपरिचितया रुषा क्रुधा सहचरयेति शेषः । कृतज्ञयेव पूर्व्वकृतं वैरानुबन्धं सम्प्रति जानात्येवेत्युत्प्रेक्षा । न मुक्तोन त्यक्तः अद्यापीति शेषः । नूनमयम्प्राग्भवीयवैरानुबन्धी कश्चित् सम्प्रति वैरवीजासम्भवादिति भावः । कुतः यद्यतः आरात् समीपतः । आराद्दूरसमीपयोरित्यमरः । विरोधिनीर्मृगजाती रवधूय त्यक्त्वा जवेन मामभियाति अभिधावति अन्यथा नाभि यायादिति भावः ॥ ५ ॥

न केवलमभियानमेव किन्तु मनोवृत्तिरप्यत्र प्रमाणमित्याह । न मृगइति । अयं मृगोन खलु किन्तु कोऽपि कश्चिदन्यएव जिघांसुः हन्तुमिच्छुः । हन्तेस्सन्नन्तादुप्रत्ययः अभ्यासाच्चेति कुत्वं अज्झनगमां सनीति दीर्घः । कुतः हि यस्मात् । अत्रास्मिन् मृग विषये मे मनस्तथा भृशं स्खलति भ्रमति यथायञ्जिघांसुरिति

न मृगः खलु कोऽप्ययञ्जिघांसुः
स्खलति ह्यत्र तथा भृशम्मनो मे ।
विमलङ्कलुषीभवच्च चेतः
कथयत्येव हितैषिणं रिपुं वा ॥ ६ ॥
मुनिरस्मि निरागसः कुतो मे
भयमित्येष न भूतयेऽभिमानः ।
परवृद्धिषु बद्धमत्सराणां
किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् ॥ ७ ॥

बुद्धिरुत्पद्यतइत्यर्थः । तथाहि । विमलम्प्रसन्नं तथा कलुषीभवत् क्षुभ्यच्च चेतएव हितैषिणं रिपुं वा मित्रममित्रञ्च कथयति । यत्र यत्र मनः प्रसीदति तदेव मित्रं अन्यथा त्वन्यथेति निश्चित मित्यर्थः । अतोऽयं बध्यइति भावः ॥ ६ ॥

ननु मुनेः किमनया दुःशङ्कया तत्राह । मुनिरिति । मुनिरस्मि अतोनिरागसोनिरपराधस्य मे कुतोभयमित्येषोऽभिमानः अनपकारिणं मां कोऽपि किङ्करिष्यतीति बुद्धिः भूतये श्रेयसे न भवति । तथाहि परवृद्धिषु विषये बद्धमत्सराणां दुरात्मनामलङ्घ्यमिव अस्ति न किञ्चिदकार्य्यमस्तीत्यर्थः । इवशब्दो वाक्यालङ्कारे ॥ ७ ॥

अस्तु जिघांसुरपि क्षुद्रः किङ्करिष्यतीत्यत्राह । दनुजइति । अयन्दनुजः स्वित् दानवोवा क्षपाचरोराक्षसोवा न तु मृग एवेत्यर्थः । कुतः । वनजे सत्त्वे वन्यप्राणिनि इतीदृशमलक्ष्याखि

दनुजस्विदयं क्षपाचरोवा
वनजे नेति बलं बतास्ति सत्त्वे ।
अभिभूय तथा हि मेघनीलः
सकलङ्कम्पयतीव शैलराजम् ॥ ८ ॥

अयमेव मृगव्यसत्रकामः
प्रहरिष्यन्मयि मायया शमस्थे ।
पृथुभिर्ध्वजिनीरवैरकार्षी
च्चकितोद्भ्रान्तमृगाणि काननानि ॥ ९ ॥

वतेत्याश्चर्य्ये । बलमेव समर्थयते । तथाहि मेघनीलोऽयं वराहः सकलं शैलराजमभिभूयाक्रम्य कम्पयतीव पदविष्टम्भभरात्तथा प्रतीयतइत्यर्थः । अत्र कम्पयतीवेत्युत्प्रेक्षागर्भोऽयं शैलकम्पनरूप कार्य्येण तत्कारणबलातिरेकसमर्थनात् कार्य्येण कारणसमर्थन रूपोऽर्थान्तरन्यासः ॥ ८ ॥

किञ्च योऽयं शैले मृगयाकलकलइव श्रूयते सोऽप्येतन्मायापरि. कल्पितएवेत्याह । अयमिति । अयमेव शमस्थे शान्तिनिविष्टे मयि । अधिकरणविवक्षायां सप्तमी मायया प्रहरिष्यन्प्रहर्त्तु मिच्छन्नित्यर्थः । लृट् शेषे चेति क्रियार्थायां क्रियायां लृट् लृटः सदेति शत्रादेशः । मृगव्यम्मृगया तस्य सत्रं वनन्तदर्थं वनमित्यर्थः तत्कामयते इति मृगव्यसत्रकामोमृगयाभूमिपरि ग्रहार्थी सन्नित्यर्थः । कर्मण्यण् । आखेटनं मृगव्यं स्यादाखेटो मृगया स्त्रियामिति । सत्रमाच्छादने यज्ञे सदा दाने वनेऽपि चेति चामरः । पृथुभिर्महद्भिर्ध्वजिनीरवैस्सेनाकलकलैः स्वमायया

बङ्गशः कृतसत्कृतेर्विधातुं
प्रियमिच्छन्नथ वा सुयोधनस्य ।
क्षुभितं वनगोचराभियोगा-
द्गणमाशिश्रियदाकुलन्तिरश्चाम् ॥ १० ॥
अवलीढसनाभिरश्वसेनः
प्रसभं खाण्डवजातवेदसा वा ।
प्रतिकर्त्तुमुपागतः समन्युः
कृतवैरो यदि वा वृकोदरेण ॥ ११ ॥

कल्पितैरेवेत्यर्थः । काननानि चकितोद्भ्रान्तास्त्रस्तपलायिता मृगा येषु तानि अकार्षीत् चकार । अथं रन्ध्रान्वेषी मत्प्रहारार्थं स्वयमेव मृगयुर्भूत्वा वनावरोधाय सेनाघोषं कल्पयामास । स मृगरूपेणा गच्छतीत्यर्थः ॥ ८ ॥

वितर्कान्तरमाह । बङ्गश इति । अथवा बङ्गशः कृता सत्कृतिः सत्कारो येन तस्य सुयोधनस्य प्रियं मद्वधरूपं विधातुङ्कर्त्तुमिच्छन् यः कश्चिदिति शेषः । वनं गोचरं स्थानं येषान्तेषां वनगोचराणामभियोगादवरोधात् क्षुभितमुद्विग्नमाकुलन्तिरश्चाङ्गणं आशिश्रियत् वराहरूपेण प्राविशत् । णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ् । चङीति द्विर्भावः ॥ १० ॥

वितर्कान्तरमाह । अवलीढेति । खाण्डवजातवेदसा खाण्डववनाग्निना प्रसभमवलीढसनाभिर्दग्धबन्धुः । सपिण्डास्तु सनाभयः । सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समा इत्यमरः । अतएव समन्युर्बद्धवैरः तस्यार्ज्जुनस्यापकारयितव्यादिति भावः । अश्वसेन

बलशालितया यथा तथा वा
धियमुच्छेदपरामयन्दधानः ।
नियमेन मया निवर्हणीयः
परमं लाभमरातिभङ्गभाङ्गः ॥ १२ ॥

तक्षकपुत्रः कश्चिन्महासर्प्पः प्रतिकर्त्तुं वैरनिर्यातनार्थमुपागतः वराहमाययेति शेषः । पचान्तरमाह । यदि वा वृकोदरेण भीमसेनेन कृतमन्युः जनितक्रोधो वा कश्चिदिति शेषः । पुरा किल पाण्डवः खाण्डवदाहे पावकभयात् पलायमानांस्तक्षकपुत्रानस्य सेनस्य बन्धून् बाणैरवरुध्य दाहयामासेति भारतकथानुसन्धेयेति ॥ ११ ॥

अथ द्वाभ्यामनन्तरकरणीयमध्यवस्यति । बलेत्यादिना । किम्बहुना । यथा तथा वा अस्तु अयं मायिकः पारमार्थिको वास्त्वित्यर्थः । बलशालितया बलदृप्ततयेत्यर्थः । उच्छेदपरान्धियं दधानो माञ्जिघांसुरित्यर्थः । अयं मृगो नियमेनावश्यं मया निवर्हणीयो वध्यः । प्रमापणन्निवर्हणमित्यमरः । तथाहि अराति भङ्गं शत्रुवधम्परमं लाभमाङ्गः ॥ १२ ॥

ननु तपोविरोधिनी हिंसेत्याशङ्क्याह । कुर्व्विति । हे तात वत्स मार्ग्गदायी न भवतीति अमार्ग्गदायी रन्ध्रान्वेषिणाम्प्रवेश मयच्छन्नित्यर्थः । कुतः जयार्थित्वादित्याह । विजयाय तपांसि कुर्व्विति मुनिर्व्यासोमामलं भृशमन्वशात् अनुशिष्टवान् । अनुशासे र्लङ् । ननु मुनिर्वा कथमधर्म्ममन्वशात्तत्राह । बलिनइति । अस्य मृगस्य बलिनः प्रबलस्य बधादृते बधं विना । अन्यारादितरर्त्ते

कुरु तात तपांस्यमार्ग्गदायी
विजयायेत्यलमन्वशान्मुनिर्म्माम् ।
बलिनस्य वधादृतेऽस्य शक्यं
व्रतसंरक्षणमन्यथा न कर्त्तुम् ॥ १३ ॥
इति तेन विचिन्त्य चापनाम
प्रथमम्पौरुषचिह्नमाललम्बे ।
उपलब्धगुणः परस्य भेदे
सचिवः शुद्ध इवाददे च बाणः ॥ १४ ॥

इत्यादिना पञ्चमी । अन्यथा उपायान्तरेण व्रतसंरक्षणन्तपो रक्षणं कर्त्तुन्न शक्यम् । हिंसापि दुष्टनिग्रहात्मिका नाधर्म्म इत्यर्थः ॥ १३ ॥

इतीति । तेनार्ज्जुनेन इतीत्थं विचिन्त्य वितर्क्य चापनाम चापाख्यं प्रथमं पौरुषचिह्नन्तस्य मुख्यायुधत्वादिति भावः । आललम्बे गृहीतम् । कर्म्मणि लिट् । अथ परस्य शत्रोर्भेदे विदारणे उपलब्धगुणोज्ञातशक्तिः बाणस्तु प्राप्तमौर्व्वीकश्चेति शेषः । शुद्धो ऋजुः दिग्धत्वादिदोषरहितोवा । न कर्णिभिर्देर्न्नोदिग्धैर्नाग्निज्वलित तेजसैरिति निषेधात् । अन्यत्र शुद्धोनिर्म्मलचित्तइति यावत् । बाणश्च सचिव इवाददे । अत्र बाणसचिवयोः शब्दमात्रसाधर्म्यात् श्लेषालङ्कारः प्रकृतविषयइति सर्व्वस्वकारः उपमैवेति केचित् ॥ १४ ॥

अनुभावेति । गुरु महत्पूज्यं च स्थिरत्वात्सारवत्त्वादविसंवादि अभङ्गुरं अन्यत्र प्रतिष्ठितत्वादसत्यरहितं गुणवत् सज्यं अन्यत्रौदार्य्यादि

अनुभाववता गुरु स्थिरत्वा
दविसंवादि धनुर्धनञ्जयेन ।
स्वबलव्यसनेऽपि पीड्यमानं
गुणवन्मित्रमिवानतिम्प्रपेदे ॥ १५ ॥
प्रविकर्षनिनादभिन्नरन्ध्रः
पदविष्टम्भनिपीडितस्तदानीं ।
अधिरोहति गाण्डिवं महेषौ
सकलः संशयमारुरोह शैलः ॥ १६ ॥

गुणवद्धनुर्मित्रमिव अनुभाववता निश्चयबुद्धिमता। अनुभावः प्रभावे च सताञ्च मतिनिश्चयइत्यमरः। धनञ्जयेन स्वबलव्यसनेऽपि तपसा क्षीणबलेऽपि । अन्यत्र स्वं धनन्तदेव बलन्तस्य ह्रासेऽपि पीड्यमानमाकृष्यमाणमवरुध्यमानञ्च सन्मित्रमिवानतिं नम्रतामानुकूल्यञ्च प्रपेदे। अलङ्कारस्तु पूर्ब्बवत् ॥ १५ ॥

प्रविकर्षेति। तदानीन्तस्मिन् काले महेषौ गाण्डिवं अर्ज्जुनधनुरधिरोहति सति। कपिध्वजस्य गाण्डीवगाण्डिवौ पुन्नपुंसकइत्यमरः। गाण्ड्यजगात्संज्ञायामिति वप्रत्ययः। प्रविकर्षेण ज्याविकर्षेण योनिनादस्तेन भिन्नरन्ध्रो विदलितगह्वरः तथा पदविष्टम्भेन पादाक्रमणेन निपीडितः नुन्नः सकलः समूलः शैलः संशयं जीवितसन्देहञ्च आरुरोह प्रापेत्यर्थः। अत्र शैलस्य संशयासम्बन्धेऽपि सम्बन्धकथनादतिशयोक्तिरलङ्कारः ॥ १६ ॥

इदमइति । अथ बाणसन्धानानन्तरं शिवेन स्थिरं निश्चलमूर्त्तञ्च यथा तथा आयते आकृष्टे चापमण्डले तिष्ठतीति तथोक्तः

ददृशेऽथ स विस्मयं शिवेन
स्थिरपूर्णायतचापमण्डलस्थः ।
रचितस्त्रिसृणां पुरां विधातुं
बधमात्मेव भयङ्करः परेषाम् ॥ १७ ॥
विचकर्ष च संहितेषुरुच्चै
श्वरणास्कन्दननामिताचलेन्द्रः ।
धनुरायतभोगवासुकिज्या
वदनग्रन्थिविमुक्तवह्नि शम्भुः ॥ १८ ॥

चापमण्डलमन्तर्द्धाय स्थितइत्यर्थः । तिसृणां । न तिसृचतसृ इति दीर्घप्रतिषेधः । पुरां बधं संहारं विधातुं कर्त्तुं रचितः कल्पितः स्थानविशेषे स्थापितइति यावत् । आत्मा स्वयमेव परेषाम्भयानकोभयङ्करः । सोऽर्जुनः सविस्मयं स्वयन्ददृशे दृष्टः उपमालङ्कारः ॥ १७ ॥

अथ पिनाकिवृत्तान्तमाह । विचकर्षेति । अथ शम्भुश्च संहितेषुः सन् उच्चैः भृशञ्चरणास्कन्दनेन पदविष्टम्भेन नामितः अधोनीतः अचलेन्द्रोयेन स तथोक्तः । आयतभोगः आकृष्टकायः वासुकिरेव ज्या तस्य वदनमेव ग्रन्थिस्तेन विमुक्तः उत्सृष्टोवह्नि र्यस्य तद्धनुर्विचकर्ष इति स्वभावोक्तिः ॥ १८ ॥

सहइति । सह सम्भूय अर्थं अरिबधरूपप्रयोजनं विधास्यतोः करिष्यतोः अन्यत्र सहार्थं अभिधेयमभिधास्यतोरित्यर्थः । प्रकृति प्रत्ययौ सहार्थं ब्रूतइति वचनात् । भवच्चयैकहेतोः संसारोच्छेद

स भवस्य भवक्षयैकहेतोः
सितसप्तेश्च विधास्यतोः सहार्थं ।
रिपुराप पराभवाय मध्यं
प्रकृतिप्रत्यययोरिवानुबन्धः ॥ १९ ॥
अथ दीपितवारिवाहवर्त्मा
रवविचासितवारणादवार्य्यः ।
निपपात जवादिषुः पिनाका
न्महतोऽभ्रादिव वैद्युतः कृशानुः ॥ २० ॥

निदानस्य शिवस्य सितसप्तेरर्ज्जुनस्य च मध्यं रिपुर्वराहः । यस्मा त्प्रत्ययो विधीयते सा प्रकृतिर्धात्वादिः प्रत्ययः सनादिः तयोर्मध्य मनुबन्धइत्संज्ञको वर्णो यथा भूतं भूतिरित्यादौ ककारः । सइव पराभवाय लोपार्थमेवाप न तु स्थित्यर्थमित्यर्थः ॥ १९ ॥

अथेति । अथ रिपोर्मध्यप्रवेशानन्तरन्दीपितं वारिवाहवर्त्म आकाशं येन स अवार्य्योदुर्वारः इषुः शरः रवविचासितवारणात् खघोषभीषितगजात् पिनाकात् शिवधनुषः । पिनाकोऽजगवन्धनु रित्यमरः । महतोऽभ्रात् मेघात् विद्युतोऽयं वैद्युतः कृशानुरग्नि रिव जवात् वेगान्निपपात आदधाव ॥ २० ॥

प्रजवइति । प्रजवोधावतोऽस्य बाणस्य छदज्ञाः पतत्रेभ्यः पत्रेभ्यो जन्म यस्य स तथोक्तः कृता तार्क्ष्योपनिपातवेगशङ्का गरुडागम भ्रमोयत्र सः । अतएव महोरगाणां हृदयानि श्रोत्राणि च भिन त्तीति हृदयश्रोत्रभित् । समुद्राभ्रादइति सूत्रे पूर्व्वनिपात व्यभिचाराच्छ्रोत्रशब्दस्य पूर्व्वनिपातव्यभिचारः । प्रतिनादैः प्रति

व्रजतोऽस्य बृहत्पतत्रजन्मा
कृततार्क्ष्योपनिपातवेगशङ्कः ।
प्रतिनादमहान्महोरगाणां
हृदयश्रोत्रभिदुत्पपात नादः ॥ २१ ॥
नयनादिव शूलिनः प्रवृत्तै
र्मनसोप्याशुतरं यतः पिशङ्गैः ।
विदधे विलसत्तडिल्लताभैः
किरणैर्व्योमनि मार्ग्गणस्य मार्ग्गः ॥२२॥

ध्वनिभिर्महान् समूर्च्छितोनादः उत्पपात उत्थितः । अत्र नादस्य उरगहृदयभेदकत्वासम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिः। सा च तार्क्ष्यवेगभ्रमोत्थापितेति तयोरङ्गाङ्गिभावेन सङ्करः ॥ २१॥

नयनादिति । शूलिनोनयनात्प्रवृत्तैर्निर्गतैरिवेत्युत्प्रेक्षा । नेत्राग्निशिखाकल्पैरित्यर्थः । पिशङ्गैर्विलसत्तडिल्लताभैर्विद्युद्दाम तुल्यैरित्युपमा । मनसश्चित्तादपि आशुतरं शीघ्रतरम् । आशु शब्दादव्ययात्तरप् । अतः किमेत्तिङव्ययेत्यादिनाम् प्रत्ययोन । क्लीबे शीघ्राद्यसत्त्वेस्यादित्यमरः । यतः गच्छतः । इणः शतृ प्रत्ययः । मार्गणस्य शरस्य । कदम्बमार्गणशरादृत्यमरः। किरणै र्व्योमनि आकाशे मार्ग्गउल्कारेखाकारः पन्था विदधे विरचित इति स्वभावोक्तिरलङ्कारः ॥ २२ ॥

अपयन्निति । पृषत्कोबाणः। पृषत्कबाणविशिखाइत्यमरः । धनुषः पिनाकादपयन् निर्गच्छन्नित्यर्थः । इणः शतृप्रत्ययः । शिवान्तिकस्थैर्नभश्चरैः अभिख्यया शोभया जिहानः शोभाक्रुच्छ

अपयन्धनुषः शिवान्तिकस्थै-
र्विवरेसद्भिरभिख्यया जिहानः।
युगपद्ददृशे विशन्वराह-
न्तदुपोढैश्च नभश्चरैः पृषत्कः ॥ २३ ॥

स तमालनिभे रिपौ सुराणां
घननीहारइवाविषक्तवेगः।
भयविप्लुतमीक्षितो नभस्थै-
र्जगतीं ग्राहइवापगां जगाहे ॥ २४ ॥

न्नित्यर्थः। ओहाङ्गताविति धातोः शानच्। अभिख्या नामशोभयो-रित्यमरः। विवरे सीदन्तीति विवरेसदस्तैर्विवरेसद्भिः अन्तरालवर्त्तिभिर्नभश्चरैः। सत्सूद्विषेत्यादिना क्विप् तत्पुरुषे कृतिबहुलमित्यलुक्। अथ वराहं विशन् प्रविशन् तदुपोढैस्तं वराहमुपोढैः प्रत्यासन्नैः। वहेः कर्त्तरि क्तः। नभश्चरैर्युगपद्ददृशे दृष्टइति बाणवेगोक्तिः। अत्र पिनाकनिष्क्रमणादिक्रियाविशिष्टस्य बाणस्य शिवान्तिकादिभिन्नदेशस्थनभश्चरकर्तृकदर्शनयौगपद्यासम्बन्धेऽपि तत्सम्बन्धोक्तिमूलातिशयोक्त्या लोकोत्तरवेगप्रतीतेरलङ्कारेण वस्तुध्वनिः ॥ २३ ॥

सइति। स बाणः तमालनिभे तमालप्रभे नीलाभे इति यावत्। सुराणां रिपौ वराहे घननीहारे सान्द्रतुहिनइव अविषक्तवेगोऽप्रतिबद्धवेगः सन्। तथा नभस्थैः खेचरैर्भयेन विप्लुतं विकलं यथा तथा ईक्षितः सन्। अपां सम्बन्धिवेगआपः अपां समूहो वा आपं आपेन गच्छतीति आपगा नदी तां गृह्णातीति ग्राहोजलग्रहः। जलचर-

सपदि प्रियरूपपर्व्वरेखः
सितलोहाग्रनखः खमाससाद ।
कुपितान्तकतर्ज्जनाङ्गुलिश्री
र्व्यथयन्प्राणभृतः कपिध्वजेषुः ॥ २५ ॥

परमास्त्रपरिग्रहोरु तेजः
स्फुरदुल्काकृति विक्षिपन्वनेषु ।
स जवेन पतन्परःशतानां
पततां व्रातइवारवं वितेने ॥ २६ ॥

इति वक्तव्यात् विभाषया ग्रहइति णप्रत्ययः। सइव जगतीम् भूमिं। जगतीविष्टपे भूम्यामिति वैजयन्ती। जगाहे विवेश अन्तर्हित इत्यर्थः ॥ २४ ॥

अथार्ज्जुनबाणप्रयोगमाह। सपदीति। सपदि शिवबाणपात समयएव प्रियाः रूपं आकृतिः पर्व्वाणि ग्रन्थयोरेखारचनाश्च यस्य सः। अङ्गुलिपक्षे पर्व्वरेखाः प्रसिद्धाः। लोहाग्रमयःफलं तन्नख मिवेत्युपमितसमासः। सितं लोहानग्रखं यस्य सः कुपितस्यान्तकस्य मृत्योर्या तर्ज्जना तस्याअङ्गुलिस्तर्ज्जनाङ्गुलिः तर्ज्जनी तस्याः श्रीरिव श्रीर्यस्य स कपिध्वजेषुः अर्ज्जुनबाणः प्राणभृताव्यथयन् भीषयमाणः खं आकाशं आससाद प्राप। उपमालङ्कारः ॥२५॥

परमेति। परमास्त्रपरिग्रहेण दिव्यास्त्राधिष्ठानेन उरु महत् अतएव स्फुरदुल्काकृति उल्कावद्दीप्यमानमित्यर्थः। तेजोवनेषु विक्षिपन् विकिरन्सन् जवेन पतन् धावन् स बाणः शतात्परे परःशताः तेषां शताधिकसङ्ख्याकानामित्यर्थः। परः

अविभावितनिष्क्रमप्रयाणः
शमितायाम इवातिरंहसा सः ।
सह पूर्व्वतरं नु चित्तवृत्ते
रपतित्वा नु चकार लक्ष्यभेदम् ॥ २७ ॥

शताद्यास्ते येषाम्परा सङ्ख्या शताधिकेत्यमरः । पञ्चमीति योग विभागात्समासः राजदन्तादिषु परमित्युपसर्जनस्य शतशब्दस्य परनिपातः पारस्करादित्वात्सुडागमः । पततांपतत्त्रिणाम् । पतत्पत्त्ररथाण्डजाइत्यमरः । शातः समूहइव शारवं वितेने ॥ २६ ॥

अविभावितेति । अतिरंहसा अतिवेगेन अविभाविते अलक्षिते निष्क्रमो गाण्डीवान्निःसरणम्प्रयाणमन्तरागमनञ्च यस्य सः । तथा शमितायामः सङ्क्षिप्तदैर्घ्यइव स्थितइत्युपमा । अत्र वेगगुणनिमित्ता दैर्घ्यगुणाभावोत्प्रेक्षा । सशरः । सह नु सह वा चित्तवृत्त्येति शेषः । चित्तवृत्तेः पूर्व्वतरं नु प्रागेव वा उभयत्रापि लक्ष्ये पतित्वेति शेषः । अथवा अपतित्वा नु लक्ष्यइति शेषः । लक्ष्यभेदञ्चकार । अत्रोपात्त वेगगुणनिमित्तात् बाणस्य चित्तवृत्त्या सहपातपूर्व्वपातपतनाभावो त्प्रेक्षात्रितयः उत्तरोत्तरोत्कर्षेण वेगातिशयव्यञ्जिकाइत्यलङ्कारेण वस्तुध्वनिः ॥ २७ ॥

सइति । जयहेतुः स शरो वृषध्वजसायकावभिन्नं शिवशरविद्धं एषणीयं वेद्धुमिति शेषः । इषेरिच्छार्थादनीयर्प्रत्ययः । प्रतिकायं प्रतिशरीरं प्रतिपक्षमिति यावत् । विधिना दैवेन उदीरितं फलसाधनतया प्रतिपादितमर्थं योगादिकं प्रयत्नः पुरुष

स वृषध्वजसायकावभिन्न
ञ्जयहेतुः प्रतिकायमेषणीयम् ।
लघु साधयितुं शरः प्रसेहे
विधिनेवार्थमुदीरितम्प्रयत्नः ॥ २८ ॥
अविवेकवृथाश्रमाविवार्थ
ञ्चयलोभाविव संश्रितानुरागम् ।
विजिगीषुमिवानयप्रमादा
ववसादं विशिखौ विनिन्यतुस्तं ॥ २९ ॥

व्यापार इव । लघु अक्लेशेन यथा तथा साधयितुं । स्वार्थणि अन्तात्तुमुन् । प्रसेहे शशाक । उपमालङ्कारः ॥ २८ ॥

अविवेक इति । अविवेकः अन्तरानभिज्ञत्वं वृथाश्रमो निष्फल प्रयासः तौ अर्थं धनमिव । अस्थानविनियोगहेतुकत्वादनयोर्धनहानि करत्वमिति भावः । चयोऽनुपचयः लोभोऽदातृत्वन्तौ संश्रिताना मनुजीविनां अनुरागमिव । अकिञ्चित्करे स्वामिनि अनुरागस्यानव स्थानादिति भावः । अनयोर्दुर्नीतिः प्रमादोऽनवधानता तौ विजि गीषुमिव । रन्ध्रभूयिष्ठस्य जयासिद्धेरिति भावः । विशिखौ शिवा र्ज्जुनवाणौ । तं वराहं अवसादं करणशैथिल्यं विनिन्यतुः नीतवन्तौ । नयतिर्द्विकर्म्मकः । मालोपमेयम् ॥ २९ ॥

अथेति । अथ स वराहः दीर्घतरन्तमो दीर्घनिद्रां प्रवेक्ष्यन् मरिष्यन्नित्यर्थः । सहसा झटिति रुग्णरयो भग्नवेगः संभ्रमेण भ्रान्त्या । संभ्रमो भ्रान्तिहावयोरिति विश्वः । उष्णरश्मिं उर्व्यान्ति

अथ दीर्घतरन्तमः प्रवेच्य
न्सहसा रुग्णरयः स सम्भ्रमेण ।
निपतन्तमिवोष्णरश्मिमुर्व्यां
वलयोभूततरूधराञ्च मेने ॥ ३० ॥

स गतः क्षितिमुष्णशोणितार्द्रः
खुरदंष्ट्राग्रनिपातदारिताश्मा ।
असुभिः क्षणमीक्षितेन्द्रसूनु
र्विहितामर्षगुरुध्वनिर्निरासे ॥ ३१ ॥

पतन्तमिव मेने धराञ्च वलयीभूतामण्डलीभूतास्तरवोयस्यास्ता न्तथा मेने तथा बभ्रामेत्यर्थः ॥ ३० ॥

स इति । क्षितिङ्गतः क्षितौ पतितः उष्णेन प्रत्यग्रत्वात् शोणितेनार्द्रः स्नुतः खुराणां दंष्ट्रयोश्चाग्राणान्निपातेनाघातेन दारिताश्मा पाटितपाषाणः । किञ्च क्षणं ईक्षितेन्द्रसूनुः स्वार्थविघातरोषादिति भावः । अतएव विहितः कृतः अमर्षगुरुः क्रोधाद्धतः ध्वनिः क्रन्दितं येन सतथोक्तः स वराहः असुभिः प्राणैर्निरासे निराक्षितः त्यक्तइत्यर्थः । अस्यतेः कर्म्मणि लिट् । इयञ्च स्वभावोक्तिः ॥ ३१ ॥

स्फुटेति अथ वराहपातानन्तरम्पार्थः प्राज्यशरः प्रभूतशरः सन्नपीत्यथः । प्रभूतम्प्रचुरं प्राज्यमित्यमरः । स्फुटपौरुषं व्यक्तविक्रमं वराहभेदिनं शरं जिघृक्षुः ग्रहीतुमिच्छुः । ग्रहे सन्नन्तादु प्रत्ययः । आपपात आधावति स्म कृतज्ञतया शरग्रहणन्न तु लोभादित्यर्थः । ननु अन्येऽपि उपकर्त्तारएव किमत्रादरस्तत्राह ।

स्फुटपौरुषमापपात पार्थ
स्तमथ प्राज्यशरः शरञ्जिघृक्षुः ।
न तथा कृतवेदिनां करिष्यन्
प्रियतामेति यथा कृतावदानः ॥ ३२ ॥
उपकारइवासति प्रयुक्तः
स्थितिमप्राप्य मृगे गतः प्रणाशम् ।
कृतशक्तिरधोमुखो गुरुत्वा
ज्जनितव्रीडइवात्मपौरुषेण ॥ ३३ ॥
स समुद्धरता विचिन्त्य तेन
स्वरुचङ्कीर्तिमिवोत्तमान्दधानः ।
अनुयुक्तइव स्ववार्त्तमुच्चैः
परिरेभे नु भृशं विलोचनाभ्याम् ॥ ३४ ॥

कृतवेदिनां कृतज्ञानां कृतावदानः कृतकर्म्मा । अवदानं कर्म्म वृत्तमित्यमरः । यथा प्रियतामेति तथा करिष्यन्नुपकरिष्यन् न प्रियतामेति । कृतकरिष्यमाणयोः कृतम्बलीयइति भावः ॥ ३२ ॥

अथ युग्मेनाह । उपकारइति । असति नीचे प्रयुक्तः उपकारइव मृगे स्थितिमप्राप्य प्रणाशमदर्शनङ्गतइत्युपमा । तथा कृतशक्तिः कृतपौरुषः गुरुत्वाल्लोहभारान्महत्त्वात् अधोमुखो नम्रमुखः । अतएव आत्मपौरुषेण जनितव्रीडइव स्थितइत्युत्प्रेक्षा ॥ ३३ ॥

सइति । उत्तमां स्वरुचं कान्तिङ्कीर्त्तिमिव दधानइत्युत्प्रेक्षा । किञ्च विचिन्त्य सर्वथा ग्राह्योयमिति विमृश्य समुद्धरता

तत्र कार्म्मुकभृतम्महाभुजः
पश्यति स्म सहसा वनेचरम्।
सन्निकाशयितुमग्रतः स्थितं
शासनं कुसुमचापविद्विषः ॥ ३५ ॥
स प्रयुज्य तनये महीपते
रात्मजातिसदृशीं किलानतिम्।
सान्त्वपूर्व्वमभिनीतिहेतुकं
वक्तुमित्थमुपचक्रमे वचः ॥ ३६ ॥

तेनार्ज्जुनेन ऊचैः स्ववार्त्तं स्वपाटवं। वार्त्तं पाटवमारोग्यमभव्यं स्वास्थ्यमनामयमिति यादवः। अनुयुक्तः पृष्ट इव स्थित इत्युत्प्रेक्षा। आदरात्तया प्रतीयत इत्यर्थः। प्रश्नोऽनुयोगः पृच्छा चेत्यमरः। स बाणो विलोचनाभ्यान्नयनाभ्याम्भृशम्परिरेभे नु आलिङ्गितः किमित्युत्प्रेक्षा। तेनात्यादरेण दृष्ट इत्यर्थः ॥ ३४ ॥

तत्रेति। तत्र प्रदेशे महाभुजोऽर्ज्जुनः। कुसुमचापविद्विषः स्मरारेः शासनं वक्ष्यमाणमादेशं सन्निकाशयितुं सन्निवेशयितुं निवेदयितुमिति यावत्। अग्रतः स्थितं कार्म्मुकभृतं वनेचरं सहसा झटिति पश्यति स्म। इतः प्रभृति रथोद्धतावृत्तम्। रोनराविह रथोद्धता लगाविति लक्षणात् ॥ ३५ ॥

सइति। स वनेचरोमहीपतेस्तनये राजपुत्रेऽर्ज्जुने आत्मजातिसदृशीं किरातजात्यनुरूपां किल। किलेति जातेरलीकता न्दर्शयति यतः परमार्थतः प्रमथएव सः। आनतिम्प्रणति

शान्तता विनययोगि मानसं
भूरिधाम विमलं तपः श्रुतम्।
प्राह ते नु सदृशी दिवौकसा
मन्ववायमवदातमाकृतिः ॥ ३७ ॥
दीपितस्त्वमनुभावसम्पदा
गौरवेण लघयन्महोभृतः।
राजसे मुनिरपीह कारय
न्नाधिपत्यमिव शातमन्यवम् ॥ ३८ ॥

प्रयुज्य सान्त्वपूर्व्वं सामपूर्व्वकम्। साम सान्त्वमुभे समे इत्यमरः। अभिनीतिहेतुकम्प्रियर्युक्तिहेतुकं वचः। इत्थं वक्ष्यमाण प्रकारेण वक्तुमुपचक्रमे उद्युक्तवान् ॥ ३६ ॥

तत्र तावच्चतुर्भिस्सान्त्वमाह। शान्ततेति। शान्तता वहिरनौ द्धत्यं ते तव विनययोगि अनौद्धत्ययुक्तं मानसम्प्राह नु ब्रूते खलु। तथा भूरि बहु धाम तेजोयस्मिन् तत्तपः कर्त्तृ विमलं सम्प्रदाय शुद्धं श्रुतं प्राह। किञ्च द्यौर्दिवं वा ओकोयेषां तेषां दिवौकसां देवानाम्। पृषोदरादित्वात्साधुः। दिवं स्वर्गेऽन्तरिक्षे चेति विश्वः। सदृशी तुल्या आकृतिर्मूर्त्तिः अवदातं शुद्धं अन्ववायं वंशम्प्राह। वंशोऽन्ववायः सन्तानइत्यमरः। शान्त्यादिभिर्लिङ्गै र्विनयादयोऽनुमीयन्ते। अन्यथा तदसम्भवादिति भावः ॥ ३७ ॥

दीपितइति। मुनिरपि ऐश्वर्य्यरहितोऽपीत्यर्थः। अनुभाव सम्पदा प्रभावातिशयेन दीपितः प्रकाशितः गौरवेण महत्तया महीभृतोराज्ञः लघयन् लघूकुर्व्वन् त्वमिहाद्रौ शतमन्योरिदं

तापसोऽपि विभुतामुपेयिवा
नास्पदन्त्वमसि सर्व्वसम्पदाम् ।
दृश्यते हि भवतोविना जनै
रन्वितस्य सचिवैरिव द्युतिः ॥ ३९ ॥
विस्मयः क इव वा जयश्रिया
नैव मुक्तिरपि ते दवीयसी ।
ईप्सितस्य न भवेदुपाश्रयः
कस्य निर्ज्जितरजस्तमोगुणः ॥ ४० ॥

शातमन्यवं ऐन्द्रं । तस्येदमित्यण्प्रत्ययः । शतमन्युर्द्दिवस्पति रित्यमरः । अधिपतेः कर्म्म आधिपत्यं त्रैलोक्यरक्षाधिकारः । ब्राह्मणादित्वात् ष्यञ् प्रत्ययः । कारयन्निव इन्द्रेणेति शेषः । राजसे तस्याप्युपजीव्यइति प्रतीयसे स्त्रमहिम्नेत्यर्थः ॥ ३८ ॥

तापसइति । विभुतां प्रभावमुपेयिवान् उपगतः । अतएव तापसोऽपि त्वं सर्व्वसम्पदामास्पदं स्थानमसि । आस्पदम्प्रतिष्ठाया मिति निपातः । विभुतामेव समर्थयते । हि यस्माद्भवतोजनै र्विनापि एकाकिनोऽपीत्यर्थः । सचिवैरन्वितस्येव अमात्यादियुक्त स्येव द्युतिस्तेजोदृश्यते अतः सर्व्वसम्पदास्पदत्वं युक्तमित्यर्थः ॥ ३९ ॥

विस्मयइति । किञ्च जयश्रिया हेतुना प्राप्तयापीति शेषः । कइव वा विस्मयः न कश्चिदित्यर्थः । विस्मयोऽद्भुतमाश्चर्य्यं चित्रमित्यमरः । अतोमुक्तिरपि ते तव दवीयसी दूरतरा दुर्लभा न भवत्येव । स्थूलदूरेत्यादिना यणादिपरलोपः पूर्व्वगुणश्च ।

ह्रेपयन्नहिमतेजसं त्विषा
स त्वमित्थमुपपन्नपौरुषः
हर्त्तुमर्हसि वराहभेदिन
मेनमस्मदधिपस्य सायकम् ॥ ४१ ॥
स्मर्य्यते तनुभृतां सनातनं
न्याय्यमाचरणमुत्तमैर्न्टभिः ।
ध्वंसते यदि भवादृशस्ततः
कः प्रयातु वद तेन वर्त्मना ॥ ४२ ॥

निर्ज्जितौ रजस्तमसी एव गुणौ येन स भवत्सदृशः पुरुषः कस्य द्वेषितस्योपाश्रयः आस्पदन्न भवेदित्यर्थः ॥ ४० ॥

अथागमनप्रयोजनमुपालम्भमुखेनाह । ह्रेपयन्निति । त्विषा तेजसा अहिमतेजसमुष्णतेजसं ह्रेपयन् लज्जयन् उपपन्नपौरुषः सम्भावितपराक्रमः स प्रसिद्धस्त्वं वराहभेदिनं कृतोपकारमित्यर्थः। एनन्त्वत्करगतं अस्मदधिपस्य सायकं शरं इत्थं साहसेन हर्त्तुमार्हसि ॥ ४१ ॥

अनर्हत्वमेवाह । स्मर्य्यतइति । उत्तमैर्न्टभिः सत्पुरुषै र्मन्वादिभिः तनुभृतां शरीरिणां सनातनं नित्यं न्याय्यं न्याया दनपेतं आचरितमाचारः स्मर्य्यते कर्त्तव्यतयेति शेषः न त्वना चारइत्यर्थः । अथाप्यनाचारेण दोषमाह । ध्वंसतइति । भवा निव दृश्यन्ते भवादृशः ततस्तदाचारात् ध्वंसते भ्रश्यन्ते यदि तदा तेन वर्त्मना न्यायमार्गेण कः प्रयातु गच्छतु वद कथय

आकुमारमुपदेष्टुमिच्छव
स्सन्निवृत्तिमपथान्महापदः ।
योगशक्तिजितजन्मम्टत्यवः
शीलयन्ति मुनयः सुशीलताम् ॥ ४३ ॥
तिष्ठतान्तपसि पुण्यमासज
न्सम्पदोऽनुगुणयन्सुखैषिणां ।
योगिनाम्परिणमन्विमुक्तये
केन नास्तु विनयः सताम्प्रियः ॥ ४४ ॥

न कोऽपीत्यर्थः । तथा च सन्मार्ग्गएव शीलं कुर्य्यादिति भावः ॥ ४२ ॥

आकुमारमिति । किञ्च योगशक्त्या आत्मज्ञानमहिम्ना जिता जन्ममृत्यू यैस्ते यतयो योगिनः । कुमारेभ्यआ आकुमारं कुमारा दारभ्येत्यर्थः । आङ् मर्य्यादाभिविध्योरित्यव्ययीभावः । महत्य आपदोयस्मिन् तस्मात् महापदोमहानर्थहेतोरित्यर्थः । अपथा दमार्ग्गात् । पथोविभाषेति समासान्तः । अपथं नपुंसकम् । सन्निवृत्तिमपगमं । उपदेष्टुमिच्छवः सन्तः सुशीलतां सद्वृत्तताम् । शीलं स्वभावे सद्वृत्तइत्यमरः । शीलयन्ति अभ्यस्यन्ति । अतो न त्याज्यं शीलमित्यर्थः ॥ ४३ ॥

न केवलं सौशील्यादनर्थनिवृत्तिमात्रं किन्त्वर्थप्राप्तिरपीत्याह । तिष्ठतामिति । तपसि तिष्ठतान्तपोनिष्ठानां धर्म्मार्थिनामित्यर्थः । पुण्यन्धर्म्ममासजन् सम्पादयन् । स्याद्धर्म्ममस्त्रियां पुण्यश्रेयसी

नूनमत्रभवतः शराकृतिं
सर्व्वथायमनुयाति सायकः ।
सोयमित्यनुपपन्नसंशयः
कारितस्त्वमपथे पदं यया ॥ ४५ ॥

सुकृतं वृषइत्यमरः । सुखैषिणां सुखार्थिनां सम्पदः सुख साधनभूतानर्थान् । अनुगुणयन् अनुकूलयन् । अर्थकामयो रपि हेतुभूतइत्यर्थः । तथा योगिनां विमुक्तये अपवर्गाय परिणमन् सम्पद्यमानोविनयः सैषोत्थं केन हेतुना सतां प्रियो नास्तु । सम्भावनायां लोट् । सर्वथा विनयएव चतुर्वर्गसाधन मित्यर्थः । अतस्त्वयानास्मत्स्वामिशरचौर्य्यं कार्य्यमिति तात्पर्य्यम् ॥ ४४ ॥

अथवा किं भवादृशेष्वन्यसम्भावनया भ्रान्तिरपि सम्भाव्यते इति स्वद्विक्तिमवलम्ब्याह । नूनमिति । अयमस्मदीयः सायकोऽत्रभवतः पूज्यस्येत्यर्थः । पूज्यस्तत्रभवानत्रभवानिति सज्जनः । इतराभ्योऽपि दृश्यतइति सार्व्वविभक्तिकस्तल्प्रत्ययः सुप्सुपेति समासः । शरा कृतिं सर्व्वथा रूपेण रेखादिना सर्व्वप्रकारेण अनुयाति अत्यन्त मनुकरोतीत्यर्थः । नूनमिति वितर्के । यया आकृत्या कर्त्र्या त्वमनुप पन्नसंशयोऽत्यन्तसादृश्यादनुत्पन्नस्वान्यदीयत्वसन्देहः सन्सोयमिति यः स्वकीयः सएवायमिति भ्रान्त्युत्पत्त्यैवेति शेषः । अपथे अमार्गे शरापहरणरूपे पदङ्कारितः निधापितइत्यर्थः । हृक्रो रन्यतरस्यामितिणि कर्त्तुः कर्मता णिन्ते कर्त्तुश्च कर्मणइति तत्रै वाभिहिते कर्मणि क्तः ॥ ४५ ॥

अन्यदीयविशिखे न केवलं
निःस्पृहस्य भवितव्यमाहृते ।
निघ्नतः परनिवर्हितं मृगं
व्रीडितव्यमपि ते सचेतसः ॥ ४६ ॥
सन्ततन्निशमयन्त उत्सुका
यैः प्रयान्ति मुदमस्य सूरयः ।
कीर्त्तितानि हसितेऽपि तानि यं
व्रीडयन्ति चरितानि मानिनम् ॥ ४७ ॥

पुनरपि स्तेयमेव दृढयन् दोषान्तरमापादयति । अन्यदीयेति । सह चेतसा वर्त्ततइति सचेतसोमनस्विनस्ते अन्यदीयविशिखे विषये यदाहृतमाहरणं । भावे क्तः । तस्मिन् अन्यदीयविशिखस्याहरणे इत्यर्थः । निःस्पृहस्य केवलं निःस्पृहेणैव न भवितव्यं किन्तु परनिवर्हितमपरेण प्रहृतं मृगन्निघ्नतः प्रहरतस्ते निघ्नता त्वयेत्यर्थः । कृत्यानाङ्कर्त्तरि वेति षष्ठी । व्रीडितव्यं लज्जितव्यमपि । भावे तव्यप्रत्ययः । सम्प्रति तु त्वया परविद्धं मृगं विद्ध्वापि न व्रीड्यते प्रत्युत स्तेयञ्च क्रियतइत्यहो महत्साहसमित्यर्थः । मृगमित्यत्र शेषत्वाविवक्षणाज्जासिनिप्रहणनाटक्राथपिषां हिंसायामिति षष्ठी न भवति शेषाधिकारात् । निघ्नत इत्यत्र निप्रयोः सङ्घातव्यस्तविपर्य्यस्तानां ग्रहणात् ॥ ४६ ॥

अथास्मिन् कृतघ्नाभियोगं स्वोपकारकत्वं वर्णयितुं विकत्थनदोषन्तावद्युष्मन परिहरन्नाह । सन्ततमित्यादि । सूरयः विद्वांसः अस्य स्वामितः सम्बन्धिभिः यैश्चरितैः करणभूतैः

अन्यदोषमिव स स्वकं गुणं
ख्यापयेत्कथमधृष्टताजडः।
उच्यते स खलु कार्य्यवत्तया
धिग्विभिन्नबुधसेतुमर्थिताम् ॥ ४८ ॥
॥ युग्मम् ॥

सन्ततं सततं उत्सुकाः सोत्कण्ठाः सन्तो निगमयन्तः चरितानि द्रष्टुमन्तः मुदमयान्ति। अत्र चरितानां मुत्प्राप्तौ शाब्दं करणत्वम् र्थात् निगमनकर्म्मत्वमिति विवेकः। तानि चरितानि हसितेऽपि परिहासेऽपि कीर्त्तितानि परैरुच्चारितानि सन्ति यं मानिनं व्रीडयन्ति मानित्वात् व्रीडा न तु चरितदोषात्तेषामलङ्कार रूपत्वादिति भावः ॥ ४७ ॥

अन्येति। अधृष्टतया विकत्थनेन शालीनतया जडः स्तब्धः अविकत्थन इत्यर्थः। सोऽस्मत्स्वामी अन्यदोषम्परावगुणमिव स्वकीय ङ्गुणङ्कथं ख्यापयेत् प्रकटयेत्। आत्मप्रशंसां परगर्हामिव वर्ज्जये दिति स्मरणात्। तथापि कार्य्यवत्तया कर्म्मार्थितयेत्यर्थः स स्वगुण उच्यते खलु कार्य्यार्थिनः कुतो गर्व्व इति भावः। निर्विन्न इवाह। धिगिति। विभिन्नबुधसेतुमतिक्रान्तसुजनमर्य्यादामर्थितां याच नाम्धिक् निन्दामीत्यर्थः। यदयमपीत्थं विकत्थयितुमप्रवृत्त इति भावः। धिक् निर्भत्सननिन्दयोरित्यमरः। अभिसर्व्वतसोः कार्य्याधिगुपर्य्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यत इति द्वितीया ॥ ४८ ॥

दुर्वचन्तदथ मा स्म भून्मृग
स्त्वय्यसौ यदकरिष्यदोजसा ।
नैनमाशु यदि वाहिनीपतिः
प्रत्यपत्स्यत सितेन पत्त्रिणा ॥ ४९ ॥
कोन्विमं हरितुरङ्गमायुध
स्थेयसीन्दधतमङ्गसंहतिम् ।
वेगवत्तरमृते चमूपते
र्हन्तुमर्हति शरेण दंष्ट्रिणम् ॥ ५० ॥

सम्प्रति स्वकृतोपकारं दर्शयति । दुर्व्वचमिति । वाहिनीपतिः सेनापतिः अस्मत्स्वामी शितेन पत्त्रिणा शरेण एनं मृगं आशु न प्रत्यपत्स्यत यदि नाभियुञ्जीत चेदसौ मृगः ओजसा बलेन त्वयि विषये यदकरिष्यत् यदनिष्टं कुर्य्यात्तद्दुर्वचं दुर्वाच्यं अमङ्गलतया वक्तुं न शक्यते। तदनिष्टं अथानन्तरं अपि मा स्म भूत् इति सौहार्द्दकथनन्तदुपेक्षणे स मृगस्त्वां हन्यादिति भावः। लिङ्निमित्ते लृङ् क्रियातिपत्ताविति करोतेः पद्यतेश्च लृङ् ॥ ४९ ॥

ननु मयैव हतोमृगोन तु सेनापतिना तत्राह। कइति। हरितुरङ्गमायुधं इन्द्रायुधन्तद्वत् स्थेयसीं स्थिरतरां अकुण्ठिता मित्यर्थः। स्थिरशब्दादियसुन् प्रियस्थिरेत्यादिना स्थादेशः। अङ्गसंहतिं अवयवसङ्घातन्दधतन्धारयन्तम् । वेगवत्तरन्दुर्वार वेगम् । इमं दंष्ट्रिणं वराहं चमूपतेः किरातवाहिनीपतेः ऋते

मित्रमिष्टमुपकारि संशये
मेदिनीपतिरयन्तथा च ते ।
तं विरोध्य भवता निरासि मा
सज्जनैकवसतिः कृतज्ञता ॥ ५१ ॥
लभ्यमेकसुकृतेन दुर्लभा
रक्षितारमसुरक्ष्यभूतयः ।
स्वन्तमन्तविरसा जिगीषतां
मित्रलाभमनु लाभसम्पदः ॥ ५२ ॥

विना । अन्यारादित्यादिना पञ्चमी । कोऽनु कोवा शरेण एकेनेति भावः । हन्तुं अर्हति न कोऽपीत्यर्थः । ५० ॥

अस्तु एवं मृगस्य हन्ता ततः किमतआह । मित्रमिति । तथा च तस्यैव मृगहन्तृत्वे सतीत्यर्थः । अयं मेदिनीपतिः किरात भूपतिः ते तव संशये प्राणसङ्कटे उपकारि उपकारकारकं इष्टं मित्रं ततोऽपि किं तत्राह । तमिति । तं विरोध्य सज्जनैकवसतिः भवादृशसुजनमात्राधारा कृतज्ञता उपकारवेदित्वं मा निरासि मा निराक्रियताम् भवता । अन्यथा जगति कृतज्ञत्वं अस्तं यायात् कृतघ्नता च ते भवेदित्यर्थः। अस्यतेः कर्म्मण्याशिषि माङि लुङ् ॥५१॥

ननु सर्व्वस्यार्थमूलत्वात्स एवास्तु किं मित्रेणेत्याशङ्क्य मित्रस्य सर्व्वाधिक्यं युग्मेनाह । लभ्यमिति । जिगीषतां जेतुमिच्छताम् । जयतेः सन्नन्ताच्छतृप्रत्ययः । दुर्लभाः कृच्छ्रेणापि लब्धुमशक्याः तथापि असुरक्ष्यभूतयः रक्षितुमशक्यमहिमानः । नित्यं रक्षणादि

चञ्चलं वसु नितान्तमुन्नता
मेदिनीमपि हरन्त्यरातयः ।
भूधरस्थिरमुपेयमागतं
मावमंस्त सुहृदम्महीपतिम् ॥ ५३ ॥

क्लेशवहास्येति भावः । अन्तविरसागलर्थ्यदत्यर्थः । लभ्यन्त इति लाभाः अर्थास्तेषां सम्पदः । एकसुकृतेन एकोपकारेण लभ्यं सुलभन्न तु दुर्लभं रचितारं न तु रच्यं खलं शुभावसानन्नलन्त विरसं मित्रलाभं अनु मित्रलाभाद्धीनानिकृष्टादत्यर्थः । हीमदत्यनोः कर्म्मप्रवचनीयसंज्ञा तद्योगे द्वितीया । अत्रोपमेयस्य मित्रलाभस्य लाभान्तरम्प्रत्याधिक्याभिधानाद्व्यतिरेकालङ्कारः ॥ ५२ ॥

चञ्चलमिति । किञ्च वसु धनं नितान्तञ्चञ्चलम्मेदिनीमप्युन्नताः प्रबलाः अरातयोहरन्ति । मित्रन्तु न तथेत्याह । भूधर इति । भूधरवत् स्थिरं उपेयं अन्विष्य गन्तव्यमागतं स्वतः प्राप्तमपि महीपतिं सर्व्वधुरीणमित्यर्थः । सुहृदं मित्रं मावमंस्त मावज्ञासीत् भवानिति शेषः । अन्यश्लोकगतोभवच्छब्दोविभक्तिपरिणामेणात्र द्रष्टव्यः । अन्यथा मध्यमपुरुषः स्यात् । मन्यतेः कर्त्तरि माङि लुङ् । अलङ्कारस्तु व्यतिरेकएव भूधरस्थिरमित्युपमासङ्कृति सङ्करः ॥ ५३ ॥

ननु मुमुक्षोः किं मित्रसङ्ग्रहेण तत्राह । जेतुमिति । भवता जेतुमर्थार्थमेव तपस्यते तपश्चर्य्यते । कर्म्मणोरोमन्थेत्यादिना चरणे क्यङ् ततोभावे लट् । कुतः मुमुक्षवः मोक्षार्थिनः । आयुधानि न दधते न धारयन्ति । अतोमित्रसङ्ग्रहः कार्य्यइति भावः । तथापि

जेतुमेव भवता तपस्यते
नायुधानि दधते मुमुक्षवः ।
प्राप्स्यते च सकलं महीभृता
सङ्गतेन तपसः फलन्त्वया ॥ ५४ ॥

वाजिभूमिरिभराजकाननं
सन्ति रत्ननिचयाश्च भूरिशः ।
काञ्चनेन किमिवास्य पत्त्रिणा
केवलन्न सहते विलङ्घनम् ॥ ५५ ॥

किम्भवत्स्वामिसख्येन तत्राह । प्राप्स्यतइति । महीभृता सह सङ्गतेन त्वया सकलञ्च तपः फलम्प्राप्स्यते अतस्ते सखा अस्मत्स्वामी युक्त इत्यर्थः ॥ ४४ ॥

नन्वकिञ्चनः कुत्रोपयुज्यते तत्राह । वाजीति । तस्य भूपतेः वाजिभूमिरश्वाकरः इभराजानां काननङ्गजोत्पतिस्थानं भूरिशो रत्ननिचयाश्च सन्तीति शेषः । नन्वीदृगाढ्यः किमेकस्मै काञ्चनपत्त्रकाण्डाय कलहायते तत्राह । अस्य काञ्चनेन सौवर्णेन पत्त्रिणा शरेण किमिव न किञ्चित्प्रयोजनमस्तीत्यर्थः । परन्तु केवलं विलङ्घनं व्यतिक्रमञ्च सहते । नायं शरलुब्धः किन्त्वधिक्षेपासहिष्णुरित्यर्थः । अत्र प्रथमार्द्धे समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारः ॥ ५५ ॥

नन्वीदृग्लुब्धः किमुपकर्त्ता तत्राह । सावलेपमिति । महानपि रजस्यपि धूलावपि परैः सावलेपं सगर्व्वं उपलिप्सिते उपलब्धुमिष्टे जिघृक्षिते सति विकृतिमभ्यपैति प्रकुप्यतीत्यर्थः । अयितो

सावलेपमुपलिप्सिते परै-
रभ्युपैति विकृतिं रजस्यपि ।
अर्थितस्तु न महान्समीहते
जीवितङ्किमु धनन्धनायितुम् ॥ ५६ ॥
तत्तदीयविशिखातिसर्ज्जना-
दस्तु वां गुरु यदृच्छयागतम् ।
राघवप्लवगराजयोरिव
प्रेम युक्तमितरेतराश्रयम् ॥ ५७ ॥

अर्थितस्तु जीवितन्धनायितुन्धनीकर्त्तुं । क्यजन्तात्तुमुन् । न समीहते नोत्सहते जीवितमप्यात्मनोनेच्छति किन्त्वर्थितः प्रयच्छतीत्यर्थः । तर्हि धनं किम् । धनमात्मनएषितुं धनायितुमिति विग्रहः । अत्र इच्छामात्रमर्थः अन्यथा धनमित्यनेन पौनरुक्त्यं स्यात् । सुपआत्मनः क्यच् । अशनायोदन्यधनायाबुभुक्षापिपासागर्द्धेष्विति निपातनादाकारः ॥ ५६ ॥

उक्तन्निगमयति । तदिति । तत्तस्मात्तदीयविशिखस्य अतिसर्ज्जनात्प्रत्यर्पणात् वां युवयोः । षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नाविति वामादेशः । राघवप्लवगराजयोः रामसुग्रीवयोरिव यदृच्छया दैवादागतं गुरु महत् युक्तमनुरूपं इतरेतराश्रयमन्योन्यविषयम्प्रेम सख्यमस्तु ॥ ५७ ॥

ननु शरलोभान्मिथ्याभियुज्यसे इत्याह । नेति । त्वमन्तं मिथ्या अभियोक्तुं अभ्याख्यातुम् । शुजेरर्थग्रहणात् द्विकर्मकता । मिथ्याभियोगोऽभ्याख्यानमित्यमरः । अस्माभिरिति शेषः । नेष्यसे नेष्टोसि कुतः

नाभियोक्तुमनृतं त्वमिष्यसे
कस्तपस्विविशिखेषु चादरः ।
सन्ति भूभृति शरा हि नः पर
ये पराक्रमवसूनि वज्रिणः ॥ ५८ ॥
मार्ग्गणैरथ तव प्रयोजनं
नाथसे किमु पतिन्न भूभृतः ।
त्वद्विधं सुहृदमेत्य सोऽर्थिन
ङ्किन्न यच्छति विजित्य मेदिनीम् ॥ ५९ ॥

तपस्वी मुनिः शोच्यश्च । मुनिशाच्यौ तपस्विनाविति शाश्वतः । तस्य विशिखेषु कश्चादरः काऽऽस्था न काचिदित्यर्थः । हि यस्मान्नोऽस्माकं भूभृति शैले अपरेऽन्येऽपि शराः सन्ति ये शरा वज्रिणः शक्रस्य पराक्रमवसूनि पराक्रमधनानि शौर्य्यसर्व्वस्वभूतानीत्यर्थः । वज्रि ग्रहणात् वज्रादप्यतिरिक्तानिति सूच्यते । अत्र शरेषु पराक्रम साधनेषु पराक्रमरूपेण वसु व्यज्यते ॥ ५८ ॥

अथ ते शरापेक्षा चेत्तर्हि तयोच्यतामित्याह । मार्ग्गणैरिति । अथ उत तव मार्ग्गणैः शरैः प्रयोजनं कृत्यं तर्हि भूभृतो गिरेः पतिम्प्रभुङ्किमु न नाथसे किमिति न याचसे । नाधृनाथृयाञ्चोपतापैश्वर्य्याशीःष्विति धातोर्लट् । न च याञ्चाभङ्गशङ्का कार्य्येत्याह । त्वदिति । सोऽस्मत्स्वामी तवेव विधा प्रकारो यस्य तन्त्वद्विधन्त्वादृशं महानुभावमित्यर्थः । तथापि सुहृदं मित्रभूतमर्थिनमेत्य लब्ध्वा मेदिनीं विजित्य न यच्छति न ददाति किं किन्तु दास्यत्येव किम्पुनः शरानिति भावः ॥ ५९ ॥

तेन सूरिरुपकारिताधनः
कर्त्तुमिच्छति न याचितं वृथा ।
सीदतामनुभवन्निवार्थिनां
वेद यत्प्रणयभङ्गवेदनाम् ॥ ६० ॥
शक्तिरर्थपतिषु स्वयङ्ग्रहं
प्रेम कारयति वा निरत्ययम् ।
कारणद्वयमिदन्निरस्यतः
प्रार्थनाधिकबले विपत्फला ॥ ६१ ॥

यदुक्तन्त्वदिधमित्यादि तत्रोपपत्तिमाह । तेनेति । तेन कारणेन सूरिर्विद्वान् अतएवोपकारिताधनउपकारकलमात्रधनः । स किरातभूपतिः । याचितं याञ्चां वृथा व्यर्थं कर्तुन्नेच्छति । कुतः यत् येन कारणेन सीदतां क्लिश्यतां अर्थिनाम्प्रणयभङ्गवेदनां याञ्चा भङ्गदुःखं स्वयं अनुभवन्निव वेद वेत्ति । अतोन वैफल्यशङ्का कार्य्येत्यर्थः ॥ ६० ॥

ननु स्वयं ग्राहिणः किं याञ्चादैन्यन्तत्राह । शक्तिरिति । अर्थ पतिषु विषये शक्तिः सामर्थ्यं स्वयङ्ग्रहं स्वाम्यनुज्ञां विना ग्रहणं कारयति । यद्वा निरत्ययं अपराधेऽपि अविकारि प्रेम कर्तृ स्वय ङ्ग्रहं कारयति प्रबलः प्रियोवा परस्य धनं स्वयं गृह्णातीत्यर्थः । अन्यथा दोषमाह । इदम्पूर्व्वोक्तकारणद्वयं निरस्यतः त्यजतः पुंस इति शेषः । अधिकबले प्रबले विषये प्रार्थना तद्धनजिघृक्षा विपत्फला अनर्थफलिका अशक्तस्याप्रियस्य यतः प्रबलधन

अस्त्रवेदमधिगम्य तत्त्वतः
कस्य चेह भुजवीर्य्यशालिनः ।
जामदग्न्यमपहाय गीयते
तापसेषु चरितार्थमायुधम् ॥ ६२ ॥

अभ्यघानि मुनिचापलात्त्वया
यन्मृगः क्षितिपतेः परिग्रहः ।
अक्षमिष्ट तदयं प्रमाद्यतां
संवृणोति खलु दोषमज्ञता ॥ ६३ ॥

पर्हणाश्च फणिशिरोमणिग्रहणसाहसवत् अनर्थाय कल्पत इत्यर्थः ॥ ६१ ॥

अथ शस्त्रार्थसम्पत्त्या शक्त्याभिमानस्तत्राह । अस्त्रवेदमिति । इह जगति तापसेषु तपस्विनां मध्ये । यतश्च निर्द्धारणमिति सप्तमी । जमदग्नेरपत्यम्पुमान् जामदग्न्यः । गर्गादिभ्यो यञ् । तमपहाय परशुरामं विनेत्यर्थः । अस्त्रवेदन्तत्त्वतोऽधिगम्य भुजवीर्य्येण शालन्त इति भुजवीर्य्यशालिनः । उभयसम्पन्नस्येत्यर्थः । शालनक्रियापेक्षया समानकर्त्तृकत्वात् क्त्वानिर्द्देशः । कस्य वा आयुधं चरितः प्राप्तोऽर्थो येन तच्चरितार्थं सार्थकं गीयते न कस्यापीत्यर्थः । अतस्तवापि तापसत्वादकिञ्चित्करस्य तेन सह सख्यमेव मुख्यमिति भावः ॥ ६२ ॥

ननु युष्मन्मृगवधशरहरणाभ्यां द्रोहिणो मम तेन कथं सख्यं स्यादित्याशङ्क्य सत्यन्तथापि तावत् मृगवधापराधः क्षमिष्यत

जन्मवेषतपसां विरोधिनीं
मा कृथाः पुनरमूमपक्रियाम् ।
आपदेत्युभयलोकदूषणी
वर्त्तमानमपथे हि दुर्म्मतिम् ॥ ६४ ॥

इत्याह । अभ्यघानीति । त्वया मुनिचापलाद्ब्राह्मणचापल्यादित्यर्थः । क्षितिपतेरस्मत्स्वामिनः परिगृह्यत इति परिग्रहः तेन स्वीकृत इत्यर्थः । परिग्रहः परिजने पत्न्यां स्वीकारमूलयोरिति विश्वः । यत् मृगो ऽभ्यघानि अभिहत इति । हन्तेः कर्म्मणि लुङ् । तद्धननमयं अस्मत्स्वामी अचमिष्ट सोढवानेव । तथाहि प्रमाद्यतामविमृश्य कारिणामित्यर्थः । दोषमपराधमज्ञता अज्ञानिता संवृणोति आच्छादयति । नाज्ञस्यापराधोगण्यत इत्यर्थः ॥ ६३ ॥

अथ सुहृद्भाविव हितमुपदिशति । जन्मेति । जन्म संस्कुले प्रसूतिः वेषोजटावल्कलादिः तपोनियमः तेषां विरोधिनीं विरुद्धां अमूमेवंविधां अपक्रियामपकारं पुनरितः परमित्यर्थः । मा कृथाः मा कुरु । करोतेः कर्त्तरि माङि लुङ् । वयोरूपार्थ वाग्वेषश्रुताभिनयकर्म्मणां । आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथेति स्मरणात् । उक्तविपरीते दोषमाह । आपदिति । हि यस्मात् । अपथे वर्त्तमानं दुर्म्मतिम्पुरुषमिति शेषः । उभौ लोकौ दूषयति हन्तीत्युभयलोकदूषणी । तद्धितार्थ इत्यादिना उत्तरपद समासः । आपत् एति प्राप्नोति । समासविषये उभशब्दस्थाने उभयशब्दप्रयोगएव साधुः । यदाह कैयटः उभादुदात्तो नित्यमिति नित्यग्रहणस्येदम्प्रयोजनं वृत्तिविषये उभशब्दस्य

यष्टुमिच्छसि पितॄन्न साम्प्रतं
संवृतोऽर्च्चिचयिषुर्दिवौकसः ।
दातुमेव पदवीमपि क्षमः
किं मृगेऽङ्ग विशिखं न्यवीविशः ॥ ६५ ॥

प्रयोगोमाभूत् । उभयशब्दस्यैव रूपं यथा स्यादित्युभयत्रेत्यादि भवतीति ॥ ६४ ॥

यदुक्तं अभ्यघानीति तदेव स्फुटयति । यष्टुमिति । साम्प्रतं सम्प्रति । सम्प्रतीदानीमधुना साम्प्रतं तथेत्यमरः । पितॄन् यष्टुमर्च्चयितुन्नेच्छसि यतः संवृतः एकान्ते स्थितः । तथा दिवौकसः देवान् अर्च्चिचयिषुरपि अर्च्चयितुमिच्छुरपि नासि अतो न पित्रर्थं यं हिंसा नापि देवतार्था तदाराधने तद्विहितत्वादिति भावः । अथ सर्व्वतआत्मानं गोपायोतेति श्रुतेरात्मरक्षार्थमिति चेदित्याह । दातुमिति । अङ्ग हे । पदवीं मार्गं दातुमेव न तु हन्तुं मुनित्वादिति भावः । क्षमेऽपि योग्यः सन्नपि । किञ्चिमर्थं मृगे विशिखन्न्यवीविशः निवेशितवान् । विशतेर्ण्यन्ताल्लुङ् । अभिधावतोमृगात् अपसरणेनैव आत्मरक्षणे कर्त्तव्ये यदवधीस्तच्चापलमेव । न हिंस्यात्सर्व्वाभूतानीति निषेधादिति भावः ॥ ६५ ॥

किं बहुना परमार्थः श्रूयतामित्याह । सज्जनइति । सज्जनोऽसि अतएव चापलञ्चपलस्य कर्म्म विजहीहि त्यज । जहातेर्लोट् आ च हाविति ईकारः । सर्व्वदा कदुव त्वा कोवा सहिष्यते । इवशब्दोवाक्यालङ्कारे वाशब्दोऽवधारणे । असहने कारणमाह । वारिधीनिति । अनिभृताश्चपलाः पुनः परकार्य्य

सज्जनोऽसि विजहीहि चापलं
सर्व्वदा क इव वा सहिष्यते ।
वारिधीनिव युगान्तवायवः,
क्षोभयन्त्यनिभृता गुरूनपि ॥ ६६ ॥
अस्त्रवेदविदयम्महीपतिः
पर्व्वतीय इति मावजीगणः ।
गोपितुम्भुवमिमां मरुत्वता
शैलवासमनुनीय लम्भितः ॥ ६७ ॥

कारिणो गुरून् धैर्य्ययुक्तानपि युगान्तवायवः प्रलयपवनाः गुरून् विशालानपि वारिधीनिव समुद्रानिव क्षोभयन्ति । उपमानुप्राणितोऽयमर्थान्तरन्यासः ॥ ६६ ॥

नन्वयङ्किरातः क्षुभितः किङ्करिष्यति तत्राह । अस्त्रेति । अयं महीपतिः अस्त्रवेदवित् निग्रहानुग्रहसमर्थ इति भावः । अतः पर्व्वते भवः पर्व्वतीयः । पर्व्वताच्चेति छप्रत्ययः । इति हेतोः मा अवजीगणः वनेचरबुद्ध्या मावज्ञासीरित्यर्थः । गणयतेर्माङि लुङ् ई च गण इतीकारः । नन्वीदृशश्चेत्किमिह वने वसति तत्राह । गोपितुमिति । मरुत्वता इन्द्रेण इमाम्भुवङ्गोपितुं रक्षितुम् । आयादय आर्द्धधातुके वेति विकल्पात् गुपूधूपेत्यादिना न आय प्रत्ययः । अनुनीय प्रार्थ्य शैलवासं लम्भितः प्रापितः । ण्यन्ते कर्त्तुश्च कर्म्मण इति वचनादणिकर्त्तृकर्म्मणि क्तः गतिबुद्धीत्यादिना अणिकर्त्तुः कर्म्मत्वम् ॥ ६७ ॥

तत्तितिक्षितमिदम्मया मुने
रित्यवोचत वचश्चमूपतिः ।
बाणमत्रभवते निजन्दिश
न्नाप्नुहि त्वमपि सर्व्वसम्पदः ॥ ६८ ॥
आत्मनीनमुपतिष्ठते गुणाः
सम्भवन्त्युपरमन्ति चापदः ।
इत्यनेकफलभाजि मा स्म भू
दर्थिता कथमिवार्य्यसङ्गमे ॥ ६९ ॥

उपसंहरति । तदिति । तत्तस्मान्मुनिचापलात् मुनेः सम्बन्धि इदं मृगवधरूपम्मया तितिक्षितं सोढमिति वचश्चमूपतिरवोचत । शरद्रोहस्य प्रत्यर्पणमेव प्रतीकारइत्याह । अत्रभवते पूज्याय स्वामिने । अत्रभवान् व्याख्यातः निजम्बाणन्तदीयमेव शरन्दिशन्प्रत्यर्प्पयंस्त्वमपि सर्व्वसम्पदः आप्नुहि सख्येनेति भावः ॥ ६८ ॥

ननु मह्यमेतत्सख्यमेव न रोचते किमुनस्तन्मूलास्सम्पदस्तत्राह । आत्मनीनमिति । आत्मने हितं आत्मनीनं । आत्मन् विश्वजनभोगोत्तरपदात्खः । उपतिष्ठते सङ्गच्छते । उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यादात्मनेपदम् । गुणाः विनयादयः सम्भवन्ति आपदस्तु विरमन्ति । व्याङ्परिभ्योरम इति परस्मैपदम् । इत्यनेकफलभाजि आर्य्यसङ्गमे साधुसङ्गतौ अर्थिता अपेक्षा कथमिव मा स्म भूत् सर्व्वदा भवत्येव ॥ ६९ ॥

न चायन्दूरे वर्त्ततइत्याह । दृश्यतामिति । तिग्महेतिभिस्तीक्ष्णायुधाभिः । हेतिर्ज्वालास्त्रसूर्य्यांशुष्विति हेमचन्द्रः ।

दृश्यतामयमनोकहान्तरे
तिग्महेतिपृतनाभिरन्वितः ।
साहिवीचिरिव सिन्धुरुद्धतो
भूपतिः समयसेतुवारितः ॥ ७० ॥

सज्यन्धनुर्वहति योऽहिपतिस्थवीयः
स्थेयान् जयन् हरितुरङ्गमकेतुलक्ष्मीम् ।
अस्यानुकूलय मतिं मतिमन्ननेन
सख्या सुखं समुपयास्यसि चिन्तितानि ॥ ७१ ॥

पृतनाभिर्वाहिनीभिः । वाहिनी पृतना चमूरित्यमरः । अन्वितो भूपतिः । आहयः सर्पाः वीचयोयस्य स सिन्धुः समुद्र इवोद्धतः किन्तु समयो मर्यादा सेतुरिव स समयसेतुः तेन वारितः सन् । हस्तेन निर्दिशन्नाह । अयमनोकहान्तरे द्रुमान्तर्द्धाने वर्त्तत इति शेषः । दृश्यतां । अनोकहः कुटः शालः पलाशी द्रुद्रुमागमा इत्यमरः ॥ ७० ॥

अथास्य विज्ञापनमेवाह । सज्यमिति । स्थेयान् स्थिरतरः । प्रियस्थिरेत्यादिना स्थादेशः । यस्तु भूपतिः हरितुरङ्गमकेतो रिन्द्रध्वजस्य लक्ष्मीं शोभां जयन अहिपतिः शेष इव स्थवीयः स्थूलतरं । स्थूलदूरेत्यादिना पूर्व्वगुणयणादिपरलोपौ । सह ज्यया सज्यन्धनुर्वहति । हे मतिमन् अस्य चमूपतेर्मतिमनुकूलय अनुकूलां कुरु सख्यं कुर्वित्यर्थः । मतिमत्तायाः फलमेतदिति भावः । कुतः सख्या अनेन चमूपतिना हेतुना सुखमक्लेशेन चिन्तितानि मनोरथानभियास्यसि प्राप्स्यसि । वसन्ततिलकावृत्तम् ॥ ७१ ॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये दूतवाक्यं नाम त्रयोदशस्सर्गः ॥ १३ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किराताऽर्ज्जुनीयव्याख्यायाङ्घण्टापथसमाख्यायां दूतवाक्यनाम त्रयोदशः सर्गः ॥ १३ ॥

ततः किरातस्य वचोभिरुद्धतैः
पराहतः शैलइवार्णवाम्बुभिः ।
जहौ न धैर्य्यं कुपितोऽपि पाण्डवः
सुदुर्ग्रहान्तःकरणाहि साधवः ॥ १ ॥
सलेशमुल्लिङ्गितशात्रवेङ्गितः
कृती गिरां विस्तरतत्त्वसङ्ग्रहे ।
अयम्प्रमाणीकृतकालसाधनः
प्रशान्तसंरम्भइवाददे वचः ॥ २ ॥

ततइति । ततः किरातवाक्यानन्तरम् उद्धतैः प्रगल्भैः किरातवचोभिः अर्णवाम्बुभिः शैलइव पराहतोऽभिहतः अतएव कुपितोऽपि पाण्डवो धैर्य्यं निर्विकारचित्तत्वन्न जहौ न तत्याज । उत्पन्नमपि कोपं स्तम्भयामासेत्यर्थः । तथाहि साधवः सज्जनाः सुदुर्ग्रहं सुष्ठुदुरासदं अप्रतिकृष्यमन्तःकरणं येषान्ते सुदुर्ग्रहान्तःकरणाहि । अर्थान्तरन्यासः ॥ १ ॥

सलेशमिति । लेश लेशैः सलेशं सकलं यथा तथा उल्लिङ्गित मुद्गतलिङ्गं कृतं लिङ्गैस्तद्वाक्यभङ्गिभिरेव सम्यगवगतमित्यर्थः । शत्रुरेव शात्रवः । स्वार्थे अण्प्रत्ययः । तस्येङ्गितमभिप्रायः तदुल्लिङ्गितं येन सः । गिरां वाचां सम्बन्धिनि विस्तरे तत्त्वसङ्ग्रहे अर्थसङ्क्षेपे । वैभाषिकोद्वन्द्वैकवद्भावः । कृती कुशलः प्रमाणीकृतम्प्रधानीकृतं कालएव साधनं येन सः अवसरोचितं विवक्षुरित्यर्थः । अथ पाण्डवः प्रशान्तसंरम्भः सङ्क्षोभरहितइव वचः आददे उवाचेत्यर्थः ॥ २ ॥

विविक्तवर्णाभरणा सुखश्रुतिः
प्रसादयन्ती हृदयान्यपि द्विषाम्।
प्रवर्त्तते नाकृतपुण्यकर्म्मणा
प्रसन्नगम्भीरपदा सरस्वती ॥ ३ ॥

सान्त्वपूर्ब्बकमेवाह। विविक्तेति। विविक्ताःसंयोगादिना अश्लिष्टाः स्फुटोच्चारितावर्णाः अक्षराण्येव आभरणानि यस्याः सा अन्यत्र तु विविक्तानि शुद्धानि वर्णोरूपमाभरणानि च यस्याः सा। वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाचरइत्युभयत्राप्यमरः। सुखा श्रुतिः श्रवणं यस्याः सा सुखश्रुतिः श्राव्येत्यर्थः। अन्यत्र श्रूयते इति श्रुतिर्वाक् सा सुखा यस्याः सा मञ्जुभाषिणीत्यर्थः। द्विषामपि हृदयानि प्रसादयन्ती किम्पुनः सुहृदामिति भावः। प्रसन्नानि वाचकानि गम्भीराणि अर्थगुरूणि च पदानि सुप्तिङन्तरूपाणि यस्याः सा। अन्यत्र तु प्रसन्ना विमला गम्भीरपदा अलसचरणा सरस्वती वाक्। गीर्व्वाग्वाणी सरस्वतीत्यमरः। न कृतं पुण्यकर्म्म यैस्तेषां न प्रवर्त्तते न प्रसरति किन्तु सुकृतिनामेवेत्यर्थः। भवद्वाणी चैवं विधेति धन्योभवानिति भावः। अत्र काचिन्नायिका वाग्देवता च प्रतीयते। तत्रादौ समासोक्तिरलङ्कारः विशेषण साम्येनाप्रस्तुतप्रतीतेः अतएव न श्लेषः ॥ ३ ॥

भवन्तीति। ते पुरुषाः विपश्चितां विदुषां। विद्वान् विपश्चि द्दोषज्ञइत्यमरः। मध्ये सभ्यतमाः सभायां साधुतमानिपुणतमाः। साधुःसमर्थोनिपुणश्चेति काशिकायां। भवन्ति ये मनोगतं मनसा गृहीतमर्थं वाचि निवेशयन्ति वाचा उद्गिरन्तीत्यर्थः। तेषु वक्तृ

भवन्ति ते सभ्यतमा विपश्चितां
मनोगतं वाचि निवेशयन्ति ये।
नयन्ति तेष्वप्युपपन्ननैपुणा
गभीरमर्थं कतिचित्प्रकाशताम् ॥ ४ ॥
स्तुवन्ति गुर्व्वीमभिधेयसम्पदं
विशुद्धिमुक्तेरपरे विपश्चितः।
इति स्थितायाम्प्रतिपूरुषं रुचौ
सुदुर्लभाः सर्व्वमनोरमा गिरः ॥ ५ ॥

ष्वपि उपपन्ननैपुणाः सम्भावितकौशलाः कतिचिदेव गभीरन्निगूढ मर्थम्प्रकाशतां स्फुटतां नयन्ति। लोके तावत् ज्ञातार एव दुर्लभाः तत्रापि वक्तारः तत्रापि निगूढार्थप्रकाशकाः त्वयि सर्व्वमस्तीति स्तुतिः। वनेचरवाक्यरहस्यं ज्ञातमिति स्वयमपि तादृश एवेति हृदयम् ॥ ४ ॥

स्तुवन्तीति। किञ्च केचित् गुर्व्वीमभिधेयसम्पदं अर्थसम्पत्तिम् स्तुवन्ति। अपरे विपश्चितः उक्तेः शब्दस्य विशुद्धिं सामर्थ्यं स्तुवन्ति। इति प्रतिपूरुषं रुचौ प्रीतौ स्थितायां व्यवस्थितायां सर्व्वमनोरमाः सर्व्वेषां शब्दार्थरुचीनाम्पुंसाम्मनोरमाः गिरः सुदुर्लभाः। त्वद्गिरस्तु सर्व्वमनोरमाः उक्तसर्व्वगुणसम्पत्त्येति भावः ॥ ५ ॥

समस्येति। धुरं वहतीति धुर्य्यस्तत्सम्बोधने हे धुर्य्य हे कार्य्य निर्व्वाहक। धुरो यड्ढकाविति यत्प्रत्ययः। अतएव समारोपित भार। स्वामिना विहितसन्ध्यादिकार्य्यभार हे। तदाह मनुः। दूते सन्धिविपर्य्ययाविति। इमां शान्तता विनयेयोगीत्यादिकाम्भारतीं

समस्य सम्पादयता गुणैरिमां
त्वया समारोपितभार भारतीम्।
प्रगल्भमात्मा धुरि धुर्य्य वाग्मिनां
वनेचरेणापि सताधिरोपितः ॥ ६ ॥
प्रयुज्य सामाचरितं विलोभनं
भयं विभेदाय धियः प्रदर्शितम्।
तथाभियुक्तञ्च शिलीमुखार्थिना
यथेतरन्न्याय्यमिवावभासते ॥ ७ ॥

वाचं गुणैर्विविक्तत्वर्थत्वादिभिः समस्य संयोज्य प्रगल्भं निर्भीकं यथा तथा सम्पादयता रचयता व्याहरतेत्यर्थः। त्वया वनेचरेणापीत्यर्थः। सता अपिशब्दो विरोधद्योतनार्थम्। आत्मा स्वयं वाग्मिनां वाचोयुक्तिपटूनाम्। वाचोयुक्तिपटुर्वाग्मीत्यमरः। वाचोग्मिनिरिति मत्वर्थीयो ग्मिनिप्रत्ययः। धुर्य्ये धुरि धिरोपितः आस्थापित इत्यर्थः। रुहः पोऽन्यतरस्यामिति पकारः। अत्र मनुः। वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यत इति ॥ ६ ॥

वाग्मितामेवाह। प्रयुज्येति। शान्तता विनययोगीत्यादिना साम सान्त्वं। साम सान्त्वमुभे समे इत्यमरः। प्रयुज्य नियुज्य विलोभनं प्रलोभनं मित्रमिष्टमित्यादिना आचरितं सम्पादितम्। तथा धियो बुद्धेर्विभेदाय व्यामोहनार्थं शक्तिरर्थपतिष्वित्यादिना भयं प्रदर्शितं। किञ्च शिलीमुखार्थिना न तु न्यायार्थिनेति भावः त्वयेति शेषः। नाभियोक्तुमित्यादिना तथाभियुक्तं

विरोधि सिद्धेरिति कर्त्तुमुद्यतः
स वारितः किम्भवता न भूपतिः ।
हिते नियोज्यः खलु भूतिमिच्छता
सहार्थनाशेन नृपोऽनुजीविना ॥ ८ ॥
ध्रुवं प्रणाशः प्रहितस्य पत्रिणः
शिलोच्चये तस्य विमार्गणं नयः ।
न युक्तमत्रार्य्यजनातिलङ्घनं
दिशत्यपायं हि सतामतिक्रमः ॥ ९ ॥

कथितं यथेतरत् न्यायादन्यदन्याय्यमित्यर्थः । न्याय्यं न्यायादनपेत मिवावभासत इत्युपमा । अनेन वाग्मिनामयमग्रेसरोऽसीति भावः ॥ ७ ॥

ततः किमतआह । विरोधीति । किन्तु सिद्धेः फलस्य विरोधि विघातकमिति इदमस्मदास्कन्दनरूपकर्म्म कर्त्तुमुद्यतः स भूपतिर्भवता धुर्य्येणेति भावः । किन्न वारितोनिवर्त्तितः । निवारणे हेतुमाह । भूतिमिच्छता इहामुत्र च श्रेयोर्थिना सह सहचरितावर्थनाशौ स्वार्थानर्थौ यस्य तेन सहार्थनाशेन समानसुखदुःखेनेत्यर्थः । अनुजीविना भृत्येन नृपः स्वामी हिते नियोज्योनियम्यः खलु । अन्यथा स्वामिद्रोहपातकी श्रेयसो भ्रष्टः स्यादिति भावः ॥ ८ ॥

तर्हि मेवाणः क गतः किमत्र वा न्याय्यन्तत्राह । ध्रुवमिति । प्रहितस्य प्रयुक्तस्य पत्रिणः शरस्य प्रणाशोऽदर्शनं ध्रुवं निश्चितं । तस्य नष्टस्य पत्रिणः शिलोच्चये शैले । अद्रिगोत्रगिरिग्रावाचल

अतीतसंख्याविहितामसाग्निना
शिलीमुखाः खाण्डवमत्तुमिच्छता ।
अनादृतस्यामरसायकेष्वपि
स्थिता कथं शैलजनाशुगे धृतिः ॥ १० ॥

यदि प्रमाणीकृतमार्य्यचेष्टितं
किमित्यदोषेण तिरस्कृता वयम् ।
अयातपूर्व्वा परिवादगोचरं
सतां हि वाणी गुणमेव भाषते ॥ ११ ॥

शैलशिलोच्चयावित्यमरः । विमार्गणमन्वीक्षणं नयेन्याय्यः । अन्वीक्षणं विचयनं मार्गणं मृगणामृगणमित्यमरः । अत्र विषये आर्य्यजनातिलङ्घनं सज्जनव्यतिक्रमो न युक्तं । हि यस्मात् कारणात् सतामतिक्रमोऽपायमनर्थं दिशति ददाति ॥ ९ ॥

यदुक्तं हर्त्तुमर्हसीति तत्रोत्तरमाह । अतीतेति । खाण्डवं इन्द्रवनं अत्तुमभक्षयितुं इच्छता अग्निना समातीतसंख्या असंख्याः शिलीमुखाः शराः विहिताः दत्ताः खाण्डवदाहे अक्षयतूणीरदानमुक्तम्भारते । अतोऽमरसायकेष्वपि अनादृतस्य आदररहितस्य । भावे क्तः ततोमत्वा बहुव्रीहिः । सत कथं शैलजनाशुगे किरातबाणे धृतिरास्था स्थिता न कथञ्चिदित्यर्थः । अतोनापहारशङ्का कार्य्येत्यर्थः ॥ १० ॥

यदुक्तं स्मर्य्यते तनुभृतामित्यादिना सदाचारः प्रमाणमिति तत्रोत्तरमाह । यदीति । आर्य्यचेष्टितं सच्चरितम्प्रामाणीकृतं यदि साधुत्वेनाङ्गीकृतं यदित्यर्थः । तर्हि अदोषेण दोषाभावेऽपि ।

गुणापवादेन तदन्यरोपणा
द्भृशाधिरूढस्य समञ्जसञ्जनम् ।
द्विधेव कृत्वा हृदयन्निगूहतः
स्फुरन्नसाधोर्विवृणोति वागसिः ॥१२ ॥

क्वाचित्कसज्यप्रतिषेधेऽपि नञ्समासइति भाष्यकारः । उपलक्षणे तृतीया । वयञ्चिमिति तिरस्कृताः न युक्तमित्यर्थः । हि यस्मा त्परिवादगोचरम्परनिन्दास्पदं अयातपूर्व्वा सतां वाणी गुण मेव भाषते न दोषं अतस्ते मृषादोषभाषिणोन सदाचारप्रामाण्य बुद्धिरिति भावः । पूर्व्वं न यातेति अयातपूर्व्वा । सुप्सुपेतिसमासः । परत्वात्सर्व्वनाम्नोनिष्ठायाः पूर्व्वनिपातः स्त्रियाः पुंवदित्यादिना पुंवद्भावः पूर्व्वलिङ्गताच । अर्थान्तरन्यासः ॥ ११ ॥

नन्वप्रत्यक्षा परबुद्धिः कथं दुष्टेति निश्चीयते तत्राह । गुणेति । गुणापवादेन विद्यमानगुणापह्नवेन तदन्यरोपणात् तस्माद्गुणा दन्यस्य दोषस्याविद्यमानस्यैवारोपणाच्च समञ्जसञ्जनं सुजनं भृशाधिरूढस्य अतिमात्रमाक्रम्य स्थितस्याभिचिप्तस्येत्यर्थः । कर्त्तरि क्तः । निगूहतो हृदयं संवृण्वतोऽपि असाधोरनार्य्यस्य हृदयं कर्म्म स्फुरन् विलसन् वागेवासिः द्विधा कृत्वा भित्त्वेव विवृणोति । दुष्टया वाचैवैतत्पूर्व्विकायाः बुद्धेरपि दौष्ट्यमनुमीयत इति भावः । वागसिरित्यत्र रूपकं द्विधाकरणरूपकसाधकम् ॥ १२ ॥

यदुक्तमभ्यघानीति तत्रोत्तरमाह । वनेति । वनाश्रयाः अत एव मृगाः कस्य परिग्रहाः न कस्यापीत्यर्थः । किन्तु यस्तान्मृगा न्प्रसभेन बलात्कारेण शृणाति हिनस्ति । शॄ हिंसायामिति धातो

वनाश्रयाः कस्य मृगाः परिग्रहाः
शृणाति यस्तानसभेन तस्य ते।
प्रहीयतामत्र नृपेण मानिता
न मानिता चास्ति भवन्ति च श्रियः ॥१३॥
न वर्त्म कस्मैचिदपि प्रदीयता
मिति व्रतं मे विहितम्महर्षिणा।
जिघांसुरस्मान्निहतोमया मृगो
व्रताभिरक्षा हि सतामलङ्क्रिया ॥ १४ ॥

सेट्। ते मृगास्तस्य हन्तुः परिग्रहाः परिग्राह्याः हन्ता चाहमेवेति भावः। ननु ममायमित्यभिमानान्नृपस्य स्वत्वमित्याशङ्क्याह। अत्र मृगे नृपेण मानिता ममेत्यभिमानिता प्रहीयतान्त्यज्यतां कुत इत्याशङ्क्याह। नेति। मानिता चास्ति श्रियः स्वानि च भवन्तीति न किन्तु न भवन्त्येव सत्यामभिमानितायामित्यर्थः। अभिमानमात्रेण स्वत्वेऽतिप्रसङ्गादिति भावः॥ १३ ॥

यष्टुमिच्छसि पितॄनित्यादिना यन्निष्कारणमवधीरित्युपालब्धं तत्रोत्तरमाह। नेति। कस्मैचिदपि वर्त्म न प्रदीयतामिति एवंव्रतम्महर्षिणा व्यासेन मे मह्यं विहितमुपदिष्टमित्यर्थः। अस्मात्कारणात्। जिघांसुर्हन्तुमिच्छुरापतन् मृगोमया निहतः हि यस्मात् व्रताभिरक्षा सतामलङ्क्रिया न तु दोषः अतः आत्म रक्षणार्थमस्य वधो न निष्कारणमित्यर्थः॥ १४ ॥

दुर्वचन्तदित्यादिना यत् सञ्जातमन्धुत्वमुक्तन्तत्राचष्टे। मृगा निति। स्वमात्मैव हेतुस्तेन स्वहेतुना स्वार्थमित्यर्थः। सर्व्वनाम

मृगान्विनिघ्नन् मृगयुः स्वहेतुना
कृतोपकारः कथमिच्छतान्तपः ।
कृपेति चेदस्तु मृगः क्षतः क्षणा
दनेन पूर्व्वं न मयेति का गतिः ॥१५॥
अनायुधे सत्वजिघांसिते मुनौ
कृपेति वृत्तिर्म्महतामकृत्रिमा ।
शरासनं बिभ्रति सज्यसायकं
कृतानुकम्पः स कथम्प्रतीयते ॥१६॥

स्तृतीया चेति तृतीया। मृगान्विनिघ्नन् प्रहरन्। मृगान् यातीति मृगयुर्व्याधः । मृगयुर्व्याधश्चेत्यौणादिकोयुप्रत्ययान्तोनिपातः । व्याधोमृगवधाजीवोमृगयुर्लुब्धकोऽपि स इत्यमरः । तपइच्छता न्तपस्विनां कथं कृतोपकारोन कथञ्चिदित्यर्थः । अथ कृपेति चेत् व्याधस्यापीति शेषः। अस्तु किं शुष्ककलहेनेति भावः। परन्तु यदुक्तं निघ्नतः परनिबर्हितमित्यादिना तस्य प्रथमप्रहर्तृत्वन्तदयुक्त मित्याह। मृगः क्षणात्क्षतः आवाभ्यां युगपदेव विद्ध इत्यर्थः। एवं सति अनेन नृपेणैव पूर्व्वं हतोमया तु नेत्यत्र का गतिः किम्प्रमाण मौर्व्वापर्य्यस्य दुर्लक्ष्यत्वादिति भावः । तथा च त्रोडितव्यमि त्युपालम्भस्तस्यैव किन्न स्यादिति भावः॥ १५॥

पूर्व्वं कृपेति चेदस्त्वित्युक्तं सम्प्रति तदप्यसहमानआह । अनायुधइति । अनायुधे निरायुधे सत्त्वेन केनचित्प्राणिना जिघांसिते हन्तुमिष्टे । हन्तेः सन्नन्तात्कर्म्मणि क्तः । मुनौ विषये

अथो शरस्तेन मदर्थमुज्झितः
फलञ्च तस्य प्रतिकायसाधनम्।
अविचते तत्र मयात्मसात्कृते
कृतार्थता नन्वधिका चमूपतेः॥ १७ ॥

कृपेति वृत्तिर्व्यवहारो महतां महात्मनामकृत्रिमा अकपटा। सह ज्यया सज्यः सायकोयस्मिन् तच्छरासनन्धनुर्बिभर्त्ति दधति मयि स नृपः कथं कृतानुकम्पः मया प्रतीयते ज्ञायते। इणः कर्म्मणि लट्। अतमे कृपा विहिता न तु चमद्रत्यर्थः॥ १६ ॥

अथ कृपामभ्युपगम्याह। अथो इति। अथो प्रश्ने। मङ्गला नन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः। तेन नृपेण मदर्थं यथा तथा। अर्थेन सह नित्यसमासः। शरउज्झितस्त्यक्तस्तस्य फलञ्च प्रतिकायस्य प्रतिपक्षस्य साधनं बधः। साधनं निर्वृतौ मेढ्रे सैन्ये सिद्धौ बधे गताविति विश्वः। अविचते अखण्डिते तत्र तस्मिन् फले मया आत्मसात् कृते स्वाधीनीकृते सति। तदधीन वचनइति सातिप्रत्ययः। चमूपतेरधिका कृतार्थता साफल्यम्। ननु खलु। स्वायुधस्य परत्राणशत्रुवधपात्रप्रतिपादनार्थैक हेलया सिद्धेरित्यर्थः। तथाप्ययं शरलोभइति कृपालुतायामूला न्यपि निकृन्ततीति भावः॥ १७ ॥

मार्गणैरथ तव प्रयोजनमित्यादिना यदुक्तन्तद्विराचष्टे। यदिति। स नृपः कामं भवता याच्यतामिति यदात्थ मामिति शेषः। एतदनल्पचेतसां मनस्विनान्न चमं न युक्तं। कुतः प्रसह्य बलादाहरणैषिणामाहर्त्तुमिच्छूनां। चत्रियस्य विजितमिति

यदात्थ काममभवता स याच्यता
मिति क्षमं नैतदनल्पचेतसाम् ।
कथं प्रसह्याहरणैषिणां प्रियाः
परावनत्या मलिनीकृताः श्रियः ॥ १८ ॥
अभूतमासज्य विरुद्धमीहितं
बलादलभ्यं तव लिप्सते नृपः ।
विजानतोऽपि ह्यनयस्य रौद्रतां
भवत्यपाये परिमोहिनी मतिः ॥ १९ ॥

स्मरणादिति भावः । परावनत्या याञ्चादैन्येन मलिनीकृताः श्रियः कथं प्रियाः न कथञ्चिदित्यर्थः ॥ १८ ॥

अथ परेङ्गितमुद्घाट्य भयन्दर्शयति । अभूतमिति । तव नृपोऽभूतमनृतमासज्य मिथ्याभियुज्येत्यर्थः । युक्ते क्ष्मादावृते भूतमित्यमरः । अलभ्यं लब्धुमशक्यं विरुद्धं विपरीतफलकं ईहितं मनोरथं बलाल्लिप्सते लब्धुमिच्छति । नचैतच्चित्रमित्याह । हि यस्मात् अनयस्य दुर्नयस्य रौद्रतां भयङ्करत्वं विजानतोऽपि पुरुषस्य मतिर्बुद्धिरपाये विनाशकाले परिमोहिनी भवति । परिमुह्यतीति परिमोहिनी संपृचादिसूत्रेण ताच्छील्ये घिनुण प्रत्ययः । तथाचोक्तं विनिर्मितः केन न दृष्टपूर्वो हेमः कुरङ्गो न च कुत्र वार्त्ता । तथापि तृष्णा रघुनन्दनस्य विनाशकाले विपरीतबुद्धिरिति । तस्माद्विनाशकाले बलात् विपरीतबुद्धि र्भवतीति भावः ॥ १९ ॥

असिः शरा वर्म धनुश्च नोच्चकै-
र्विविच्य किम्प्रार्थितमीश्वरेण ते ।
अथास्ति शक्तिः कृतमेव याच्ञया
न दूषितः शक्तिमतां स्वयंग्रहः ॥ २० ॥
सखा स युक्तः कथितः कथन्त्वया
यदृच्छयाऽसूयति यस्तपस्यते ।
गुणार्ज्जनोच्छ्रायविरुद्धबुद्धयः
प्रकृत्यमित्रा हि सतामसाधवः ॥ २१ ॥

अथ सर्वथा लभ्यस्तु शरस्तर्हि किमनेन सुष्ठु विश्रब्धं याच्यतां शरोऽन्यद्वेत्याह । असिरिति । असिः खड्गः शराः वर्म कवचम् उच्चकैरुत्कृष्टं धनुश्च ते तव ईश्वरेण स्वामिना विविच्य एकैकशो विभज्य किं न प्रार्थितं न याचितं येन प्रयोजनन्तद्दास्यामीति भावः । नपुंसकैकशेषः । अथास्य वीराभिमानिनोन्तपस्य शक्तिरस्ति चेदिति शेषः । याच्ञया कृतमेव अलमेव साध्याभावाच्च याचितव्यमेवेत्यर्थः । गम्यमानक्रियापेक्षया करणत्वात्तृतीयेत्युक्तम्प्राक् । कृतमिति निषेधार्थमव्ययम् । यतः शक्तिमतां स्वयंग्रहः बलाद्ग्रहणञ्च दूषितः किन्तु भूषणमेव वीराणामिति भावः । क्षत्रियाणां प्रसह्य वित्ताहरणं न दूषितमिति भारतोक्तम् ॥ २० ॥

राघवप्लवगराजयोरिवेत्यादिनोपदिष्टं सख्यमत्याचष्टे । सखेति । स तपः कथन्त्वया युक्तो योग्यः सखा कथितः न कथञ्चित्कथनीय

वयं क्व वर्णाश्रमरक्षणोचिताः
क्व जातिहीना मृगजीवितच्छिदः ।
सहापकृष्टैर्म्महतां न सङ्गतं
भवन्ति गोमायुसखा न दन्तिनः ॥ २२ ॥

इत्यर्थः । कुतः येनृपः तपस्यते तपस्यते अनपराधिनइत्यर्थः । क्रुधद्रुहेत्यादिना सम्प्रदानत्वाच्चतुर्थी । यदृच्छया स्वैरवृत्त्या । यदृच्छा स्वैरितेत्यमरः । असूयति असूयाङ्करोति । असूया दोषारोपो गुणेष्वपीत्यमरः । प्रत्युत प्रचुरेवायमित्याह । हि यस्माद्गुणानामर्ज्जने यउत्कर्षः तस्य विरुद्धा विमुखा बुद्धिर्येषां ते तथा असाधवो दुष्टाः सतां सज्जनानां प्रकृत्यमित्राः प्रकृत्या शत्रवः । द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवइत्यमरः ॥ २१ ॥

हीनजातित्वात्सख्यानर्हः स इत्याह । वयमिति । वर्णाश्रमरक्षणोचिताः विशुद्धवृत्तयोवयं राजानः क्व । जातिहीना मृगजीवितच्छिदोहिंसाजीविनोव्याधाः क्व । फलितमाह । सहापकृष्टैरपकृष्टया जात्या वृत्त्या च निकृष्टैः सह महतामुत्कृष्टया जात्या वृत्त्या चोत्कृष्टानां सङ्गतं सख्यन्न घटते इति शेषः । तथाहि । दन्तिनो गजाः गोमायूनां शृगालानां सखायो गोमायुसखाः न भवन्ति । स्त्रियां शिवाभूरिमायगोमायुमृगधूर्त्तकाः । शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाइत्यमरः । अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ २२ ॥

परोऽवजानाति यदज्ञताजड
स्तदुन्नतानान्न विहन्ति धीरताम्।
समानवीर्य्यान्वयपौरुषेषु यः
करोत्यतिक्रान्तिमसौ तिरस्क्रिया ॥ २३ ॥
यदा विगृह्णाति हतन्तदा यशः
करोति मैत्रीमथ दूषितागुणाः।
स्थितिं समीक्ष्योभयथा परीक्षकः
करोत्यवज्ञोपहतम्पृथग्जनम् ॥ २४ ॥

नीचसख्यं कथमधिक्षिप्यतइति चेत्तत्राह। परइति। अज्ञता जडोमोहान्धः परोऽवजानाति यत्तदवज्ञानमुन्नतानां महता न्धीरतान्न विहन्ति न विकारञ्जनयतीत्यर्थः। क्रोष्टेव सिंहस्येति भावः। किन्तु समानानि तुल्यानि वीर्य्यान्वयपौरुषाणि शक्तिकुल विक्रमाः येषान्तेषु मध्ये। निर्द्धारणे सप्तमी। यः कश्चिदित्यर्थः अतिक्रान्तिमतिक्रमं करोति चेत् असौ सदृशजनातिक्रमः तिर स्क्रिया तिरस्कारः। यथा सिंहे सिंहस्येति भावः ॥ २३ ॥

तर्हि नीचे कीदृशी वृत्तिरित्याशङ्क्य सोपपत्तिकमाह। यदेति। यदा विगृह्णाति विरुणद्धि पृथग्जनेनेति शेषः। तदा यशोहतम्भवेत्। अथ मैत्रीं करोति तदा गुणादूषिताभवेयुरिति शेषः। इत्युभयथा स्थितिं समीक्ष्य प्रतर्क्य विमृश्य परीक्षकोविवेचकः पृथग्जनं नीचजनमवज्ञया अनादरेणोपहतन्तिरस्कृतङ्करोति उपेक्षत इत्यर्थः ॥ २४ ॥

मया मृगान् हन्तुरनेन हेतुना
विरुद्धमाक्षेपवचस्तितिक्षितम्।
शरार्थमेष्यत्यथ लप्स्यते गतिं
शिरोमणिं दृष्टिविषाज्जिघृक्षतः॥ २५ ॥

इतीरिताकूतमनीलवाजिन
ञ्जयाय दूतः प्रतितर्ज्य तेजसा।
ययौ समीपं ध्वजिनीमुपेयुषः
प्रसन्नरूपस्य विरूपचक्षुषः॥ २६ ॥

उपसंहरन्नाह। मयेति। अनेन हेतुना सन्धिविग्रहानर्हत्वेन कारणेन मया मृगान् हन्तुर्व्याधस्य सम्बन्धि। हन्तेस्तृन् प्रत्ययः अतएव न लोकेत्यादिना षष्ठीप्रतिषेधः। विरुद्धमतिपरुषं आक्षेप वचस्तिरस्कारवचनं तितिक्षितं सोढम्। ननु सख्यानङ्गीकारे बलात् शरं ग्रहीष्यतीत्याशङ्क्याह। शरेति। अथ शरार्थमेष्यति दृष्टौ विषं यस्य तस्मात् दृष्टिविषात्सर्पविशेषात् शिरोमणिञ्जिघृक्षतोग्रहीतु मिच्छतोगतिन्दशां लप्स्यते प्राप्स्यति॥ २५॥

इतीति। इतीत्थं ईरिताकूतमुक्ताभिप्रायमनीलवाजिनं श्वेताश्वं अर्ज्जुनं दूतोजयाय तेजसा प्रतापेन प्रतितर्ज्य अस्मान् जित्वा क गमिष्यसीति भीषयित्वेत्यर्थः। ध्वजिनीमुपेयुषः सेनासङ्गतस्य प्रसन्नरूपस्यार्ज्जुनम्प्रतीति शेषः। विरूपचक्षुषस्त्र्यम्बकस्य समीपं ययौ॥ २६॥

ततइति। ततः पताकिनीपतेः सेनापतेः अपवादेनादेशेन। अपवादोऽपि आदेशइति सज्जनः। निर्ह्रादवती शब्दवती महा

ततोपवादेन पताकिनीपते
श्चचाल निर्ह्रादवती महाचमूः ।
युगान्तवाताभिहतेव कुर्व्वती
निनादमम्भोनिधिवीचिसंहतिः ॥ २७ ॥

रणाय जैत्रः प्रदिशन्निव त्वरा
न्तरङ्गितालम्बितकेतुसन्ततिः ।
पुरोबलानां सघनाम्बुशीकरः
शनैः प्रतस्थे सुरभिः समीरणः ॥ २८ ॥

चमूः सेना । युगान्तवातैः अभिहता अतएव निनादं कुर्व्वती अम्भोनिधिवीचिसंहतिरर्णवोर्म्मिसमूह इव चचाल ॥ २७ ॥

रणायेति । जेतैव जैत्रो जयनशीलोऽनुकूल इत्यर्थः । जयते स्तृन्नन्तात्प्रज्ञादित्वात्स्वार्थेऽण्प्रत्ययः । तरङ्गितं सञ्जाततरङ्गं यथा तथा आलम्बिता अवस्थिताः केतुसन्ततयो येन सः सह घनैः सान्द्रैः अम्बुशीकरैः सघनाम्बुशीकरः सुरभिः समीरणो वायुः रणाय त्वराम्प्रदिशन्निव त्वरयन्निव बलानां सैन्यानाम्पुरोऽग्रे शनैः प्रतस्थे प्रस्थितः ववावित्यर्थः ॥ २८ ॥

जयेति । जयारवैर्वन्दिमागधजयेति शब्दैः क्ष्वेडितनादैः सिंहनादैश्च मूर्च्छितो वर्द्धितः शरासनज्यानामनुगुणानान्तलवारणानाञ्च ध्वनिः भूधरराजकुक्षिषु गिरिगुहासु असम्भवन् अमान् अवकाशमलभमान इत्यर्थः । अतएव गां भुवं प्रकम्पयन् । एतेन बलानां बाहुल्यमुक्तम् । दिशोऽवततारे व्यानशे । हतस्य संयोगादेर्गुणः । अत्र मूर्च्छापदार्थस्य विशेषणगत्या असम्भवनहेतुत्वा

जयारवक्ष्वेडितनादमूर्छितः
शरासनज्यातलवारणध्वनिः।
असम्भवन् भूधरराजकुक्षिषु
प्रकम्पयन् गामवतस्तरे दिशः ॥ २९ ॥
निशातरौद्रेषु विकाशताङ्गतैः
प्रदीपयद्भिः ककुभामिवान्तरम्।
वनेसदां हेतिषु भिन्नविग्रहै
र्विपुस्फुरे रश्मिमतो मरीचिभिः ॥ ३० ॥

त्काव्यलिङ्गं रूपकं तु गिरिकुक्षिरूपापेक्षया ध्वनेराधेयस्याधिक्यो क्तेरधिकालङ्कारश्चैतेभ्यश्चेयमसम्भवन्निति व्यञ्जकं विनोत्थाप्यमाना उपात्तमूर्छागुणनिमित्ता प्रतीयमाना क्रियोत्प्रेक्षा तैरङ्गाङ्गिभावेन सङ्कीर्य्यत इति सङ्क्षेपः ॥ २९ ॥

निशातेति। निशातास्तीक्ष्णाः अतएव रौद्राः भीषणाश्च ये तेषु निशातरौद्रेषु। विशेष्यविशेषणयोरन्यतरविशेष्यत्वविवक्षायाँ इष्टत्वाद्विशेषणसमासः। वने सीदन्तीति वनेसदां वनेचराणाम्। सत्सूद्विषेत्यादिना क्विप्। तत्पुरुषे कृति बहुलमित्यलुक्। हेतिष्वा युधेषु। हेतिः शस्त्रेऽपि पुंस्त्रियोरिति केशवः। भिन्नविग्रहैः सङ्क्रान्त मूर्त्तिभिः अतएव विकाशतां विस्तृतरताङ्गतैरतएव ककुभान्दिशा मन्तरम्प्रदीपयद्भिः प्रज्वालयद्भिरिव स्थितैरित्युत्प्रेक्षा। रश्मिमतः सूर्य्यस्य। मादुपधायाश्च मतोर्वोऽयवादिभ्य इति मतुपोमकारस्य न वकारः। मरीचिभिः करैः। भानुः करो मरीचिः स्त्रीपुंसयोरित्य मरः। विपुस्फुरे बभासे। स्फुरतेर्भावे लिट् ॥ ३० ॥

उदूढवक्षःस्थगितैकदिङ्मुखो
विकृष्टविस्फारितचापमण्डलः ।
वितत्य पक्षद्वयमायतम्बभौ
विभुर्गणानामुपरीव मध्यगः ॥ ३१ ॥
सुगेषु दुर्गेषु च तुल्यविक्रम
ज्जवादहम्पूर्व्विकया यियासुभिः ।
गणैरविच्छेदनिरुद्धमाबभौ
वनं निरुच्छासमिवाकुलाकुलम् ॥ ३२ ॥

उदूढेति । उदूढेनोन्नतेन वक्षसा स्थगितमाच्छादितमेकमेक तरन्दिङ्मुखं येन सः विकृष्टमाकृष्टमतएव विस्फारितं निर्घोषितं चापमण्डलं येन स विभुः शिवः आयतं विस्तृतम्पक्षद्वयम्पार्श्वद्वयं वितत्य स्वमहिम्ना व्याप्य। पक्षः साध्यगरुत्पार्श्वसहायबलभित्तिष्विति वैजयन्ती। गणानां मध्यगोमध्यस्थोऽपि उपरि स्थितइव बभौ। सर्व्वोन्नतत्वात्तथा लक्षितइत्यर्थः ॥ ३१ ॥

सुगेष्विति । सुखेन दुःखेन च गच्छन्त्येष्विति सुगेषु सुगमेषु दुर्गेषु दुर्गमेषु च समविषमदेशेष्वित्यर्थः । सुदुरो रधिकरणार्थे डोवक्तव्यः अतएव टिलोपः । तुल्यविक्रमैर्लाघवात् समसञ्चारैः। जवाद्दहम्पूर्व्विकया अहमहमिकया । अहम्पूर्व्व महम्पूर्व्वमित्यहंपूर्व्विका स्त्रियामित्यमरः । यियासुभिर्यातु मिच्छुभिः । यातेः सन्नन्तादुप्रत्ययः। गणैः प्रमथैः। मनोज्ञादित्वात् वुञ् प्रत्ययः पृषोदरादित्वात् वृद्ध्यभावः। गणाः प्रमथसङ्घौघा इति वैजयन्ती । अविच्छेदेन निरुद्धं अतएव आकुलाकुलं

तिरोहितश्वभ्रनिकुञ्जरोधसः
समश्रुवानाः सहसातिरिक्तताम्।
किरातसैन्यैरपिधाय रेचिता
भुवः क्षणन्निम्नतयेव भेजिरे ॥ ३३ ॥
पृथूरुपर्य्यस्तबृहल्लताततिं
र्जवानिलाघूर्णितशालचन्दना।
गणाधिपानाम्परितः प्रसारिणी
वनान्यवाञ्चीव चकार संहतिः ॥ ३४ ॥

लालुलप्रकारं। प्रकारे गुणवचनस्येति द्विर्भावः। वनं निरुच्छ्वासं निरुद्धप्राणमिव आबभावित्युत्प्रेक्षा ॥ ३२ ॥

तिरोहितेति। किरातसैन्यैस्तिरोहितानि छन्नानि श्वभ्रनिकुञ्जरोधांसि गर्त्तकुञ्जतटानि यासान्ताः अतएव भुवः प्रदेशाः सहसा अतिरिक्ततामुत्तानतां समश्रुवानाः आमुवत्यः। अपिधाय छाद्य रेचितारिक्तीकृताः भुवः क्षणं निम्नतया गाम्भीर्येण भेजिरे इव प्रापुरित्युत्प्रेक्षा। सैन्यैर्यभुवो व्याप्तास्ता उत्ताना: प्रतीयन्ते तैर्मुक्तास्ताएव निम्नाः प्रतीयन्ते इत्यर्थः ॥ ३३ ॥

पृथ्विति। पृथुभिर्विशालैरूरुभिः पर्य्यस्ताः क्षिप्ताः बृहत्योलता ततयोयया सा जवानिलेन वेगमारुतेन आघूर्णिताः भ्रमिताः शालाः सर्ज्जतरवश्चन्दनानि च यया सा। प्राकारवृक्षयोः शालः शालः सर्ज्जतरुः स्यादिति शाश्वतः। परितः सर्व्वत्र प्रसारिणी प्रसरणशीला गणाधिपानां संहतिस्समूहोवनान्यवाञ्चि न्युब्जानीव

ततः सदर्प्पं प्रतनुं तपस्यया
मदस्रुतिक्षाममिवैकवारणम् ।
परिज्वलन्तं निधनाय भूभृता
न्दहन्तमाशामिव जातवेदसम् ॥ २५ ॥

अनादरोपात्तधृतैकसायकं
जयेऽनुकूले सुहृदीव सस्पृहम् ।
शनैरपूर्णप्रतिकारपेलवे
निवेशयन्तं नयने बलाद्धौ ॥ २६ ॥

चकारेत्युत्प्रेक्षा । अवाञ्चति अधोभवति अवपूर्व्वादञ्चतेः क्विप् । स्यादवाङप्यधोमूख इत्यमरः ॥ २४ ॥

अथाष्टभिः श्लोकैरर्ज्जुनं विशिंषन गणानान्तदभियोगमाह । ततइत्यादि । ततः सदर्प्पं सगर्ब्बं सान्तःसारं तपस्यया तपश्चर्य्यया । तपस्यतेः क्यजन्तात् स्त्रियामप्रत्यये टाप् । प्रतनुं कृशं अतएव मदस्रुत्या मदक्षरणेन क्षामं कृशम् । क्षायोमइति निष्ठातकारस्य मकारः । एकवारणमेकाकिनङ्गजमिव स्थितमित्युपमा । पुन भूर्भृतां राज्ञान्निधनाय नाशाय परिज्वलन्तं तेजस्विनं अतएवाशा दिशोदहन्तं जातवेदसमग्निमिव स्थितमित्युपमालङ्कारः । कृपीटयोनि र्ज्वलनोजातवेदास्तनूनपादित्यमरः ॥ २५ ॥

अनादरेति । पुनश्च अनादरेण अवगणनया उपात्तोनिषङ्गा दुद्धृतोधृतश्चैकः सायकोयेन तन्तथानुकूले सुहृदीव जये सस्पृहं जयमिच्छन्तमित्यर्थः । पुनः अपर्णः न्यूनः प्रतिकारोबाणादरस्य

निषण्णमापत्प्रतिकारकारणे
शरासने धैर्य्य इवानपायिनि ।
अलङ्घनीयं प्रकृतावपि स्थित
न्निवातनिष्कम्पमिवापगापतिम् ॥ ३७ ॥
उपेयुषीं बिभ्रतमन्तकद्युति
म्बधाद्दूरे पतितस्य दंष्ट्रिणः ।
पुरः समावेशितसत्पशुं द्विजैः
पतिम्पशूनामिव हूतमध्वरे ॥ ३८ ॥

प्रत्यर्प्यणरूपोपायस्य सः अतएव पेलवोलघुस्तस्मिन्पूर्व्वप्रतिकार पेलवे बलोदधौ सेनासमुद्रे शनैरसम्भ्रमेण नयने दृष्टी निवेशयन्तं इति वीरस्वभावोक्तिः । बलमुदधिरिवेत्युपमितसमासः । पेष वासवाहनधिषु चेत्युदकस्योदादेशः ॥ ३६ ॥

निषण्णमिति । पुनस्तापदाम्प्रतीकारस्य कारण साधने अनपायिनि स्थिरे शरासने एवम्भूते धैर्य्यइव निषण्णं स्थितं प्रकृतौ स्वभावे स्थितमपि निर्व्विकारमपीत्यर्थः । अतएव अलङ्घनीयं अनतिक्रमणीयं अतएव निवातनिष्कम्पं वाताभावा न्निश्चलं । निवातावाश्रयावाताविव्यमरः । आपगापतिं समुद्रमिव स्थितम् ॥ ३७ ॥

उपेयुषीमिति । पुनस्त्वादूरे समीपे पतितस्य दंष्ट्रिणोवराहस्य । त्रीह्यादित्वादिनिप्रत्ययः । बधाद्धेतोरुपेयुषीमाप्तां अन्तकस्येव यमस्येव द्युतिस्तां बिभ्रतन्धारयन्तम् । तथा च द्विजैर्ब्राह्मणैरध्वरे

निजेन नीतं विजितान्यगौरवं
गभीरतां धैर्य्यगुणेन भूयसा ।
वनोदयेनेव घनोरुवीरुधा
समन्धकारीकृतमुत्तमाचलम् ॥ ३९ ॥
महर्षभस्कन्धमनूनकन्धरं
बृहच्छिलावप्रघनेन वक्षसा ।
समुज्जिहीर्षुं जगतीं महाभरां
महावराहं महतोऽर्णवादिव ॥ ४० ॥

यज्ञे । यज्ञः सवोऽध्वरो याग इत्यमरः । हुतभाग्हुतभुक् अग्ने समाविशितः स्थापितः सत्पशुर्यज्ञीयपशुर्यस्य तं पशूनां पतिं रुद्रमिव स्थितम् ॥ ३८ ॥

निजेनेति । पुनश्च निजेन नैसर्गिकेण भूयसा बहुलेन धैर्य्यमेव गुणस्तेन विजितमन्येषां गौरवङ्गाम्भीर्य्यं यस्मिन् कर्म्मणि तथा गभीरतां दुरवगाहत्वं नीतम् । अतएव घनाः सान्द्रा उरवश्च महत्यो वीरुधो लता यस्मिन् तेन घनोरुवीरुधा वनोदयेनारण्यप्रादुर्भावेन समन्धकारीकृतं दुरवगाहीकृतमुत्तमाचलमिव स्थितं समन्ततोऽन्धकारो यस्य सइति विग्रहः ॥ ३९ ॥

महर्षभेति । महर्षभस्य महावृषभस्य स्कन्धइव स्कन्धौ अंसौ यस्य तम् । उपमानपूर्व्वपदत्वादुत्तरस्कन्धलोपः । ऋषभो वृष इत्यमरः । स्कन्धोभुजशिरोंऽसोऽस्त्रीत्यमरः । अनूनकन्धरं स्थूलग्रीवम् । अथ ग्रीवायां शिरोधिः कन्धरेत्यपीत्यमरः ।

हरिन्मणिश्याममुदग्रविग्रह
म्प्रकाशमानम्परिभूय देहिनः ।
मनुष्यभावे पुरुषं पुरातनं
स्थितञ्जलादर्शइवांशुमालिनम् ॥ ४१ ॥
गुरुक्रियारम्भफलैरलङ्कृत
ङ्गतिम्प्रतापस्य जगत्प्रमाथिनः ।
गणाः समासेदुरनीलवाजिनं
तपात्यये तोयघनाघनाइव ॥ ४२ ॥

॥ कुलकम् ॥

बृहच्छिलावप्रं महाशिलातटन्तद्दृढेन कठिनेन वचसा उपलक्षितं। महाभरान्दुष्टैरतिभारवतीञ्जगतीं महीं समुज्जिहीर्षुन्दुष्टराजकार्ष्यवात्समुद्धर्त्तुमिच्छुम्। अतएव महतोर्ष्यवाज्जगतीं समुज्जिहीर्षुमुक्तविशेषणविशिष्टञ्च वराहमिव स्थितं। अर्थसाधर्म्यादियमुपमा न श्लेषः शब्दमात्रसाधर्म्येण तस्य विधानादिति रहस्यम् ॥ ४० ॥

हरिदिति । पुनश्च हरिन्मणिश्यामं मरकतमणिश्यामलं उदग्रविग्रहमुदारमूर्त्तिं देहिनः सत्वान्परिभूय प्रकाशमानं जलमेवादर्शोमुकुरस्तस्मिन् अंशुमालिनं सूर्य्यमिव मनुष्यभावे मनुष्यरूपे स्थितम्पुरातनम्पुरुषं योवदरीतपोवननिवासी नारायणसहचरोनरोनाम स एवायमित्यर्थः ॥ ४१ ॥

गुर्व्विति । गुरुभिः क्रियारम्भाणाम्फलैरलङ्कृतं सफलकर्म्मारम्भमित्यर्थः। जगत्प्रमाथिनः जगद्विजयिनः प्रतापस्य तेजसोगतिं

यथास्वमाशंसितविक्रमाः पुरा
मुनिप्रभावक्षततेजसः परे ।
ययुः क्षणादप्रतिपत्तिमूढतां
महानुभावः प्रतिहन्ति पौरुषम् ॥ ४३ ॥
ततः प्रजह्रे सममेव तत्र तै
रपेक्षितान्योन्यबलोपपत्तिभिः ।
महोदयानामपि सङ्घवृत्तितां
सहायसाध्याः प्रदिशन्ति सिद्धयः ॥ ४४ ॥

स्थानं गतोऽस्य बहूनामेकलक्ष्यत्वञ्च युज्यत इति सन्दर्भाभिप्रायः । पूर्व्वोक्तविशेषणविशिष्टमनीलवाजिनं श्वेताश्वं अर्ज्जुनङ्गणाः प्रमथा दयस्तपात्यये तोयघनाः तोयभरिता वार्षिकादय इत्यर्थः घनामेघा इव महाचलमिति शेषः । समासेदुरवापुरित्यर्थः ॥ ४२ ॥

यथास्वमिति । पुरा पूर्व्वं स्वस्वमनतिक्रम्य यथास्वमहमे वैनं जेष्यामीति आशंसिताः काङ्क्षिताः कथितावा विक्रमा यैस्ते परे शत्रवः मुनिप्रभावात् क्षततेजसो हतप्रभावाः सन्तः अप्रतिपत्ति मूढतां मोहान्धतां ययुः । तथाहि महानुभावोऽतिप्रतापः पौरुषं पुरुषस्य चेष्टितम्प्रतिहन्ति नाशयति ॥ ४३ ॥

ततइति । ततः एकैकस्याशक्तौ अपेक्षिता वाञ्छितान्योन्य बलोपपत्तिरन्योन्यशक्त्यवष्टम्भो यैस्तैस्तैः प्रमथैस्तत्रार्ज्जुने । क्रिया धारत्वात्सप्तमी । समं युगपदेव प्रजह्रे प्रहृतम् । भावे लिट् । तथा हि । सहायसाध्याः सिद्धयः कार्य्यसिद्धयोमहोदयाना

किरातसैन्यादुरुचापनोदिताः
समं समुत्पेतुरुपात्तरंहसः ।
महावनादुन्मनसः खगा इव
प्रवृत्तपत्रध्वनयः शिलीमुखाः ॥ ४५ ॥
गभीररन्ध्रेषु भृशं महीभृतः
प्रतिस्वनैरुन्नमितेन सानुषु ।
धनुर्निनादेन जवादुपेयुषा
विभिद्यमाना इव दध्वनुर्दिशः ॥ ४६ ॥

महानुभावानामपि । महत्त्वेन वृत्तिर्व्यापारो येषान्तेषाम्भावस्तत्ता तां महद्वृत्तितां सम्भूयकारितामदिशन्ति । अतोगणानामपि सम्भूय कारित्वं न दोषइति भावः ॥ ४४ ॥

किरातेति । उरुभिर्महद्भिश्चापैर्नोदिताः प्रक्षिप्ताः उपात्त रंहसः प्राप्तवेगाः प्रवृत्तपत्रध्वनयः सञ्जातपत्रस्वनाः शिलीमुखा बाणाः महावनादुन्मनसः क्वापि गन्तुमुत्सुकाः तथा उक्तविशेषण विशिष्टाश्च खगाः पक्षिणइव किरातसैन्यात्समं समन्तत उत्पेतुः ॥ ४५ ॥

गभीरेति । गभीररन्ध्रेषु गम्भीरगह्वरेषु महीभृतः सानुषु ये प्रतिस्वनास्तैर्भृशमुन्नमितेनोत्थापितेन दीर्घीकृतेन जवादुपेयुषा प्राप्तवता धनुषोनिनादेन दिशोविभिद्यमाना विदीर्य्यमाणाइव दध्वनुः ध्वनिञ्चक्रुः ॥ ४६ ॥

विधूनयन्तीति । भूरुहां गहनानि वनानि । अटव्यरण्यं विपिनङ्गहनं काननं वनमित्यमरः । विधूनयन्ती कम्पयन्ती

विधूनयन्ती गहनानि भूरुहां
स्तिरोहितोपान्तनभोदिगन्तरा ।
महीयसी वृष्टिरिवानिलेरिता
रवं वितेने गणमार्गणावलिः ॥ ४७ ॥

त्रयीमृतूनामनिलाशिनस्सतः
प्रयाति पोषं वपुषि प्रहृष्यतः ।
रणाय जिष्णोर्विदुषेव सत्वरं
घनत्वमीये शिथिलेन वर्म्मणा ॥ ४८ ॥

तिरोहितानि छादितानि उपान्तानि प्रान्तानि नभोऽन्तरीक्ष न्दिगन्तराणि च यया सा गणमार्गणावलिः प्रमथशरसंहति रनिलेन वायुना ईरिता प्रेरिता महीयसी वृष्टिरिव रवं वितेने विस्तारयामास ॥ ४७ ॥

त्रयीमिति । ऋतूनान्त्रयीं षण्मासान् । कालाध्वनोरत्यन्त संयोगे द्वितीया । अनिलाशिनोवायुभक्षकस्य कृशस्येत्यर्थः । सत स्तथापि रणाय रणङ्कर्त्तुम्प्रहृष्यतउत्सहमानस्य । क्रियार्थेत्यादिना चतुर्थी । जिष्णोरर्ज्जुनस्य वपुषि पोषं उपचयम्प्रयाति गच्छति सति शिथिलेन प्रथममिति शेषः । वर्म्मणा कवचेन विदुषेव अनन्तर करणीयज्ञानतेवेत्युत्प्रेक्षा । सत्वरं शीघ्रं घनत्वं दृढत्वमीये प्राप्तम् अन्यथानुपयोगादितिभावः । इणः कर्म्मणि लिट् ॥ ४८ ॥

पतत्स्विति । अस्तेषु रोदसी द्यावापृथिव्यौ । द्यावापृथिव्यौ रोदस्यावित्यमरः । समन्ततोवितत्य व्याप्य पतत्सु सत्सु धनुर्द्धूपतः

पतत्सु शस्त्रेषु वितत्य रोदसी
समन्ततस्तस्य धनुर्दुधूषतः ।
सरोषमुल्केव पपात भीषणा
बलेषु दृष्टिर्विनिपातशंसिनी ॥ ४९ ॥

दिशः समूहन्निव विक्षिपन्निव
प्रभां रवेराकुलयन्निवानिलम् ।
मुनिश्चचाल क्षयकालदारुणः
क्षितिं सशैलाञ्चलयन्निवेषुभिः ॥ ५० ॥

कम्पितुमिच्छतः आस्फालयत इत्यर्थः । धूञः सन्नन्तात् शतृप्रत्ययः । स्वरतिसूतिसूयतिधूञूदितो वेति विकल्पादिड्भावः । तस्यार्ज्जुनस्य सम्बन्धिनी भीषयत इति भीषणा । नन्द्यादित्वाल्ल्युः । विनिपातशंसिनी विनाशसूचिका दृष्टिरुल्काविशेषणा उल्केव बलेषु सरोषं यथा तथा पपात ॥ ४९ ॥

दिश इति । क्षयकालः कल्पान्तकाल इव । संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपीत्यमरः । दारुणो रौद्रः मुनिरर्ज्जुनः इषुभिर्बाणैर्दिशः समूहन्निवैकत्र समाहरन्निव अन्यथा तासामपारदर्शनन्न स्यादिति भावः । रवेः प्रभां विक्षिपन्निव अधः प्रक्षिपन्निव अन्यथा सा कथं न दृश्यत इति भावः । तथा अनिलं वायुं आकुलयन् इषुभिरन्तराले आघूर्णयन्निव तस्य तथा गतिविघाता दिति भावः । सशैलां क्षितिं चलयन्निव कम्पयन्निव तथा सङ्क्षोभा दिति भावः । चचाल गतिमकरोत् । सर्व्वत्र इवशब्द उत्प्रेक्षायाम् ॥ ५० ॥

विमुक्तमाशंसितशत्रुनिर्ज्जयै
रनेकमेकावसरं वनेचरैः ।
सनिर्ज्जघानायुधमन्तरा शरैः
क्रियाफलङ्काल इवातिपातितः ॥ ५१ ॥
गतैः परेषामविभावनीयता
न्निवारयद्भिर्व्विपदं विदूरगैः ।
भृशं बभूवोपचितो बृहत्फलैः
शरैरुपायैरिव पाण्डुनन्दनः ॥ ५२ ॥

विमुक्तमिति । आशंसितः कांक्षितः शत्रुनिर्जयो यैस्तैः । अह मह मिकया शत्रुं विजिगीषद्भिरित्यर्थः । वनेचरैरेकावसरं सम कालम् । अत्यन्तसंयोगे द्वितीया । विमुक्तं प्रयुक्तमनेकमायुधम् । जातावेकवचनम् । सोऽर्ज्जुनः क्रियाफलमतिपातितोऽतिक्रान्तः काल इव अतिक्रान्तकालस्य कर्म्मणो निष्फलत्वादिति भावः । अन्तरा मध्ये शरैर्निजघान ॥ ५१ ॥

गतैरिति । पाण्डुनन्दनोऽर्ज्जुनः परेषामविभावनीयतां लघु प्रयोगादन्यत्र गूढप्रयोगाच्चाद्दृश्यतां अप्रकाश्यतां च गतैः विपद मनर्थं निवारयद्भिर्विदूरगैर्दूरलक्ष्यगैः परमण्डलप्रविष्टैश्च बृह त्फलैरायताग्रैर्महालाभैश्च । फलम्बाणाग्रलाभयोरिति शाश्वतः । शरैरुपायैः सामादिभिरिव भृशमुपचितः प्रवृद्धो बभूव । अत्र शब्दमात्रसाधर्म्यात्प्रकृताप्रकृतश्लेषः । उपमेति केचित् ॥ ५२ ॥

दिवइति । शराः दिवोऽन्तरिक्षात्पृथिव्या भूगोलाद्वा ककुभां मण्डलाद्वा दिशांमण्डलाद्वा उत तिग्मतेजसोऽर्कस्य बिम्बान्मण्डलाद्वा ।

दिवः पृथिव्याः ककुभान्नु मण्डला
त्पतन्ति बिम्बादुत तिग्मतेजसः ।
सकृद्विकृष्टादथ कार्म्मकान्मुनेः
शराः शरीरादिति तेऽभिमेनिरे ॥ ५३ ॥
गणाधिपानामविधाय निर्गतैः
परासुताम्मर्म्मविदारणैरपि ।
जवादतीये हिमवानधोमुखैः
कृतापराधैरिव तस्य पत्त्रिभिः ॥ ५४ ॥

अथवा सकृद्विकृष्टात्कार्म्मुकाद्वा मुनेः शरीराद्वा पतन्तीति ते गणाः अभिमेनिरे अन्यथा कथममी विश्वमन्तर्द्धाय शराः सम्भाव्यन्तइति भावः । अत्र सर्व्वतः शरसम्पातदर्शनात्सम्भावनया पृथिव्यादीना मन्यतमस्यापादानत्वोत्प्रेचा । सा च प्रतीयमाना व्यञ्जकाप्रयोगात् । नुशब्दादयस्तु संशये ॥ ५३ ॥

गणेति । मर्म्मविदारणैरपि मर्म्मस्थानान्येव विदारयद्भिरपी त्यर्थः । गणाधिपानाम्परासुतां मरणमविधाय अकृत्वा निर्गतै स्तेषाममर्त्यत्वादिति भावः । तस्य मुनेः पत्त्रिभिः शरैः कृतापराधै रिव स्वामिकार्य्याकरणात्सापराधैरिवेत्युत्प्रेचा । अधोमुखैः सद्भि र्जवात् हिमवान् अतीये अतिचक्रमे तत्र प्रविष्टमित्यर्थः लज्जितस्य क्वचिन्निलयनमुचितमिति भावः ॥ ५४ ॥

द्विषामिति । प्रथमे प्रथममुक्तादित्यर्थः । शिलीमुखाः मुनिशराः द्विषान्देहावरणानि वर्म्माणि विभिद्य याः चतीः प्रहारान्

द्विषां क्षतीर्य्याः प्रथमे शिलीमुखाः
विभिद्य देहावरणानि चक्रिरे।
न तासु पेते विशिखैः पुनर्मुने
ररुन्तुदत्वम्महतां ह्यगोचरः॥ ५५॥
समुज्झिता यावदराति निर्य्यती
सहैव चापान्मुनिबाणसंहतिः।
प्रभा हिमांशोरिव पङ्कजावलि
न्निनाय सङ्कोचमुमापतेश्चमूम् ॥ ५६ ॥

चक्रिरे तासु क्षतिषु पुनः पश्चात्प्रयुक्तैर्मुनेर्व्विशिखैर्न पेते न पतितं पिष्टपेषणदोषापातादिति भावः। तथाहि अरुन्तुदत्वं पीडितपीडनं सतामगोचरोहि। सन्तः पीडितपीडां न कुर्व्वन्ती त्यर्थः। न हन्याद्व्यसनप्राप्तं नार्त्तं नातिपरिक्षतमिति निषेध स्मरणादिति भावः। अरुर्व्रणन्तुदतीति अरुन्तुदः। व्रणो स्त्रियामीर्म्ममरुरित्यमरः। विध्वरुषोस्तुद इति खश्प्रत्ययः अरु र्द्विषदजन्तस्य मुमिति मुमागमः॥ ५५ ॥

समुज्झितेति। यावन्तोऽरातयोयावदराति यावदवधारण इत्यव्ययीभावः। यावदराति यथा तथा समुज्झिताअरातिसम सङ्ख्यया मुक्ता मुनिचापात् सह सम्भूयैव निर्य्यती निष्क्रामन्ती तादृक् तस्य कौशलमिति भावः। याते: शतरि ङीप्। मुनि बाणसंहतिरुमापतेश्चमूं हिमांशोः प्रभा पङ्कजावलिमिव सङ्कोचं निनाय प्रापयामास। दुहादिपाठान्नयतिर्द्विकर्म्मकः॥ ५६ ॥

अजिह्ममोजिष्ठममोघमक्लमं
क्रियासु बह्वीषु पृथङ्नियोजितम् ।
प्रसेहिरे सादयितुन्न सादिताः
शरौघमुत्साहमिवास्य विद्विषः ॥ ५७ ॥

शिवध्वजिन्यः प्रतियोधमग्रतः
स्फुरन्तमुग्रेषुमयूखमालिनम् ।
तमेकदेशस्थमनेकदेशगा
निदध्युरर्कं युगपत्प्रजा इव ॥ ५८ ॥

अजिह्ममिति। अजिह्मं स्वरूपतोगत्या वा अवक्रम्। अन्यत्र तु जिह्मस्यानप्रवृत्तोन भवतीत्यजिह्मत्वम्। ओजिष्ठमोजस्विनं सारवत्तमन्तेजिष्ठं च। उभयत्रापि ओजस्विशब्दाद्विन्यन्तादिष्ठन् विन्मतोर्लुगिति लुक् टिलोपश्च। अमोघमवन्ध्यं अक्लमन्निरन्तर व्यापारेऽप्यश्रान्तं बह्वीषु क्रियासु छेदनभेदनपातनादिकर्म्मसु पृथग्भेदेन नियोजितं कर्म्मानुगुण्येन विनियुक्तमित्यर्थः। अस्य मुनेः शरौघं उत्साहमौत्सुक्यमिव वीरस्थायिभावभूतमध्यवसायविशेष मिवेत्यर्थः। सादिताः कर्षिताः विद्विषः शत्रवः सादयितुमतिकर्त्तुं न प्रसेहिरे न शेकुः। तस्योत्साहवदेव शरवर्षं दुर्द्धर्षमभूदिति भावः ॥ ५७ ॥

शिवेति। अनेकदेशगानानादेशस्थाः शिवध्वजिन्योहरसेनाः। उग्रेषवोमयूखाइवेत्युपमितसमासः। अन्यत्र तूग्रेषवइव मयूखा इति मयूरव्यंसकादित्वात्समासः। तेषां मालास्यास्तीति तमग्रेषु

मुनेः शरौघेण तदुग्ररंहसा
बलम्प्रकोपादिव विष्वगायता।
विधूनितं भ्रान्तिमियाय सङ्गिनीं
महानिलेनेव निदाघजं रजः ॥ ५९ ॥
तपोबलेनैष विधाय भूयसी
स्तनूरदृश्याः स्विदिषून्निरस्यति।
अमुष्य मायाविहतं निहन्ति नः
प्रतीपमागत्य किमु स्वमायुधम् ॥ ६० ॥

मयूखमालिनं। श्रीह्यादित्यादिनिः। एकदेशस्थमेकत्रैव स्थितं मुनिं अर्कमजाद्दव युगपत्प्रतियोधं योधं योधमति। अव्ययं विभक्तीत्यादिना प्रत्यर्थे वीप्सायामव्ययीभावः। अग्रतःस्फुरन्तन्निदध्युः ददृशुः। यथैकोऽर्कएकत्रैव स्थितोऽपि नानादेशस्थाना मपि प्रतिपुरुषममैवाग्रे वर्त्ततइति युगपत्प्रतीयते तद्वद्वाणवर्षी मुनिरपि प्रतियोधन्तथैव प्रत्यभादित्यर्थः ॥ ५८ ॥

मुनेरिति। प्रकोपादमर्षादिव विष्वक्समन्तात् आयता आगच्छता उग्ररंहसा तीव्रवेगेन मुनेः शरौघेण उक्तविशेषणेन महानिलेन वात्यया निदाघजं ग्रीष्मोत्थं रजइव विधूनितं व्याहतन्तद्दल प्रमथानां सैन्यं सङ्गिनीमनुबन्धिनीमविच्छिन्नामिति यावत् भ्रान्ति मनवस्थानमियाय प्राप ॥ ५९ ॥

अथ त्रिभिर्विशेषकमाह। तपइत्यादि। एषमुनिः तपो बलेन तपःसामर्थ्येन भूयसीर्बह्वीरदृश्यास्तनूरात्मनः शरीराणि

हृता गुणैरस्य भयेन वा मुने
स्तिरोहिताः स्वित् प्रहरन्ति देवताः ।
कथं न्वमी सन्ततमस्य सायका
भवन्त्यनेके जलधेरिवोर्म्मयः ॥ ६१ ॥

विधाय रक्षा इषून्निरस्यति स्वित् क्षिपति किं अथ वा अमुष्य अस्य मुनेर्मायया विहतं प्रतिहतं स्वं स्वकीयमिवायुधं प्रतीपं प्रतिकूल मागत्य प्रत्यावृत्येत्यर्थः नोऽस्माकं निहन्ति किमु । जासि निप्रहणेत्यादिसूत्रेण कर्म्मणि षष्ठी शेषाविवक्षायान्तु द्वितीया ॥ ६० ॥

हृतादृति । यद्वा अस्य मुनेर्गुणैः शान्त्यादिभिर्हृता आकृष्टाः भयेन दरेण वा । भयाद्विभ्यत्य एवेत्यर्थः । देवतास्तिरोहिताः सत्यः प्रहरन्ति स्वित् । तत्कुतः । अन्यथा अस्य मुनेरमी सायकाः जलधेरूर्म्मयइव कथं नु सन्ततमनेके असङ्ख्याः भवन्ति । एतच्चोद्यमन्यसपक्षसम्भवेन न सम्भवतीत्यर्थः । एक शब्दस्य एकशेषे कृते एकइति रूपमिति केचित् । नुशब्दस्त्वन्यार्थे ॥ ६१ ॥

जयेनेति । कच्चिदयं रणाज्जयेन विरमेत् । अस्मान् जित्वा कच्चिदयं युद्धं उपसंहरेदित्यर्थः । अपि चराचराय स्वस्ति भवेत् कच्चित् स्थावरजङ्गमञ्जगन्न विनश्येदित्यर्थः । कच्चिदपीह सम्भावनायां । प्रार्थनायां लिङ् । इति प्रतर्क्काकुलिता पूर्व्वोक्ताये प्रतर्क्कास्तैराकुलिताविक्लवा । अत्र सहेतुकं विशेषणमाह ।

जयेन कच्चिद्विरमेदयं रणा
द्भवेदपि स्वस्ति चराचराय वा।
तताप कीर्णा नृपसूनुमार्गणै
रिति प्रतर्क्काकुलिता पताकिनी ॥ ६२ ॥
अमर्षिणा कृत्यमिव क्षमाश्रयं
मदोद्धतेनेव हितम्प्रियं वचः।
बलीयसा तद्विधिनेव पौरुषं
बलन्निरस्तं न रराज जिष्णुना ॥ ६३ ॥

नृपसूनुमार्गणैरर्ज्जुनबाणैः कीर्णा क्षिप्ता पताकिनी ततापं तापम्
आप ॥ ६२ ॥

अमर्षिणेति। जिष्णुना निरस्तं बलं न रराज। किमिव
केन क्षमाश्रयं कृत्यं कार्य्यं अमर्षिणेव। क्षमासाध्यं हि कृत्यं
सामर्षैर्न्निरस्यते तच्च निरस्तन्न शोभते। मदोद्धतेन च पंसा हितः
प्रियवचनमिव। मदः पौरुषादिधर्म्मः तेन उद्धतोऽवलिप्तस्तेना
बलीयसा च विधिना दैवेन पौरुषमिव। बलीयसा दैवेन प्रतिहत
पुरुषव्यापारस्य नैष्फल्यादिति भावः॥ ६३ ॥

प्रतिदिशमिति। प्लवगानामधिपोऽधीशोलक्ष्म यस्य तेन
वानरचिह्नेन। कपिप्लवङ्गप्लवग इति चिह्नं लक्ष्म च लक्षणमिति
चामरः। विशिखसंहतितापितमूर्त्तिभिरिति। विशिखाबाणास्तेषां
संहतयः समूहाः। स्त्रियान्तु संहतिर्वृन्दमित्यमरः। ताभिः
तापिताः पीडितामूर्तयोदेहाः येषान्तैस्तथाभूतैः शरनिकर

प्रतिदिशं प्लवगाधिपलक्ष्मणा
विशिखसंहतितापितमूर्त्तिभिः ।
रविकरग्लपितैरिव वारिभिः
शिवबलैः परिमण्डलता दधे ॥ ६४ ॥

प्रविततशरजालच्छन्नविश्वान्तराले
विधुवति धनुराविर्मण्डलं पाण्डुसूनौ ।
कथमपि जयलक्ष्मीर्भीतभीता विहातुं
विषमनयनसेनापक्षपातं विषेहे ॥ ६५ ॥

कर्त्तितकलेवरैरित्यर्थः । शिवबलैः प्रमथसैन्यैः कर्त्तृभिः रविकरेण ग्लपितैस्तप्तैर्वारिभिरुदकैरिव प्रतिदिशं दिक्षु परिमण्डलता परितश्चक्राकारमण्डलतेति यावत् । दधे अधारि प्रतदिशं मण्डलाकारेण स्थितमित्यर्थः । धाञः कर्म्मणि लिट् । आतपतप्तं हि नीरम्परि भ्रमति तद्वन्मुनिपीडितं सैन्यं बभ्रामेत्यर्थः । द्रुत विलम्बितंछन्दः । द्रुतविलम्बितमाह नभौ भराविति लक्षणात् ॥ ६४॥

प्रविततेति । प्रविततानि विस्तृतानि शरजालानि तैश्छन्न माच्छादितं विश्वान्तरालं येन तस्मिन् शरपूरितब्रह्माण्डोदरे पाण्डुसूनौ आविर्म्मण्डलं आविर्भूतमण्डलन्धनुः आविर्भूतं मण्डलं यस्य धनुष इति वृत्तौ भूतार्थस्यानुप्रवेशाद्भूतशब्दस्याप्रयोगः । विधुवति कम्पयति आस्फालयति सति भीतभीतेव भीतप्रकारेव जयलक्ष्मीर्विजयश्रीः कथमपि केनचित् प्रकारेण विषमनयनसेनां पक्षपातं विहातुन्त्यक्तुं विषेहे शशाकेत्यर्थः ॥ ६५ ॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये अर्ज्जुनाभिगमनोनाम चतुर्द्दशस्सर्ग्गः ॥ १४ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां चतुर्द्दशस्सर्ग्गः ॥ १४ ॥

अथ भूतानि वार्त्रघ्नशरेभ्यस्तत्र तत्रसुः ।
भेजे दिशः परित्यक्तमहेष्वासा च सा चमूः ॥ १ ॥
अपश्यद्भिरिवेशानं रणान्निववृते गणैः ।
मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितम्मनः ॥ २ ॥

अथेति । अथानन्तरन्तत्र रणे भूतानि सर्व्वप्राणिनः वृत्रं हतवानिति वृत्रहा इन्द्रः । ब्रह्मभ्रूणवृत्रेषु क्विप् । तस्यापत्यं पुमान्वार्त्रघ्नोऽर्ज्जुनः । तस्यापत्यमित्यण्प्रत्ययः । तस्य शरेभ्यः तत्रसुः बिभ्युः । वा जॄभ्रमुत्रसामिति विकल्पादेत्वाभ्यासलोपा भावः । सा चमूश्च इषवोऽस्यन्ते एभिरितीष्वासाः धनूंषि । धनुश्चापोऽस्त्रमिष्वासइति हेमचन्द्रः । अकर्त्तरि च कारके संज्ञायामिति करणे घञ् । परित्यक्तामहान्तइष्वासाः यया सा परित्यक्तायुधेत्यर्थः । दिशोभेजे पलायाञ्चक्रे इत्यर्थः । अत्र भूतत्रासनेनापलायनयोस्समुच्चयकथनाद्भिन्नविषयः क्रियासमुच्चयोऽलङ्कारः । गुणक्रियायौगपद्यं समुच्चयइति सामान्यलक्षणन्तस्य यमकेन संसृष्टिः ॥ १ ॥

अपश्यद्भिरिति । गणैः प्रमथैः ईशानं स्वामिनं शिवं पुरोवर्त्तिनमिति भावः । अपश्यद्भिरिव रणान्निववृते निवृत्तम् । भावे लिट् । तथा हि कृच्छ्रेष्वापत्सु संभ्रमेण साध्वसेन ज्वलितन्तप्तं । संभ्रमः साध्वसेऽपि स्यादिति विश्वः । मनोमुह्यत्येव अतः पुरोवर्त्तिनोऽप्यदर्शनमुपपद्यतइति भावः ॥ २ ॥

खण्डितेति । खण्डिता ध्वस्ता आशंसा जयाशा यस्यास्तया तेषाङ्गणानां सम्बन्धिन्या तयातिसन्निकृष्टयेत्यर्थः । पराङ्मुखतया

खण्डितांशंसया तेषाम्पराङ्मुखतया तया ।
आविवेश कृपा केतौ कृतोच्चैर्वानरन्नरम् ॥ ३ ॥
आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु ।
व्यक्तिमायाति महताम्माहात्म्यमनुकम्पया ॥ ४ ॥
स सासिः सासुसूः सासो येयायेयाययाययः ।
ललौ लीलां ललोऽलोलः शशीशशिशुशीः शशन् ॥ ५ ॥

॥ एकाक्षरपादः ॥

रणवैमुख्येन पलायनेनेत्यर्थः । केतौ ध्वजे कृतः आरोपितः उच्चैरुन्नतोवानरोहनूमान् येन तन्नरं पुरुषङ्कपिध्वजमित्यर्थः । कृपा करुणा आविवेश । तदीयदुर्द्दशां दृष्ट्वा स कृपाविष्टोऽभूदि त्यर्थः । यमकालङ्कारः ॥ ३ ॥

ननु शत्रुषु कथङ्करुणा तत्राह । आस्थामिति । आस्थां यत्नं आलम्ब्य । आस्था त्वालम्बनास्थानयत्नापेक्षासु कथ्यतइति विश्वः । वशन्नीतेषु क्षुद्रेषु दुष्टेष्वरातिषु शत्रुषु विषये अनुकम्पया कृपया महतां वीराणां माहात्म्यं महानुभावत्वं व्यक्तिं स्फुटतामायाति प्राप्नोति । स्वपौरुषनिर्ज्जितेष्वरातिषु अपि करुणा भूषणमेव महतामिति भावः ॥ ४ ॥

स सासिरिति । सहासिना वर्त्तमानः सासिः सखड्गः असून् सुवन्ति प्रेरयन्तीति असुसुवोबाणाः । षु प्रेरणे इतिधातोः सत्सू द्विषेत्यादिना क्विप् । असुसूभिः सह वर्त्ततइति सासुसूः सबाणः । अस्यन्ते क्षिप्यन्ते शरा अनेनेति आसःधनुः । अकर्त्तरि च कारके संज्ञायामिति घञ् । आसेन सह वर्त्ततइति सासः सचापः ।

त्रासजिह्मं यतश्चैतान्मन्दमेवान्वियाय सः।
नातिपीडयितुम्भग्नानिच्छन्ति हि महौजसः॥ ६ ॥

सर्व्वत्र तेन सहेति तुल्ययोगइति बहुव्रीहिः। येयाः यातव्याः यानसाध्याः। अयेयाः अयातव्याः यानं विनैव साध्याः। अचोयदिति यत्प्रत्ययः। येयाश्च अयेयाश्च येयायेयाः तेषां द्वयानां आये स्वर्गजादिलाभे याति प्राप्नोतीति येयायेयाययः अयः शुभावहदैवं यातीत्यययः। येयायेयाययश्चासौ अययश्चेति येयायेयाययाययः। याधातोरुभयत्रापि आतोऽनुपसर्गे क इति कप्रत्ययः। अतोललति विलसतीति ललः। ललविलासे पचाद्यच्। अलोलोऽचपलः शशिनः ईशः शिवः तस्य शिशुः स्कन्दः तं शृणाति हिनस्तीति शशीशशिशुशीः क्विप्। शशन् प्लुतगतिं कुर्व्वन्। शश प्लुतगताविति धातोः शतृप्रत्ययः। सोऽर्ज्जुनोलीलां शोभां ललौ प्राप। लाआदाने कर्त्तरि लिट्। एकाचरपादः॥ ५॥

त्रासेति। सोऽर्ज्जुनः त्रासजिह्मम्भयक्लिष्टं यथा तथा यतो गच्छतः पलायमानानित्यर्थः। एतान् गणान् मन्दमेवान्वियाय अनुजगाम। तथाहि महौजसोमहानुभावाः भग्नानतिपीडयितुन्नेच्छन्ति॥ ६॥

अथेति। अथाग्रे बलानामित्यर्थः। हसता तद्भङ्गदर्शनात् स्मयमानेन साचिस्थितेन तन्निवारणाय तिर्य्यग्व्यवस्थितेन। तिर्य्यगर्थे साचि तिरइत्यमरः। स्थिरकीर्त्तिना क्षयमभङ्गत्वादिति भावः। किञ्चिद्दीर्घदायस्तं खिन्नं चेतोयस्य तेन स्वकीय

अथाग्रे हसता साचिस्थितेन स्थिरकीर्त्तिना ।
सेनान्या ते जगदिरे किञ्चिदायस्तचेतसा ॥ ७ ॥

॥ निरौष्ठ्यम् ॥

मा विहासिष्ट समरं समरन्तव्यसंयतः ।
क्षतं क्षुण्णासुरगणैरगणैरिव किं यशः ॥ ८ ॥

॥ पादान्तादियमकम् ॥

विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः ।
अमी वोमोघमुद्गूर्णा हसन्तीव महासयः ॥ ९ ॥

गणभङ्गादीषत्खिन्नचित्तेन सेनान्या स्कन्देन । पार्व्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहइत्यमरः । ते गणाः प्रमथादयोजगदिरे उक्ताः । ओष्ठ्यवर्णाभावात् निरौष्ठ्यमेतत् ॥ ७ ॥

अथैकविंशतिश्लोकैः स्कन्दवाक्यमेवाह । मा विहासिष्टेत्यादि । रन्तव्यं रमणं क्रीडा । बहुलग्रहणाद्भावे तव्यप्रत्ययः । संयद् युद्धं । समुदायः स्त्रियां सय्यंत्समित्याजिसमिद्युधइत्यमरः । समे रन्तव्यसंयती येषान्ते समरन्तव्यसंयतः तुल्यक्रीडासङ्गरा इतितेषां सम्बोधनम् । यूयं समरं सङ्ग्रामं मा विहासिष्ट न त्यजत । जहातेर्माङि लुङ् मध्यमबहुवचनम् । क्षुण्णाः पराजिताअसुरगणाः यैस्तैर्भवद्भिरिति शेषः । अगणैरिव गणेभ्यो ऽन्यैरिव किं किमर्थं यशः क्षतं नाशितन्नैतद्युक्तं महाशूराणां भवादृशानामित्यर्थः ॥ ८ ॥

विवस्वदिति । विवस्वदंशुसंश्लेषेण सूर्य्यकिरणसम्पर्केण द्विगुणीकृतानि तेजांसि येषान्ते तथोक्ताः मोघं व्यर्थं उद्गूर्णाः उद्यताः ।

वनेऽवने वनसदां मार्ग्गम्मार्ग्गमुपेयुषाम्।
वाणैर्वाणैः समासक्तं शङ्केऽशङ्केन शाम्यति ॥ १० ॥

॥ पादादियमकम् ॥

पातितोत्तुङ्गमाहात्म्यैः संहृतायतकीर्त्तिभिः।
गुर्व्वी कामापदं हन्तुं कृतमावृत्तिसाहसम् ॥ ११ ॥

गुरीउद्यमने इति धातोः कर्म्मणि क्तः। वोयुष्माकममी महाशयः खड्गाः हसन्तीवेत्युत्प्रेक्षा। किम्पलायमानानां खड्गैरिति हासः॥ ९॥

वनइति। वनसदां वनेचराणां अवने रक्षके वने मार्ग्गं मृग सम्बन्धिनं मार्गं पन्थानंउपेयुषां पलायमानानामित्यर्थः। युष्माक मिति शेषः। वाणाध्वनिरेषामस्तीति तैर्वाणैर्ध्वनियुक्तैः। वण संशब्दने इतिधातोर्घञ् ततोऽर्शआदिभ्यइत्यच्प्रत्ययः। यमक त्वात् ववयोरभेदः। उक्तञ्च। रलयोर्डलयोस्तद्वज्जययोर्ब्बवयो रपि। शसयोर्म्मनयोश्चान्ते सविसर्गाविसर्गयोः। सविन्दुका विन्दुकयोः स्यादभेदेन कल्पनमिति। वाणैः शरैः समासक्तं समासञ्जितं अशं दुःखन्तत्केन शाम्यतीति शङ्के केनोपायेन शाम्येदिति विचारयामीत्यर्थः॥ १०॥

पातितेति। पातितं उत्तुङ्गमाहात्म्यं उन्नतभावोयैस्तैः संहृताः आहृताआयताः विस्तृताः कीर्त्तयोयैस्तैर्युष्माभिरिति शेषः। कां गुर्व्वीं आपदं हन्तुन्न काञ्चिदपीत्यर्थः। आवृत्तिः युद्धान्निवृत्तिः सैव साहसं कृतंअतः पापादन्यन्न किञ्चित् फलमस्तीति भावः। तदुक्तम्मनुना। यस्तु भीतः परावृत्तः सङ्ग्रामे हन्यते परैः। भर्त्तुर्यद्दुष्कृतं किञ्चित्तत्सर्व्वं प्रतिपद्यते। यच्चास्य सुकृतं किञ्चि

॥ गोमुत्रिकाबन्धः ॥

ना सु रो यं न वा ना गो ध र सं स्थो न रा क्ष सः ।
ना सु खो यं न वा भो गो ध र णि स्थो हि रा ज सः
॥ १२ ॥

मन्दमस्यन्निषुलतां घृणया मुनिरेष वः ।
प्रणुदत्यागतावज्ञं जघनेषु पशूनिव ॥ १३ ॥

दमुत्रार्थमुपार्जितम् । भर्त्ता तत्सर्व्वमादत्ते पराधत्तदतस्य तु इति ॥ ११ ॥

नेति । किञ्च अयमसुरो दैत्यो न नागो गजो वा पन्नगश्च न । धरसंस्थः पर्व्वताकारः । आहार्य्यधरपर्व्वता इत्यमरः । संस्था व्यवस्था प्रणिधिस्थितिसाकारमृत्युष्विति वैजयन्ती । राक्षसो न किन्त्वयं सुखयतीति सुखः सुखसाध्य इत्यर्थः । नवाभोगोऽभिनवप्रयत्नो महोत्साह इत्यर्थः । आभोगो वरुणच्छत्रे पूर्णतायत्नयोरपीति विश्वः । धरणिस्थो भूतलचारी राजसो रजोगुणप्रधानो ना पुरुषो हि कश्चिन्मानुष इत्यर्थः । पुरुषाः पूरुषा नरः । मनुष्या मानुषा मर्त्त्या मनुजा मानवा नरा इत्यमरः । अतो न पलायनमुचितमिति भावः । गोमूत्रिकाबन्धः । वर्णानामेकरूपत्वं यद्येकान्तरमर्द्धयोः । गोमुत्रिकेति तत्प्राहुः दुष्करन्तद्विदो विदुरिति लक्षणात् । षोडश कोष्ठद्वये अर्द्धद्वयं क्रमेण विलिख्यैकान्तरविनियमेन वाचने श्लोकनिष्पत्तिरित्युद्धारः ॥ १२ ॥

मन्दमिति । एष मुनिः घृणया कृपया इषुं लतां शाखामिव मन्दमस्यन् क्षिपन् वो युष्मान् पशूनिव आगतावज्ञं यथा तथा

न नोननुन्नोनुन्नोनो नाना नानानना ननु ।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ॥ १४ ॥
एकाक्षरः ॥

जघनेषु प्रणुदति चोदयति किमतः परं कष्टमस्तीति भावः ॥ १३ ॥

नेति । पदच्छेदस्तावत् । न ना ऊननुन्नः नुन्नोनः ना अना नानाननाः ननु नुन्नः अनुन्नः ननुन्नेनः ना अनेनाः नुन्ननुन्ननुत् । अथ योजना । हे नानाननाः नानाप्रकाराणि आननानि येषां ते नानाविधास्ता इत्यर्थः । ऊनेन निकृष्टेन नुन्नो विद्ध ऊननुन्नः यः सः ना न पुरुषेण । तथा नुन्नः ऊनो येन स नुन्नोनः ना पुरुषः अना ननु अपुरुषः खलु । ऊनाद्भीतः पलायमानस्तु किं वक्तव्य मिति भावः । किञ्च नुन्नः इनः स्वामी यस्य स नुन्नेनः स न भवतीति ननुन्नेनः । नञर्थस्य नशब्दस्य सुप्सुपेति समासः । स नुन्नो विद्धोऽप्यनुन्नोऽविद्ध एव यूयमनुन्नस्वामिकत्वादनुन्ना एवेति भावः । तथा नुन्ननुन्ननुदतिशयेन नुन्नान्नुन्ननुन्नान् नुदतीति नुन्न नुन्ननुत् अतिपीडितपीडकः ना पुरुषः अनेनाः निर्दोषेण भवतीति किन्तु सदोष एवेति नात्र्नातिपरिचितमिति निषेधा दित्यर्थः । अयन्तु नैतादृश इति न पलायितव्यमिति भावः । अयमेकव्यञ्जनः अन्त्यस्तकारस्तु न दोषावहः । नान्त्यवर्णस्तु भेदक इत्यभ्यनुज्ञानात् ॥ १४ ॥

वरमिति । कृताः पूर्व्वमुत्पादिताः पश्चाद्ध्वस्ता नष्टास्ते कृतध्वस्ताः पूर्व्वकालेत्यादिना समासः । कृतध्वस्ताः गुणाः यस्य तस्मात्पुंसोऽत्यन्त

वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान् ।
प्रकृत्या ह्यमणिः श्रेयान्नालङ्कारश्च्युतोपलः ॥ १५ ॥
स्यन्दनानो चतुरगाः सुरेभावाविपत्तयः ।
स्यन्दनानो च तुरगाः सुरेभावा विपत्तयः ॥१६॥

॥ समुद्गकः ॥

भवद्भिरधुनारातिपरिहापितपौरुषैः ।
ह्रदैरिवार्कनिष्पीतैः प्राप्तः पङ्कोदुरुत्तरः ॥१७॥

मतिशयेनागुणोनिर्गुणः पुमान् वरं मनाक्प्रियः किञ्चित्प्रियं इत्यर्थः । वरं क्लीवे मनाक्प्रियइत्यमरः । तथाहि प्रकृत्या स्वभावेन अमणिः मणिरहितोऽलङ्कारः श्रेयान् । च्युतोपलोभ्रष्ट रत्नोन श्रेयान् । उपलः प्रस्तरे रत्ने इति विश्वः । पलायितुः समरादसमरएव वरमिति भावः । अत्र समानविषयारोपयोः प्रतिबिम्बकरणाद्दृष्टान्तालङ्कारः ॥ १५ ॥

स्यन्दनाइति । स्यन्दन्ते प्रस्रवन्तीति स्यन्दनाः जवनाः स्यन्दनाः रथानो सन्ति । नन्द्यादित्वात् ल्युः । चतुरं गच्छन्तीति चतुरगाः तुरगाश्च अश्वानो सन्ति । सुरेभाः शोभनवृंहणाः सुरेभावा सुरगजाश्च नो सन्ति । अविपत्तयोविपत्तिरहिताः विपत्तयोवा विशिष्टाः पदातयोनो सन्ति । अतोन भेतव्यमिति भावः । अत्र पूर्व्वोत्तरार्द्धगतानां विशेषणानाञ्चोद्देशोद्देश्यीभूतानां यथासङ्ख्यमन्वयानुक्रमाद्यथासंख्यालङ्कारोयमकेन संसृष्टः ॥ १६ ॥

भवद्भिरिति । अधुना अरातिभिः परिहापितानि त्याजितानि पौरुषाणि येस्तैर्भवद्भिरर्कनिष्पीतैः अर्केण संशोषितैर्ह्रदैरिव दुरुत्तरोदुस्तरः पङ्कइव दुष्कीर्त्तिः प्राप्तः ॥ १७ ॥

वेत्रशाककुजे शैलेऽलेशैजेऽकुकशात्रवे।
यात किं विदिशोजेतुं तुंजेशोदिवि किंतया ॥ १८ ॥

॥ प्रतिलोमानुलोमपादः ॥

अयं वः क्लैव्यमापन्नान्दृष्टपृष्ठानरातिना।
इच्छतीशश्च्युताचारान्दारानिव निगोपितुम् ॥ १९ ॥

वेत्रेति। वेत्राणि वंशाःफलिन्योवा शाकाः वर्वराश्च कुजाष्टचा यस्मिन् तस्मिन् वेत्रशाककुजे शत्रुणा दुःप्रवेश्यइत्यर्थः। वेत्रं वंशफलिन्योश्चेति विश्वः। शाकवर्वरवर्द्धकाइत्यमरः। लेशेन लोकेनाप्येजते कम्पते इति लेशैजः स न भवतीति अलेशैजस्तस्मिन्। अत्यन्तीकम्पनइत्यर्थः। एजृ कम्पने पचाद्यच्। न कोकते नाद्त्ते इति अकुकोग्रहणासमर्थः शात्रवोयस्मिन् तस्मिन् अकुकशात्रवे। कुकआदाने पचाद्यच्। शैले पर्व्वते। केषां भावः किन्ता कुत्सितता तया उपलक्षिताः सन्तः। कुत्सानिन्दावितर्केषु चेव किंशब्दइष्यतइति शाश्वतः। विदिशोजेतुं यात गच्छत किं। यातेः सम्प्रश्ने लोट्। मध्यमपुरुषबहुवचनं। दिवि स्वर्गेऽपि तुञ्जे शइति तेषां सम्बोधनं। तुञ्जन्तइति तुञ्जाः दैत्याः तुजि हिंसा याम्पचाद्यच्। तेभ्योदैत्येभ्यईशतइति तुञ्जेशः ईशेः क्विप्। तेभ्योऽपि शक्ताइत्यर्थः। स्वर्गेऽप्यसुरविजयिनां युष्माकमत्र क्षुद्रस्थले क्षुद्रशत्रौ पलायनमनुचितमिति भावः ॥ १८ ॥

अथेशे तिष्ठति पलायनमेतद्वान युक्तमित्याह। अयमिति। अयमीशः स्वामी शिवः क्लैव्यं निष्पौरुषत्वं आपन्नान् प्राप्तान् तथा अरातिना दृष्टपृष्ठान् पलायमानानित्यर्थः वोयुष्मान् च्युताचारान्

ननु हो मथना राघो घोरा नाथमहो नु न ।
तयदातवदा भीमा माभीदा वत दायत ॥ २० ॥

॥ प्रतिलोमानुलोमाङ्कः ॥

स्खलितव्रतान् दारान् कलत्राणीव । अथ पुंभूम्नि दारा इत्य मरः । निगोपितुङ्गोप्तुम् । ऊदित्त्वादिड्विकल्पः । दारदोषं भर्त्तेव स्वमहिम्ना युष्मद्दोषं संवरितुमिच्छति । अतः कुतो युष्माक मनर्थ इत्यर्थः ॥ १९ ॥

नन्विति । ननु इत्यामन्त्रणे । हो इत्याह्वाने । हि हे व्यस्तौ समस्तौ च दूरात् सम्बोधनार्थयोः । हो है चैवंविधौ ज्ञेयौ संबुद्ध्याह्वानयोरपीति विश्वः । मथन्तीति मथनाः । मथ विलोडने कर्त्तरि ल्युट् । राघन्ति समर्थाभवन्तीति राघः । राघृ सामर्थ्ये क्विप् । घोराः क्रूराः शत्रूणामिति भावः । नाथं महयन्ति पूजयन्तीति नाथमहः । इग्विग्रहणात्कर्म्मणि उपपदे क्विप् । तयन्ति रक्षन्तीति तयाः रक्षकाः । पचाद्यच् । दायन्तीति दाताः शुद्धाः । दैप् शोधने कर्त्तरि क्तः । वदन्तीति वदाः वक्तारः । पचाद्यच् । तेषां द्वन्द्वः तयदातवदाः भीमाभयङ्कराः माभीः । नञर्थमा शब्दस्य सुप्सुपेति समासः । तान्ददतीति माभीदाः अभयप्रदाः एवंविधाः यूयमिति शेषः । वतेति खेदे बवयोरभेदः । न दायत नु न शुद्धाः किं । नु पृच्छायां । किन्तु शुद्धा एव न काकुरत्रानु सन्धेयः । दैप् शोधने लोट् मध्यमपुरुषबहुवचनं ॥ २० ॥

किमिति । अपास्तोऽवधीरितः देवलमानुष्यकयोः परिग्रहः स्वीकारो यैस्तैः अतिदेवमानुषैरित्यर्थः । मनुष्याणाम्भावो मानुष्यकं ।

किन्त्यक्तापास्तदेवत्वमानुष्यकपरिग्रहैः ।
ज्वलितान्यगुणैर्गुर्वी स्थिता तेजसि मानिता ॥२१॥
निशितासिरतोऽभीकोन्येजतेऽमरणारुचा ।
सारतान विरोधी न स्वाभासोभरवानुत ॥ २२ ॥

योपधाद्गुरूपान्तिमादुञ् । ज्वलितान्यगुणैः ज्वलिताः प्रकाशिता इति यावत् अन्यगुणा असदृशगुणाये स्तैः । अन्यौ विभिन्नासदृशौ इति वैजयन्ती । ईदृशैर्भवद्भिरिति शेषः । तेजसि प्रतापे स्थिता प्रतापैकशरणा मानिता शूरत्वाभिमानिता किमिति त्यक्ता । किमिति निर्लज्जैः पलाय्यतइति भावः ॥ २१ ॥

निशितेति । हे अमरणाः मरणरहिताः निशितासिरतः अतितीक्ष्णखड्गरतः अभीकोनिर्भीकः रुचा तेजसा उपलक्षितः सुष्ठु आभासतइति स्वाभासोरमणीयः । पचाद्यच् । उतात्यर्थं अतिशयेन भरवान् रणभरसहिष्णुरित्यर्थः । उतात्यर्थविकल्पयो रिति विश्वः । ईदृशोनोऽस्माकं विरोधी शत्रुः सारतोबलतोन न्येजते न कम्पते न प्रचलतीत्यर्थः । एजृकम्पने लट् । अतो भवद्भिरपि स्थातव्यमेव न चलितव्यमिति भावः ॥ २२ ॥

नन्वयन्न चलतीति कथं ज्ञायते तत्राह । तन्विति । तनु मावृणोत्याच्छादयतीति तनुवारं वर्म्म । कर्म्मण्यण् । तेन बभस्ति भासते इति तनुवारभसः । भस दीप्तौ पचाद्यच् । भास्वान् तेजस्वी चारुणा भास्वता अविनतेनोनतेनोरसा वक्षःस्थलेन उपलक्षित । एवं विधोऽप्यधीरोधैर्य्यरहितः रसितेन शब्दितेनैवाञ्मति रसिताशी तस्मिन् । रवेणैव विश्वप्राणहारिणीत्यर्थः । आभीक्ष्ण्ये णिनिः ।

तनुवारभसोभास्वानधीरोऽविनतोरसा।
चारुणा रमते जन्ये कोऽभीतोरसितोशिनि ॥२३॥

॥ प्रतिलोमानुलोमेन श्लोकद्वयम् ॥

विभिन्नपातिताश्वीयनिरुद्धरथवर्त्मनि।
हतद्विपनगष्ठ्यूतरुधिराम्बुनदाकुले ॥ २४ ॥

जन्ये युद्धे। युद्धमायोधनं जन्यमित्यमरः। अभीतः निर्भीकः सन् कोरमते कः क्रीडति निर्भयसञ्चारादेवास्य निश्चलत्वन्निश्चीयत इत्यर्थः। पूर्व्वश्लोकस्यायम्प्रतिलोमः ॥ २३ ॥

अथ पञ्चभिः कुलकमाह। विभिन्नेत्यादिभिः। आहवं विशिनष्टि। विभिन्नानि विदारितानि अतएव पातितानि आश्वीयाश्वसमूहाः। पूर्व्वकालेति समासः। तैरश्वसमूहै निरुद्धानि रथानां वर्त्मानि यस्मिन् तथोक्ते। वृन्दे त्वाश्वीयमाश्वव दित्यमरः। केशाश्वाभ्यां यञ्छणावन्यतरस्यामिति छण् प्रत्ययः। हतास्ताडिताद्विपागजा एव नगाः शैलाः। शैलवृक्षौ नगावगा वित्यमरः। तैः ष्ठ्यूतानि उज्झितानि। ष्ठिवतेः कर्म्मणि क्तः। छ्वोः शूडनुनासिके चेति ऊठादेशः। तानि रुधिराण्येवाम्बूनि तेषां नदैः प्रवाहैः आकुले व्याप्ते ॥ २४ ॥

देवेति। पुनश्च देवान् आकनयत्युद्दीपयत्युत्साहयतीति देवाकानी तस्मिन्देवाकानिनि। कनदीप्ताविति धातोर्ण्यन्तात् णिनिः। यद्वा के शब्दे इति धातोराङ्पूर्व्वस्य भावे ल्युटि आकानं आशब्द नमीषद्वदनमिति यावत् देवानां तद्वतीत्यर्थः। कावादः ईष द्वादोवाक्कलहः। ईषदर्थे चेति कुशब्दस्य कादेशः। तद्वति

दे वा का नि नि का वा दे
वा हि का स्व स्व का हि वा
का का रे भ भ रे का का
नि स्व भ व्य व्य भ स्व नि ॥ २५ ॥

॥ सर्व्वतोभद्रः ॥

कावादे। अर्श्रआदिभ्योऽच्। वाहिका पर्य्यायेण रणभारोद्वहनम्। वहेः पर्य्याये धात्वर्थनिर्देशे एवुल् वक्तव्यः। वाहिकया क्रमप्राप्त रणक्रियया सुष्ठु शोभनं यथा तथा अस्वकान् परानाजिहीते अभियुङ्क्ते योजयतीति यावत् वाहिकास्वस्वकाहास्तस्मिन्। योद्धृधर्म्मो युद्धे उपचर्य्यते। ओहाङ्गताविति धातोः विच् प्रत्ययः। सोमपाशब्दवत् प्रक्रिया। वाशब्दस्त्वार्थे। कं मदो दकमाकिरन्तीति काकाराः मदस्राविणः। किरतेराङ्पूर्व्वात्कर्म्मण्यण्। एवंविधा इभभराः गजघटाः यत्र तस्मिन् काकारेभभरे। काका इव काकाः गर्हादिति लक्षणया तेषामामन्त्रणम्। निस्वाः निरुत्साहाः भव्याः सोत्साहाः तानुभयान् व्ययन्ति संवृण्वन्तीति निस्वभव्यव्याः। व्येञ् संवरणे आतोनुपसर्गे कः। तैर्भसि भासते इति निस्वभव्यव्यभस्तान् तस्मिन्। अन्येभ्योऽपि दृश्यते इति क्विप्। सर्व्वतोभद्रम्। सर्व्वतो भ्रमणात्सर्व्वतोभद्राख्यश्चित्रबन्धः। यथाह दण्डी। तदिदं सर्व्वतोभद्रं भ्रमणं यदि सर्व्वतइति। उद्धारस्तु अष्टकोष्ठचतुष्टयं लिखित्वा तत्र श्लोकं क्रमेण लिखित्वा सर्व्वतो वाचनात्सर्व्वतोभद्रइति ॥ २५ ॥

प्रस्खलेति। प्रस्खलत्तशवेभ्योन्त्यत्कबन्धेभ्यः वित्रस्तैः भ्रमितैस्तुरगै राचिप्ता अवधूताः सारथयो यत्र तस्मिन्। तथा मारुतेनापर्य्यस्तै

प्रन्टत्तशवविचस्ततुरगाच्छिन्नसारथौ ।
मारुतापूर्णतूणीरविक्रुष्टहतसादिनि ॥ २६ ॥

स स त्व र ति दे नि त्यं
स द रा म र्ष ना शि नि
त्व रा धि क क सं ना द
र म क त्व म क र्ष ति ॥ २७ ॥

॥ अर्द्धभ्रमकः ॥

आसुरे लोकविचासविधायिनि महाहवे ।
युष्माभिरुन्नतिं नीतन्निरस्तमिह पौरुषम् ॥ २८ ॥

॥ कुलकम् ॥

स्तूणीरैर्निषङ्गैर्विक्रुष्टाः शब्दायमानाहतास्ताडिताः सादिनस्तौ रङ्गिकायत्र तस्मिन् यद्वा मारुतापूर्णतूणीरैः विक्रुष्टा आकर्षिता अतएव हतामारिताः सादिनोऽश्ववारायत्र तस्मिन् ॥ २६ ॥

ससत्वेति । ससत्वानां सत्ववतां रतिदे रागप्रदे नित्यं सदराणां सभयानाममर्षनाशिनि क्रोधहारिणि त्वरया उत्साहेनाधिकं कसन्तोविकसन्तोनादाः यत्र तस्मिन् रमयतीति रमकः । रम धातोः वुण् तस्याकादेशः तद्भावोरमकत्वं । रणकर्म्मणा पर रञ्जकत्वं अकर्षति अपनुदति वीराणाम्परस्परमुत्साहं रणकर्म्मणा स्फोरयतीत्यर्थः ॥ २७ ॥

आसुरइति । एवंविधे आसुरे असुरसम्बन्धिनि लोकविचास विधायिनि लोकभयङ्करे महाहवे महायुद्धे युष्माभिरुन्नतिं

इति शासति सेनान्याङ्गच्छतस्ताननेकधा।
निषिध्य हसता किञ्चित्तस्थे तत्रान्धकारिणा ॥२९॥
॥ निरौष्ठ्यम् ॥

मुनीषुदहनातप्तान् लज्जया निविवृत्सतः।
शिवः प्रह्लादयामास तान्निषेधहिमाम्बुना ॥३०॥

दूनास्तेऽरिबलादूनानिरेभावङ्क मेनिरे।
भीताः शितशराभीताः शङ्करन्तत्र शङ्करम् ॥३१॥
॥ पादाद्यन्तयमकम् ॥

वृद्धिं नीतमापितमौरुषं पुरुषकर्म्म निरस्तं नाशितमिह सङ्ग्रामे ॥ २८ ॥

इतीति। इतीत्थं सेनान्यां स्कन्दे शासति आज्ञापयति अनेकधा गच्छतः पलायमानांस्तान् गणान् निषिध्य निवार्य्य अन्धकारिणा हरेण किञ्चिद्धसता तस्थे स्थितं। भावे लिट् ॥ २९ ॥

मुनीति। मुनेरिषवएव दहनस्तेन आतप्तान् पीडितान् तथा लज्जया रणभङ्गाच्छालीनत्वेन निविवृत्सतोनिवर्त्तितुकामान् वृद्भ्यः स्यसनोरिति विकल्पात्परस्मैपदम्। तान् गणान् शिवः निषेधः मा भैष्ट मा पलायतेति निवारणवचनं सएव हिमाम्बु शीतोदकन्तेन प्रह्लादयामास। रूपकालङ्कारः ॥ ३० ॥

दूनादिति। दूनाः परितप्ताः। स्वादिभ्यश्चेति निष्ठानत्वं। अरिबलाच्छत्रुबलात् ऊनाः ऊनबलाः। पञ्चमी विभक्तारिति, पञ्चमी निरेभाः निःशब्दाः कुतः भीताः त्रस्ताः कुतोभयः

महेषुजलधौ शत्रोर्वर्त्तमाना दुरुत्तरे ।
प्राप्य पारमिवेशानमाशश्वास पताकिनी ॥ ३२ ॥
स बभार रणापेतात्चमूम्पश्चादवस्थिताम् ।
पुरः सूर्य्यादपावृत्ताञ्छायामिव महातरुः ॥३३॥
मुञ्चतीशे शरान् जिष्णौ पिनाकस्वनपूरितः ।
दध्वान ध्वनयन्नाशाः स्फुटन्निव धराधरः ॥३४॥

शितैस्तीक्ष्णैः शरैरभीताः अभिव्याप्ताः । दूणः कर्म्मणि क्तः । ते गणास्तत्र रणे शङ्करं अभयवचनेन सुखकरं शङ्करं शिवम्बज्ञ· यथा तथा मेनिरे अमन्यन्त ॥ ३१ ॥.

महेष्विति । दुरुत्तरे दुस्तरे शत्रोः सम्बन्धिनि महेषुजलधौ महति बाणसागरे वर्त्तमाना पताकिनी सेना ईशानं शिवं पारं परतीरमिव । पारावारे परार्वाचीत्यमरः । प्राप्य आशश्वास प्राणिति स्म ॥ ३२ ॥

स इति । स शिवो रणापेतां रणादपवृत्तान्पराङ्मुखीभूता मतएव पश्चात्पृष्ठभागे अवस्थिताञ्चमूम्पुरोऽग्रे स्थितः सूर्य्यः सूर्य्यकिरणैः तस्मादपावृत्ताम्परावृत्ताञ्छायां महातरुरिव बभार । छायान्तरुरिव आत्मैकशरणान्ताञ्चमूम्न मुमोचेत्यर्थः ॥ ३३ ॥

मुञ्चतीति । ईशे हरे कर्त्तरि जिष्णावर्जुने विषये शरान्मुञ्चति सति पिनाकस्य शिवकार्मुकस्य स्वनेन ध्वनिना पूरितः धराधर इन्द्रकीलः स्फुटन्निव विदीर्य्यमाणइवेत्युत्प्रेक्षा । आशा दिशः ध्वनयन् शब्दयुक्ताः कुर्व्वन् दध्वान शब्दमकरोत् ॥ ३४ ॥

तद्गणादृदृशुर्भीमश्चित्रसंस्थाइवाचलाः ।
विस्मयेन तयोर्युद्धञ्चित्रसंस्थाइवाचलाः ॥ ३५ ॥
॥ द्विचतुर्थयमकम् ॥

परिमोहयमाणेन शिक्षालाघवलीलया ।
जैष्णवी विशिखश्रेणी परिजह्रे पिनाकिना ॥३६॥
अवद्यन्पत्रिणः शम्भोः सायकैरवसायकैः ।
पाण्डवः परिचक्राम शिक्षया रणशिक्षया ॥ ३७ ॥
॥ आद्यन्तयमकम् ॥

तदिति । भीमन्तयोर्हरपाण्डवयो. तत्प्रसिद्धं युद्धं गणाः प्रमथाः चित्रसंस्थाः चित्राकाराः अचलाः शैलाइव । तथाचित्रे आलेख्ये संस्था स्थितिर्येषां ते चित्रसंस्थाः चित्रलिखिताइवाचला आश्चर्य्यवशान्निश्चलाः सन्तोदृदृशुः ॥ ३५ ॥

परीति । शिक्षालाघवलीलया अभ्यासपाटवातिशयेन हेतुना परिमोहयमाणेन व्यामोहयता । अणावकर्म्मकाच्चित्तवत्कर्त्तृका दिति परस्मैपदे प्राप्ते न पादमित्यादिना तत्प्रतिषेधादात्मनेपदं शानच् णेर्विभाषेति कृत्स्थस्य नस्य वा णत्वम् । पिनाकिना हरेण जिष्णोरर्ज्जुनस्येयञ्जैष्णवी विशिखश्रेणी बाणसङ्घातः परिजह्रे निरस्ता ॥ ३६ ॥

अवद्यन्निति । पाण्डवोऽर्ज्जुनः अवसायकैः अवसानकरैः स्यतेर्ण्यन्तात् ण्वुल्प्रत्ययः । सायकैर्बाणैः शम्भोः पत्रिणः शरा नवद्यन् खण्डयन् । द्यतेः शतृप्रत्ययः ओतः श्यनीत्योकारलोपः ।

चारचुंचुः चिरारेची चंचच्चीररुचा रुचः ।
चचार रुचिरः चारु चारैराचारचंचुरः ॥ ३८ ॥

॥ द्व्यक्षरः ॥

स्फुरत्पिशङ्गमौर्वीकन्धुनानः स वृहद्धनुः ।
धृतोल्कानलयोगेन तुल्यमंशुमता बभौ ॥ ३९ ॥

शिक्षया शक्तुमभवितुमिच्छया उत्साहेनेत्यर्थः । रणे शिक्षया अभ्यासेन च परिचक्राम उत्साहनैपुणाभ्यांचचारेत्यर्थः ॥ ३७ ॥

चारैरिति । चारैर्गतिविशेषैर्वित्तइति चारचुञ्चुः । तेन वित्त चुञ्चुप्चणपाविति चुञ्चुप्प्रत्ययः । चिरमारेचयति रिक्तीकरोति शत्रूनिति चिरारेची । चञ्चतश्चलतश्चीरस्य वल्कलस्य रुचा प्रभया रोचते इति रुचः शोभमानः । इगुपधेति कः । रुचिरः सुन्दरः । चञ्चर्य्यते भृशं चरतीति चञ्चुरः । चरतेर्य्यङन्तात्पचाद्यच् चरफलोश्चेति नुमागमः यङोचि चेति यङोलुक् । आचारस्य युद्ध व्यवहारस्य चञ्चुराम्भृशमाचरितः स मुनिः चारु यथा तथा चारै चक्रादिचर्य्यैर्गतिविशेषैः चचार । चारः प्रियालवृचे स्याद्गतौ बन्धापसर्पयोरिति विश्वः ॥ ३८ ॥

स्फुरदिति । समुनिः अर्ज्जुनः स्फुरन्ती पिशङ्गी पिशङ्गवर्णा मौर्व्वी ज्या यस्य तत्तथोक्तम् । नद्यृतश्चेति कप्प्रत्ययः । वृहद्धनु गाण्डीवं धुनानः कम्पयन् । उल्कैवानलस्तेन धृतोयोगोयेन तेनां शुमता अर्केण सूर्य्येण तुल्यं बभौ । उपमा ॥ ३९ ॥

पार्थबाणाः पशुपतेरावव्रुर्विशिखावलीम् ।
पयोमुचाइवारम्भाः सावित्रीमंशुसंहतिम् ॥ ४० ॥
शरवृष्टिं विधूयोर्वीमुदस्तां सव्यसाचिना ।
रुरोध मार्ग्गणैर्मार्ग्गन्तपनस्य त्रिलोचनः ॥ ४१ ॥
तेन व्यातेनिरे भीमाभीमार्ज्जनफलाननाः ।
न नानुकम्प्य विशिखाः शिखाधरजवाससः ॥४२॥
॥ शृङ्खलायमकम् ॥

पार्थेति । पार्थबाणाः अर्ज्जुनशराः पशुपतेर्विशिखावलीं शरसङ्घातं सवितुरियं सावित्री तां अंशुसंहतिं किरणसमूहं आरम्भाः निविडाः पयोमुचोमेघाइवावव्रुः तिरोदधुः ॥ ४० ॥

शरेति । त्रिलोचनः शिवः । सव्येन सचते समवैतीति तेन सव्यसाचिना अर्ज्जुनेनोदस्तां क्षिप्तां उर्वीम्महतीं शरवृष्टिं मार्ग्गणैः शरैर्विधूय निरस्य तपनस्य मार्ग्गं रुरोधावव्रे ॥ ४१ ॥

तेनेति । तेन शिवेन भीमाः भयङ्कराः भियोभयस्य मार्ज्जनं निरासः तदेव फलं प्रयोजनं येषां तानि आननानि अग्राणि येषान्ते भीमार्ज्जनफलाननाः । तथा शिखाधराः मयूराः तेषु जातानि शिखाधरजानि वर्हाणि तानि वासांसि पत्त्राणि येषान्ते शिखाधरजवाससः मयूरपत्त्रिण इत्यर्थः । विशिखाः बाणा अनुकम्प्य कृपां कृत्वा न व्यातेनिरे इति न किन्त्वनुकम्प्यैवेत्यर्थः । अनुजिघृक्षुत्वादिति भावः । सम्भाव्यनिषेधने द्वौ प्रतिषेधावित्युक्तम् । ॥ ४२ ॥

द्युवियद्गामिनीतारसंरावविहतश्रुतिः ।
हैमीषुमाला शुशुभे विद्युतामिव संहतिः ॥४३॥

॥ गूढचतुर्थपादः ॥

विलङ्घ्य पत्रिणां पङ्क्तिं भिन्नः शिवशिलीमुखैः ।
ज्यायोवीर्य्यमुपाश्रित्य न चकम्पे कपिध्वजः ॥४४॥

द्युवियदिति । द्यां स्वर्गं वियदन्तरिचञ्च गच्छतीति द्युवियद्गामिनी तद्व्यापिनी। श्रितादिषु गम्यादीनामुपसङ्ख्यानात्समासः। तारेण उच्चैस्वरेण संरावेण विहतास्ताडिता विद्धाः श्रुतयः कर्णायया सा तथोक्ता । हैमी हेममयी इषुमाला शिवशरावलिः विद्युतां संहतिरिवोक्तविशेषणा विद्युन्मालेव। शुशुभे । चतुर्थ पादवर्णानान्त्रिपाद्यां सम्भवात् गूढचतुर्थपादमाङ्गः ॥ ४३ ॥

विलङ्घ्येति । शिवशिलीमुखैः पत्रिणां पङ्क्तिन्निजशरावलिं विलङ्घ्यातिक्रम्य भिन्नोविद्धः कपिध्वजः ज्यायः प्रशस्तं । वृद्ध प्रशस्ययोर्ज्यायानित्यमरः । वीर्य्यं सत्त्वं उपाश्रित्य अवस्थाय न चकम्पे न चचाल किन्तु तान् सहन् अवतस्थावित्यर्थः ॥ ४४ ॥

जगतीति । अर्थत्रयवाची श्लोकोऽयम् । तत्रादौ अगराज इति पदच्छेदमाश्रित्य एकाऽर्थोऽभिधीयते । ईशस्य रणे युक्तः शक्तः अन्यत्र जगतीशरणे भूरक्षणे युक्तः स्थितः विधिनेति शेषः हरिः सिंहइव कान्तः मनोहरः अन्यत्र हरीणां सिंहानां कान्तः आवासदानात्प्रियः सुष्ठु दधाति पालयति प्रजाइति सुधाः । विजन्तः । असितः कृष्णवर्णः ततो विशेषणसमासः । अन्यत्र सुधा लेपद्रव्यविशेषः तद्वत् सितोधवलः दानवर्षी

जगतीशरणे युक्तो हरिकान्तः सुधासितः ।
दानवर्षी कृताशंसो नागराज इवाबभौ ॥ ४५ ॥
॥ अर्थत्रयवाची ॥

बहुप्रदः कृताशंसः कृतजयाभिलाषः अन्यत्र दानवैः दैत्यैः ऋषिभिश्च कृता आशंसा नानाफलाभिलाषो यस्मिन्स ना नरो ऽर्ज्जुनः । अगराजो हिमवानिव जगत्यावभावित्येकार्थः ॥ * ॥ अथैरावतसाम्यमुच्यते । जगतीं भुवं श्यन्ति तनूकुर्व्वन्तीति ते जगतीशाः राक्षसाः तेषां रणः तत्र युक्तः विहितः समर्थः । हरिकान्तः इन्द्रप्रियः उभयत्रापि समानमेतत् । सुधासितः अमृत स्वच्छः एकत्र शीलतः अन्यत्र वर्णतइति विवेकः । दानवर्षी धनप्रदो मदस्रावी च कृताशंसः उभयत्र कृतजिगीषः पार्थः नागराजइव ऐरावतइव आबभाविति द्वितीयोर्थः ॥ * ॥ अथ शेषौपम्य मुच्यते । जगतीशरणे भूरक्षणे युक्तः नियुक्तः दैवेनेति शेषः । शरणं गृहरक्षित्रोरित्यमरः । हरिकान्तः कृष्णप्रियः उभयत्रापि तुल्यम् । सुष्ठु दधातीति सुधा वसुधेति केचित् एकदेशग्रहणात् समु दायग्रहणम् । तत्र सितोबद्धः । षिञ् बन्धने क्तः । अन्यत्र सुधया अमृतेन सितोबद्धः अमृतप्रियइत्यर्थः । दानवाः ऋषयश्च तैः कृता शंसोविहितप्रशंसः उभयत्रापि तुल्यमेतत् सोऽर्ज्जुनः नागराजः शेषइवाबभाविति तृतीयोर्थः ॥ ४५ ॥

विफलीति । अमुना चतबाणस्य अतएव विफलीकृतयत्नस्य निष्फलप्रयत्नस्य गाण्डीवन्धनुर्यस्य तस्य गाण्डीवधन्वनोऽर्ज्जुनस्य । वा संज्ञायामित्यनङादेशः । खेभ्यः इन्द्रियरन्ध्रेभ्यः । खमिन्द्रिये

विफलीकृतयत्नस्य चतबाणस्य शम्भुना ।
गाण्डीवधन्वनः खेभ्योनिश्चक्राम हुताशनः ॥४६॥

स पिशङ्गजटावलिः किर
न्नुरु तेजः परमेण मन्युना ।
ज्वलितौषधिजातवेदसा
हिमशैलेन समं विदिद्युते ॥ ४७ ॥

शतशोविशिखानवद्यते
भृशमस्मै रणवेगशालिने ।
प्रथयन्ननिवार्य्यवीर्य्यता
मभिघायेषु मघातुकं शिवः ॥ ४८ ॥

सुखे स्वर्ग्गइति विश्वः । हुताशनोऽग्निर्निश्चक्राम निष्क्रान्तः क्रोधा दिति भावः ॥ ४६ ॥

सइति । पिशङ्गजटावलिः पिशङ्गजटाजूटः परमेणोत्कृष्टेन मन्युना क्रोधेन उरु महत्तेजः किरन् विक्षिपन् सोऽर्ज्जुनः ज्वलिताः ओषधयः तृणज्योतींषि जातवेदाः दवाग्निश्च यस्मिन् तेन हिम शैलेन समन्तुल्यं हिमाद्रिरिव विदिद्युते हिमाद्रिवत् शुशुभे इति विम्बप्रतिविम्बभावोपमा ॥ ४७ ॥

शतशइति । शिवः शतशोविशिखानवद्यते खण्डयते रणवेग शालिने अस्मै पार्थाय भृशमनिवार्य्यवीर्य्यतां निजामिति शेषः । तस्मै प्रथयन् दर्शयन् । किन्तु अघातुकममारकं । लषपतेत्यादिना उक्तेरुकञ् । इषुस्ताताविकरवनमभिघाय प्रयुयुजे । दिगता विति धातोर्लिट् चेरचीडीति कुलम् ॥ ४८ ॥

शम्भोर्धनुर्म्मण्डलतः प्रवृत्त
न्तम्मण्डलादंशुमिवांशुभर्त्तुः ।
निवारयिष्यन् विदधे सिताश्वः
शिलीमुखच्छायवृतान्धरित्रीम् ॥ ४९ ॥
घनं विदार्य्यार्ज्जुनबाणपूगं
ससारबाणोऽयुगलोचनस्य ।
घनं विदार्य्यार्ज्जुनबाणपूगं
ससार बाणोऽयुगलोचनस्य ॥ ५० ॥

शम्भोरिति । सिताश्वोऽर्ज्जुनः शम्भोर्धनुर्मण्डलतः धनुर्मण्डला प्रवृत्तन्निष्क्रान्तं तं इषुं अंशुभर्तुरर्कस्य मण्डलात् प्रवृत्तं अंशुमिव अत्रापि इषुवज्जातावेकवचनं । निवारयिष्यन्निवारयितुकामः । क्रियार्थक्रियायां ऌटि तस्य शत्रादेशः । धरित्रीभुवं शिलीमुखानां छाया शिलीमुखच्छायं । छाया बाहुल्यइति नपुंसकत्वं । तेन वृतां व्याप्तां विदधे कृतवान् । शरजालच्छायावृतान्धरित्रीमकरो दित्यर्थः ॥ ४९ ॥

घनमिति । अयुगलोचनस्य विषमनेत्रस्येशस्य अलोचनस्य । लोच्यतेऽनेनेति लोचनः । कर्म्मणि ल्युट् । न लोचनः अलोचनः तस्य अलोचनस्य अचाक्षुषज्ञानविषयस्य सम्बन्धी सारोबलं बाणः शब्दः ताभ्यां सारबाणाभ्यां सह वर्त्तते इति ससारबाणः बवयोरभेदइत्युक्तम् । न युज्यते कुत्रापीत्ययुक् सङ्गरहितः । क्विप् । बाणः शरः जातावेकवचनं । घनं सान्द्रमर्ज्जुनस्य बाणपूगं शरव्रातं विदार्य्य विभिद्य घनं निविडम् विदार्य्याभूमिकूष्माण्डोलता

रुजन्महेषून् बहुधाशुपातिनो
मुहुः शरौघैरपवारयन् दिशः।
चलाचलोऽनेक इव क्रियावशा-
न्महर्षिसङ्घैर्बुबुधे धनञ्जयः ॥ ५१ ॥

विकाशमीयुर्जगतीशमार्ग्गणा
विकाशमीयुर्जगतीशमार्ग्गणाः।
विकाशमीयुर्जगतीशमार्ग्गणा
विकाशमीयुर्जगतीशमार्गणाः ॥ ५२ ॥

॥ महायमकम् ॥

विशेषाः अर्ज्जुनाः ककुभवृक्षाः बाणानीलवैरेयकाः पूगाः क्रमुकाः तेषां। विभाषा वृक्षेत्यादिना द्वन्द्वैकवद्भावः। विदार्य्यार्ज्जुनबाण पूगं ससार विवेशेत्यर्थः। यदा तदानीमेव युगलोचलस्यार्ज्जुनस्य बाणः ससारेत्यर्थः ॥ ५० ॥

रुजन्नित्यादि। बहुधा आशुपातिनः शीघ्रमापततो महेषून् मुहुः शरौघैरुजन् भञ्जयन्। तथा दिशश्चापवारयन्नाच्छादयन् क्रियावशात् युद्धकर्मायत्ततया चलाचलोऽतिचञ्चलो धनञ्जयो महर्षिसङ्घैरनेको बहुविध इव बुबुधे दृदृशे ॥ ५१ ॥

विकाशमिति। जगतीशस्यार्ज्जुनस्य मार्ग्गणा बाणाः विकाश मपारमीयुः तथा जगति लोके ईशमार्ग्गणाः शम्भुशराः विकाशं विषमगतिमीयुः प्रापुरित्यर्थः। तथा जगतीं पृथ्वीं घ्नन्ति तनू कुर्व्वन्तीति जगतीशाः दानवाः। आतोऽनुपसर्गे कः। तान्मारयन्तीति जगतीशमाराः। क्विप्। ते च ते गणाश्च जगतीशमार्ग्गणाः प्रमथाः

सम्पश्यतामिति शिवेन वितायमानं
लक्ष्मीवतः क्षितिपतेस्तनयस्य वीर्य्यम् ।
अङ्गान्यभिन्नमपि तत्त्वविदाम्मुनीनां
रोमाञ्चमञ्चिततरं बिभराम्बभूवुः ॥ ५२ ॥

इति श्रीमहोपाध्याय भारविकृतौ किरातार्ज्जुनीये महाकाव्ये युद्धवर्णनं नाम पञ्चदशस्सर्गः ॥१५॥

विकाशं उल्लासं हर्षमीयुः प्रापुरित्यर्थः । अहो देवेऽप्यस्य पराक्रम प्रसर इति विस्मयात् इति भावः। तदानीं मार्गयन्तीति मार्गणाः अन्वेषणाः। कर्त्तरि ल्युट् । अगतीशस्य मार्गणाः अन्वेषकाः शिव द्रष्टारो देवर्ष्यादयः वीनाम्पक्षिणाङ्कामोगतिरचेति विकाशं आकाश मीयुः दिदृक्षयेति भावः ॥ ५२ ॥

सम्पश्यतामिति । इतीत्थं शिवेन वितायमानं विस्तार्य्यमाणम्। तनोतेर्य्यकीति वैकल्पिकआकारादेशः । लक्ष्मीवतोजयश्रीमतः । मादुपधायाद्दत्यादिना मतुपोमस्य वकारः । क्षितिपतेस्तनयस्यार्ज्जुनस्य वीर्य्यं शौर्य्यं सम्पश्यतान्तत्त्वविदामपि हरेरंशावतारोय मिति विदुषामपि किमुतान्येषामिति भावः। मुनीनामङ्गानि गात्राणि अभिन्नमविरलं अञ्चिततरमतिरुचिरतरं रोमाञ्चं रोमहर्षं बिभराम्बभूवुः बभ्रुः । भीह्रीत्यादिना विकल्पादा मत्ययः ॥ ५२ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां पञ्चदशस्सर्गः ॥ १५ ॥

---

ततः किराताधिपतेरलघ्वी
माजिक्रियां वीक्ष्य विवृद्धमन्युः ।
स तर्कयामास विविक्ततर्क
श्चिरं विचिन्वन्निति कारणानि ॥ १ ॥

मदस्रुतिश्यामितगण्डलेखाः
क्रामन्ति विक्रान्तनराधिरूढाः ।
सहिष्णवो नेह युधामभिज्ञा
नागा नगोच्छ्रायमिवाक्षिपन्तः ॥ २ ॥

तत इति । ततोऽनन्तरङ्किराताधिपतेः सम्बन्धिनीमलघ्वीं गुर्वीमाजिक्रियां रणकर्म्म वीक्ष्य विवृद्धमन्युः विवृद्धकोपः विविक्तः निष्कलङ्कः तर्कः ऊहो ज्ञानं वा यस्य सोऽर्ज्जुनः कारणानि रणभराशक्तिकारणानि विचिन्वन् विमृशन् । इतीत्थं वक्ष्यमाणमेव तर्कयामास अभ्यूहितवान् ॥ १ ॥

अथ चयोविंशतिश्लोकैर्वितर्कमेवाह । मदेत्यादि । इह युद्धे मदस्रुतिभिः मदप्रवाहैः श्यामाः कृता इति श्यामिताः गण्डलेखाः कपोलभागा येषान्ते विक्रान्ताः पराक्रमं कुर्व्वन्तः । कर्त्तरि क्तः । सूरोवीरश्च विक्रान्त इत्यमरः । तैर्नरैरधिरूढाः सहिष्णवो रणभरक्षमाः युधां युद्धानामभिज्ञाः शिक्षिता इत्यर्थः । कृद्योगात्कर्म्मणि षष्ठी । किञ्च नगानामुच्छ्रायम्पर्व्वतानामौन्नत्यम् । घञन्तेनोपसर्गस्य समासेनोपसृष्टात् घञ्प्रत्ययः श्रिणीभुवोनुपसर्गे इत्यत्रानुपसर्ग इति निषेधात् । आक्षिपन्तः प्रतिषेधयन्त इव स्थिताः तथोन्नता इत्यर्थः । नागाः गजाः इह सङ्ग्रामे नाक्रामन्ति

विचित्रया चित्रयतेव भिन्नां
रुचं रवेः केतनरत्नभासा ।
महारथौघेन न सन्निरुद्धा
पयोदमन्द्रध्वनिना धरित्री ॥ ३ ॥

समुल्लसत्प्रासमहोर्म्मिमाल
म्परिस्फुरच्चामरफेनपङ्क्ति ।
विभिन्नमर्य्यादमिहातनोति
नाश्वीयमाशाजलधेरिवाम्भः ॥ ४ ॥

न चरन्ति । यथा युद्धान्तरेष्विति शेषः । एवमुत्तरत्रापि सर्व्वत्र द्रष्टव्यन्तथापि कथं मे शक्तिह्रासोयमिति सर्व्वत्र तात्पर्य्यार्थः ॥ २ ॥

विचित्रेति । विचित्रया नानावर्णया केतनानां रत्नानि तेषां भासा प्रभया भिन्नां संवलितां रवेरुचं कान्तिं विचित्रयता विचित्र वर्णां कुर्व्वतेव स्थितेनेति. केतनैश्मत्यनिमित्तेयमुत्प्रेक्षा । पयोदमन्द्र ध्वनिना मेघगम्भीरघोषेण महतां रथानामोघेन समूहेन धरित्री न सन्निरुद्धा नावृता ॥ ३ ॥

समुल्लसदिति । इह युद्धे प्रासाः कुन्ताः । प्रासस्तु कुन्तइत्यमरः । ते महोर्म्मयइव तेषां मालाः समुल्लसन्त्योयत्र तत्समुल्लसत्प्रासमहोर्म्मि मालं । चामराणि फेनाइव परिस्फुरन्त्यश्चामरफेनानां पङ्क्तयोयत्र तत्तथोक्तं । आश्वीयमश्वसमूहः । इन्दे लाश्वीयमाश्ववदित्यमरः । जलधेरम्भइव भिन्नमर्य्यादं उन्मर्य्यादमुच्छृङ्खलं यथा तथा आशा दिशोमातनोति नावृणोति ॥ ४ ॥

हताहतेत्युद्धतभीमघोषैः
समुज्झिता योद्धृभिरभ्यमित्रम्।
न हेतयः प्राप्ततडित्त्विषः खे
विवस्वदंशुज्वलिताः पतन्ति ॥ ५ ॥
अभ्यायतः सन्ततधूमधूम्रं
व्यापि प्रभाजालमिवान्तकस्य।
रजः प्रतूर्णाश्वरथाङ्गनुन्न
न्तनोति न व्योमनि मातरिश्वा ॥ ६ ॥

हतेति। हत प्रहरत आहत विध्यत। हन्तेर्लोट् मध्यमपुरुष बहुवचनं। अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। आहते त्यत्र कर्म्मणः प्रयोगासम्भवेऽपि हन्तेः स्वाभाविकसकर्मत्वस्याम पायात् अकर्म्मकत्वस्य चात्र विवक्षितत्वेन कर्म्मनिवृत्त्यैव तन्निवृत्तेः आङोयमहनइत्यात्मनेपदम्। इत्येवमुद्धताः प्रगल्भाः भीमाश्च घोषा येषान्तैर्योद्धृभिः योधैः अभ्यमित्रं अमित्रानभि समुज्झिता मुक्ता विवस्वतोऽंशुभिः प्रतिफलितैरिति भावः। ज्वलिता दीपिताः अतएव प्राप्ताः तडितान्त्विषो याभिस्ताहेतयः शस्त्राणि खे न पतन्ति। हेतिः स्त्रीपुंसयोरिति विश्वः ॥ ५ ॥

अभीति। अभ्यायतो वीरान् हन्तुमागच्छतः। इणः शतृप्रत्ययः। अन्तकस्य कालस्य सम्बन्धि सन्ततं सततन्धूमवत् धूम्रं व्यापि व्यापक प्रभाजालमिव स्थितम्प्रतूर्णैरश्वैः रथाङ्गैः रथचक्रैश्च नुन्नं प्रेरितं रजो मातरिश्वा मरुत् व्योमनि अन्तरिक्षे न तनोति न विस्तारयति ॥ ६ ॥

भूरेणुना रासभधूसरेण
तिरोहिते वर्त्मनि लोचनानाम्।
नास्यत्र तेजस्विभिरुत्सुकाना
मह्नि प्रदोषः सुरसुन्दरीणाम्॥ ७॥
रथाङ्गसंक्रीडितमश्वहेषा
वृहन्ति मत्तद्विपवृंहितानि।
सङ्घर्षयोगादिव मूर्च्छितानि
ह्रादन्निगृह्णन्ति न दुन्दुभीनाम्॥ ८॥

भूरेणुनेति। अत्राहवे रासभोगर्द्दभः तद्वत् धूसरेण ईष त्पाण्डुना। ईषत्पाण्डुस्तु धूसरइत्यमरः। रासभोगर्दभः खरइत्य मरः। भूरेणुना रजसा लोचनानां वर्त्मनि चक्षुर्मार्ग्गे तिरोहिते सति तेजस्विभिः तेजस्विषु वीरेषु उत्सुकानां वीरवरणार्थ मागतानामित्यर्थः। प्रसितोत्सुकाभ्यां तृतीया चेति विकल्पात् तृतीया। सुरसुन्दरीणामह्नि दिवसे एव प्रदोषोरात्रिर्नास्ति अन्धकारवत्त्वात् दृष्टेस्तिरोधानात् रात्रिभ्रमः स्यादिति भावः॥७॥

रथाङ्गेति। रथाङ्गसंक्रीडितं रथचक्रकूजितं अश्वानाञ्च हेषा ह्रेषितानि शब्दितानि। अश्वानां ह्रेषा हेषा च निःस्वन इत्यमरः। वृहन्ति महान्ति मत्तद्विपानां वृंहितानि। वृंहितं करिगर्ज्जितमित्यमरः। सङ्घर्षयोगादिव परस्परस्पर्द्धासम्बन्धादिव मूर्च्छितानि वृद्धिङ्गतानि सन्ति। नपुंसकमनपुंसकेत्यादिना, नपुंसकैकशेषः। दुन्दुभीनां ह्रादं निर्घोषम्। स्वाननिस्वाननिर्ह्राद इत्यमरः। न निगृह्णन्ति न तिरस्कुर्व्वन्ति॥ ८॥

अस्मिन् यशःपौरुषलोलुपाना
मरातिभिः प्रत्युरसङ्क्षतानाम्।
मूर्च्छान्तरायं मुहुरुच्छिनत्ति
नासारशीतङ्करिशीकराम्भः॥ ९ ॥
असृङ्नदीनामुपचीयमानै
र्विदारयद्भिः पदवीं ध्वजिन्याः।
उच्छ्रायमायान्ति न शोणितौघैः
पङ्कैरिवाश्यानघनैस्तटानि ॥ १० ॥

अस्मिन्निति। अस्मिन् रणे यशःपौरुषयोर्लोलुपानां गृध्नूनां अतएव अरातिभिः प्रत्युरसमुरसि। प्रतेरुरसः सप्तमी स्थादिति समासान्तः। क्षतानां विद्धानां सम्बन्धिनं मूर्च्छैवान्तरायोऽरण विघ्नस्तं आसारशीतं वर्षधाराशीतलं। धारासम्पातआसारइत्य मरः। करिणां शीकरएवाम्भः कर्त्तृ मुहुर्नोच्छिनत्ति न नाशयति ॥ ९ ॥

असृगिति। असृङ्नदीनान्तटानि उपचीयमानैरुपचयं नीयमानैः तथा ध्वजिन्याः पदवीं विदारयद्भिः। विदूरयद्भि रिति पाठे विदूरां दूरसञ्चारां कुर्वद्भिः आश्यानाईषत्शुष्काः। संयोगादेरातोधातोर्यण्वतइति श्यायतेर्निष्ठानत्वम्। घनाः सान्द्राः तैराश्यानघनैः शोणितौघैः पङ्कैरिवोच्छ्रायं वृद्धिं नायान्ति न प्राप्नुवन्ति ॥ १० ॥

परीति। इह रणे दन्तिदन्तैः गजदन्तैः परिघट्टते ताडिते वचसि नभसः पतन्ती प्रियायाः अङ्कइव शीता शीतला सुखकरी

परिक्षते वक्षसि दन्तिदन्तैः
प्रियाङ्कशीता नभसः पतन्ती।
नेह प्रमोहम्प्रियसाहसाना
म्मन्दारमाला विरलीकरोति ॥ ११ ॥
निषादिसन्नाहमणिप्रभाघे
परीयमाणे करिशीकरेण।
अर्कत्विषोन्मीलितमभ्युदेति
न खण्डमाखण्डलकार्मुकस्य ॥ १२ ॥
महीभृता पक्षवतेव भिन्ना
विगाह्य मध्यम्परवारणेन ॥
नावर्त्तमानानिनदन्ति भीम
मपान्निधेरापइव ध्वजिन्यः ॥ १३ ॥

मन्दारमाला सुरैर्मुक्तेति शेषः। प्रियं साहसं येषां तेषाम्प्रिय साहसानां यतोगजाभियायिनामिति भावः। प्रमोहम्प्रहारमूर्च्छां न विरलीकरोति न मन्दीकरोति ॥ ११ ॥

निषादीति। करिणां शीकरेण पुष्करतुषारेण परीयमाणे व्याप्यमाने निषादिनोहस्त्यारोहाः। हस्त्यारोहानिषादिनइत्यमरः। तेषां सन्नाहाः कवचानि तेषां मणिप्रभौघे रत्नांशुजाले अर्कस्य त्विषा तेजसा उन्मीलितमुत्पादितमाखण्डलकार्मुकस्येन्द्रधनुषः। आखण्डलः सहस्राक्षइत्यमरः। खण्डं नाभ्युदेति ॥ १२ ॥

महीति। पक्षवता महीभृता मैनाकेनेव परवारणेन शत्रुगजेन मध्यं विगाह्य प्रविश्य भिन्नाः चेभिताः ध्वजिन्यः सेनाः।

महारथानामतिदन्त्यनीक
मधिस्यदस्यन्दनमुत्थितानाम्।
आमूललूनैरतिमन्युनेव
मातङ्गहस्तैर्व्रियते न पन्थाः ॥ १४ ॥
धृतोत्पलापीड इव प्रियायाः
शिरोरुहाणां शिथिलः कलापः।
न वर्हभारः पतितस्य शङ्को
र्निषादिवक्षस्थलमातनोति ॥ १५ ॥

ध्वजिनी वाहिनी सेनेत्यमरः। अपां निधेस्सागरस्य आप इव। आवर्त्तमानाः भ्रमन्त्यः सत्यः। स्यादावर्त्तोऽम्भसां भ्रम इत्यमरः। भीमं न निनदन्ति ॥ १३ ॥

महारथानामिति। प्रतिदन्त्यनीकं दन्तिसैन्यं प्रति। अनीकन्तु रणे सैन्ये इति विश्वः। अधिस्यदा महारयाः स्यन्दनाः रथाः यत्र तत्तथा। रंहस्तरसी तु रयः स्यद इत्यमरः। उत्थितानां प्रस्थितानां महारथानां रथिकविशेषाणां। तदुक्तं। आत्मानं सारथिं चाश्वान् रक्षन् युध्येत यो नरः। स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदा इति लक्षणात्। पन्था मार्गः आमूलालूनैश्छिन्नैः मातङ्गहस्तै र्नागकरैरतिमन्युना अतिक्रोधेनेव न व्रियते न निरुध्यते ॥ १४ ॥

धृतेति। पतितस्य वक्षसि मग्नस्य शङ्कोस्तोमरस्य सम्बन्धी। वा पुंसि शल्यं शङ्कुर्ना सर्व्वला तोमरोऽस्त्रियामित्यमरः। वर्हभार

उज्झत्सु संहार इवास्तसङ्ख्य
मह्नाय तेजस्विषु जीवितानि।
लोकत्रयास्वादनलोलजिह्वं
न व्याददात्याननमत्र मृत्युः ॥ १६ ॥
इयञ्च दुर्व्वारमहारथाना
माक्षिप्य कीर्त्तिम्महतां बलानाम्।
शक्तिर्ममावस्यति हीनयुद्धे
सौरीव ताराधिपधाम्नि दीप्तिः ॥ १७ ॥

स्तन्मूलबद्धोलाञ्छनपिञ्छकलापः धृतः उत्पलापीडः कुवलय शेखरोयस्मिन् सः प्रियायाः सम्बन्धी शिथिलः स्रस्तः शिरोरुहाणां कलापः केशपाशइव निषादिनो हस्त्यारोहस्य वक्षस्थलं नातनोति न व्याप्नोति ॥ १५ ॥

उज्झत्स्विति। अत्राहवे संहारे कल्पान्ते इव तेजस्विषु वीरेषु अस्तसङ्ख्यमसङ्ख्यं यथा तथा अह्नाय झटिति। द्राक् झटि त्यञ्जसाह्नायेत्यमरः। जीवितानि उज्झत्सु त्यजत्सु सत्सु मृत्युर्लोक त्रयस्यास्वादने भक्षणे लोला लुब्धा जिह्वा यस्मिन् तदाननं न व्या ददाति न विवृणोति। आङोदोनास्यविहरणइत्यनास्यविहरण इतिनिषेधान्नात्मनेपदम् ॥ १६ ॥

सत्यमेव तथापि किं ते कुत्सितत्वमाह। इयमिति। इयं मम शक्तिश्च दुर्वाराः पराक्रमिणोमहारथायेषु तेषां महतां बलानां वीर्य्यमाक्षिप्य निरस्य ताराधिपधाम्नि चन्द्रतेजसि सूर्य्यस्येय

माया स्विदेषा मतिविभ्रमो वा
ध्वस्तं नु मे वीर्य्यमुताहमन्यः।
गाण्डीवमुक्ता हि तथा पुरेव
पराक्रमन्ते न शराः किराते ॥ १८ ॥
पुंसः पदं मध्यममुत्तमस्य
द्विधेव कुर्व्वन् धनुषः प्रणादैः।
नूनन्तथा नैष यथास्य वेषः
प्रच्छन्नमप्यूहयते हि चेष्टा ॥ १९ ॥

सौरी। सूर्य्यतिष्यागस्त्यमत्स्यानां य उपधाया इति स्त्रियां ङीप् यकारस्य लोपः। दीप्तिरिव हीनयुद्धे किरातरणे अपस्यति अव सीदति। एतच्च विरुद्धमत्यद्भुतं चेति भावः। षोऽन्तकर्म्मणीति धातोर्लट् ॥ १७ ॥

मायेति। एषा शक्तिह्रासरूपा माया स्वित् देवताक्षोभणं नाम मतिविभ्रमो बुद्धिविपर्य्ययो वा। अथवा मे वीर्य्यं ध्वस्तं नष्टं नु उताहमन्यः अर्ज्जुनो न वा। कुतः हि यस्मात् गाण्डीवमुक्ताः मे शराः पुरा यथा पूर्व्वं परिपन्थिष्विवेत्यर्थः। किराते न पराक्रमन्ते अप्रतिबन्धेन न प्रवर्त्तन्ते। उपपराभ्यामिति आत्मनेपदं वृत्तिरप्रतिबन्धः ॥ १८ ॥

पुंस इति। किञ्च उत्तमस्य पुंसः पुरुषोत्तमस्य मध्यमं पदमाकाशन्धनुषः प्रणादैः। उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम्। द्विधा कुर्व्वन्निव विदारयन्निव स्थितः स एष किरातो नूनन्तथा

धनुः प्रबन्धध्वनितं रुषेव
सकृद्विकृष्टा विततेव मौर्वी ।
सन्धानमुत्कर्षमिव व्युदस्य
मुष्टेरसम्भेद इवापवर्गे ॥ २० ॥
अंसाववष्टब्धनतौ समाधिः
शिरोधरायारहितप्रयासः ।
धृताविकारास्त्यजता मुखेन
प्रसादलक्ष्मीः शशलाञ्छनस्य ॥ २१ ॥

तथाभूतेन । अस्य पुरुषस्य यथा यथाभूतो विषेोवर्त्तत इति शेषः । अतोनायं किरातस्वरूप इत्यर्थः । कुतो हि यस्मात् चेष्टा व्यापारः प्रच्छन्नमपि निगूढमपि स्वरूपं ऊहयते तर्कयते तस्य स्वभावादव्यभिचारादिति भावः ॥ १९ ॥

अथ चतुर्भिश्चेष्टामेवाचष्टे । धनुरिति । धनुः रुषेव प्रबन्धेनाविच्छेदेन ध्वनितं । ध्वनतेः कर्त्तरि क्तः । मौर्वी च सकृद्विकृष्टा विततेव एकवाराकर्षणादेव विततेव स्थिता सन्धानं बाणसन्धानं उत्कर्षमुद्धरणं व्युदस्येव वर्जयित्वा किमु कृतमिति शेषः अपवर्गे बाणमोचेऽपि मुष्टेरसम्भेदोऽसम्भेदनमिव मुष्टिबन्धं विनैव बाणमोक्षः कृतइव इति हस्तलाघवोक्तिः ॥ २० ॥

अंसाविति । किञ्च अंसौ अवष्टब्धौ स्थिराववस्थापितौ च नतौ चावष्टब्धनतौ शिरोधरायाः कन्धरायाः समाधिः संस्थानविशेषस्य रहितः प्रयासोयस्य स तथोक्तः निःप्रयास इत्यर्थः ।

प्रहीयते कार्य्यवशागतेषु
स्थानेषु विष्टब्धतया न देहः ।
स्थितप्रयातेषु ससौष्ठवश्च
लक्ष्येषु पातः सदृशः शराणाम् ॥ २२ ॥
परस्य भूयान्विवरेऽभियोगः
प्रसह्य संरक्षणमात्मरन्ध्रे ।
भीष्मेऽप्यसम्भाव्यमिदं गुरौ वा
न सम्भवत्येव वनेचरेषु ॥ २३ ॥

तया विकारांस्त्यजता अस्तत्वान्निर्विकारेणेत्यर्थः । मुखेन शश लाञ्छनस्य इन्दोः प्रसादलक्ष्मीर्धृता । असम्भवत्सम्बन्धो निदर्शनालङ्कारः ॥ २१ ॥

प्रहीयतइति । तस्य देहः कार्य्यवशेन प्रयोजनवशेनागतेषु स्थानेषु आलीढादिस्थानकेषु विष्टब्धतया स्थिरतया कर्त्या न प्रहीयते न त्यज्यते किन्तु स्थिरइव तिष्ठतीत्यर्थः । सुष्ठु भावः सौष्ठवं लाघवं । उद्गात्रादित्वादञ्प्रत्ययः । तेन सह वर्त्तमानः ससौष्ठवः शराणां पातश्च स्थितान्यचलानि प्रयातानि चलानि तेषु स्थितप्रयातेषु विषये चलाचलेषु लक्ष्येषु सदृशः एकरूपः ॥ २२ ॥

परस्येति । किञ्च परस्य विवरे रन्ध्रे । अल्पेऽपीति शेषः । भूयान् भूयिष्ठः प्रसह्य झटिति अभियोगः शाठ्लम्परस्य रन्ध्र शाठ्लात् प्रहारोद्योगइत्यर्थः । आत्मरन्ध्रे विवरे अनल्पेऽपीति

अप्राकृतस्याहवदुर्म्मदस्य
निवार्य्यमस्यास्त्रबलेन वीर्य्यम् ॥
अल्पीयसोऽप्यामयतुल्यवृत्ते
र्म्महापकाराय रिपोर्व्विवृद्धिः ॥ २४ ॥

॥ कुलकम् ॥

स सम्प्रधार्य्येदमहार्य्यसारः
सारं विनेष्यन्सगणस्य शत्रोः ।
प्रस्वापनास्त्रं द्रुतमाजहार
ध्वान्तं घनानद्ध इवार्द्धरात्रः ॥ २५ ॥

शेषः । प्रसह्य झटिति संरक्षणं गोपनं इदं द्वयमीशेऽपि गुरौ वा द्रोणे वाप्यसम्भाव्यन्दुर्व्वितर्क्कं वनेचरेषु न सम्भवत्येव अतोनायं किरातः किन्त्वेष तिरोहितवेषः कोऽप्यमानुषः अपुरुषइति भावः ॥ २३ ॥

अप्राकृतस्येति । अप्राकृतस्य उक्तरीत्या असाधारणस्य आहव दुर्म्मदस्य रणमत्तस्य अस्य किरातस्य वीर्य्य तेजः अस्त्रबलेन दिव्यशस्त्रमहिम्ना निवार्य्यन्निवारणीयं अन्यथा अनिवार्य्यत्व मस्येति भावः । तथाहि अल्पीयसोऽपि अल्पस्यापि आमयतुल्य वृत्तेः रोगसमानविक्रियस्य । रोगव्याधिगदामयाइत्यमरः । वृद्धिः महापकाराय किन्तु अयं महानुभावइति भावः ॥ २४ ॥

स इति । अहार्य्यसारः अनिवार्य्यवीर्य्यः सोऽर्ज्जुनः एवं सम्प्रधाय निर्धार्य्य सगणस्य सानुगस्य शत्रोः सारं सत्त्वं विनेष्यन् ।

प्रसक्तदावानलधूमधूम्रा
निरुन्धती धाम सहस्ररश्मेः ।
महावनानीव महातमिस्रा
छाया ततानेशवलानि काली ॥ २६ ॥

॥ युग्मम् ॥

आसादिता तत्प्रथमम्प्रसह्य
प्रगल्भतायाः पदवीं हरन्ती ।
सभेव भीमा विदधे गणाना
निद्रानिरासप्रतिभागुणस्य ॥ २७ ॥

अपनेष्यन् प्रस्थाप्यते भाय्यते अनेनेति प्रस्थापनन्तदेवास्त्रं घनारब्धः मेघावरुद्धः अर्द्धरात्रः निशीथः । अर्द्धरात्रनिशीथौ द्वावित्यमरः । अर्द्धं नपुंसकमिति समासः अहः सर्वैकदेशेत्यादिना समासान्तः रात्राह्नाहाः पुंसीति पुल्लिङ्गता । ध्वान्तमिवा अहारात्रकर्ष ॥ २५ ॥

प्रसक्तेति । प्रसक्तः सन्ततोयोदावानलधूमस्तद्धूम्रा धूसरा सहस्ररश्मेर्धाम तेजोनिरुन्धती आवृण्वती काली कृष्णवर्णा । जानपदेत्यादिना ङीष् । छाया कान्तिः । ईशबलानि महातमिस्रा महती तमःसन्ततिः । तमिस्रा तु तमस्ततिरिति विश्वः । महावनानीव ततान व्यानशे ॥ २६ ॥

आसादितेति । तदेवासादनम्प्रथमन्तत्प्रथमं यथा तथा प्रसह्य आसादिता कल्पिता प्रगल्भतायाः व्यवहारधार्ष्ट्यस्य

गुरुस्थिराण्युत्तमवंशजत्वा
द्विज्ञातसाराण्यनुशीलनेन ।
केचित्समाश्रित्य गुणान्वितानि
सुहृत्कुलानीव धनूंषि तस्थुः ॥ २८ ॥
कृतान्तदुर्वृत्तइवापरेषा
म्पुरः प्रतिद्वन्द्विनि पाण्डवास्त्रे ।
अतर्कितम्पाणितलान्निपेतुः
क्रियाफलानीव तदायुधानि ॥ २९ ॥

पदवीं हरन्ती भीमा भयङ्करी निद्रा उक्तविशेषणा सभा संसदिव गणानाम्प्रतिभा प्रज्ञा शक्तिः सैव गुणः तस्य निरास म्प्रतिभाक्षयं विदधे चक्रे ॥ २७ ॥

० गुर्व्वीति । केचिदुत्तमवंशजत्वात् वंशोवेणुः कुलं च । वंशोवेणौ कुले चेति विश्वः । गुरूणि महान्ति स्थिराणि दृढानि च गुरुस्थिराणि अनुशीलनेन परिचयबलेन विज्ञातः सारोबलं येषां तानि गणैः शौर्य्याभिः शौर्य्यादिभिश्चान्वितानि धनूंषि सुहृत्कुलानि मित्रकुलानीव समाश्रित्य तस्थुः धनूंष्यवष्टभ्य निदध्युरित्यर्थः ॥ २८ ॥

कृतान्तेति । कृतान्तदुर्वृत्ते दैवदुश्चेष्टिते इव । कृतान्तोयम सिद्धान्तदैवाकुशलकर्मस्विति विश्वः । पाण्डवास्त्रे पुरः प्रति द्वन्द्विनि सति प्रतिकूलवर्त्तिनि सति तदा तस्मिन् काले अपरेषां आयधानि क्रियाफलानीव कृष्यादिफलानीव अतर्कितमविचारित मेव पाणितलान्निपेतुः ॥ २९ ॥

अंसस्थलैः केचिदभिन्नधैर्य्याः
स्कन्धेषु संश्लेषवतान्तरूणाम् ।
मदेन मीलन्नयनाः सलील
न्नागाइव स्रस्तकरानिषेदुः ॥ ३० ॥
तिरोहितेन्दोरथ शम्भुमूर्द्ध्नः
प्रणम्यमानन्तपसान्निवासैः ।
सुमेरुशृङ्गादिव विम्बमार्क्क
पिशङ्गमुच्चैरुदियाय तेजः ॥ ३१ ॥
छायां विनिर्द्धूय तमोमयीन्तां
तत्त्वस्य संवित्तिरिवापविद्याम् ।
ययौ विकाशं द्युतिरिन्दुमौले
रालोकमभ्यादिशती गणेभ्यः ॥ ३२ ॥

अंसेति । अभिन्नधैर्य्यास्तदानीमप्यच्युतधैर्य्याः केचित् अंस स्थलैरंसभागैः सह संश्लेषवतां तरूणां स्कन्धेषु प्रकाण्डेषु मदेन मीलन्ति नयनानि येषान्ते नागाः गजाइव स्रस्तकराः स्रस्तहस्ताः सन्तोनिषेदुः निषसाः ॥ ३० ॥

तिरोहितेति । अथ तिरोहितेन्दोः किरातमायया छन्न चन्द्राच्छम्भुमूर्द्ध्नः सकाशात्सुमेरुशृङ्गात् अर्क्कसम्बधि विम्बमिव तप सान्निवासैः तापसैः प्रणम्यमानं अभिवन्द्यमानम्पिशङ्गन्तेजः उच्चै रूर्द्ध्वं उदियाय प्रकटीबभूव तत्र तत्राटन्निति भावः ॥ २१ ॥

छायामिति । इन्दुमौलेर्द्युतिः कान्तिः तत्त्वस्य संवित्तिर्ज्ञान न्तत्त्वज्ञानं अपविद्यामविद्यामिव तान्तमोमयीञ्छायां निद्रां विनिर्धूय

त्विषान्ततिः पाटलिताम्बुवाहा
सा सर्व्वतः पूर्व्वसरीव सन्ध्या ।
निनाय तेषान्द्रुतमुल्लसन्ती
विनिद्रतां लोचनपङ्कजानि ॥ ३३ ॥
पृथग्विधान्यस्त्रविरामबुद्धाः
शस्त्राणि भूयः प्रतिपेदिरे ते ।
मुक्ताविताने न बलाहकानां
ज्योतींषि रम्याइव दिग्विभागाः ॥ ३४ ॥

निरस्य गणेभ्यः आलोकं वस्तुप्रकाशञ्चिरं अत्या दिशती वितरन्ती विकाशं विस्तारं ययौ ॥ ३२ ॥

त्विषामिति । सर्व्वतः पाटलिताः पाटलीकृताः अम्बुवाहाः यया सा तथोक्ता त्विषान्तेजसान्ततिः पूर्व्वा सरतीति पूर्व्वसरी । पूर्व्वे कर्त्तरि इति टप्रत्यये ङीप् । सर्व्वनाम्नोवृत्तिमात्रे पुंवद्भावइति पूर्व्वाशब्दस्य पुंवद्भावः । सन्ध्या प्रातःसन्ध्येव उल्लसन्ती प्रसरन्ती तेषाङ्गणानां विलोचनपङ्कजानि द्रुतं विनिद्रतां विकासन्निनाय ॥ ३३ ॥

पृथगिति । अस्त्रविरामेण प्रस्वापनास्त्रोपरमेण बुद्धा विनिद्रास्ते गणाबलाहकानां वितानेन मेघपटलेन मुक्ताअतएव रम्या दिग्विभागा दिगन्ताः ज्योतींषि नक्षत्राणीव । ज्योतिस्तारा राश्मि भाज्वालादृक्प्रकाशरमात्मस्विति वैजयन्ती । पृथग्विधानि नाना विधानि शस्त्राणि भूयः प्रतिपेदिरे जगृहुरित्यर्थः ॥ ३४ ॥

द्यौरुन्ननामेव दिशः प्रसेदुः
स्फुटं विसस्रे सवितुर्म्मयूखैः ।
क्षयङ्गतायामिव यामवत्यां
पुनः समीयाय दिनन्दिनश्रीः ॥ ३५ ॥

महास्त्रदुर्गे शिथिलप्रयत्ने
दिग्वारणेनेव परेण रुग्णे ।
भुजङ्गपाशान् भुजवीर्य्यशाली
निबन्धनाय प्रजिघाय जिष्णुः ॥ ३६ ॥

द्यौरिति । तदा यामवत्यां रात्रौ क्षयङ्गतायां विभातायामिव द्यौरन्तरिक्षमुन्ननामेव ऊर्द्धमुत्पपातेवेत्युत्प्रेक्षा । दिशः प्रसेदुः सवितुर्मयूखैः स्फुटं स्पष्टं विसस्रे विसृतम् । भावे लिट् । दिनश्रीः पुनः घस्रकान्तिः दिनं समीयाय सञ्जगाम । अत्र वैयधिकरण्येन गुणक्रिययोः समुच्चयेन समुच्चयोऽलङ्कारः तस्य च समुन्नमनोत्प्रेक्षयेवशब्दवाच्ययानुप्रवेशलक्षणसङ्करः । दिक्प्रसादो गुणः शेषाः क्रियाः ॥ ३५ ॥

महास्त्रेति । भुजवीर्य्यशाली जिष्णुरर्जुनो महास्त्रमस्वापनाख्यन्तद्दुर्गमिव तस्मिन्महास्त्रदुर्गे दिग्वारणेन दिग्गजेनेव परेण शत्रुणा शिथिलप्रयत्नमल्पप्रयासं यथा तथा रुग्णे भग्ने सति । रुजोभङ्गे . कर्म्मणि क्तः ओदितश्चेति निष्ठातकारस्य नत्वम् । प्रबन्धनाय प्रकर्षेण बन्धनाय भुजङ्गा एव पाशास्तान् प्रजिघाय प्रहितवान् ॥ ३६ ॥

जिह्वेति । लसन्त्यस्तडिल्लोला विद्युच्चञ्चला विषानला विषाग्नयो येषु तानि जिह्वाशतान्यजस्रं उल्लसयन्ती चलयन्ती । भुजगे

जिह्वाशतान्युल्लसयन्त्यजस्रं
लसत्तडिल्लोलविषानलानि ।
त्रासान्निरस्ताभुजगेन्द्रसेना
नभश्चरैस्तत्पदवीं विवव्रे ॥ ३७ ॥

दिङ्नागहस्ताकृतिमुद्वहद्भि
र्भोगैः प्रशस्तासितरत्ननीलैः ।
रराज सर्प्पावलिरुल्लसन्ती
तरङ्गमालेव नभोऽर्णवस्य ॥ ३८ ॥

निःश्वासधूमैः स्थगितांशुजालः
फणावतामुत्फणमण्डलानाम् ।
गच्छन्निवास्तं वपुरभ्युवाह
विलोचनानां सुखमुष्णरश्मिः ॥ ३९ ॥

न्द्रसेना त्रासात् भयात् । नभश्चरैर्निरस्ता त्यक्ता तेषान्नभश्चराणा
न्पदवीं मार्ग्गं विवव्रे विशेषेण रुरोध ॥ ३७ ॥

दिङ्नागेति । दिङ्नागहस्ताकृतिमुद्वहद्भिः दिक्करिकरा
कारैः तथा प्रशस्तानि समीचीनान्यसितरत्नानि इन्द्रनीलमणयः
तद्वन्नीलैर्भोगैः कायैरुपलक्षिता सर्प्पावलिरुल्लसन्ती प्रक्षुभ्यन्ती
नभएव अर्णवस्तस्य तरङ्गमालेव रराज । रूपकोत्थापितेय
मुत्प्रेक्षा ॥ ३८ ॥

निःश्वासेति । उष्णरश्मिरस्तङ्गच्छन्निवोन्नमितानि फणा
मण्डलानि येषां तेषां फणावतां सर्प्पाणां निःश्वासेषु ये धूमास्तैः

प्रतप्तचामीकरभासुरेण
दिशः प्रकाशेन पिशङ्गयन्त्यः ।
निश्चक्रमुः प्राणहरेक्षणानां
ज्वालामहोल्का इव लोचनेभ्यः ॥ ४० ॥
आच्छिन्नसम्पातमपेतशोभ-
मुद्वह्निधूमाकुलदिग्विभागम् ।
वृतन्नभो भोगिकुलैरवस्था-
म्परोपरुद्धस्य पुरस्य भेजे ॥ ४१ ॥

स्थगितमाच्छादितमंशुजालं यस्य स तथोक्तः अतएव विलोचनानां सुखं सुखकरं वपुरभ्युवाह ॥ ३९ ॥

प्रतप्तेति । प्राणहराणि ईक्षणानि येषान्तेषां प्राणहरेक्षणानां दृष्टिविषाणां लोचनेभ्यः । लोचनन्नयनन्नेत्रमित्यमरः । प्रतप्तं यच्चामीकरं सुवर्णन्तद्वद्भासुरेण । भञ्जभासमिदोघुरजिति घुरच् प्रत्ययः । प्रकाशेन तेजसा दिशः पिशङ्गयन्त्यः ज्वालामहोल्का इव निश्चक्रमुः निर्जग्मुः ॥ ४० ॥

आच्छिन्नेति । आच्छिन्नः प्रतिषिद्धः सम्पातः सञ्चारो यस्मिन् तत्सिद्धानाम्पक्षिणाञ्चेति शेषः अपेता शोभा यस्मात्तत् अपेतशोभं गतश्रीकं उद्गतवह्निधूमाभ्यां आकुलाः दिग्विभागा दिगन्ताः यस्मिन् तत् भोगिकुलैस्सर्पकुलैर्वृतमावृतं नभः परोपरुद्धस्य शत्रुवेष्टितस्य पुरस्यावस्थामिवावस्थान्दशां भेजे उक्तरीत्या तत्साधर्म्यं प्राप्त मित्यर्थः । निदर्शनालङ्कारः ॥ ४१ ॥

तमाशु चक्षुःश्रवसां समूह
मन्त्रेण तार्क्ष्योदयकारणेन ।
नेता नयेनेव परोपजाप
न्निवारयामास पतिः पशूनाम् ॥ ४२ ॥
प्रतिघ्नतीभिः कृतमीलितानि
द्युलोकभाजामपि लोचनानि ।
गरुत्मतां सन्ततिभिर्विहायः
क्षणप्रकाशाभिरिवावतेने ॥ ४३ ॥
ततः सुपर्णव्रजपक्षजन्मा
नानागतिर्म्मण्डलयन् जवेन ।
जरत्तृणानीव वियन्निनाय
वनस्पतीनाङ्गहनानि वायुः ॥ ४४ ॥

तमिति । पशूनाम्पतिः शिवः तञ्चक्षुःश्रवसां सर्प्पाणां समूहन्तार्क्ष्योदयकारणेन गरुडाविर्भावहेतुना मन्त्रेण नेता नायको नयेन नीत्या परेषामुपजापम्परोपजापम्पराकृतं स्वमण्डलभेदमिव । भेदोपजापावुपधेत्यमरः । आशु निवारयामास ॥ ४२ ॥

प्रतीति । द्युलोकभाजामपि अनिमेषाणामपि कृतं-मीलनं निमेषो येषान्तानि लोचनानि दृष्टीः प्रतिघ्नतीभिः प्रतिबध्नतीभिः । हन्तेः शतरि ङीप् । गरुत्मतान्तार्क्ष्याणां संहतिभिः समूहैः क्षणप्रकाशाभिर्विद्युद्भिरिव तासां सौवर्णत्वादिति भावः । विहायो ऽन्तरिक्षं अवतेने व्यानशे ॥ ४३ ॥

ततइति । ततः सुपर्णव्रजानान्तार्क्ष्यकुलानाम्पक्षेभ्याजन्म यस्य स नानागतिः विचित्रगतिर्वायुर्वनस्पतीनां वृक्षाणां गहनानि

मनःशिलाभङ्गनिभेन पश्चा
न्निरुध्यमानन्निकरेण भासाम् ।
व्यूढैरुरोभिश्च विनुद्यमान
न्नभः ससर्प्पेव पुरः खगानाम् ॥ ४५ ॥
दरीमुखैरासवरागताम्रं
विकासि रुक्मच्छदधाम पीत्वा ।
जवानिलाघूर्ण्णितसानुजालो
हिमाचलः क्षीव इवाचकम्पे ॥ ४६ ॥

जरत्तृणानि जीर्णतृणानीव जवेन मण्डलयन् भ्रमयन् वियद्न्तरिक्षन्निनाय ॥ ४४ ॥

मनःशिलेति । मनःशिला धातुविशेषः तस्याः भङ्गः छेदः तन्निभेन तत्सदृशेन भासां निकरेण कान्तिपुञ्जेन पश्चाद्भागे निरुध्यमानमाव्रियमाणं व्यूढैर्विशालैरुरोभिर्वक्षोभिश्च । उरो वत्सञ्च वक्षश्चेत्यमरः। विनुद्यमानम्प्रेर्य्यमाणं नभः खगानां गरुडानां पुरः ससर्प्पेव ससारेव । उत्तरोत्तरदेशतिरोधानेन गच्छतां खगानां अपूर्व्वोऽपि पुरोभागः सादृश्यात्पूर्व्ववदुपलभ्यमानतया नभस एव छेदनात्पुरः ससर्प्पेव इत्युत्प्रेक्षालङ्कारः ॥ ४५ ॥

दरीति । जवानिलेन आघूर्ण्णितानि भ्रमितानि सानुजालानि यस्य स हिमाचलः आसवस्य रागो रक्तता तद्वत्ताम्रं गुणयोरेवोपमानोपमेयभावः । विकासि विकस्वरं रुक्मच्छदाः सुवर्णपक्षास्तार्क्ष्यास्तेषां धाम तेजो दरीभिर्मुखैरिव दरीमुखैः पीत्वा क्षीवो मत्त इवाचकम्पे आचचाल उपमाव्यापितेयमुत्प्रेक्षा ॥ ४६ ॥

प्रवृत्तनक्तंदिवसन्धिदीप्तै
र्नभःस्थलं गाञ्च पिशङ्गयद्भिः।
अन्तर्हिताक्कैः परितः पतद्भि
श्छायाः समाचिक्षिपिरे वनानाम् ॥ ४७ ॥

स भोगिसङ्घः शममुग्रधाम्नां
सैन्येन निन्ये विनतासुतानाम्।
महाध्वरे विध्यपचारदोषः
कर्म्मान्तरेणेव महोदयेन ॥ ४८ ॥

प्रवृत्तेति। नक्तञ्च दिवा च नक्तन्दिवं। अचतुरेत्यादिना सप्तम्यर्थे द्वयोरप्यव्यययोर्द्वन्द्वैकवद्भावनिपाते समासान्तः। लक्षणया लक्षोरात्रसमाववाचौ। प्रवृत्तः प्रादुर्भूतोयोनक्तंदिवस्य सन्धिः सन्ध्या तद्वद्दीप्तैः शोभितैः नभस्तलं गाञ्चुवञ्च पिशङ्गयद्भिः पिशङ्गीकुर्व्वद्भिः अन्तर्हितः आच्छादितोऽर्कोयैस्तैः पतद्भिः पक्षिभिः परितः सर्व्वतोवनानां छायाः समाचिक्षिपिरे समाक्षिप्ता अन्तर्व्वह्निस्य तेजःप्रकाशात् क्वापि अन्तर्हिता इत्यर्थः ॥ ४७ ॥

सइति। स भोगिसङ्घः सर्प्पसमूहउग्रधाम्नान्तेजस्विनां विनतासुतानान्तार्क्ष्यपक्षिणां सैन्येन महाध्वरे महाक्रतौ विध्यपचारदोषः कर्म्मस्खलनदोषः महोदयेन महासामर्थ्येन अथवा महता फलेन तन्मूलेन प्रकृतक्रियासिद्धेरिति कर्म्मान्तरेण प्रायश्चित्तेनेव शमं शान्तिं निन्ये प्रापितः ॥ ४८ ॥

साफल्यमिति। अस्ते सर्प्पास्ते भाग्ये प्राग्भवीये शुभे कर्म्मणीव रिपुपौरुषस्य रिपुपराक्रमस्य साफल्यं कृत्वा अपवर्गमवसानं

साफल्यमस्त्रे रिपुपौरुषस्य
कृत्वा गते भाग्य इवापवर्गम् ।
अनिन्धनस्य प्रसभं समन्युः
समाददेऽस्त्रं ज्वलनस्य जिष्णुः ॥ ४९ ॥
ऊर्द्ध्वन्तिरश्चीनमधश्च कीर्णैं
र्ज्वालासटैर्लङ्घितमेघपङ्क्तिः ।
आयस्तसिंहाकृतिरुत्पपात
प्राण्यन्तमिच्छन्निव जातवेदाः ॥ ५० ॥

समाप्तिङ्गते सति स्वनिवृत्त्या परसाफल्यात् सफलीकरणोपचारः समन्युः सक्रोधो जिष्णुरर्ज्जुनः अनिन्धनस्य इन्धनं विनैवोत्पादितस्य ज्वलनस्य ज्वलनप्रदीपकमस्त्रमाग्नेयास्त्रं प्रसभं शीघ्रं समाददे जग्राह ॥ ४९ ॥

ऊर्द्ध्वमिति । ऊर्द्ध्वन्तिरश्चीनं तिर्यक् । विभाषाञ्चेरदिक् स्त्रियामिति खप्रत्ययः । अधश्च कीर्णैः विसृतैः ज्वाला एव सटाः केसराः । सटा जटा केसरयोरिति विश्वः । तैर्लङ्घितमेघपङ्क्तिः अतिक्रान्तजलदालिः आयस्तस्य लङ्घनोद्यतस्य सिंहस्येवाकृतिर्यस्य स जातवेदा अग्निः प्राण्यन्तमाप्राणिनां संहारं इच्छन्निवोत्पपात ॥ ५० ॥

भित्त्वेति । भाभिस्तेजोभिः सवितुर्मयूखान् किरणान् । किरणोस्रमयूखांशवित्यमरः । भित्त्वेव अभिहत्येव विष्वक् समन्तात् विसृताः स्फुलिङ्गा यस्य सः स्फुलिङ्गादयस्य मयूखाभिघातहेतुकत्वमभेप्रयते । विप स्फुलिङ्गोऽग्निकण इत्यमरः ।

भित्त्वेव भाभिः सवितुर्म्मयूखान्
जज्वाल विष्वग्विहतस्फुलिङ्गः ।
विशीर्य्यमाणाश्मनिनादधीरं
ध्वनिं वितन्वन्नकृशः कृशानुः ॥ ५१ ॥
चयानिवाद्रीनिव तुङ्गशृङ्गान्
क्वचित्पुराणीव हिरण्मयानि ।
महावनानीव च किंशुकाना
न्ततान वह्निः पवनानुवृत्त्या ॥ ५२ ॥

अकृशोऽतनुः कृशानुः वह्निः विशीर्य्यमाणस्य विदलतोऽश्मनो निनादमिव धीरमुद्धतं ध्वनिं वितन्वन् जज्वाल ॥ ५१ ॥

चयानिति । वह्निः पवनानुवृत्त्या वायुवशेन चयानिव हिरण्मयान्प्राकारानिव । चयः समूहे प्राकार इति विश्वः । तुङ्गशृङ्गानद्रीनिव क्वचित् हिरण्मयानीति दाण्डिनायनेत्यादिना निपातनात्साधुः । पुराणि नगराणीव तथा किंशुकानाम्पलाश तरूणां । पलाशे किंशुकः पर्णइत्यमरः । महावनानीव पुष्पितानीति भावः । ततान वितस्तार तदाकारेण जज्वालेत्यर्थः ॥ ५२ ॥

मुहुरिति । सान्द्राञ्जनश्यामरुचः घनकज्जलश्यामरुचः पयोदाः मुहुश्चलन्त्यश्च ताः पल्लवलोहिन्यो लोहितवर्णाश्च ताभिश्चलत्पल्लवलोहिनीभिः । वर्णादनुदात्तात्तोपधात्तोनइति ङीप् । तकारस्य नकारः । शिखिनोऽग्नेरुच्चैरुन्नताभिः शिखाभिः ज्वालाभिरवलीढाः दग्धाइत्यर्थः । अतएव तलेषु अधोभागेषु मुक्तविशदा

मुहुस्खलत्पल्लवलोहिनीभि
रुच्चैः शिखाभिः शिखिनोवलीढाः ।
तलेषु मुक्ताविशदाबभूवुः
सान्द्राञ्जनश्यामरुचः पयोदाः ॥ ५३ ॥

लिलिक्षतीव क्षयकालरौद्रे
लोकं विलोलार्च्चिषि लोहिताश्वे ।
पिनाकिना हूतमहाम्बुवाह
मस्त्रं पुनः पाशभृतः प्रणिन्ये ॥ ५४ ॥

ततोधरित्रीधरतुल्यरोधस
स्तडिल्लतालिङ्गितनीलमूर्त्तयः ।
अधोमुखाकाशसरिन्निपातिनी
रपः प्रसक्तं मुमुचुः पयोमुचः ॥ ५५ ॥

मौक्तिकधवलाबभूवुः जलसंशोषणादिति भावः । अधः स्वरूपयो रस्त्री तलमित्यमरः ॥ ५३ ॥

लिलिक्षतीति । क्षयकालरौद्रे कल्पान्तकालभयावहे विलोलार्च्चिषि चलज्ज्वाले लोहिताश्वे ज्वलने । लोहिताश्वोवायुस खेत्यमरः । लोकं लिलिक्षति लेढुमिच्छति सति जिघत्सति सतीव । लिहेः सन्नन्तात् शतृप्रत्ययः । पिनाकिना पुनः हूताः आहूताः आकारिताः महाम्बुवाहाः येन तत्पाशभृतोवरुणस्यास्त्रं प्रणिन्ये प्रयुक्तम् ॥ ५४ ॥

ततइति । ततोवरुणास्त्रप्रयोगानन्तरञ्चरित्रीधरतुल्यरोधसः पर्व्वतसमप्रान्ताः । रोधः स्यात्प्रान्तकूलयोरिति विश्वः तडि

पराहतध्वस्तशिखे शिखावतो
वपुष्यधिक्षिप्तसमिद्धतेजसि ।
कृतास्पदास्तप्त इवायसि ध्वनि
म्पयोनिपाताः प्रथमे वितेनिरे ॥ ५६ ॥
महानले भिन्नसिताभ्रपातिभिः
समेत्य सद्यः क्रथनेन फेनताम् ।
व्रजद्भिरार्द्रेन्धनवत्परिक्षय
जलैर्वितेने दिवि धूमसन्ततिः ॥ ५७ ॥

लताभिरालिङ्गितानीलमूर्त्तयोनीलाङ्गानि येषां ते पयोमुचो मेघाः अधोमुखा आकाशसरिदिव निपतन्तीत्यधोमुखाकाशसरिन्निपातिनीः। कर्त्तर्युपमानइति णिनिः । अपो जलानि प्रसक्तं अनुबन्धं अविच्छिन्नं यथा तथा मुमुचुः । इतः प्रभृति वंशस्थवृत्तम् ॥ ५५ ॥

पराहतेति । पराहताः अभिहताः अतोध्वस्तानिर्व्वापिताः शिखाज्वाला यस्य तस्मिन्पराहतध्वस्तशिखे । अधिक्षिप्तं प्रहारितं अतः समिद्धं झटिति प्रदीप्तन्तेजो यस्य तस्मिन् शिखावतोऽग्नेः वपुषि तप्ते अयसि लौहइव कृतास्पदाः कृतस्थितयः । आस्पदं प्रतिष्ठायामिति निपातः । प्रथमे पयोनिपाताः जलपाताध्वनिं वितेनिरे विस्तारयामासुः ॥ ५६ ॥

महानलइति । महानलेऽग्नौ भिन्नानि खण्डितानि सिताभ्राणीव पतन्तीति भिन्नसिताभ्रपातिभिः । कर्त्तर्युपमाने इति णिनिप्रत्ययः । अतएव सद्यः क्रथनेन पाकेन फेनताम्प्राप्य समेत्य परिक्षयं नाशं व्रजद्भिः जलैः आर्द्रेन्धनवत् आर्द्रकाष्ठैस्तुल्यम् ।

खकेतुभिः पाण्डुरनीलपाटलैः
समागताः शक्रधनुःप्रभाभिदः ।
असंस्थितामादधिरे विभावसो
र्विचित्रचीनांशुकचारुतां त्विषः ॥५८॥
जलौघसम्मूर्च्छनमूर्च्छितस्वनः
प्रसक्तविद्युल्लसितैधितद्युतिः ।
प्रशान्तिमेष्यन् धृतधूममण्डलो
बभूव भूयानिव तत्र पावकः ॥ ५९ ॥

तेन तुल्यं क्रिया चेद्वतिरिति वतिप्रत्ययः । दिवि गगने धूमसन्ततिः वितेने विस्तारिता फेनादिकमार्द्रेन्धनेऽपि तुल्यम् ॥ ५७ ॥

खकेतुभिरिति । पाण्डुरैर्नीलैः पाटलैश्च पाण्डुरनीलपाटलैः विचित्रैः खकेतुभिर्धूमैः समागताः सङ्गताः अतएव शक्रधनुषः प्रभाभिदोद्युतिभाजः विभावसोरग्नेः त्विषः असंस्थितामस्थिरां विचित्रस्य चीनांशुकस्य पट्टदुकूलस्य चारुतां समादधिरे दधुः ॥ ५८ ॥

जलौघेति । जलौघानां उदकप्रवाहानां सम्मूर्च्छनेन मेलनेन मूर्च्छितस्वनः प्रवृद्धघोषः । मूर्च्छनं मेलने प्रोक्तं वृद्धौ मूर्च्छित मेव वेति सज्जनः । प्रसक्तैः सङ्गतैर्विद्युतां तडिल्लतानां लसितैः स्फुरणैरेधिता वर्द्धिता द्युतिर्यस्य सः धृतधूममण्डलः जलाघातात्सम्भूतधूमपटलः पावकः प्रशान्तिमेष्यन् तत्र देशे भूयानिव बभूव भूयस्तया स्थापितइवेत्युत्प्रेक्षा ॥ ५९ ॥

प्रवृद्धसिन्धूर्म्मिचयस्थवीयसां
चयैर्व्विभिन्नाः पयसां प्रपेदिरे ।
उपात्तसन्ध्यारुचिभिः सरूपतां
पयोदविच्छेदलवैः कृशानवः ॥ ६० ॥

उपैत्यनन्तद्युतिरप्यसंशयं
विभिन्नमूलोऽनुदयाय संचयम् ।
तथाहि तोयौघविभिन्नसंहतिः
स हव्यवाहः प्रययौ पराभवम् ॥ ६१ ॥

प्रवृद्धेति । प्रवृद्धानां सिन्धोरूर्म्मीणाञ्चयाराशयइव । स्थवीयसां स्थूलतराणां पयसां चयैः पूरैर्व्विभिन्नाविश्लेषिताः कृशानवो ग्रयउपात्तसन्ध्यारुचिभिः प्राप्तसन्ध्यारागैः पयोदानां विच्छिद्यन्ते इति विच्छेदाः विच्छिन्नाविश्लिष्टाः लवाः शकलास्तैः सरूपतां समानरूपतां प्रपेदिरे इत्युपमा ॥ ६० ॥

उपैतीति । अनन्तद्युतिर्म्महातेजाः अपि विभिन्नमूलः असंशयं यथा तथा अनुदयाय पुनरनुत्थानाय नाशमुपैति । तथाहि । तोयौघैर्व्विभिन्ना संहतिः सङ्घातो यस्य स तथोक्तः स हव्यवाहोऽग्निः पराभवन्नाशमप्ययौ । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६१ ॥

अथेति । अथाग्निनिर्व्वाणानन्तरं विहितविधेयैः कृतकृत्यैः असितनगस्याञ्जनाद्रेर्नितम्बः कटकः तद्वत् श्यामभासां घनानां वितानैः पटलैर्मुक्ता द्यौराकाशोविकसिदाहादिवेत्युत्प्रेक्षा । विकसन्ति च तान्यमलधामानि स्वच्छकान्तीनि च तेषां नीलोत्पलानां

अथ विहितविधेयैराशु मुक्ता वितानै-
रसितनगनितम्बश्यामभासाङ्कनानाम् ।
विकसदमलधाम्नां प्राप नीलोत्पलानां
श्रियमधिकविशुद्धां वह्निदाहादिव द्यौः ॥६२॥
इति विविधमुदासे सव्यसाची यदस्त्र-
म्बहुसमरनयज्ञः सादयिष्यन्नरातिम् ।
विधिरिव विपरीतः पौरुषं न्यायवृत्तेः
सपदि तदुपनिन्ये रिक्ततां नीलकण्ठः ॥६३॥

अधिकविशुद्धानां अत्युज्ज्वलानां श्रियं प्राप इति निदर्शनालङ्कारः ॥ ६२ ॥

इतीति । बहुसमरनयान् अनेकरणोपायान् जानातीति बहुसमरनयज्ञः । आतोऽनुपसर्गे कइति कप्रत्ययः न लिगुपधेत्यादिना आकारान्तादनुपपदात्कर्मोपपदोभवति विप्रतिषेधेनेति वार्त्तिकव्याख्याने भाष्यकारेणार्थज्ञशब्दमुदाहृत्य अस्यार्थज्ञशब्दस्य कर्मोपपदत्वं दर्शितम् । सव्यसाची अर्ज्जुनः अरातिं सादयिष्यन् अवसादयितुकामः सन्नित्यर्थः । क्रियार्थक्रियायां लृटि तस्य शत्रादेशः । इति पूर्व्वोक्तप्रकारेण विविधं यदस्त्रमुदासे प्रयुक्तवानित्यर्थः । उपसर्गादस्यत्यूह्योर्वेति वाच्यमित्यात्मनेपदम् । विपरीतोविधिः प्रतिकूलं दैवम् । विधिर्विधाने दैवेऽपीत्यमरः । नयेन नीत्या वृत्तिर्वर्त्तनं यस्य तस्य, नीतिनिष्ठस्य पौरुषमिव नीलकण्ठः शिवः सपदि तदस्त्रं रिक्ततां व्यर्थतामुपनिन्ये । मालिनीवृत्तम ॥ ६३ ॥

वीतप्रभावतनुरप्यतनुप्रभावः
प्रत्याचकाङ्क्ष जयिनीम्भुजवीर्य्यलक्ष्मीम् ।
अस्त्रेषु भूतपतिनापहृतेषु जिष्णु-
र्वर्षिष्यता दिनकृतेव जलेषु लोकः ॥ ६४ ॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये किरातार्ज्जुनयुद्धन्नाम षोडशस्सर्गः ॥१६॥

वीतेति। भूतपतिना शम्भुना अनुग्रहीष्यतेति शेषः। अस्त्रेषु अपहृतेषु सत्सु वर्षिष्यता उत्तरत्र सहस्रगुणं वितरिष्यता दिनकृता सूर्य्येण जलेष्वपहृतेषु सत्सु लोकइव वीतप्रभावोगतास्त्रमहिमा अन्यत्र गतशक्तिः अतएव तनुः क्षीणोवीतप्रभावतनुः तथापि अतनुप्रभावोनिसर्गतः सामर्थ्यादधिकः अन्यत्रोद्योगवान् ततोजिष्णुरर्ज्जुनः जयिनीं जयनशीलाम्। जिहृक्षीत्यादिना इनिप्रत्ययः। भुजवीर्य्यलक्ष्मीम्भुजपराक्रमसम्पदम्। उभयत्रापि पुरुषकारमिति यावत्। तत्कालकुण्ठितामिति शेषः। प्रत्याचकाङ्क्ष प्रत्याहर्त्तुमियेषेत्यर्थः। यथा लोकोनद्यादिजलापहारेऽपि उपायान्तरेण कूपादिना जीवितुमिच्छति तद्वत् अस्त्रबलापहारेऽपि भुजबलेनैव जेतुमियेषेति भावः। वसन्ततिलकावृत्तम् ॥ ६४ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायां षोडशः सर्गः ॥ १६ ॥

---

अथापदामुद्धरणक्षमेषु
मित्रेष्विवास्त्रेषु तिरोहितेषु ।
धृतिं गुरुश्रीर्गुरुणाभिपुष्यन्
स्वपौरुषेणेव शरासनेन ॥ १ ॥

भूरिप्रभावेण रणाभियोगा
त्प्रीतोविजिह्मश्च तदीयवृद्ध्या ।
स्पष्टोप्यविस्पष्टवपुःप्रकाशः
सर्प्पन्महाधूम इवाद्रिवह्निः ॥ २ ॥

अथ पञ्चभिः पार्थं विशेषयन् षड्भिः कुलकमाह । अथेत्यादिभिः । अथ जयलक्ष्मीप्रत्याकाङ्क्षानन्तरं आपदामुद्धरणक्षमेषु आपन्निवारणसमर्थेषु अस्त्रेषु प्रस्थापनादिषु तादृशेषु मित्रेष्विव तिरोहितेष्वन्तर्हितेषु सत्सु गुरुणा महता स्वपौरुषेणेव तादृशेन शरासनेन धृतिस्थैर्य्यं अभिपुष्यन्वर्द्धयन् अद्यापि धनुषि पौरुषे च प्रति कियानयं किरात इति धैर्य्यमवलम्बमान इत्यर्थः । अतएव गुरुश्रीः प्रवृद्धशोभासम्पत्तिः । पद्मा मा लक्ष्मीः श्रीर्निगद्यत इति शाश्वतः ॥ १ ॥

भूरीति । पुनश्च भूरिप्रभावेण महानुभावेन सह रणाभियोगात् युद्धलाभात्प्रीतः । तदीयवृद्ध्या शत्रुवृद्ध्या विजिह्मोविस्मयश्च तथा स्पष्टः दीप्त्या प्रज्वलन्नप्यविस्पष्टोवपुःप्रकाशोयस्य सः कुतः सर्प्पन् प्रसरन्महान् धूमोयस्य ससर्प्पन्महाधूमोऽद्रिवह्निरिव स्थितः ॥ २ ॥

तेजः समाश्रित्य परैरहार्य्य
निजम्महन्मित्रमिवोरुधैर्य्यम् ।
आसादयन्नस्खलितप्रभावं
भीमे भुजालम्बमिवारिदुर्गे ॥ ३ ॥

वंशोचितत्वादभिमानवत्या
सम्प्राप्तया सम्प्रियतामसुभ्यः ।
समक्षमादित्सितया परेण
वध्वेव कीर्त्त्या परितप्यमानः ॥ ४ ॥

तेजइति । पुनश्च परैररिभिरहार्य्यमभेद्यन्निजं स्वकीयं महत्तेजो वीर्य्यं मित्रमिव समाश्रित्य । अतएव भीमे भयानके अरिरेव दुर्गं तस्मिन्नरिदुर्गे शत्रुसङ्कटे अस्खलितप्रभावमचलशीलमुरु महद्धैर्य्यं भुजालम्बमिव हस्तावष्टम्भमिव आसादयन्प्राप्नुवन् ईदृशे सङ्कटेऽपि महावीर्य्यत्वात धैर्य्यमत्यजन्नित्यर्थः ॥ ३ ॥

वंशेति । पुनश्चाभिमानोममताबुद्धिः तद्वत्या विषयतया कर्म्मणि क्तस्तलोप्रचारः । अभिमानास्पदेनेत्यर्थः । अन्यच्च कुलशीलाद्यभिमानवत्या वंशोचितत्वात् स्वकुलानुरूपत्वात् असुभ्यः प्राणेभ्योऽपि सम्प्रियतां सम्प्राप्तया परेण शत्रुणा अक्ष्णोस्समीपे समक्षमग्रतः । अव्ययीभावे शरत्प्रभृतिभ्यइति समासान्तः टच् प्रत्ययः । आदातुं ग्रहीतुमिष्टया आदित्सितया आजिहीर्षितयेत्यर्थः । आङ्पूर्व्वाद्ददातेः सन्नन्तात् कर्म्मणि क्तः । वध्वेव० कीर्त्त्या हेतुना परितप्यमानः । कर्त्तरि शानच् हेताविति तृतीया कन्यया शोकइतिवत् ॥ ४ ॥

पतिन्नगानामिव बद्धमूल
मुन्मूलयिष्यन् तरसा विपक्षम्।
लघुप्रयत्नन्निगृहीतवीर्य्य
स्त्रिमार्गगावेगइवेश्वरेण ॥ ५ ॥
संस्कारवत्त्वाद्रमयत्स चेतः
प्रयोगशिक्षागुणभूषणेषु।
जयं यथार्थेषु शरेषु पार्थः
शब्देषु भावार्थमिवाशशंसे ॥ ६ ॥

पतिमिति। पुनश्च नगानाम्पतिं हिमवन्तमिव बद्धमूलं विपक्षं शत्रुन्तरसा बलेनोन्मूलयिष्यन्। किञ्च त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगा गङ्गा। उत्तरपदसमासः। तस्याः वेगइव ईश्वरेण लघुप्रयत्नं अल्पप्रयासं यथा तथा निगृहीतवीर्य्यः प्रतिबद्धशक्तिः हृतास्त्रशक्तिरिति यावत्। पुरा किल हिमाद्रिविदलनाय गगनात्पतन्तङ्गङ्गाप्रवाहङ्गङ्गाधरो निजजटाजूटेन निजग्राहेति पौराणी कथा। तद्वदित्यर्थः ॥ ५ ॥

संस्कारेति। एवम्भूतः पार्थः संस्कारवत्त्वात्संस्कारश्चित्तवासना अन्यत्र साधुत्वं असाधूनाम्प्रयोगनिषेधादिति भावः। अथवा संस्कारोव्युत्पत्तिः तद्वत्त्वाच्चेतोरमयत्स प्रयोगः सन्धानमोत्तादिः शिक्षा अभ्यासोगुणस्तदाहितोऽतिशयः मौर्वी वा। अन्यत्र तु प्रयोगोभियुक्तव्यवहारः शिक्षा अभ्यासः गुणाः स्वस्थानकरणादयः श्लेषप्रसादादयोवा ते भूषणं येषान्तेषु यथा यथाभूताश्चार्था येषां तेषु यथार्थेषु। अन्यच नियतार्थेषु शृणन्ति हिंसन्तीति शराः

भूयः समाधानविवृद्धतेजा
नैवम्पुरा युद्धमिति व्यथावान् ।
स निर्ववामास्रममर्षनुन्नं
विषं महानाग इवेक्षणाभ्याम् ॥ ७ ॥

तस्याहवायासविलोलमौलेः
संरम्भताम्रायतलोचनस्य ।
निर्वापयिष्यन्निव रोषतप्तं
प्रस्नापयामास मुखन्निदाघः ॥ ८ ॥

तेषु जयन्तनिर्वाहकत्वात्तदाधारत्वविवक्षायां सप्तमी । शब्देषु उप पदेषु भावः प्रवृत्तिनिमित्तं सामान्यादिस्स एवार्थः तमिवाशंसे आचकाङ्क्षे । आङ्पूर्वाच्छंसेराङ्पूर्वशंसेरिच्छायामात्मनेपदमुपसङ्ख्यानात् । यथा शाब्दिकाः शब्दैरर्थं साधयन्ति तद्वदयं शरैर्जयं साधयितुमियेषेत्यर्थः ॥ ६ ॥

भूय इति । भूयः पुनरपि समाधानेन युद्धाय मनोव्यवस्थापनेन विवृद्धतेजाः प्रवृद्धप्रतापः पुरा पुरातन युद्धं एवमित्थं शक्तिसादकरन्न भवतीति हेतोर्व्यथावान् परितापवान् सोऽर्ज्जुनः ईक्षणाभ्यां दृष्टिभ्यां महानागो महासर्प्पो विषमिव अमर्षनुन्नं क्रोधोत्थापितं अस्रं अश्रु निर्ववाम निर्जगार । सात्विकानां वीररससाधारण्याद्वीरे रसे अश्रूदयोक्तिः । स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलयइत्यष्टौ सात्विकामताः ॥ ७ ॥

तस्येति । आहवायासेन युद्धायासेन विलोलमौलेः स्रस्तकेशबन्धस्य । चूडा किरीटकेशाश्च संयतामौलयस्त्रियामित्यमरः ।

क्रोधान्धकारान्तरितो रणाय
भ्रूभेदलेखाः स बभार तिस्रः ।
घनोपरुद्धः प्रभवाय वृष्टे
रूर्द्धांशुराजीरिव तिग्मरश्मिः ॥ ९ ॥

स प्रध्वनय्याम्बुदनादि चापं
हस्तेन दिङ्नाग इवाद्रिशृङ्गम् ।
बलानि शम्भोरिषुभिस्तताप
चेतांसि चिन्ताभिरिवाशरीरः ॥ १० ॥

संरम्भताम्रे कोपारुणे आयते लोचने यस्य तस्य । संरम्भस्सम्भ्रमे कोपइति विश्वः । तस्यार्ज्जुनस्य रोषतप्तं मुखनिदाघोघर्म्मः निर्व्वापयिष्यन् शिथिलीकरिष्यन्निवेत्युत्प्रेक्षा । प्रस्तापयामास सिषेच स्वेदञ्जनयामासेत्यर्थः । स्नातेर्मित्वविकल्पितत्वात् ह्रस्वविकल्पः॥ ८॥

क्रोधेति । क्रोधोऽन्धकारइव तेनान्तरितआवृतः सोऽर्ज्जुनः घनोपरुद्धोमेघावृतः तिग्मरश्मिः रविः वृष्टेः प्रभवाय वर्षणाय तिस्रः ऊर्द्धांशूनां राजीरिव अर्कस्योर्द्धांशोरेवोदयोवृष्टिलिङ्ग मित्यागमः । रणाय रणप्रवृत्तये तिस्रः त्रिसङ्ख्याः भ्रूभेदोभ्रूभङ्गः तस्य रेखाबभार ॥ ९ ॥

सइति । सोऽर्ज्जुनः अम्बुदवन्नदतीति अम्बुदनादि कर्त्तर्य्युप मानइति णिनिः । चापं दिङ्नागः दिग्गजः अद्रिशृङ्गमिव हस्तेन करेण प्रध्वनय्य प्रध्वनयन् शम्भोर्बलानि अशरीरोनङ्गः कामः चेतांसि युवमनांसि चिन्ताभिः प्रेयोजनध्यानैरिव इषुभिस्तताप तापयामास । तपतिः सकर्म्मकः । अत्रेषुशब्दः स्त्रीलिङ्गः अन्यथा

सद्वादितेवाभिनिविष्टबुद्धौ
गुणाभ्यसूयेव विपक्षपाते ।
अगोचरे वागिव चोपरेमे
शक्तिः शराणां शितिकण्ठकाये ॥ ११ ॥

उपमानोपमेययोर्भिन्नलिङ्गतादोषात् । पक्षौ रोपदूषुद्वयोरित्यमरः ॥ १० ॥

सद्वादितेति । अभिनिविष्टा शास्त्रनिविष्टा बुद्धिर्यस्य स तस्मिन् अभिनिविष्टबुद्धौ शास्त्रनिष्ठितमतौ विषये सद्वादिता प्रामाणिकार्थसमर्थकतेव न हि सम्यगभ्यस्तशास्त्रम्प्रति सद्वाद्यपि शक्नोतीति व्याचक्षते केचित् । अन्येतु अभिनिविष्टबुद्धौ आग्रहाविष्टचित्ते विषये सद्वादिता हितोपदेष्टृत्वमिव नह्याग्रही हितं गृह्णातीति भावः । विपक्षपाते वीतरागे विषये गुणाभ्यसूया गुणासहिष्णुता इव समदर्शी द्विषन्तमपि न द्वेष्टि यतइति भावः । अगोचरे अवाङ्मनसगोचरे ब्रह्मणि वागिव । यतो वाचोनिवर्तन्ते अप्राप्य मनसा सह इति श्रुतेरिति भावः । शराणां शक्तिः शितिकण्ठकाये शिवशरीरे उपरेमे उपरता तस्यासाध्यमहिमत्वादिति भावः । विभाषाकर्मकादित्यस्य वैकल्पिकत्वात्पक्षे आत्मनेपदम् । अत्र मालोपमा ॥ ११ ॥

उमेति । पाण्डुसुतेन प्रणुन्नाः प्रक्षिप्ताः शिखीमुखाबाणाः उमापतिं शिवं अभ्युत्थितस्याभ्युन्नतस्याद्रिपतेर्नितम्बकूटकं हैमन्ते भवस्य हैमनस्य । सर्वत्राण् तलोपश्चेत्यण् प्रत्ययः तकारलोपश्च । अर्कस्य पादारश्मयइव । पादारश्म्यङ्घ्रितुर्यांशाइत्यमरः ।

उमापतिम्पाण्डुसुतप्रणुन्नाः
शिलीमुखान व्यथयांबभूवुः ।
अभ्युत्थितस्याद्रिपतेर्नितम्ब
मर्कस्य पादाइव हैमनस्य ॥ १२ ॥
सम्प्रीयमाणोऽनुबभूव तीव्र
म्पराक्रमन्तस्य पतिर्गणानाम् ।
विषाणभेदं हिमवानसह्यं
वप्रानतस्येव सुरद्विपस्य ॥ १३ ॥
तस्मै हि भारोद्धरणे समर्थं
प्रदास्यता बाहुमिव प्रतापम् ।
चिरं विषेहेऽभिभवस्तदानीं
सकारणानामपि कारणेन ॥ १४ ॥

न व्यथयांबभूवुः । मध्ये स्थितस्यासुमतां समूहमर्कस्येति पाठा न्तरे मध्ये स्थितस्य हैमनस्यार्कस्य पादाः किरणाः असुमता प्राणिनां समूहमिवेति न दुःखमुत्पादयामासुरिति ॥ १२ ॥

समिति । गणानाम्पतिः शिवः तीव्रन्तस्यार्जुनस्य पराक्रमं वप्रे रोधसि आनतस्य परिणतस्य वप्रप्रहारिण इत्यर्थः । सुरद्विपस्या सह्यं विषाणभेदन्दन्तप्रहारं हिमवानिव सम्प्रीयमाणः संहृष्यन् अनुबभूवानुभवति स्म । तस्याभ्यत्वादनुजिघृक्षुत्वाच्चेति भावः ॥ १३ ॥

तस्मै हीति । तस्मै पार्थाय भारस्य भूभारस्योद्धरणे उद्वहने समर्थम्प्रतापम्बाहुमिव अवष्टम्भतयेति शेषः । अन्यथा भारोद्वहन

प्रत्याहतौजाः कृतसत्त्ववेगः
पराक्रमं ज्यायसि यस्तनोति ।
तेजांसि भानोरिव निष्पतन्ति
यशांसि वीर्य्यज्वलितानि तस्य ॥ १५ ॥
दृष्टावदानाद्व्यथतेऽरिलोकः
प्रध्वंसमेति व्यथिताच्च तेजः ।
तेजोविहीनं विजहाति दर्प्पः
शान्तार्च्चिषं दीपमिव प्रकाशः ॥ १६ ॥

दुष्करत्वादिति भावः । सप्रतापः प्रभावश्च यत्तेजः कोषदण्डज मित्यमरः । प्रदास्यता वितरिष्यता कारणानां ब्रह्मादीनामपि कारणेन जनकेन देवेन सोऽर्ज्जुनोऽभिभवस्तदानोंऽचिरमसेहे सोढः वात्सल्यादिति भावः ॥ १४ ॥

अथ त्रिभिर्भगवदभिप्रायमाविष्कुर्वन् चतुर्भिः कलापक माह । प्रत्याहतेति । प्रत्याहतौजाः परेण प्रतिहतबलः सन्नपि कृतसत्त्ववेगः कृतोत्साहातिशयः सन् यः पुमान् ज्यायसि स्वस्मादप्यधिके पराक्रमन्तनोति तस्य पुंसः भानोरर्कस्य तेजांसीव वीर्य्येण शौर्य्येण ज्वलितानि प्रकाशितानि यशांसि निष्पतन्ति उद्भवन्तीत्यर्थः । हीनस्याधिकाभियोगो यशस्कर इति भावः ॥ १५ ॥

ततः किमित्यत आह । दृष्टेति । दृष्टमवदानं महत्कर्म यस्य तस्मात् दृष्टावदानात् दृष्टपौरुषात् अरिलोकः शत्रुजनः व्यथते बिभेति । व्यथितात् भीतात् तेजः प्रध्वंसन्नाशमेति । तेजोविहीनन्दर्प्प

ततः प्रयात्यस्तमदावलेपः
स जय्यतायाः पदवीञ्जिगीषोः ।
गन्धेन जेतुः प्रमुखागतस्य
गन्धद्विपस्येव मतङ्गजौघः ॥ १७ ॥

एवम्प्रतिद्वन्द्विषु तस्य कीर्त्तिं
मौलीन्दुलेखाविशदां विधास्यन् ।
इयेष पर्य्यायजयावसादां
रणक्रियां शम्भुरनुक्रमेण ॥ १८ ॥

उत्साहः शान्तार्चिषन्निर्व्वाणज्वालन्दीपम्प्रकाश इव प्रजहाति त्यजति ॥ १६ ॥

तत इति । ततो दर्पहान्यनन्तरं अस्तौ च्युतौ मदावलेपौ मदगर्वौ यस्य सः सोऽरिलोकः गन्धेन मदगन्धेनैव जेतुर्जयनशीलस्य । तृच्प्रत्ययः । प्रमुखागतस्याभिमुखागतस्य गन्धद्विपस्यान्यो मतङ्गजौघः मत्तगजसमूह इव जिगीषोर्नायकस्य जय्यतायाः पदवीम्प्रयाति प्राप्नोति विजिगीषुणां जेतुं शक्योभवतीत्यर्थः । क्षय्यजय्यौ शक्यार्थ इति निपातः । अत्र श्लोकद्वयेन ज्यायसि पराक्रमकरणादीनां पूर्व्वपूर्व्वस्योत्तरोत्तरं प्रति कारणत्वकथनात् कारणमालाख्योऽलङ्कारः । लक्षणन्तूक्तम् ॥ १७ ॥

एवमिति । एवमुक्तरीत्या प्रतिद्वन्द्विषु प्रत्यरिमध्ये तस्यार्ज्जुनस्य मौलीन्दुलेखाविशदाङ्कीर्त्तिं विधास्यन् करिष्यन् अनुक्रमेण विपर्यासेन पर्यायेण जयोवसादोभङ्गश्च यस्यान्ताम्पर्य्यायजयावसादां

मुनेर्विचित्रैरिषुभिः स भूया
न्निन्ये वशम्भूतपतेर्ब्बलौघः ।
सहात्मलाभेन समुत्पतद्भि
र्ज्जातिस्वभावैरिव जीवलोकः ॥ १९ ॥

॥ कलापकम् ॥

वितन्वतस्तस्य शरान्धकार
न्त्रस्तानि सैन्यानि रवन्निशेमः ।
प्रवर्षतः सन्ततवेपथूनि
चपाघनस्येव गवां कुलानि ॥ २० ॥

रणक्रियामियेष इच्छति स्म जयानन्तरभङ्गो भङ्गानन्तरञ्जयः इति पर्य्यायार्थः तस्य विपर्य्यासोऽन्यतरनैरन्तर्य्यं तदभावोऽनुक्रम इत्यपौनरुक्त्यन् ॥ १८ ॥

मुनेरिति । मुनेर्विचित्रैरिषुभिः स भूयान् अधिको भूतपतेर्बलौघः आत्मलाभेन जन्मना सह समुत्पतद्भिराविर्भवद्भिराजन्मसिद्धैरित्यर्थः । जातयः गोत्वमनुष्यत्वादयः स्वभावाः जातिनियताः धर्म्मास्तैर्जातिस्वभावैर्जीवलोकः प्राणिजातमिव वशं निन्ये नीतः । कर्म्मणि लिट् । प्राणिनो जातिधर्म्मानिव गणा मुनिशरान्नातिक्रमितुं शेकुरित्यर्थः ॥ १९ ॥

वितन्वत इति । त्रस्तानि सैन्यानि सन्ततवेपथूनि निरन्तरकम्पानि गवां कुलानि वृन्दानि प्रवर्षतो वृष्टिं कुर्वतः चपाघनस्य रात्रिमेघस्येव शरैर्य्योऽन्धकारस्तं वितन्वतः विस्तारयतः तस्य मुनेः

स सायकान्साध्वसविप्लुतानां
क्षिपन्परेषामतिसौष्ठवेन ।
शशीव दोषावृतलोचनानां
विभिद्यमानः पृथगाबभासे ॥ २१ ॥
क्षोभेण तेनाथ गणाधिपाना
म्भेदं ययावाकृतिरीश्वरस्य ।
तरङ्गकम्पेन महाह्रदाना
ञ्छायामयस्येव दिनस्य भर्त्तुः ॥ २२ ॥

सम्बन्धिनं रवं शरवर्षघोषं निशमुः शुश्रुवुः न तु किञ्चिद्दृशुः चेष्टा तु दूरे आस्तामिति भावः ॥ २० ॥

स इति । अतिसौष्ठवेनातिलाघवेन सायकान् शरान् क्षिपन् सोऽर्ज्जुनः साध्वसेन विप्लुतानां भ्रान्तानां साध्वसविप्लुतानाम्परेषां द्विषान्दोषेण रागादिना आवृतलोचनानां दुष्टचक्षुषां शशीव पृथग्विभिद्यमानः आबभासे । यथा सदोषचक्षुषा एकश्चन्द्रोनानेव लक्ष्यते तद्वदेकोऽप्यनेकइव दृष्टइति भावः ॥ २१ ॥

क्षोभेणेति । अथ गणाधिपानां सम्बन्धिना तेन क्षोभेण कम्पेन ईश्वरस्याकृतिराकारामूर्त्तिर्म्महाह्रदानान्तरङ्गकम्पेन छायामयस्य प्रतिबिम्बरूपस्य दिनस्य भर्त्तुः दिवाकरस्य आकृतिरिव भेदं विकारं ययौ। प्राप स्वयं निर्विकारोऽपि प्रतिसूर्य्यवत्परसंसर्गात्तथा प्रतीयतइत्यर्थः ॥ २२ ॥

यदि देवोऽपि विकृतस्तर्हि कोपः किन्न कृतस्तत्राह । प्रसेदिवांस मिति । प्रसेदिवांसमर्ज्जुनम्प्रति प्रसन्नचित्तन्तं देवं कोपोनाप न

प्रसेदिवांसन्न तमाप कोपः
कुतः परस्मिन्पुरुषे विकारः ।
आकारवैषम्यमिदं च भेजे
दुर्लक्ष्यचिह्ना महतां हि वृत्तिः ॥ २३ ॥
विस्फार्य्यमाणस्य ततो भुजाभ्यां
भूतानि भर्त्रा धनुरन्तकस्य ।
भिन्नाकृतिं ज्यान्ददृशुः स्फुरन्तीं
क्रुद्धस्य जिह्वामिव तक्षकस्य ॥ २४ ॥

आप तत्राप्यनुपद्दं यथाविति भावः । तत्र हेतुः परस्मिन्पुरुषे परात्मनि देवे स्वतोनिर्व्विकारद्दृत्यर्थः । विकारः कोपरूपः कुतः न कुतश्चिदित्यर्थः । ननु तस्य निर्व्विकारस्य कथं वहिराकारभेदः कारणाभावादिति चेत् तन्न विमद्दत्याह । इदं पूर्व्वोक्तमाकारवैषम्यञ्च भेजे किन्तु केनापि कारणेन न कुप्यतीत्यर्थः । ननु निर्व्विकारे कुतश्चाकारभेदस्तत्राह । महतां वृत्तिश्चेष्टा दुर्लक्ष्यचिह्ना दुर्ग्रहहेतुका हि ॥ २३ ॥

विकारमेवाह । विस्फार्य्यमाणस्येति । ततोऽनन्तरम्भूतानि भर्त्रा भूतपतिना । भृञस्तृच्प्रत्ययः अतएव न लोकेत्यादिना षष्ठी प्रतिषेधः । भुजाभ्यां । कर्त्तृकरणयोस्तृतीया । विस्फार्य्यमाणस्याकृष्यमाणस्य धनुरन्तकइव तस्य धनुरन्तकस्य सम्बन्धिनीं स्फुरन्तीं चलन्तीं अतएव भिन्ना द्विधेव दृश्यमाना आकृतिर्य्यस्यास्तां ज्यां धनुर्गुणं क्रुद्धस्य तक्षकस्य नागविशेषस्य जिह्वामिव ददृशुः द्विधाभावाद्भयङ्करत्वाच्चेति भावः ॥ २४ ॥

सव्यापसव्यध्वनितोग्रचाप
म्पार्थः किरातधिपमाशशङ्के ।
पर्य्यायसम्पादितकर्णतालं
यन्ता गजं व्यालमिवापराद्धः ॥ २५ ॥
निजघ्निरे तस्य हरेषुजालैः
पतन्ति वृन्दानि शिलीमुखानाम् ।
तेजस्विभिः सिन्धुमुखागतानि
यादांसि यादोभिरिवाम्बुराशेः ॥ २६ ॥

सव्येति । पार्थः सव्यापसव्याभ्यां ध्वनितन्नादितमुग्रचापं येन तङ्किराताधिपं अपराद्धः प्रमत्तोयन्ता पर्य्यायेणायौगपद्येन सम्पादितं कर्णयोस्तालं आस्फालनं येन तं व्यालन्दुष्टं । भेद्यलिङ्गं शठे व्यालइत्यमरः। गजमिवाशशङ्के तच्चापचातुर्य्यदर्शनात् दुर्ज्जयः कोऽप्ययमनर्थकरश्चेति शङ्कितवानित्यर्थः ॥ २५ ॥

निजघ्निरइति । हरेषुजालैस्तस्यार्ज्जुनस्य पतन्ति आगच्छन्ति शिलो शल्यं मुखं येषान्तेषां शिलीमुखानां शराणां वृन्दानि । तेजस्विभिः प्रबलैः अम्बुराशेर्यादोभिर्जलग्राहैः सिन्धुमुखेन नदीमखेन आगतानि यादांसीव जलजन्तूनिव । यादांसि जलजन्तव इति वैजयन्ती । निजघ्निरे हतानि ॥ २६ ॥

विभेदमिति । अन्तर्विभेदं व्यूहविश्लेषणं उपजापञ्च पदवी निरोधं मार्गएव प्रतिबन्धनमन्यत्र लासारप्रसारप्रतिबन्धं विध्वंसनं खण्डनन्दुर्घटनदाहादिकञ्चेत्यादि यथानेता नायकोजिगीषु

विभेदमन्तःपदवीनिरोध
मध्वंसनञ्चाविदितप्रयोगः।
नेतारिलोकेषु करोति यद्य
त्तत्तञ्चकारास्य शरेषु शम्भुः॥ २७॥
सोढावगीतप्रथमायुधस्य
क्रोधोज्झितैर्वेगितया पतद्भिः।
छिन्नैरपि त्रासितवाहिनीकैः
पेते कृतार्थैरिव तस्य बाणैः॥ २८॥

रविदितप्रयोगः संवृतमन्त्रत्वादविज्ञातोपायप्रयोगः सन् अरिलोकेषु शत्रुकुलेषु करोति। तत्तत् शम्भुरविदितप्रयोगः अज्ञातसंधानमोचादिकः सन् अस्यार्ज्जुनस्य शरेषु चकार कृतवान्। कर्त्तरि लिट्। श्लेषालङ्कारः॥ २७॥

सोढेति। सोढानि परैरवगीतानि गर्हितानि प्रथमायुधानि पूर्वोत्सृष्टबाणाः यस्य तस्यार्ज्जुनस्य सम्बन्धिभिः क्रोधोज्झितैः क्रोधाभिषिक्तैः पूर्व्वबाणवैफल्यात् कोपेन त्यक्तैः। अतएव वेगितया वेगेन पतद्भिः गतिं कुर्व्वद्भिः। अतएव छिन्नैरपि त्रासितावाहिन्यो यैस्तैरतएव कृतार्थैरिव बाणैः पेते। भावे लिट्। वस्तुतस्तु अकृतार्था एवेत्यर्थः॥ २८॥

अलमिति। ऋजुता अवक्राकारत्वं अवक्रशीलत्वं च सैव गुणस्तेनालङ्कृतानां गुरुभिर्धनुर्विद्यागुरुभिः धर्मशास्त्रगुरुभिश्चोपदिष्टान्दर्शिताङ्गतिङ्गमनमाचारञ्चाश्रितानां प्राप्तानां मार्गणानां

अलङ्कृतानामृजुतागुणेन
गुरूपदिष्टां गतिमास्थितानाम् ।
सतामिवापर्व्वणि मार्ग्गणाना
म्भङ्गः स जिष्णोर्धृतिमुन्ममाथ ॥ २९ ॥
बाणच्छिदस्ते विशिखाः स्मरारे
रवाङ्मुखीभूतफलाः पतन्तः ।
अखण्डितम्पाण्डवसायकेभ्यः
कृतस्य सद्यः प्रतिकारमापुः ॥ ३० ॥

शराणां सतां साधूनामिवापर्व्वण्यग्रन्थौ अन्यत्राप्रस्ताव अकाण्ड इत्यर्थः । पर्व्व स्यादुत्सवे ग्रन्थौ प्रस्तावे लक्षणान्तरइति विश्वः । स ईश्वरकृतो भङ्गः छेदो व्यसनञ्च जिष्णोरर्ज्जुनस्य कस्यचित् जितरस्य । जिष्णुः शक्रे धनञ्जये जितरइति विश्वः । धृतिर्न्धैर्य्यमुन्ममाथ जहारेत्यर्थः । अकाण्डे साधुविपत्तिदर्शनादिव शरभङ्गदर्शना द्धैर्य्यभङ्गोऽभूदित्यर्थः ॥ २९ ॥

बाणेति । बाणच्छिदः पार्थशरच्छेदिनस्ते स्मरारेर्व्विशिखाः अवाङ्मुखीभूतफलाः विमुखाग्राः विफलाश्च सन्तः पतन्तः पाण्डव सायकेभ्यः । क्रियाग्रहणाच्चतुर्थी । पाण्डवसायकानां कृतस्य फल भङ्गरूपस्य स्वकर्म्मणः सद्योऽखण्डितम्प्रतिकारमापुः अत्युत्कटङ्कर्म्म सद्यः फलन्दर्शयतीति भावः ॥ ३० ॥

पुनरर्ज्जुनस्य जयमाह । चित्रीयमाणानिति । अरातिरर्ज्जुनः अतिलाघवेन अतिशीघ्रत्वात् चित्रीयमाणांश्चित्रमाश्चर्य्यं कुर्व्वाणान् नमोऽरिव चित्रकः क्यङ् । भवमार्ग्गणानाम्प्रमाथिनः खण्डयतः

चित्रीयमाणानतिलाघवेन
प्रमाथिनस्तान् भवमार्गणानाम् ।
शङ्काकुलायानिचखान दूरं
बाणान् ध्वजिन्या हृदयेष्वरातिः ॥ ३१ ॥

तस्यातियत्नादतिरिच्यमाने
पराक्रमेऽन्योन्यविशेषणेन ।
हन्ता पुरां भूरि पृषत्कवर्षं
निरास नैदाघमिवाम्बु मेघः ॥ ३२ ॥

अनाहतशान्तः क्वचिदेव मर्म्म
प्रियैषिणानुप्रहिताः शिवेन ।
सुहृत्प्रयुक्ता इव नर्म्मवादाः
शरा मुनेः प्रीतिकरा बभूवुः ॥ ३३ ॥

तान् बाणान्। शङ्काकुलायाः सङ्कुलितायाः संक्षुभितायाः ध्वजिन्याः सेनायाः हृदयेषु दूरङ्गाढन्निचखान निखातवान् ॥ ३१ ॥

तस्येति। तस्यार्ज्जुनस्य पराक्रमेऽतियत्नाद्धेतोरन्योन्यस्य विशेषणे नातिशयकरणेनातिरिच्यमाने अतिक्रम्यमाणे सति. पुरां हन्ता त्रिपुरविजयी हरो भूरि प्रभूतम्पृषत्कवर्षं बाणवर्षम् । पृषत्क बाणविशिखाः इत्यमरः । निदाघे भवो नैदाघो मेघोऽम्बुवाहो ऽम्बु जलमिव निरास मुमोच । अस्यतेर्लिट् । निदाघग्रहणं वर्षणस्यातितीव्रत्वद्योतनार्थम् ॥ ३२ ॥

अनाहतशान्तइति । प्रियैषिणा प्रियचिकीर्षुणा शिवेनान प्रहिताः प्रयुक्ताः अतएव क्वचिदेव मर्म्म अनाहत्य शान्तोऽप्रशान्ताः

अस्त्रैस्समानामतिरेकिणीं वा
पश्यन् रिपूणामथ तस्य शक्तिम्।
विषादवक्तव्यबलः प्रमाथी
स्वमाललम्बे बलमिन्दुमौलिः ॥ २४ ॥

ततस्तपोवीर्य्यसमुद्धतस्य
पारं यियासोः समरार्णवस्य।
महेषुजालान्यखिलानि जिष्णो
रर्कः पयांसीव समाचचाम ॥ २५ ॥

त शराः सुहृन्मित्रं सोऽपि प्रियैषी तेन प्रयुक्ताः उच्चारिताः नर्मवादाः प्रियवादाइव मुनेरर्ज्जुनस्य प्रीतिकराः, प्रीतिजनका बभूवुः ॥ २३ ॥

अस्त्रैरिति। अस्त्रैः स्वायुधैः समानान्तुल्यामतिरेकिणीं ततोऽधिकां वा तस्य मुनेः रिपूणामपि शक्तिं पश्यन्विषादेनोत्साह भङ्गेन वक्तव्यानि निर्वाच्यानि बलानि यस्य सः प्रमाथी शत्रुमर्दनः इन्दुमौलिर्महादेवः स्वं बलमात्मीयं बलमाललम्ब स्वसामर्थ्यमवलम्बितवान् ॥ २४ ॥

ततइति। ततोमहिमप्रादुर्भावानन्तरं देवस्तपोवीर्य्याभ्यां समुद्धतस्य प्रगल्भस्य समरएवार्णवस्तस्य पारमन्तं यियासोर्जिगमिषो र्जिष्णोरर्ज्जुनस्याखिलानि महेषुजालानि समग्रबाणसमूहानर्कस्सूर्य्यः पयांसीव जलानीव समाचचाम संजहारेत्यर्थः ॥ २५ ॥

रिक्तइति। अथ बाणान्तर्द्धानानन्तरं अर्जुनस्य पाणिः करः रिक्ते बाणशून्येऽपि निषङ्गवक्त्रे तूणीरमुखे अन्यद्विपेन गजान्तरेण

रिक्ते सविस्रम्भमथार्ज्जुनस्य
निषङ्गवक्त्रे निपपात पाणिः ।
अन्यद्विपापीतजले सतर्षं
मतङ्गजस्येव नगाश्मरन्ध्रे ॥ ३६ ॥
च्युते स तस्मिन्निषुधौ शरार्थौ
ह्रस्तार्थसारे सहसेव बन्धौ ।
तत्कालमोघप्रणयः प्रपेदे
निर्वाच्यताकामइवाभिमुख्यम् ॥ ३७ ॥

आपीतजले पीततोये नगस्याचलस्याश्मरन्ध्रे शिलागर्त्ते कन्दर इत्यर्थः । सतर्षं सतृष्णं यथा स्यात्तथेति क्रियाविशेषणम् । मतङ्गजस्य पाणिः लक्षणया करइव सविस्रम्भं सन्त्येव बाणाइति सविश्वासन्निपपात ॥ ३६ ॥

च्युतइति । शराएवार्थोधनं यस्य तस्मात् च्युते भ्रष्टे तस्मिन्निषुधौ निषङ्गे सहसा झटिति ध्वस्तार्थसारे अकाण्डे नष्टधनसारे बन्धाविव तत्काले मोघः वितथः प्रणयः प्रीतिर्यस्य स प्रणयेणार्थप्रार्थनात् पूर्व्वं कृतार्थएवेति भावः । स पाणिर्निर्वाच्यतां कृतघ्नत्वादपवाद राहित्यं कामयतइति निर्वाच्यताकामः । शीलिकामिभक्ष्याचरिभ्योणः । सइवेत्युत्प्रेक्षा । आभिमुख्यम्प्रपेदे । यथा कश्चित्कृतज्ञः तत्कालानुपकृतमपि बन्धुम्पूर्व्वोपकारस्मरणात् पुनः पुनः अनवभाति तद्वदित्यर्थः ॥ ३७ ॥

आघट्टयामासेति । अस्य मुनेः अग्रं चासावङ्गुलिश्चेति अग्राङ्गुलिः हस्ताग्राग्रहस्तयोर्गुणिगुणिनोर्भेदादिति वामनः । विधेयमार्गो

आघट्टयामास गतागताभ्यां
सावेगमग्राङ्गुलिरस्य तूणौ ।
विधेयमार्गे मतिरुत्सुकस्य
नयप्रयोगाविव गाञ्जिगीषोः ॥ ३८ ॥
बभार शून्याकृतिरर्ज्जुनस्तौ
महेषुधी वीतमहेषुजालौ ।
युगान्तसंशुष्कजलौ विजिह्मः
पूर्व्वापरौ लोकइवाम्बुराशी ॥ ३९ ॥

कर्त्तव्यान्वेषणे उत्सुकस्य प्रवृत्तस्य गां भुवञ्जिगीषोर्न्नायकस्य मतिर्बुद्धिः नयः षाड्गुण्यं प्रयोगउपायः तौ नयप्रयोगाविव तूणौ निषङ्गौ सावेगंससम्भ्रमं । इष्टानिष्टागमाज्ञानमावेगश्चित्त सम्भ्रमइति शाश्वतः । गतागताभ्यां यातायाताभ्यां आवापोद्वापाभ्यां घाघट्टयामास । अन्यत्र तु वितर्कयामास । शरग्रहणाय पुनः पुनस्तूणयोः पाणिं व्यापारयामासेत्यर्थः ॥ ३८ ॥

बभारेति । शून्याकृतिरिष्टनाशात् निस्तेजस्करूपोऽर्ज्जुनः तौ वीतमहेषुजालौ वीतानि रिक्तानि महषुजालानि ययोस्तौ महेषुधी महानिषङ्गौ विजिह्मः शून्योलोकः युगान्ते संशुष्कजलौ । शुषः कइति निष्ठातकारस्य ककारः । पूर्व्वापरावम्बुराशी समुद्राविव बभार ॥ ३९ ॥

तेनेति । पार्थस्तयोस्तूणयोः रिक्ततया हेतुना यथा अनुतेपे शुशोच तथा तेन अनिमित्तेन बाणचयरूपेण दुर्निमित्तेन न

तेनाभिमित्तेन तथा न पार्थ-
स्तयोर्यथा रिक्ततयानुतेपे ।
स्वामापदम्प्रोज्झ्य विपत्तिमग्नं
शोचन्ति सन्तो ह्युपकारिपक्षम् ॥ ४० ॥

प्रतिक्रियायै विधुरः स तस्मा-
त्कृच्छ्रेण विश्लेषमियाय हस्तः ॥
पराङ्मुखत्वेऽपि कृतोपकारा-
त्तूणीमुखान्मित्रकुलादिवार्य्यः ॥ ४१ ॥

शुशोच । तथाहि सन्तः स्वामापदं प्रोज्झ्य विसृज्य विपत्ति-मग्नं उपकारिणां पक्षं वर्गं शोचन्ति । स्वव्यसनापेक्षया परकीय-व्यसनमेव सतामनुतापकमित्यर्थः ॥ ४० ॥

प्रतीति । प्रतिक्रियायै विधुरः प्रतिकर्त्तुमसमर्थः । तुमर्थाच्च भाववचनादिति चतुर्थी । अर्ज्जुनस्य स हस्तः पाणिः पराङ्मुखत्वेऽपि तत्कालवैमुख्येऽपि कृतोपकारात्तस्मात् तूणीमुखान्मित्रकुला-दार्य्यः साधुः कृतज्ञइव । आर्य्यः साधुकुलीनयोरिति विश्वः । कृच्छ्रेण महाकष्टेन विश्लेषमियाय । गौरादित्वात्तूणशब्दात् ङीष् ॥ ४१ ॥

पश्यन्निति । तदानीम्भर्त्तुः स्वामिनः । कर्त्तरि षष्ठी । पश्चात् क्रिया पृष्ठतः करणं तूणयुगस्योपकारिणीव उपकारिकेव जज्ञे जाता । तथाहि । सम्भावनाद्यां स्वयोग्यताद्यां अधरीकृतायां सफलीकृतायाम्पत्युः स्वामिनः पुरोऽग्रे आसितव्यमासंस्थितं ।

पश्चात्क्रिया तूणयुगस्य भर्त्तु
र्जज्ञे तदानीमुपकारिणीव ।
सम्भावनायां विफलीकृतायां
म्यत्युः पुरः साहसमासितव्यम् ॥ ४२ ॥
तं शम्भुराचिप्तमहेषुजालं
लौहैः शरैर्मर्म्मसु निस्तुतोद ।
हृतोत्तरन्तत्त्वविचारमध्ये
वक्तेव दोषैर्गुरुभिर्विपच्चम् ॥ ४३ ॥
जहार चास्मादचिरेण वर्म्म
ज्वलन्मणिद्योतितहैमलेखम् ।
चण्डः पतङ्गान्मरुदेकनील
न्तडित्वतः खण्डमिवाम्बुदस्य ॥ ४४ ॥

सङ्गलग्रहणाद्भावे तव्यप्रत्ययः । साहसं न योग्यं । भर्त्ता सम्भावितस्य अवसरे अनुपकर्त्तुरनुजीविनः तत्सामुख्यमनुचित मित्यर्थः ॥ ४२ ॥

तमिति । शम्भुराचिप्तानि आहृतानि महेषुजालानि यस्य तं मुनिन्तत्त्वविचारमध्ये वादमध्ये हृतोत्तरं निरुत्तरीकृतं विपच्च मतिवादिनं वक्ता वादी गुरुभिर्दोषैर्निग्रहस्थानैरिव लौहैर्लौह मयैः शरैर्म्मर्मसु निस्तुतोद व्यथयामास ॥ ४३ ॥

जहारेति । किञ्च अस्मान्मुनेः अचिरेण शीघ्रं ज्वलद्भि र्मणिभिर्द्योतिताहैम्यः सौवर्णाः लेखाः यस्य तत्तथोक्तं । वर्म्म

विकोषनिर्द्धूततनोर्म्महासेः
फणावतस्त्वचि विच्युतायाम् ।
प्रतिद्विपाबद्धरुषः समक्षं
नागस्य चाक्षिप्तमुखच्छदस्य ॥ ४५ ॥
विबोधितस्य ध्वनिना घनानां
हरेरपेतस्य च शैलरन्ध्रात् ।
निरस्तधूमस्य च रात्रिवह्ने
र्विना तनुत्रेण रुचिं स लेभे ॥ ४६ ॥
॥ युग्मकम् ॥

कवचञ्चण्डोमरुत् पवनः पतङ्गात् सूर्य्यात् एकनीलं केवलं कृष्णवर्णम् । एके मुख्यान्यकेवलाइत्यमरः । तडित्वतस्तडिद्युक्तस्याम्बुदस्य खण्डमिव जहार । तदा भगवन्मायया मुक्तकञ्चुकोमुनिर्मेघनिर्मुक्तः सूर्य्यइव दिदीपइति भावः ॥ ४४ ॥

अथ युग्मेनाह । विकोषेति । सोऽर्ज्जुनः तनुन्त्रायतइति तनुत्रं वर्म्म । आतोऽनुपसर्गे कइति कप्रत्ययः । तेन विना विकोषाः कोषादुद्धृतः निर्धूततनुः बाणोल्लीढमूर्त्तिः । ततोविशेषणसमासः । तस्य विकोषनिर्द्धूततनोर्म्महासेः महाखड्गस्य तथा त्वचि विच्युतायां सत्यां फणावतस्सु मुक्तकञ्चुकस्याहेस्सु प्रतिद्विपे प्रतिगजे आबद्धरुषोबद्धकोपस्य समक्षम्प्रतिगजस्याग्रे आक्षिप्तमुखच्छदस्य निरस्तमुखावरणस्य नागस्य गजस्य च ॥ ४५ ॥

विबोधितस्येति । घनानां ध्वनिना गर्ज्जितेन विबोधितस्य शैलरन्ध्रात् कन्दरादपेतस्य निष्क्रान्तस्य हरेः सिंहस्य च तथा

अचित्ततायामपि नाम युक्ता
मनूर्द्ध्वतामाप्य तदीयकक्षे ।
महीजुतौ ताविषुधी तदानीं
विवव्रतुश्चेतनयेव योगम् ॥ ४७ ॥
स्थितं विशुद्धे नभसीव सत्त्वे
धाम्ना तपोवीर्य्यमयेन युक्तम् ।
शस्त्राभिघातैस्तमजस्रमीश
स्त्वष्टा विवस्वन्तमिवोल्लिलेख ॥ ४८ ॥

निरस्तधूमस्य रात्रिवह्नेस्य रुचिं शोभाम्भेजे । एतेनास्य तीक्ष्णता वैरनिर्य्यातनत्वरणदुर्म्मदत्वमनस्वित्वतेजस्वित्वान्युक्तानि । अत्र रुचिमिव रुचिमिति साहृश्याक्षेपात्सम्भवदस्तुसम्बन्धो निदर्शनालङ्कारो मालया संसृष्टः ॥ ४६ ॥

अचित्ततायामिति । तदानीङ्कवचपतनसमये महीजुतौ इषुधी निषङ्गौ अचित्ततायामपि अचेतनत्वेऽपि तदीयकक्षे स्वामिव्यसने युक्तां योग्याम् नाम किल अकिञ्चित्करत्वादिति भावः । अनूर्द्ध्वतामवाङ्मुखत्वमाप्य चेतनया प्राणिसाधारणज्ञानेनेव योगञ्चैतन्यसम्बन्धं विवव्रतुरिवेत्युत्प्रेक्षा । अचेतनत्वे अवाङ्मुखत्वादिचेतनधर्म्मयोगादिति भावः ॥ ४७ ॥

स्थितमिति । विशुद्धे निर्म्मले नभसीव सत्त्वे सत्त्वगुणे स्थितन्तपोवीर्य्यमयेन तपोवीर्य्याभ्याङ्कृतेन धाम्ना तेजसा युक्तं तमर्ज्जुनमीशस्त्वष्टा विश्वकर्म्मा विवस्वन्तमिवाजस्रं शस्त्राभिघातैः शस्त्रकर्षणैरुल्लिलेख ततक्ष ॥ ४८ ॥

संरम्भवेगोज्झितवेदनेषु
गात्रेषु चाधैर्य्यमुपागतेषु ।
मुनेर्बभूवागणितेषुराशे
र्लौहस्तिरस्कार इवात्ममन्युः ॥ ४९ ॥
ततोनुपूर्व्वायतवृत्तबाहुः
श्रीमान् चरल्लोहितदिग्धदेहः ।
आस्कन्द्य वेगेन विमुक्तनादः
क्षितिं विधुन्वन्निव पार्ष्णिघातैः ॥ ५० ॥

संरम्भेति । संरम्भवेगेन सम्भ्रमातिशयेन उज्झितवेदनेषु त्यक्त दुःखेषु गात्रेषु चाधैर्य्यं स्तैमित्यं उपागतेषु सत्सु न गणिताः इषुराशयो येन तस्य अगणितेषुराशेः मुनेरर्ज्जुनस्यात्ममन्युः स्वकोपो लोहस्य विकारो लौहः कार्ष्णायसः तिरस्क्रियते आच्छाद्यते ऽनेनेति तिरस्कारः कञ्चुक इव बभूव । रोषवशात् न किञ्चित्प्रहारदुःखमज्ञासीदित्यर्थः । क्रोधैकवर्म्मणां वीराणां किमन्यैर्लौहभारैरित्यर्थः ॥ ४९ ॥

अथ युग्मेनाह । तत इति । ततोऽनन्तरं अनुपूर्व्वौ पूर्व्वमनुगतौ गोपुच्छाकारौ आयतौ दीर्घौ वृत्तौ वर्त्तुलौ बाहू यस्य सः श्रीमान् शोभावान् चरल्लोहितदिग्धदेहः स्रवद्रुधिरलिप्तगात्रः पार्ष्णिघातैस्चरणतलाघातैः । तद्ग्रन्थी घुटिके गुल्फौ स्त्रियां पार्ष्णिरधस्तयोरित्यमरः । क्षितिं विधुन्वन् प्रकम्पयन् इव वेगेनास्कन्द्याभिद्रुत्य विमुक्तनादः सोऽर्ज्जुनः ॥ ५० ॥

साम्यङ्गतेनाशनिना मघोनः
शशाङ्कखण्डाकृतिपाण्डुरेण।
शम्भु बिभित्सुर्धनुषा जघान
स्तम्बं विषाणेन महानिवेभः ॥ ५१ ॥
॥ युग्मम् ॥

रयेण सा सन्निदधे पतन्ती
भवोद्भवेनात्मनि चापयष्टिः।
समुद्धता सिन्धुरनेकमार्गा
परे स्थितेनौजसि जह्नुनेव ॥ ५२ ॥

साम्यमिति। मघोनः इन्द्रस्य अशनिना वज्रेण सह साम्यं गतेन वज्रकल्पेन शशाङ्कस्य खण्डं शकलन्तस्येव आकृतिर्यस्य तद्वद्वक्रमित्यर्थः। पाण्डुरश्च तद्वदेवेति भावः। तेन शशाङ्कखण्डाकृतिपाण्डुरेण धनुषा शम्भुं बिभित्सुः भेत्तुमिच्छुः सन्महानिभोगजः विषाणेन दन्तेन स्तम्बमिव जघान ॥ ५१ ॥

रयेणेति। रयेण वेगेन पतन्ती सा चापयष्टिः भवस्य संसारस्य उद्भवः उत्पत्तिर्यस्मात् तेन भवोद्भवेन ईश्वरेण परे ओजसि परमे ज्योतिषि स्थितेन जह्नुना राजर्षिणा समुद्धता अत्युत्कटा अनेकमार्गा त्रिस्रोताः सिन्धुर्गङ्गेव आत्मनि सन्निदधे सम्यक् निहिता अन्तर्निक्षिप्तेत्यर्थः ॥ ५२ ॥

विकार्मुकइति। विकार्मुकोभग्नचापः अतएव परिच्युतौदार्य्यो दानवर्ज्जितउपचारः सत्कारइव कर्मसु रणक्रियासु कृत्येषु च

विकार्म्मुकः कर्म्मसु शोचनीयः
परिच्युतौदार्य्यइवोपचारः ।
विचिच्छिपे शूलभृता सलीलं
स पत्रिभिर्दूरमदूरपातैः ॥ ५३ ॥

उपोढकल्याणफलोभिरक्ष-
न्वीरव्रतम्पुण्यरणाश्रमस्थः ।
व्रतोपवासैरिव संयतात्मा
तेपे मुनिस्तैरिषुभिः शिवस्य ॥ ५४ ॥

शोचनीयः शोच्योऽपूज्यश्च सत्वावष्टम्भनात् भग्नचित्तत्वाच्च सो ऽर्ज्जुनः शूलभृता शिवेन सलीलं यथा तथा अदूरपातैरतिगाढ प्रहारैः पत्रिभिः शरैः दूरं अत्यन्तं विचिच्छिपे नुन्नः ॥ ५३ ॥

उपोढेति । उपोढमासन्नं कल्याणफलं अस्त्रलाभरूपं स्वर्गादिकञ्च यस्य सः वीरव्रतमाहवादनिवृत्तिरूपन्तीव्रन्तपश्चाभि रक्षन्न पालयमानः पुण्योयोरणएवाश्रमः तत्र तिष्ठतीति पुण्यरणा श्रमस्थः संयतात्मा नियमितचित्तः मुनिरर्ज्जुनः कश्चित्तपस्वी च तैः शिवस्य महादेवस्य इषुभिश्शरैर्व्रतोपवासैरिव तेपे तप्तः । तपतेः कर्म्मणि लिट् ॥ ५४ ॥

ततइति । ततश्चापान्तर्द्धानानन्तरं सोऽर्ज्जुनः अयमूर्मि विपदि गन्तव्यस्थानं शरणमित्यर्थः कुतः व्यवसायसिद्धेः युद्धो द्योगसिद्धेः सीमानमवधिं साधकतममित्यर्थः । अन्यैः परैः अति दुस्तरं दुरतिक्रमन्तेजःश्रियां प्रतापसम्पदामाश्रयं हेतुमित्यर्थः ।

ततोऽग्रभूमिं व्यवसायसिद्धेः
सीमानमन्यैरतिदुस्तरं सः ।
तेजःश्रियामाश्रयमुत्तमासिं
साक्षादहङ्कारमिवाललम्बे ॥ ५५ ॥

शरानवद्यन्ननवद्यकर्म्मा
चचार चित्रम्प्रविचारमार्गैः ।
हस्तेन निस्त्रिंशभृता स दीप्तः
सार्क्कांशुना वारिधिरूर्म्मिणेव ॥ ५६ ॥

यथा निजे वर्त्मनि भाति भाभि
श्छायामयश्चाप्सु सहस्ररश्मिः ।
तथा भ्रमन्नाशु रणस्थलीषु
स्पष्टद्विमूर्त्तिर्द्ददृशे स भूतैः ॥ ५७ ॥

उत्तमासिं महाखड्गं । सन्महदित्यादिना समासः । साक्षादहङ्कारं सविग्रहमभिमानमिवाललम्बे जग्राह ॥ ५५ ॥

शरानिति । अनवद्यकर्म्माऽगर्ह्यकर्म्मा । अवद्यपण्येत्यादिना निपातः । शरान् अवद्यन् खण्डयन् वीरो निस्त्रिंशभृता खड्गयुक्तेन हस्तेन सार्क्कांशुना अर्क्कांशुसहितेन ऊर्म्मिणा तरङ्गेण वारिधिरिव दीप्तो दीपितः सोऽर्ज्जुनः प्रविचारमार्गैः खड्गिनाङ्गतिभेदैश्चित्रं यथा तथा चचार ॥ ५६ ॥

यथेति । भाभिर्द्दीप्तिभिरुपलक्षितः । स्युः प्रभा रुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तय इत्यमरः। सहस्ररश्मिरर्क्को यथा निजे वर्त्मनि

शिवप्रणुन्नेन शिलीमुखेन
त्सरुप्रदेशादपवर्ज्जिताङ्गः।
ज्वलन्नसिस्तस्य पपात पाणे
र्घनस्य वप्रादिव वैद्युतोऽग्निः ॥ ५८ ॥

आच्छिन्नचापावरणेषुजाल
श्छिन्नोत्तमासिः स मृधेऽवधूतः।
रिक्तः प्रकाशश्च बभूव भूमे
रुत्सादितोद्यानइव प्रदेशः ॥ ५९ ॥

नभसि छायामयः प्रतिविम्बरूपः सन् अप्सु भाति रणस्थलेषु च स्पष्टे द्वे मूर्त्ती यस्य स स्पष्टद्विमूर्त्तिः सन् सोऽर्ज्जुनः भ्रमन् तथा भूतैर्गणैर्ददृशे दृष्टः । यथैकोऽर्कोनभस्यप्सु च अनेकइव दृश्यते । तथा सोऽपि दिवि भुवि चाप्सु सञ्चारायौगपद्यभ्रमादेवैकोऽप्यनेक इव गणैर्दृष्टइत्युत्प्रेक्षा ॥ ५७ ॥

शिवेति । शिवेन प्रणुन्नः क्षिप्तः तेन शिलीमुखेन त्सरुप्रदेशात् मुष्टिप्रदेशमवधिं कृत्वा । त्सरुः खड्गादिमुष्टौ स्यादित्यमरः । अपवर्ज्जिताङ्गोलूनविग्रहः । असिः खड्गस्तस्यार्ज्जुनस्य पाणेः करात् घनस्य मेघस्य वप्रात्तटात् । वैद्युतोविद्युत्सम्बन्धी अग्निरिव ज्वलन्पपात ॥ ५८ ॥

आच्छिन्नेति । आच्छिन्नान्यपहृतानि चापावरणेषुजालानि धनुर्वर्म्मबाणसमूहायस्य सः छिन्नोत्तमासिः लूनमहाखड्गः मृधे रणे । मृधमास्कन्दनं सङ्ख्यमित्यमरः । अवधूतोनिरस्तः सोऽर्ज्जुनः

स खण्डनाम्प्राप्य परादमर्षवान्
भुजद्वितीयोऽपि विजेतुमिच्छया ।
ससर्ज्ज वृष्टिं परिरुग्णपादपा
न्द्रवेतरेषां पयसामिवाश्मनां ॥ ६० ॥

नीरन्ध्रम्परिगमिते क्षयम्पृषत्कै
र्भूतानामधिपतिना शिलावितानेः ।
उच्छ्रायस्थगितनभोदिगन्तरालं
चिक्षेप क्षितिरुहजालमिन्द्रसूनुः ॥ ६१ ॥

उत्सादितं उत्पाटितमुद्यानं यस्य सः भूमेः प्रदेशो भूमिभागइव रिक्तः शून्यः प्रकाशो निस्सम्बन्धश्च बभूव ॥ ५८ ॥

सइति । परात्परस्माच्छत्रोः । पूर्व्वादिभ्योनवभ्योवेति विकल्पात् न स्मादादेशः। खण्डनाभङ्गम्प्राप्य अमर्षवान् सोऽर्जुनः भुजद्वितीयो भुजमात्रसहायः सन्नपि विजेतुमिच्छया द्रवेभ्यः इतराणि तेषा न्द्रवेतरेषाङ्कठिनानाम्पयसामिव करकाणामिवेत्यर्थः । अश्मनां सम्बन्धिनीं परिरुग्णाभग्नाः पादपाः यस्याः सा तां वृष्टिं ससर्ज्ज । अश्मभिर्जघानेत्यर्थः ॥ ६० ॥

नीरन्ध्रमिति । शिलाविताने शिलाजाले भूतानामधिपतिना शिवेन पृषत्कैर्बाणैः क्षयं गमिते नीते सति इन्द्रसूनुरर्ज्जुनः उच्छ्रायेणोत्सेधेन स्थगितं आच्छादितं नभोदिशामन्तरालञ्च येन तत् नीरन्ध्रं सान्द्रं रोहन्तीति रुहाः । इगुपधलक्षणः कप्रत्ययः । क्षितौ रुहाः क्षितिरुहास्तेषां जालञ्चिक्षेप प्रेरयामास उच्छ्रायङ्गमितवतीति प्रामादिकः पाठः ॥ ६१ ॥

निःशेषं शकलितवल्कलाङ्गसारैः
कुर्वद्भिर्भुवमभितः कषायचित्राम्।
ईशानः सकुसुमपल्लवैर्नगैस्तै
रातेने बलिमिव रङ्गदेवताभ्यः ॥ ६२ ॥

उन्मज्जन्मकर इवामरापगाया
वेगेन प्रतिमुखमेत्य बाणनद्याः।
गाण्डीवी कनकशिलानिभं भुजाभ्या
माजघ्ने विषमविलोचनस्य वक्षः ॥ ६३ ॥

निःशेषमिति। ईशानः शिवः। शानच्प्रत्ययः। निःशेषं यथा तथा शकलितानि वल्कलानि त्वचः अङ्गानि शाखाः सारो मज्जा च येषान्तैर्भुवमभितः कषायो योरागः स्वरागेण रञ्जनमिति यावत् रागे क्वाथे कषायोऽस्त्रीति वैजयन्ती। तेन चित्रां विचित्रवर्णा कुर्व्वद्भिः सकुसुमपल्लवैः तैर्नगैर्वृक्षैरङ्गे रणरङ्गे यादेवतास्ताभ्यो बलिम्पूजामिवातेने ॥ ६२ ॥

उन्मज्जन्निति। गाण्डीवी अर्ज्जुन उन्मज्जन् उत्तरन् मकरो जलग्राहविशेषः अमरापगायाइव बाणनद्याः बाणप्रवाहात् वेगेन प्रतिमुखमभिमुखमेत्यागत्य कनकशिलानिभङ्कनकग्रहणङ्काठिन्या तिशयद्योतनार्थम्। विषमविलोचनस्य त्र्यम्बकस्य वक्षो हृदयं भुजाभ्यामाजघ्ने ताडितवान्। अत्रात्मनेपदं विचार्य्यम्। आङो यमहनं इत्यत्राकर्म्मकाधिकारात् स्वाङ्गकर्म्मकाच्चेति वक्तव्यत्वात्। न च शिवस्य प्रतिमुखमित्यन्वयात् कनकशिलानिभङ्कनकनिकषतुल्यं

अभिलषत उपायं विक्रमं कीर्त्तिलक्ष्म्यो
रसुगममरिसैन्यैरङ्कमभ्यागतस्य ।
जनकइव शिशुत्वे सुप्रियस्यैकसूनो
रविनयमपि सेहे पाण्डवस्य स्मरारिः ॥ ६४ ॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये सप्तदशस्सर्गः ॥ १७ ॥

श्यामं स्ववक्षआजघ्ने इत्यर्थः इति वाच्यम् । अनौचित्याचरणात् न हि युद्धाय सन्नद्धानिपुणाअपि मल्लाः स्ववक्षस्ताडनमाचरन्ति किन्तु स्वभुजास्फालनम् । किञ्च अनन्तरं वक्ष्यमाणभवकर्त्तृकाविनय सहनविरोधात् वक्षएवेत्यन्वयस्याव्यवधानाच्च पूर्व्वैरेव दूषितत्वात् अतोव्याकरणान्तरात् द्रष्टव्यम् । केचित्तु व्यस्तकस्य वक्षः प्राप्येत्यध्याहारं स्वीकृत्य अकर्म्मकत्वात् आत्मनेपदमाहुः ॥ ६३ ॥

अभिलषतइति । कीर्त्तिलक्ष्म्योरुपायं साधनभूतं अरिसैन्यैरसुगमन्दुरासदं विक्रममभिलषतः । सूनुपक्षे यत्किञ्चिन्महत्फल म्प्रार्थयमानस्येत्यर्थः। अतएव अङ्कमन्तिकमभ्यागतस्य उत्सङ्गसमारूढस्य च पाण्डवस्य अविनयं स्मरारिरनेन भक्तवात्सल्यमेव सहनकारणमिति सूच्यते । शिशुत्वे शैशवे सुप्रियस्य परम प्रेमास्पदस्य कुतः एकएव सूनुस्तस्यैकसूनोरविनयञ्जनकइव सेहे सोढवान् ॥ ६४ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायाङ्घण्टापथसमाख्यायां सप्तदशः सर्गः ॥ १७ ॥

EXAMINATION BOM

ततउदग्रइव द्विरदे मुनौ
रणमुपेयुषि भीमभुजायुधे ।
धनुरपास्य सबाणधि शङ्करः
प्रतिजघान घनैरिव मुष्टिभिः ॥ १ ॥
हरपृथासुतयोर्ध्वनिरुत्पतन्
नमृदुसंवलिताङ्गुलिपाणिजः ।
स्फुटदनल्पशिलारवदारुणः
प्रतिननाद दरीषु दरीभृतः ॥ २ ॥

ततइति । ततोमुनिमुष्टियुद्धानन्तरं उदग्रे महति द्विरदे गजे इव भीमे भुजावेव आयुधे यस्य तथाभूते रणमुपेयुषि मुनौ शङ्करः स्वयमपि सबाणधि सतूणं धनुरपास्य त्यक्त्वा मुष्टिभिर्घनैर्लोहमुद्गरैरिव प्रतिजघान प्राङ्मुनिकृताघातस्य प्रतिघातं कृतवानित्यर्थः । घनाः कठिनसङ्घातमेघकाठिन्यमुद्गराइति वैजयन्ती । घनस्तु लोहमुद्गरइति विश्वः । यद्यपि मुष्टिशब्दः मुष्ट्या तु बद्धया सरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना इत्यमरे उभयथा प्रयोगाद्द्विलिङ्गस्तथाप्यत्रोपमानसारूप्यात्पुंलिङ्गोग्राह्यः । द्रुतविलम्बितं वृत्तम् ॥ १ ॥

हरेति । हरपृथासुतयोरमृदु निबिडं यथा तथा संवलिताः सङ्घटिताः अङ्गुलयोयेषान्ते मुष्टीकृताइत्यर्थः तेषु पाणिषु जातस्तथोक्तः । स्फुटन्तीनां विदलन्तीनामनल्पशिलानामारवइव दारुणोभीषणोध्वनिरुत्पतन् उद्गच्छन् । दरीभृतोगिरेः दरीषु गुहासु प्रतिननाद प्रतिदध्वान ॥ २ ॥

शिवभुजाहतिभिन्नपृथुक्षतोः
सुखमिवानुबभूव कपिध्वजः ।
क इव नाम बृहन्मनसां भवे
दनुकृतेरपि सत्त्ववतां क्षमः ॥ ३ ॥
व्रणमुखच्युतशोणितशीकर
स्थगितशैलतटाभभुजान्तरः ।
अभिनवौषसरागभृता बभौ
जलधरेण समानमुमापतिः ॥ ४ ॥

शिवेति । कपिध्वजः शिवस्य भुजाहतिभिर्मुष्टिघातैर्भिन्ना विदीर्णाः याः पृथवो महत्यः क्षतयः प्रहाराः व्रणास्ताः सुखमिवानुबभूव दुःखकरीरपीति भावः । क्षतीर्दुःखनाजीगणदित्यर्थः । ननु दुस्सहदुःखवेगेषु कथमगणनेत्यत्राह । कइति । क इव नाम को नु खलु सत्त्ववतां सत्त्वाधिकानां बृहन्मनसां तेजस्विनां अनुकृतेरनुकरणस्यापि क्षमो भवेत् । मनस्विनाञ्चरितं नटवदनुकर्त्तुमपि न कश्चिद्दोष्टे तस्याचरणन्तु दूरापास्तम् । रौद्ररसाविष्टमनस्विनां कुतः सुखगणनेति भावः ॥ ३ ॥

व्रणेति । व्रणमुखेभ्यः च्युतस्य क्षरितस्य शोणितस्य शीकरैः स्थगितमावृतं शैलतटाभं शिलाभम्भुजान्तरं वक्षो यस्य स तथोक्तः उमापतिः अभिनवमौषसरागं सन्ध्यारागं बिभर्त्तीति तथोक्तेन जलधरेण समानं तुल्यं यथा तथा बभौ इत्युपमा ॥ ४ ॥

उरसीति । शूलभृतः शिवस्योरसि प्रहताः प्रयुक्ताः अर्जुनस्य मुष्टयः पृथुनि विशाले सुसमश्लीभूतः सह्याद्रेः रोधसि तटे

उरसि शूलभृतः प्रहिता मुहुः
प्रतिहतिं ययुरर्ज्जुनमुष्टयः ।
भृशरया इव सह्यमहीभृतः
पृथुनि रोधसि सिन्धुमहोर्मयः ॥ ५ ॥
निपतितेऽधिशिरोधरमायते
सममरत्नियुगेऽयुगचक्षुषः ।
त्रिचतुरेषु पदेषु किरीटिना
लुलितदृष्टि मदादिव चस्खले ॥ ६ ॥

भृशरयास्तीव्रवेगाः सिन्धोः समुद्रस्य महोर्मय इव मुहुः प्रतिहतिं ययुः ॥ ५ ॥

निपतित इति । अयुगानि चक्षूंषि यस्य तस्यायुगचक्षुषः त्रिलोचनस्य आयते दीर्घे अरत्नियुगे अरत्न्योर्बद्धमुष्ट्योर्हस्तयोर्युगे युग्मे । मुष्टा तु बद्धया सरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिनेत्यमरः । प्रकृते तु मुष्टिमात्रविवक्षया प्रयोगः । शिरोधरायामधीति अधिशिरोधरमधिकन्धरं समं युगपन्निपतिते सति । किरीटिना अर्जुनेन मदादिव त्रीणि चत्वारि वा त्रिचतुराणि । सङ्ख्ययाव्ययासन्नेत्यादिना बहुव्रीहिः । चतुरोऽच् प्रकरणे त्र्युपाभ्यामुपसङ्ख्यानमिति समासान्तोऽच्प्रत्ययः । त्रिचतुरेषु पदेषु लुलितदृष्टि घूर्णितनेत्रं यथा तथा चस्खले स्खलितम् । भावे लिट् ॥ ६ ॥

अभिभवेति । अभिभवेनोत्कर्षेण उदित उत्पन्नो यो मन्युः क्रोधस्तेन विदीपितः प्रज्वलितः सोऽर्ज्जुनः भुजाभ्यां समभिसृत्य

अभिभवोदितमन्युविदीपितः
समभिसृत्य भृशञ्जवमोजसा।
भुजयुगेन विभज्य समाददे
शशिकलाभरणस्य भुजद्वयम् ॥ ७ ॥
प्रववृतेऽथ महाहवमल्लयो
रचलसञ्चलनाहरणो रणः।
करणशृङ्खलसङ्कलनागुरु
गुरुभुजायुधगर्व्वितयोस्तयोः ॥ ८ ॥

समभिसृत्य ओजसा बलेन शशिकलाभरणस्येन्दुमौलेः शिवस्य भुजद्वयं भुजयुगेन विभज्य वियोज्य समाददे जग्राह ॥ ७ ॥

प्रववृत इति। अथ महाहवे महारणे मल्लयोर्बलीयसोः। मल्लः पात्रे कपोले च मत्स्यभेदे बलीयसीति विश्वः। गुरुभुजावेवायुधन्तेन गर्व्वितयोस्तयोः शिवार्ज्जुनयोः करणानि करचरणबन्धनान्येव शृङ्खलानि येषां तेषां सङ्कलना सङ्घट्टना तया गुरुः दुस्तरः तथा अचलस्य हिमाद्रेः सञ्चलनङ्कम्पः तस्याहरणः आरोपकः। कर्त्तरि ल्युट्। रणः प्रववृते प्रावर्त्तत ॥ ८ ॥]

अयमिति। अयम्पुरोवर्त्ती पुमान् असौ भगवान् प्रसिद्धो देवः तदुक्तम्। इदमः प्रत्यक्षरूपं समीपतरवर्त्ति चैतदो रूपं। अदसस्तु विप्रकृष्टन्तदिति परोक्षे विजानीयादिति। उत पाण्डवः अयं हि निष्ठद्वस्थायां भ्रमइति वेदितव्यम्। अथ पतनावस्थायामाह। मुनिना अवाक् अधःस्थितं उत शशिमौलिना अजेन देवेन स

अयमसौ भगवानुत पाण्डवः
स्थितमवाङ्मुनिना शशिमौलिना ।
समधिरूढमजेन नु जिष्णुना
स्विदिति वेगवशान्मुमुहे गणैः ॥ ९ ॥

प्रचलिते चलितं स्थितमास्थिते
विनमिते नतमुन्नतमुन्नतौ ।
वृषकपिध्वजयोरसहिष्णुना
मुहुरभावभयादिव भूभृता ॥ १० ॥

समधिरूढं उपरि स्थितं अथ जिष्णुना स्विदर्जुनेन वा समधिरूढमित्येवङ्गणैर्वेगवशान्मुमुहे भ्रान्तं । मुहवैचित्ये भावे लिट् ॥ ९ ॥

प्रचलिते इति । असहिष्णुना तयोर्भरमसहमानेन भूभृता शैलेन अभावभयाद्विनाशभयादिव मुहुः वृषस्य कपिश्च ध्वजे ययोस्तयोः वृषकपिध्वजयोः प्रचलिते चलने सति चलितं प्रचेले आस्थिते तूष्णीमवस्थाने स्थितन्तथैव तस्थे विनमिते सति सम्यगाक्रमणे सति नतं नम्रीभूतं अनामीति यावत् । उन्नतावुन्नमने सति उन्नतमुदनामि । सर्वत्र भावे क्तः ॥ १० ॥

करणेति । करणानि करचरणबन्धविशेषाः तान्येव शृङ्खलानि तेभ्यो निःसृतयोर्मुक्तयोर्युक्तबन्धयोरित्यर्थः । स्ततोभुजध्वनिः भुजास्फोटनशब्दो यस्मिन् कर्म्मणि तत्तथा वल्गु सुन्दरञ्च यथा तथा विवल्गतोरुत्प्लवमानयोस्तयोर्हरपार्थयोश्चरणपातैः पादक्षेपैर्निपातितानि रोधांसि यासान्ताः सरितोनद्यः परितः स्थलीः परितः स्थलीषु प्रससृपुः प्रसृताः । अभितः परितइत्यादिना

करणशृङ्खलनिःसृतयोस्तयोः
कृतभुजध्वनि वल्गु विवल्गतोः ।
चरणपातनिपातितरोधसः
प्रससृपुः सरितः परितः स्थलीः ॥ ११ ॥
वियति वेगपरिप्लुतमन्तरा
समभिसृत्य रयेण कपिध्वजः ।
चरणयोश्चरणानमितक्षिति
र्निजगृहे तिसृणाञ्जयिनं पुराम् ॥ १२ ॥
विस्मितः सपदि तेन कर्म्मणा
कर्म्मणां क्षयकरः परः पुमान् ।
क्षेप्तुकाममवनौ तमक्लमं
र्निष्पिपेष परिरभ्य वक्षसा ॥ १३ ॥

द्वितीया जानपदत्यादिना अकृत्रिमार्थे ङीष् । कूलपातक्षोभादुद्वेल सलिलाः सरितः स्थलानि प्रासर्पन्नित्यर्थः । एतेन तयोर्भारवत्त्वं ॥ ११ ॥

वियतीति । वियत्यन्तरिक्षे वेगेन परिप्लुतमुत्पतितन्तिसृणा म्पुराञ्जयिनं त्रिपुरान्तकम् । जिदृक्षीत्यादिना इनिप्रत्ययः । कपिध्वजोऽर्ज्जुनश्चरणाभ्यामाक्राभ्यामानमितक्षितिः सन् रयेण वेगेन समभिसृत्य अभिद्रुत्य अन्तरा मध्यमार्गे चरणयोः पदयो र्निजगृहे निगृहीतवानित्यर्थः । उत्पतितस्य भगवतश्चरणौ स्वकराभ्यां जग्राहेत्यर्थः ॥ १२ ॥

विस्मित इति । तेन कर्म्मणा चरणग्रहणकर्म्मणा सपदि विस्मितः सविस्मयः कर्म्मणां क्षयकरो मोक्षप्रद इत्यर्थः । परः पुमान् हरः

तपसा तथा न मुदमस्य ययौ
भगवान्यथा विपुलसत्त्वतया ।
गुणसंहतेः समतिरिक्तमहो
निजमेव सत्त्वमुपकारि सताम् ॥ १४ ॥
अथ हिमशुचिभस्मभूषितं
शिरसि विराजितमिन्दुलेखया ।
स्ववपुरतिमनोहरं हर-
न्दधतमुदीक्ष्य ननाम पाण्डवः ॥ १५ ॥

अवनौ चितौ चेशङ्कामोदस्य तम् । तुङ्काममनसोरपीति मकार लोपः । अक्षमं अक्षान्तन्त्मार्थं वक्षसा परिरभ्य निष्पिपेष गाढ मालिलिङ्गेत्यर्थः । रथोद्धतावृत्तम् ॥ १३ ॥

तपसेति । भगवान्देवोऽस्य अर्जनस्य विपुलसत्त्वतया बङ्क सत्त्वसम्पदेत्यर्थः । यथा मुदं ययौ तथा तपसा मुदन्न ययौ । तथा हि सताङ्गुणसंहतेस्तपःसेवादिगुणसङ्घातात्समतिरिक्तमतिशयित निजं सत्त्वमेवोपकारि उपकारकमहो । प्रमिताक्षरावृत्तम् ॥ १४ ॥

अथेति । अथ हिमशुचिना हिमशुभ्रेण भस्मना भूषितं शिरसीन्दुलेखया विराजितं शोभितं अतिमनोहरं सुन्दरं स्ववपुर्दधतम् । किरातरूपं विहाय निजविग्रहन्दधानं हरमुदीक्ष्य, पाण्डवो ननाम प्रणतवान् । अपरवक्त्रं वृत्तम् । अयुजि ननरला गुरुः समे नजमपरवक्त्रमिदन्ततोजराविति लक्षणात ॥ १५ ॥

सह शरधि निजन्तथा कार्म्मुकं
वपुरतनु तथैव संवर्म्मितम्।
निहितमपि तथैव पश्यन्नसिं
वृषभगतिरुपाययौ सविस्मयम्॥ १६ ॥
सिषिचुरवनिमम्बुवाहाः शनैः
सुरकुसुममियाय चित्रं दिवः।
विमलरुचि भृशन्नभो दुन्दुभे
र्ध्वनिरखिलमनाहतस्यानशे ॥ १७ ॥

सहेति। वृषभस्येव गतिर्यस्य सोऽर्जुनः तस्मिन् समये सह शरधिभ्यां वर्त्ततइति सहशरधि सनिषङ्गं। वोपसर्जनस्येति विकल्पात् सह शब्दस्य न सभावः। निजं कार्म्मुकङ्गाण्डीवन्तथैव पूर्व्ववदेव संवर्म्मितं सम्यक् कवचितं अतनु महत् निजं वपुः तथैव निहितं यथा पूर्व्वं स्थापितम्। असिमपि खड्गञ्च तथैव पश्यन् विस्मयमुपाययौ। क्वचित्तु वृषभगतिमिति पाठः तत्र वृषभगतिं शिवञ्च पश्यन् विस्मयं ययावित्यर्थः। प्रमुदितवदना वृत्तम् प्रमुदितवदना भवेत् नौ रराविति लक्षणात्॥ १६ ॥

सिषिचुरिति। अम्बुवाहाः शनैरवनिं सिषिचुः उक्षाञ्चक्रुः दिवोन्तरिक्षाच्चित्रं विचित्रं सुरकुसुमं मन्दारकुसुमानि। जातावेकवचनं। इयाय जगाम अनाहतस्याताडितस्य दुन्दुभेः। जातावेकवचनम्। ध्वनिशब्दोविमलरुचि प्रसन्नमखिलन्नभो भृशमानशे व्याप। अताडिताएव दुन्दुभयोनेदुरित्यर्थः। सर्व्वमिदमस्य सर्व्वलोकहितार्थत्वादिति वेदितव्यम्॥ १७ ॥

आसेदुषां गोत्रभिदोऽनुवृत्त्या
गोपायकानाम्भुवनत्रयस्य ।
रोचिष्णुरत्नावलिभिर्विमानै
र्द्यौराचिता तारकितेव रेजे ॥ १८ ॥

हंसा बृहन्तः सुरसद्मवाहाः
संह्रादिकण्ठाभरणाः पतन्तः ।
चक्रुः प्रयत्नेन विकीर्य्यमाणै
र्व्योम्नः परिष्वङ्गमिवाग्रपक्षैः ॥ १९ ॥

आसेदुषामिति । गोत्रभिद इन्द्रस्य अनुवृत्त्या अनुसरणेन आसेदुषामागतानाम्भुवनत्रयस्य गोपायकानां रक्षकाणां लोकपालादीनां । गुपूधूपेत्यादिना आयप्रत्ययः तदन्तात् ण्वुल् । रोचिष्णवः प्रकाशनशीलाः रत्नावलयो येषान्तैः । अलङ्कृञित्यादिना इष्णुच् प्रत्ययः । विमानैः पुष्पकैः आचिता व्याप्ता द्यौः तारकिता सञ्जाततारकेव रेजे । उत्प्रेक्षालङ्कारः ॥ १८ ॥

हंसा इति । बृहन्तः महान्तः सुरसद्मानि विमानानि वहन्तीति सुरसद्मवाहाः । कर्मण्यण् । संह्रादीनि निह्रादीनि मुखराणि कण्ठाभरणानि किङ्किण्यो येषान्ते पतन्तो धावन्तो हंसाः प्रयत्नेन विकीर्य्यमाणैर्विक्षिप्यमाणैरग्रपक्षैः पक्षाग्रैः व्योम्नः परिष्वङ्गमालिङ्गनञ्चक्रुरिवेत्युत्प्रेक्षा ॥ १९ ॥

मुदितेति । अथ मरुद्वायुर्जलदे मेघ इव वृषे निषेदिवांसमुपविष्टं ईश्वरं मुदितामधुलिहो भृङ्गा याभिस्ताः वितानीकृताः

मुदितमधुलिहोवितानीकृताः
स्रजउपरि वितत्य सान्तानिकीः ।
जलदइव निषेदिवांसं वृषे
मरुदुपसुखयांबभूवेश्वरम् ॥ २० ॥

कृतधृति परिवन्दितेनोच्चकै
र्गणपतिभिरभिन्नरोमोद्गमैः ।
तपसि कृतफले फलज्यायसी
स्तुतिरिति जगदे हरेः सूनुना ॥ २१ ॥

उल्लोचाकाराः कृताः । अस्त्री वितानमुल्लोचइत्यमरः । सान्तानिकीः सन्तानकुसुमविकाराः स्रजोमन्दारमालाइत्यर्थः । सन्तानशब्दा दिकारार्थे ठक् । सन्तानः कल्पवृक्षस्त्वित्यमरः । उपरि वितत्य विस्तार्य्य उपसुखयांबभूव प्रह्लादयामास ॥ २० ॥

कृतेति । अभिन्नरोमोद्गमैरविरलरोमाञ्चैर्गणपतिभिः प्रमथ मुख्यैः उच्चकैः परिवन्दितेन साधु साध्विति संस्तुतेन । वदि अभि वादनस्तुत्योः कर्म्मणि क्तः । हरेः सूनुना अर्जुनेन तपसि कृतं फल म्भगवत्साक्षात्काररलक्षणं येन तस्मिन् कृतफले सतीत्यर्थः कृतधृति कृतसन्तोषं यथा तथा फलज्यायसी फलाधिका इति वक्ष्यमाणा स्तुतिर्जगदे कथिता ॥ २१ ॥

शरणमिति । हे अजित हे अपराजित हे भव अतिकारुणिकमतिदयालुम् । तदस्य प्रयोजनमिति ठक् । भक्तिगम्यं भक्तिमात्रसुलभमभवन्तं शरणं रक्षकमधिगम्य जितमृत्यवोजनाः

शरणं भवन्तमतिकारुणिक
मव भक्तिगम्यमधिगम्य जनाः ।
जितमृत्यवोऽजित भवन्ति भये
ससुरासुरस्य जगतः शरणम् ॥ २२ ॥
विपदेति तावदवसादकरी
न च कामसम्पदभिकामयते ।
न नमन्ति चैकपुरुषम्पुरुषा
स्तव यावदीश न नतिः क्रियते ॥ २३ ॥

न च तच्चित्रं किन्तु ससुरासुरस्य जगतः भये आपदि शरणं स्वयं रक्षितारोभवन्ति । शरणं गृहरक्षित्रोरिति विश्वः । प्रमिताक्षरावृत्तम् ॥ २२ ॥

विपदिति । हे ईश यावत्तव नतिः प्रणामोन क्रियते पुरुषेणेति शेषः तावदेव एकम्पुरुषं एकाकिनं सन्तमवसादकरी क्षयकरी विपदेति प्राप्नोति । कामसम्पन्मनोरथसम्पच्च नाभिकामयते नेच्छति पुरुषाश्चान्ये लोकाः तमेकम्पुरुषं तव स्तुतिमकुर्व्वाणं न नमन्ति न वशे वर्त्तन्ते नानिष्टनिवृत्तिर्नापीष्टप्राप्तिरित्यर्थः । यदा तु त्वां प्रणमन्ति तदैव सर्व्वं लभ्यतइति भावः ॥ २३ ॥

संसेवन्तइति । दानं शीलं स्वभावोनिजधर्मोयेषान्ते दान शीलाः त्वामेवोद्दिश्य दानं कुर्व्वन्तइत्यर्थः । तस्माद्दानं परमं वदन्तीति श्रुतेरिति भावः । कुतोयतोजन्मदुःखं सम्पश्यन्तोऽनु भवन्तः पुमांसोविमुक्त्यै मोक्षाय संसेवन्ते भवन्तमिति शेषः ।

संसेवन्ते दानशीला विमुक्त्यै
सम्पश्यन्तो जन्मदुःखम्पुमांसः ।
यन्निःसङ्गस्त्वम्फलस्यानतेभ्यः
तत्कारुण्यं केवलं न स्वकार्य्यम् ॥ २४ ॥
प्राप्यते यदिह दूरमगत्वा
यत्फलत्यमरलोकगताय ।
तीर्थमस्ति न भवार्णववाह्यं
सार्व्वकामिकमृते भवतस्तत् ॥ २५ ॥

आनतेभ्यः प्रणतेभ्यः निःसङ्गो निस्पृहस्त्वं यत्फलसि फलं ददासि तेषां फलार्थित्वादिति भावः तत्केवलं निरुपाधिकङ्कारुण्य ङ्करुणा । स्वार्थे ष्यञ् । कारुण्यं करुणा घृणेत्यमरः । न स्वकार्य्यं एतदेव चित्रं केवलम्परार्थत्वादिति भावः । शालिनी वृत्तम् ॥ २४ ॥

प्राप्यतइति । यत्तीर्थमिहास्मिन् लोके दूरमगत्वा प्राप्यते स्मृतिमात्रसुलभमित्यर्थः । गङ्गादिकन्तु न तथेति भावः । यत्तीर्थ ममरलोकगताय फलति फलम्प्रयच्छति । अत्रापि स्मरण मात्रादेवेति भावः । भवः संसारः स एवार्णवः ततोवाह्यं वहिर्भवं संसारातीतं मोक्षप्रदमित्यर्थः । वहिर्देवपञ्चजनेभ्यश्चेति वक्तव्य मिति ष्यप्रत्ययः । सर्व्वे कामाः प्रयोजनमस्येति सार्वकामिकम् । तदस्य प्रयोजनमिति ठक् । तत्ताद्दृक् तरत्यनेनेति तीर्थन्तारक भवतः ऋते । अन्यारादित्यादिना पञ्चमी । अन्यन्नास्ति । औपच्छन्दसिकं वृत्तम् ॥ २५ ॥

व्रजति शुचि पदं त्वयि प्रीतिमान्
प्रतिहतमतिरेति घोरां गतिम्।
इयमनघ निमित्तशक्तिः परा
तव वरद न चित्तभेदः क्वचित्॥ २६॥

दक्षिणाम्प्रणतदक्षिणमूर्त्ति
न्तत्त्वतः शिवकरीमविदित्वा।
रागिणाऽपि विहिता तव भक्त्या
संस्मृतिर्भव भवत्यभवाय॥ २७॥

व्रजतीति। हे वरद त्वयि प्रीतिमान्नरः शुचि निर्म्मलं पदं कैवल्यं व्रजति। प्रतिहतमतिरुपहतबुद्धिः त्वद्द्वेषीत्यर्थः। घोरां गतिन्तीव्रं नरकमेति प्राप्नोति। न चैतावता तव रागद्वेषकलङ्कपङ्क इत्याह। इयमिति। हे अनघ निष्कलङ्क इयमुभयोरिति शेषः। विधेयप्राधान्यात् स्त्रीलिङ्गता। परा दुस्तरा निमित्त शक्तिः निमित्तभूता शक्तिः स्वचेष्टितमहिमा तव क्वचिद्भक्ते द्वेषिणि वा कुत्रापि चित्तभेदो बुद्धिवैषम्यं नास्ति स्वकर्म्मणैव जन्तुस्तरति पतति वा त्वं साक्षितया सर्व्वत्र समइत्यर्थः॥ २६॥

दक्षिणामिति। हे भव हे प्रणतदक्षिण प्रणतेषु दाक्षिण्य सम्पन्न दाक्षिण्यम्परच्छन्दानुवर्त्तित्वं। दक्षिणः सरलावामपर च्छन्दानुवर्त्तिषु इति विश्वः। शिवकरीं श्रेयस्करीम्। कृञोहे त्वित्यादिना टप्रत्यये ङीप्। तव दक्षिणां मूर्त्तिन्तत्त्वतोयाथार्थ्येन अविदित्वापि रागिणा रागद्वेषवतापि भक्त्या विहिता तव संस्मृति स्संस्मरणमभवाय संसारनिवृत्तये। प्रसज्यप्रतिषेधेऽपि नञ्समास

दृष्ट्वा दृश्यान्याचरणीयानि विधाय
प्रेक्षाकारी याति पदं मुक्तमपायैः ।
सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां
यश्चोपास्ते साधु विधेयं स विधत्ते ॥२८॥

युक्ताः स्वशक्त्या मुनयः प्रजानां
हितोपदेशैरुपकारवन्तः ।
समुच्छिनत्सि त्वमचिन्त्यधामा
कर्म्माण्युपेतस्य दुरुत्तराणि ॥ २९ ॥

इष्यते । भवति तत्त्वज्ञानं विनापि भक्तिपूर्व्विका तव संसृतिरेव मुक्तिनिदानमित्यर्थः । स्वागता वृत्तम् ॥ २७ ॥

दृष्ट्वेति । प्रेक्षया बुद्ध्या करोतीति प्रेक्षाकारी विमृश्यकारी दृश्यानि द्रष्टव्यानि दृष्ट्वा ज्ञात्वा आचरणीयानि विधाय कर्त्तव्यानि च कृत्वा अपायैर्मुक्तम्पदं याति । अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुते इति श्रुतेः । ज्ञानकर्म्मभ्यां मुक्तिरित्यर्थः । किन्तु ते अपि ज्ञानकर्म्मणी त्वद्विषये एव मुक्तिसाधनं नान्यविषये इत्याशयेनाह । सम्यगिति । यः परन्त्वाम्पश्यति तस्य सम्यग्दृष्टिः सम्यक्ज्ञानम् । यश्च त्वां उपास्ते सेवते सएव साधु विधेयं विधत्ते साधुकारीत्यर्थः । मत्तमयूरं वृत्तम् । लक्षणन्तूक्तम् ॥ २८ ॥

युक्ताइति । मुनयोव्यासादयः स्वशक्त्या निजयोगमहिम्ना युक्ताः तथा हितोपदेशैर्विधिनिषेधवाक्यैः स्मृतीतिहासपुराणमुखेन प्रजानामुपकारवन्तः कृतोपकाराश्च ।.मोक्षप्रदस्तु तेषामन्येषां

सन्निबद्धमपहर्त्तुमहार्य्यं
भूरि दुर्गतिभयम्भुवनानाम् ।
अद्भुताकृतिमिमामतिमाय
स्त्वं बिभर्षि करुणामय मायाम् ॥ ३० ॥

स त्वमेवेत्याह । समिति । अचिन्त्यधामा अचिन्त्यमहिमा त्वमेवोपेतस्य शरणमापन्नस्य प्रपन्नस्य सम्बन्धीनि दुरुत्तराणि सुदुस्तराणि कर्म्माणि बन्धकानि पुण्यपापानि समुच्छिनत्सि नाशयसि ते त्वत्तासमर्थाएवेति भावः ॥ २९ ॥

सन्निबद्धमिति । अतिक्रान्तोमायामन्यरूपामतिमायः । अत्यादयः क्रान्ताद्यर्थे द्वितीया चेति समासः । हे करुणामय हे कृपालो सन्निबद्धं स्वकर्म्मणा दृढबद्धं अतएवाहार्य्यं अन्यैरनुच्छेद्य भूरि प्रभूतम्भुवनानां दुर्गतिभयन्नरकभयम् । स्यान्नारकस्तु नरकोनिरयोदुर्गतिः स्त्रियामित्यमरः । अपहर्त्तुमद्भुताकृतिं विचित्ररूपामिमां मायां दृश्यमानां लीलाविग्रहरूपां विभर्षि । अन्येषाङ्कर्म्मानुबन्धी विग्रहपरिग्रहः । भवतस्तु परोपकारार्थ इत्यर्थः ॥ ३० ॥

न रागीति । हे देव चेतस्तव चित्तं रागि रागयुक्तं न परम योगित्वादिति भावः । तथापि परमा निरतिशया विलासिता शृङ्गारादिचेष्टाशीलता भिक्षाटनादिषु विहरणेन तौर्य्यत्रिक व्यसनितया चेति भावः । किञ्च शरीरे अर्द्धाङ्गे वधूः प्रसिद्धत्वात्, दिति भावः । तथापि मन्मथः कामश्च नास्ति तस्य भस्मीकरणादिति भावः । किञ्च प्रातः उदसि सन्ध्यायान्धातुर्ब्रह्मणोनमस्क्रिया वन्दनं

न रागि चेतः परमा विलासिता
वधूः शरीरेऽस्ति न चास्ति मन्मथः ।
नमस्क्रिया चोषसि धातुरित्यहो
निसर्गदुर्ब्बोधमिदन्तवेहितम् ॥ २१ ॥
तवोत्तरीयङ्करिचर्म्म साङ्गजं
ज्वलन्मणिः सारशनं महानहिः ।
स्रगास्यपङ्क्तिः शवभस्म चन्दनं
कला हिमांशोश्च समञ्चकासति ॥ २२ ॥

स्वयं जगद्वन्द्यस्यापीत्यर्थः । इतीत्थं विरुद्धं इदमुक्तमीहितञ्चेष्टितं निसर्गतोदुर्बोधन्दुराकलनीयं दुर्ग्रहमित्यर्थः । अदृष्टपूर्व्वत्वादिति भावः । वंशस्थं वृत्तम् ॥ २१ ॥

तवेति । हे देव तव साङ्गजं सलोमकङ्करिचर्म्म उत्तरीयं संव्यानम् । संव्यानमुत्तरीयञ्चेत्यमरः । दुःस्पर्शमिति भावः । ज्वलन्मणिः ज्वलद्रत्नोमहानहिः सारशनं कटिभूषाविशेषः । योऽन्येषां प्राणहरइत्यर्थः । क्लीवे सारशनं चाथ पुंस्कट्यां शृङ्खलं त्रिष्वित्यमरः । आस्यपङ्क्तिः कपालमाला । स्रक् माल्यं शवभस्म चन्दनं उभयञ्चापि अस्पृश्यममङ्गलञ्चेति भावः । किञ्च एतानि वस्तूनि हिमांशोः कला च समं तुल्यतया चकासति दीप्यन्ते त्वदाश्रयवशादरम्यस्यापि रम्यतेति किमशक्यन्तवेति भावः ॥ २२ ॥

अविग्रहस्येति । अविग्रहस्य वस्तुतोऽशरीरस्यापि सतः अतुलेन दुर्बोधत्वादसदृशेन हेतुना केनापि कारणेनेत्यर्थः ।

अविग्रहस्याप्यतुलेन हेतुना
समेत्य भिन्नद्वयमूर्त्ति तिष्ठतः ।
तवैव नान्यस्य जगत्सु दृश्यते
विरुद्धवेषाभरणस्य कान्तता ॥ ३३ ॥

आत्मलाभपरिणामनिरोधै
र्भूतसङ्घइव न त्वमुपेतः ।
तेन सर्व्वभुवनातिग लोके
नोपमानमसि नाप्युपमेयः ॥ ३४ ॥

भिन्ना सङ्गता विलक्षणा च द्वयी द्विविधा स्त्रीपुंसात्मिका मूर्त्ति र्यस्मिन् कर्म्मणि तत्समेत्य भिन्नद्वयमूर्त्ति यथा तथा तिष्ठतो ऽशरीरस्य शरीरमेव विरुद्धन्तदपि नारीनरात्मकमिति किमत श्चित्रमस्तीति भावः । एवंविधस्य तवैव जगत्सु विरुद्धे वेषा भरणे पूर्व्वोक्ते यस्य तस्य विरुद्धवेषाभरणस्यापि सतः कान्तता रमणीयता दृश्यते अन्यस्य न दृश्यते तस्मादचिन्त्योऽसौ तव महिमेति भावः ॥ ३३ ॥

आत्मेति । हे देव त्वं भूतसङ्घइव शरीरादिसङ्घातइव आत्मलाभपरिणामनिरोधैर्जन्मजरामरणैरुपेतो युक्तो नासि । तेन कारणेन हे सर्व्वभुवनातिग सर्व्वलोकोत्तर उपमीयतेऽनेनेति उप मानं नासि । उपमीयते यत्तदुपमेयमपि नासि न कश्चित् त्वादृशो ऽस्ति त्वमपि नान्यसदृशः अनन्यसाधारणत्वादित्यर्थः । दृत्तमक्तम् ॥ ३४ ॥

त्वमन्तकः स्थावरजङ्गमाना
न्त्वया जगत्प्राणिति देव विश्वम्।
त्वं योगिनां हेतुफले रुणत्सि
त्वं कारणं कारणकारणानाम् ॥ ३५ ॥
रक्षोभिः सुरमनुजैर्दितेस्सुतैर्वा
यल्लोकेष्वविकलमाप्तमाधिपत्यम्।
पाविन्याः शरणगतार्त्तिहारिणे ते
माहात्म्यन्तव भव तन्नमस्क्रियायाः ॥३६॥

त्वमिति। हे नाथ त्वं स्थावरजङ्गमानामन्तकः संहर्त्ता। त्वया हेतुना विश्वं सर्व्वञ्जगत् प्राणिति जीवति। त्वं योगिनां हेतुः प्रवर्त्तकं कर्म्म फलं भोगश्च ते हेतुफले रुणत्सि निवर्त्तयसि। तेषान्त्व मेव बन्धविमोचकइत्यर्थः। किञ्च त्वं कारणानि भूतानि तेषां कारणानि भूतसूक्ष्माणि परमाणवोवा तेषां कारणकारणानां कारणं प्रकृत्यादिद्वारा उत्पत्तिस्थानं। अत्र सर्व्वत्र यतोवा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसं विशन्ति इति श्रुतिः प्रमाणमिति भावः॥ ३५ ॥

रक्षोभिरिति। रक्षोभी राक्षसैः सुराश्च मनुजाश्च तैर्दितेः सुतै र्दैत्यैर्वा लोकेषु यदविकलं सम्पूर्णमाधिपत्यमाप्तं प्राप्तन्तत् हे भव शरणगतानामार्त्तिहारिणे ते भवते तुभ्यं नमस्क्रियायाः। नमः स्वस्तीत्यादिना चतुर्थी। पाविन्याः पापहारिण्याः माहात्म्यं सामर्थ्यं न कस्य उन्नत्यै भवति शिरसस्त्वय्यवनतिरिति भावः। प्रहर्षिणी वृत्तम्॥ ३६ ॥

तरसा भुवनानि योबिभर्त्ति
ध्वनति ब्रह्म यतः परम्पवित्रम्।
परितोदुरितानि यः पुनीते
शिव तस्मै पवनात्मने नमस्ते ॥ ३७ ॥

भवतः स्मरतां सदासने
जयिनि ब्रह्ममये निषेदुषाम्।
दहते भववीजसन्ततिं
शिखिनेऽनेकशिखाय ते नमः ॥ ३८ ॥

अथाष्टमूर्त्तिषु काश्चित् स्तुवन् वायुमूर्त्तिन्तावदाह । तरसेति । यः पवनः तरसा बलेन । तरसा बलरंहसोरिति विश्वः । भुवनानि बिभर्त्ति प्राणात्मना धारयति । यतोयत्प्रेरणात्पवित्रम्परम्परमं ब्रह्म वर्णात्मकं ध्वनति नदति । सोदीर्णोमूर्ध्न्यभिहतोवक्त्रमापद्य मारुतः । वर्णान्संजनयतीति वचनात् । यः पवनः परितो दुरितानि पातकानि पुनीते शोधयति नाशयतीति यावत् । हे शिव तस्मै पावयतीति पवनोवायुः स एव आत्मा यस्य तस्मै पवनात्मने ते तुभ्यन्नमः । वृत्तमुक्तम् ॥ ३७ ॥

अथाग्निमूर्त्तिं स्तौति । भवतइति । जयिनि विजयशीले सर्वोत्कृष्टे ब्रह्ममये ब्रह्मप्रधाने सदासने सम्यगासने योगासने इत्यर्थः । निषेदुषामुपविष्टानाम्भवतः स्मरताम्भवन्तं ध्यायताम् । अधीगर्थेत्यादिना शेषे कर्म्मणि षष्ठी । भववीजसन्ततिं संसारनिदानसमूहं भवनिदानकर्म्मसङ्घातन्दहते भस्मीकुर्व्वते अनेकशिखाय बहुज्वालाय शिखिने वह्निमूर्त्तये ते तुभ्यन्नमः ॥ ३८ ॥

आबाधामरणभयार्च्चिषा चिराय
प्लुष्टेभ्योभव महता भवानलेन ।
निर्वाणं समुपगमेन यच्छते ते
वीजानां प्रभव नमोऽस्तु जीवनाय ॥३९॥
यः सर्व्वेषामावरीता वरीया
न्सर्वैर्भावैर्नावृतोनादिनिष्ठः ।
मार्ग्गातीतायेन्द्रियाणां नमस्ते
ऽविज्ञेयाय व्योमरूपाय तस्मै ॥ ४० ॥

अथ जलमूर्त्तिं स्तौति । आबाधेति । हे भव वीजानाम्प्र भव कारणभूत । जीवानामिति पाठे तेषां तत्प्रतिनिम्बत्वादिति भावः । आबाधा आध्यात्मिकादिदुःखं मरणमपमृत्युं ताभ्या म्भयन्तदेवार्च्चिर्यस्य तेन महता भवानलेन संसाराग्निना चिराय चिरं प्लुष्टेभ्योदग्धेभ्यः समुपगमेन संसेवया निर्वाणं सन्तापशान्तिं यच्छते ददते जीवयतीति जीवनन्तस्मै जीवनाय जलात्मने ते तुभ्यं नमः ॥ ३९ ॥

इदानीं नभोमूर्त्तिं स्तौति । यइति । भवेत्यनुवर्त्तते । भव त्यस्मादयं प्रपञ्चइति भवस्तत्सम्बुद्धौ सकलजगज्जनकेति यावत् । वरीयान् उरुतरोविभुरित्यर्थः । प्रियस्थिरेत्यादिना उरुशब्दस्य वरादेशः । यस्त्वं सर्व्वेषां वस्तूनामावरीता आच्छादयिता । वृणोतेस्तृच्प्रत्ययः । सर्व्वैर्भावैः पदार्थैर्नावृतः केनापि कदाचि दप्यनावृतः स्वयं व्यापकत्वादिति भावः । अविद्यमाने आदिनिष्ठे उत्पत्तिनाशौ यस्यासौ अनादिनिष्ठोनित्यः । निष्ठानिष्पत्ति

अणीयसे विश्वविधारिणे नमो
नमोऽन्तिकस्थाय नमोदवीयसे।
अतीत्य वाचां मनसाञ्च गोचरं
स्थिताय ते तत्पतये नमोनमः ॥ ४१ ॥
असंविदानस्य ममेश संविदा
न्तितिक्षितुन्दुश्चरितन्त्वमर्हसि।
विरोध्य मोहात्पुनरभ्युपेयुषा
ङ्गतिर्भवानेव दुरात्मनामपि ॥ ४२ ॥

नाशान्तादित्यमरः। इन्द्रियाणां चक्षुरादीनां मार्गातीताय अतीन्द्रियाय। अतएवाविज्ञेयाय अपरिच्छेद्याय तस्मै व्योमरूपाय ते तुभ्यं नमः ॥ ४० ॥

अणीयसइति। भवेत्यनुवर्त्तते हे भव अणीयसे सूक्ष्मतराय तथापि विश्वविधारिणे जगद्धारकाय ते तुभ्यं नमः। अन्तिकस्थाय अन्तर्यामितया सन्निकृष्टाय सते। तथापि दवीयसे दूरतराय दुर्ग्रहाय ते तुभ्यं नमः। वाचां मनसाञ्च गोचरं विषयमतीत्य स्थिताय अवाङ्मनसगोचराय। तत्पतये तेषां वाङ्मनसानामध्यक्षाय। तदध्यक्षस्तैरेव न दृश्यतइति विरोधः ते तुभ्यं नमो नमः। चापल्ये द्वे भवतइति वक्तव्यमिति द्विरुक्तिः सम्भ्रमेण प्रवृत्तिश्चापल्यमिति काशिका। भक्त्युद्रेकाच्च सम्भ्रमोविरोधाभासोऽलङ्कारः ॥ ४१ ॥

असंविदानस्येति। संविदां ज्ञानानामीश। ईशानः सर्व्वविद्यानामिति श्रुतेरिति भावः। प्रेक्षोपलब्धिश्चित्संविदित्यमरः।

आस्तिक्यशुद्धमवतः प्रियधर्म्म धर्म्म
न्धर्म्मात्मजस्य विहितागसि शत्रुवर्गे ।
सम्प्राप्नुयां विजयमीश यया समृद्ध्या
तां भूतनाथ विभुतां वितराहवेषु ॥ ४३ ॥

असंविदानस्य अजानस्य । समोगमृच्छित्यादिना विदेः सम्पूर्व्वा दकर्म्मकाच्छानच्प्रत्ययः । मम दुश्चरितं शस्त्रप्रयोगरूपं दुश्चेष्टितं तितिक्षितुं सोढुं । तिजेः सन्नन्तात्तुमुन्प्रत्ययः । त्वमर्हसि योग्योऽसि । ननु तव महानपराधः कथं सोढव्यस्तत्राह । विरोध्येति । मोहादज्ञानाद्विरोध्य वैरमुत्पाद्य पुनरभ्युपेयुषामस्मा च्छरणागतानान्दुरात्मनामपि भवानेव गतिः त्वं हि शरणागताना मपराधं न गणयसीत्यर्थः ॥ ४२ ॥

सम्प्रति वरं याचते । आस्तिक्येति । हे प्रियोधर्म्मोयस्येति प्रियधर्म्म । समासान्तोविधिरनित्यइति न समासान्तोऽच् प्रत्ययः । परलोके मतिरस्तीति आस्तिकः पारलौकिकः । अस्ति तस्मिन् दिष्टमिति ठक् । तस्य भावआस्तिक्यं विश्वासः तेन शुद्धं विमलन्धर्म्मं वैदिकाचारमवतः पालयतोधर्म्मात्मजस्य युधिष्ठिरस्य विहितागसि कृतापकारे शत्रुवर्ग्गविषये हे ईश यया समृद्ध्या आत्मास्त्रवैभवेन विजयं सम्प्राप्नुयां भजेयं हे भूतनाथ आहवेषु तां विभुतां विभूतिं शस्त्रविद्यां वितर देहि ॥ ४३ ॥

इतीति । इत्युच्चैर्निगदितवन्तम्प्रणतशिरसं मघोनः इन्द्रस्य सूनुमर्ज्जुनं ईशोमहादेवः सादरं यथा तथा सान्त्वयित्वा उपसान्त्व्य अस्मै अर्ज्जुनाय ज्वलतानलेन तेजसा दीप्त्या परीतं व्याप्तं

इति निगदितवन्तं सूनुमुच्चैर्मघोनः
प्रणतशिरसमीशः सादरं सान्त्वयित्वा ।
ज्वलदनलपरीतं रौद्रमस्त्रन्दधानं
धनुरुपपदमस्मै वेदमभ्यादिदेश ॥ ४४ ॥

स पिङ्गाक्षः श्रीमान् भुवनमहनीयेन महसा
तनुम्भीमां बिभ्रत् त्रिगुणपरिवारप्रहरणः ।
परीत्येशानं त्रिः स्तुतिभिरुपगीतः सुरगणैः
सुतम्पाण्डोर्वीरञ्ज्वलदमिव भास्वानभिययौ ॥ ४५ ॥

रौद्रं रुद्रदेवताकम्पाशुपतमस्त्रन्दधानन्धनुरुपपदन्धनुःशब्दोपपदं वेदन्धनुर्वेदमित्यर्थः । अभ्यादिदेश अध्यापयामासेत्यर्थः । धनुरुपपदं वेदमित्यत्र धनुरुपपदत्वं वेदशब्दस्य न तु संज्ञिनः तदर्थस्येति संज्ञायाः संज्ञिगतत्वाभावात् अवाच्यवचनदोषमाहुरालङ्कारिकाः । तदुक्तम् यदेवावाच्यवचनं अवाच्यवचनं हि तम् । समाधाने तु धनुःशब्दविशेषितेन वेदशब्देन शब्दपरेणेत्यर्थ । परोपदेशयोग्योधनुर्वेदोलक्ष्यः ॥ ४४ ॥

स इति । पिङ्गाक्षः पिङ्गलाक्षः श्रीमान् शोभावान् भुवनमहनीयेन लोकपूज्येन महसा तेजसा भीमान्तनुं बिभ्रत् । त्रिगुणः त्रिशिखः परिवारआकारोयस्य तत् त्रिगुणपरिवारं त्रिशूलं तदेव प्रहरणमायुधं यस्य स तथोक्तः । सूर्य्यपक्षे तु गुणत्रयपरिवारः त्रय्यात्मकइति योज्यं । स धनुर्वेदः सुरगणैः स्तुतिभिरुपगीतः सन् ईशानन्देवन्त्रिस्त्रिवारम् । द्वित्रिचतुर्भ्यः सुजिति

अथ शशधरमौलेरभ्यनुज्ञामवाप्य
त्रिदशपतिपुरोगाः पूर्णकामाय तस्मै ।
अवितथफलमाशीर्व्वादमारोपयन्तो
विजयि विविधमस्त्रं लोकपाला वितेरुः ॥ ४६ ॥

असंहार्य्योत्साहं जयिनमुदयम्प्राप्य तरसा
धुरं गुर्व्वीं वोढुं स्थितमनवसादाय जगतः ।
स्वधाम्ना लोकानान्तमुपरि कृतस्थानममरा
स्तपोलक्ष्म्या दीप्तन्दिनकृतमिवोच्चैरुपजगुः ॥ ४७ ॥

सुचप्रत्ययः । परीत्य प्रदक्षिणीकृत्य वीरम्पाण्डोः सुतमर्ज्जुनं भास्वान् सूर्य्योजलदमिवाभिययौ । शिखरिणी वृत्तम् ॥ ४५ ॥

अथेति । अथ शशधरमौलिवरप्रदानानन्तरन्त्रिदशपतिपुरोगाः इन्द्रादयोलोकपालाः शशधरमौलेः शम्भोः अभ्यनुज्ञामवाप्य पूर्णकामाय तस्मै पाण्डवाय अवितथफलममोघफलं आशीर्व्वादमारोपयन्तः प्रयुञ्जानाः विजयि जयशीलं विविधं नानाविधं अस्त्रं ऐन्द्रादिकं वितेरुः ददुः । मालिनी वृत्तम् ॥ ४६ ॥

असंहार्य्योत्साहमिति । तरसा बलेन वेगेन च जयिनञ्जयशीलं उदयमस्त्रलाभरूपं अभ्युदयं अन्यत्र उदयाद्रिञ्च प्राप्य असंहार्य्योत्साहं संहर्त्तुमशक्योत्साहञ्जगतोऽनवसादाय क्षेमाय गुर्व्वीन्धुरं दुष्टनिग्रहन्तमोपसंहाररूपंच भारं वोढुं स्थितं । स्वधाम्ना स्वतेजसा लोकानामुपरि कृतासनं कृतस्थितिं कृतपदमन्यत्रोपरि वर्त्तमानं तपोलक्ष्म्या दीप्तन्तम्पाण्डवं अमराः इन्द्रादयः । दिनकृतं सूर्य्यं

व्रज जय रिपुलोकम्पादपद्मानतः सन्
गदित इति भवेन श्लाघितो देवसङ्घैः ।
निजगृहमथ गत्वा सादरम्पाण्डुपुत्त्रो
धृतगुरुजयलक्ष्मीर्द्धर्म्मसूनुन्ननाम ॥ ४८ ॥

इति श्रीमहोपाध्यायभारविकृतौ किरातार्ज्जुनीये महाकाव्ये धनञ्जयास्त्रलाभोनामाष्टादशः सर्गः ॥ १८ ॥

॥ शुभमस्तु श्रीरस्तु ॥

शिवोऽस्यैकरूपजगुः साधु महाभाग्योऽसीति तुष्टुवुः । शिखरिणीवृत्तम् ॥ ४७ ॥

व्रजेति । शिवेन व्रज स्वपुरं गच्छारिलोकं जयेति गदितः उक्तः यतः पादपद्मानतः शिवपादपङ्कजानतः सन् । तथा देवसङ्घैः श्लाघितः स्तुतोऽतएव धृता गुर्व्वी जयलक्ष्मीर्येन स पाण्डुपुत्त्रोऽर्ज्जुनः निजगृहं स्वाश्रमङ्गत्वा प्राप्याथ सादरं यथा तथा धर्म्मसूनुं राजानन्ननाम नमनञ्चकार ॥ ४८ ॥

इति श्रीपदवाक्यप्रमाणपारावारीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्ज्जुनीयव्याख्यायां घण्टापथसमाख्यायामर्ज्जुनवरप्रदानोनामाष्टादशः सर्गः ॥ १८ ॥

॥ समाप्तश्चायं ग्रन्थः ॥

---

## ॥ अथ टीकायां पाणिनिव्याकरणानुयायिन्यां प्रमापकाः ॥

| | | |
|---|---|---|
| मनुः | सज्जनः | यादवकोषः |
| पाणिनिः | क्षीरस्वामी | केशवकोषः |
| वार्त्तिकम् | अमरकोषः | मार्त्तण्डकोषः |
| भाष्यकारः | हेमचन्द्रकोषः | काव्यप्रकाशः |
| कैयटः | विश्वप्रकाशकोष | अलङ्कारसर्व्वस्वम् |
| शाकटायनः | हलायुधकोषः | दण्डिः |
| न्यासोद्योतः | शाश्वतकोषः | वृत्तरत्नाकरः |
| काशिका | वैजयन्तीकोषः | नीतिवाक्यामृतम् |
| वामनः | शब्दार्णवकोषः | कामन्दकः |

॥ इति टीकाप्रमापकाः ॥

CIVIL AND MILITARY EXAMINATION COMMITTEE
BOMBAY.

00013449

Digitized with financial assistance from the
Government of Maharashtra
on 25 June, 2016